रि
अतं ? किञ्चित्सादृश्यं ? वा, नाद्यः । कार्यकारणभावस्यैवासिद्धेः ।
यथा केशनखादावन्नादेर्वृश्चिकादौ च गोमयस्य सादृश्यप्रत्य-
स पत्तेः । द्वितीये, त्विष्टापत्तिः सत्तादेर्ब्रह्मधर्मस्याकाशादावपि
आ वात् । आकाशोऽस्तीति प्रत्यक्षप्रतीतेः आकाशादिप्रपञ्चजातं
त्पादेयं सत्तादिधर्मवत्त्वात् । यन्नैवं तन्नैवमग्निसेचनयोरिवे-
नुमानात्सत्प्रतिपक्षत्वं च बोध्यम् "आत्मनआकाशः सम्भूतः'
ादिश्रुतेश्च ॥ ६ ॥

सू० असदिति चेन्न प्रतिषेध-मात्रत्वात् २ । १ । ७ ॥

वेदान्तपा जातसौरभः ।

ननूपादानादुपादेयस्य विलक्षणत्वे उत्पत्तेः र्वं तदसन्नवि मर्हतीति, नैष दोषः पूर्वसूत्रे प्रकृतिविकारयोः सर्वथा सादृश्यनियमस्य प्रति-धमात्रत्वात् ॥ ७ ॥

वेदान्तकौस्तुभः ।

असदिति चेन्न प्रतिषेधमात्रत्वात् ।

ननु "न विलक्षणत्वादस्य" इत्यनेन प्रकृति-रयोरत्यन्तसादृश्यमङ्गीकृत्य, ब्रह्मविलक्षण

त्वादस्य तत्प्रकृतिकत्वं दूषितम्। पुनस्तत्समाधानार "दृश्यते तु" इत्यनेन विलक्षणयोरपि प्रकृतिविकृतिभावः प्रतिपादितः। तत्र हि सृष्टेः पूर्वं जगत्कारणादविलक्षणमुत? विलक्षणम्? किमात्मन् भवदभिमतम्?। अविलक्षणमिति चेत्? तत्र पुरुषादेः केशलोमादीनां विलक्षणानामुत्पत्तिवद्विलक्षणस्य जगतउत्पत्तिर्यथा स्वीक्रियते, तथा सुवर्णादेः कटकादीनामिव सदृशस्य जगतः उत्पत्तिः कुतो८ न स्यात्? विलक्षणमिति चेत्? ब्रह्मविलक्षणप्रकृतिकत्व×मस्य भवेत्? अतःप्रधानं जगतकारणमस्तु । निरस्तत्वात्तन्नाङ्गीक्रियते इति चेत्? तदा "एकमेवाद्वितीयं ब्रह्म, एकोह वै नारायणआसीत्, विष्णुस्तदासीद्धरिरेव निष्कलः" इत्येकतत्त्वश्रवणादन्याभावादसङ्गःस्यात् इति चेन्न, कुतः? "प्रतिषेधमात्रत्वात्"। "दृश्यते तु" इत्यत्र उपादानादुपादेयवैलक्षण्य-

---

८ सदृशयोः कार्यकारणभावोहि युक्तइति भावः।

× विलक्षणयोः कार्यकारणभावो न युक्तइति भावः।

? पूर्वं जगन्नासीदिति भावः।

"या वेदबाह्याः स्मृतयोयाश्चकाश्च कुदृष्टयः ।
सर्वानिष्फलाः प्रेत्य तमोनिष्ठा हिताः स्मृताः"
भाष्यि, वेदविरुद्धस्मृतिकर्त्ताऽपि कपिलनामकः
श्रेत्कणादादिवन्मुनिरेव, न तु वासुदेवाख्योभग-
वान् कपिलः । "कपिलो वासुदेवाख्यः साङ्ख्यं-
तत्त्वं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्योभृग्वादि-
भ्यस्तथैव च । तथैवासुरये सर्ववेदार्थैरुपबृंहितम् ।
सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्य-
मासुरयेऽन्यस्मै कुतर्कपरिबृंहितमि"ति पाद्मात् ।
*श्रुतिप्रोक्तस्तु कपिलोहिरण्यगर्भोज्ञेयः ॥ १ ॥

श्रीश्रीकेशवकाश्मीरिभट्टाचार्यविरचितवेदान्त-
कौस्तुभप्रभा ।

एवं प्रथमाध्याये वेदानां निखिलदोषास्पृष्टमहात्म्यसीद्धि अचिन्त्यानन्तयावदात्मवृत्तिस्वाभाविकासङ्कुचेयसार्वज्ञ्यादिसद्गुणा र्णवे ऽनन्ताचिन्त्यशक्तौ जगत्कारणे परब्रह्मणि श्रीवासुदेवे भगवति समन्वयउक्तः । इदानीमुक्तसमन्वयस्य साङ्ख्यादिस्मृति युक्तिभिर्विरोधपरिहाराय प्रधानादिवादानां युक्त्याभासत्व दर्शनाय प्रतिवेदान्तं सृष्ट्यादिप्रक्रियायाएकविधत्वदर्शनाय द्वितीयोऽध्यायआरभ्यते । तत्र प्रथमं तावत्स्मृत्यविरोधंनिरूप्य भगवता सूत्रकारेण —

*पुस्तकान्तरेऽधिकोदृश्यते एष पाठः ।

"या वेदबाह्याः स्मृतयोयाश्चकाश्च कुदृष्टयः ।
सर्वानिष्फलाः प्रेत्य तमोनिष्ठा हिताः स्मृताः"
भ्यि, वेदविरुद्धस्मृतिकर्त्ताऽपि कपिलनामकः
श्चेत्कणादादिवन्मुनिरेव, न तु वासुदेवाख्योभग-
वान् कपिलः । "कपिलो वासुदेवाख्यः साङ्ख्यं-
तत्त्वं जगाद ह । ब्रह्मादिभ्यश्च देवेभ्योभृग्वादि-
भ्यस्तथैव च । तथैवासुरये सर्ववेदार्थैरुपबृंहितम् ।
सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह । साङ्ख्य-
मासुरयेऽन्यस्मै कुतर्कपरिबृंहितमि"ति पाद्मात् ।
*श्रुतिप्रोक्तस्तु कपिलोहिरण्यगर्भोज्ञेयः ॥ १ ॥

श्रीश्रीकेशवकाश्मीरिभट्टाचार्यविरचितवेदान्त-
कौस्तुभप्रभा ।

एवं प्रथमाध्याये वेदानां निखिलदोषास्पृष्टमहात्म्यसीद्धि अचिन्त्यानन्तयावदात्मवृत्तिस्वाभाविकासङ्कुचेयसार्वज्ञ्यादिसद्गुणा र्णवेऽनन्ताचिन्त्यशक्तौ जगत्कारणे परब्रह्मणि श्रीवासुदेवे भगवति समन्वयउक्तः । इदानीमुक्तसमन्वयस्य साङ्ख्यादिस्मृति युक्तिभिर्विरोधपरिहाराय प्रधानादिवादानां युक्त्याभासत्व दर्शनाय प्रतिवेदान्तं सृष्ट्यादिप्रक्रियायाएकविधत्वदर्शनाय द्वितीयोऽध्यायआरभ्यते । तत्र प्रथमं तावत्स्मृत्यविरोधनिरूप्य भगवता सूत्रकारेण —

*पुस्तकान्तरेऽधिकोदृश्यते एष पाठः ।

त सर्वं समूलं शाश्वतिकः स नित्यः" इत्यादि, भारते "नारायणोजगन्मूर्त्तिरनन्तात्मा सनातनः । तस्मादव्यक्तमाविश्नं त्रिगुणं द्विजसत्तम !" तत्रैव राजधर्मे युधिष्ठिरः, "भवानिस्त्वमस्य प्रलयश्च कृष्ण ! त्वमेवेदं सृजसि विश्वमग्रे । त्वं चेदं त्वद्वशे विश्वयोने ! नमोस्तु ते शार्ङ्गचक्रासिपाणे !" इत्यादि, भगवद्गीतायाश्च "अहं सर्वस्य प्रभवोमत्तः सर्वं प्रवर्त्तते । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" । पराशरश्च, "विष्णोः शक्तिरादुद्भूतं जगत्तत्रैव संस्थितम् । स्थितिसंयमकर्त्ताऽसौ जगतोऽस्य जगच्च सः" इति । एतासां बाधः स्यादित्यर्थः । ननु तासां धर्मप्रतिपादनेन नैराकांक्ष्यमिति चेन्न, शास्त्रप्रतिपाद्यश्रीपुरुषोत्तमज्ञानसाधनीभूतधर्ममात्रप्रतिपादनेऽपि धर्मसाध्यज्ञानविषयब्रह्मप्रतिपादनस्य ते बाध्यमाने दोषतादवस्थ्यात् । नच कपिलस्मृतिबाधोऽप्ययोग्यः स्मृतित्वाविशेषादितिवाच्यं, श्रुतिविरुद्धायास्तस्याअप्रामाण्यस्येष्टत्वात् । तथा सूत्रितं भगवता जैमिनिना, "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमि"ति । अस्यार्थः श्रुतिस्मृतीनां परस्परविरोधे कस्याबाधइति निर्णयार्थमिदमधिकरणम् । तत्र "औदुम्बरीं स्पृष्ट्वोद्गायेदि"ति श्रुतिः "औदुम्बरीं सम्वेष्टयित्वे"ति स्मृतिः । यदि स्पर्शाङ्गीकारस्तदा स्मृतिबाधः । यदि सर्ववेष्टनं तदा श्रुतिबाधइति प्राप्ते राद्धान्तः । विरोधइत्यादि, स्मृतीनां श्रुतिविरोधे सति श्रुतीनामनपेक्षं निरपेक्षतया प्रामाण्यं स्यात् । स्मृतिविरोधोऽत्र न विचारणीयइत्यर्थः । श्रुत्यविरोधे तु अनुमीयते श्रुत्यर्थोयेन तदनुमानं स्मृतिरपि प्रमाणं, न तु श्रुतिविरोधे, श्रुतीनां निरपेक्षतयास्वार्थे प्रामाण्यं स्वतएव रवेरिव रूपविषये । स्मृतीनां तु तन्मूलत्वाच्छ्रुतिसापेक्षत्वात्तद्विरोधे सत्येवेत्यर्थः । किञ्च "यद्वै किञ्चन मनुरवदत्तद्भेषजमि"ति श्लाघ्यस्य भगवतोमनोरपि

निर्णायरूपं वचनम्, "या वेदबाह्याः स्मृतयोयाश्च काश्च दृष्टयः । ताः सर्वानिष्फलाः प्रेत्य तमोनिष्ठाहिताः स्मृताः तस्माद्वेदविरुद्धानां साङ्ख्यादिस्मृतीनां बाधेन दोषावहः । ऋ निषदानां श्रुतिस्थकपिलशब्देन च हिरण्यगर्भोग्राह्यः, क कपिलवर्णत्वात् । "योब्रह्माणं विदधाति पूर्वं योवा वेद प्राहिणोति तस्मै, हिरण्यगर्भं पश्यति जायमानमि"त्य सामानार्थकत्वाच्च । श्रुतिविरुद्धस्मृतिप्रवर्त्तकस्त्वग्निवंशजोर्ज विशेषएव, न कर्दमात्मजः । "कपिलोवासुदेवाख्यः साङ्ख्यं त जगाद ह । ब्रह्मादिभ्यश्च देवेभ्योभृग्वादिभ्यस्तथैव च । तथैवासु सर्ववेदार्थैरुपबृंहितम् । सर्ववेदविरुद्धं च कपिलोऽन्योजगाद साङ्ख्यमासुरये ऽन्यस्मै कुतर्कपरिबृंहितमि"ति पाद्मात "कपिलं परमर्षिं च यमाहुर्यतयः सदा । अग्निः स कपिलोन साङ्ख्ययोगप्रवर्तकः" इति वनपर्वण्यग्निवंशवर्णने मार्कण्डे वाक्याच्च ॥ १ ॥

सू० इतरेषां चानुपलब्धेः २।१।

वेदान्तपारिजातसौरभः ।

इतरेषां मन्वादीनां वेदस्य प्रधानपरत्वानुपलब्धेश्च वेदविरुद्धस्मृतेरप्रामाण्यम् ॥ २ ॥

वेदान्तकौस्तुभः ।

कपिलापेक्षयेतरेषां वेदविदुत्तमानां मन्वादीनां वेदस्य च प्रधानपरत्वानुपलब्धेः सांख्यस्मृति

वेदान्तकौस्तुभः।

एवमधिकरणाभ्यां स्मृतिविरोधोनिराकृतः
ानीं तर्कविरोधः परिहियते —

न* विलक्षणत्वादस्य तथात्वं च शब्दात्।

"जन्माद्यस्य यतः" इत्यादिना ऽस्य ब्रह्म-प्रकृतिकत्वमुक्तम्। तत्र तर्कबलेनाक्षिपति। नेति, नास्य जगतोब्रह्मप्रकृतिकत्वम्। कुतः? "विलक्षणत्वात्"। ब्रह्मचेतनत्वाऽस्थूलत्वानन्तत्वशुद्धत्वादिगुणकम्। ततोऽस्याचेतनत्वस्थूलत्वादिना विसदृशत्वात्। यद्यस्माद्विलक्षणं तन्न तत्प्रकृतिकम्। यथाऽऽकाशविलक्षणोघटोनाकाशप्रकृतिकः, कुलालविलक्षणं घटशरावादिकं न कुलालप्रकृतिकम्। ननु प्रकृतिधर्मानुवृत्तिर्विकारे दृश्यते, ❀एवं प्रकृतेऽपि ब्रह्मोपादानकारणं मनुष्यपश्वाद्याकारश्चेतनरूपस्तद्विकारः संसारस्तत्सदृशोभवेदतोऽसिद्धहेतुरिति चेन्न, कार्ये पाषाणकाष्ठादावचेतनत्वशङ्कायां लत्वादेः प्रत्यक्षप्रमाणगोचरत्वात् ...क्षेति स्थाप्य समं ...ति श्वेताश्वतरोपनिषदि

*द्वौ सूत्रौ पूर्वपक्षे। ...मिन्द्रियधारणामि"ति, काठके च ...ः तत्र ब्रह्मोपाद्यधारणहेतुज्ञानस्य साधनतयाशिष्टैर्गृहीतः" पाठः ...द्धं तत्र ध्येयोऽपि श्रीपुरुषोत्तमइति साङ्ग्य-

चेतनत्वमनभिव्यक्तं कल्पयितुं शक्यमतोन ।
क्षणत्वमिति चेन्न, प्रत्यक्षावगतस्यार्थस्य क
नयाऽन्यथात्वायोगात् । विलक्षणत्वं शब्दादपीत्या
तथात्वमिति । तथात्वं च विलक्षणत्वं च शब्दा
दपि "विज्ञानं चाविज्ञानं चाभवत्, समाने
वृक्षे पुरुषोनिमग्नोनीशया शोचति मुह्यमानः
अनीशश्चात्मा वध्यते भोक्तृभावादि"त्यादि-
शब्दात् ॥ ४ ॥

वेदान्तकौस्तुभप्रभा ।

ननु ब्रह्मकारणवादेऽप्यसम्भवस्तुल्यएव विप्रतिपत्तिबाहुल्यात् तथा हि उपादेयभूतस्य विकारस्योपादानगतधर्मानुविधायित्व-नियमोनिर्विवादः । दृष्टश्चायं सुवर्णादिविकृतौ कुण्डलादौ । प्रकृते तु कारणस्य ब्रह्मणश्चेतनत्वशुद्धत्वसर्वज्ञत्वादिधर्मस्याचेतनत्वा-शुद्धत्वाद्यवच्छिन्ने कार्येऽनुवृत्त्यदर्शनादन्यथा कार्यस्यापि चैतन्य-भोक्तृत्वभोग्यत्वविभागासिद्धेः । आकाशादिकार्यं न
देयमत्यन्तवैलक्षण्यात्, अग्निजलवत्, गोऽश्ववच्चेति
न केवलं प्रत्यक्षादिभिरेव वैलक्षण्यं जग-
शब्दादपि तथात्वं विलक्षणत्वमव-
समाने वृक्षे पुरुषोनिमग्नो-
पा वध्यते भोक्तृभावा-

न विलक्षणत्वादस्य तथात्वं च शब्दात्

अस्य कार्यस्य जगतोब्रह्मविलक्षणत्वान्नेदं जगद्ब्रह्मकार्यं भवितुमर्हति, अपि तु तत्सदृशस्याचेतनस्य प्रधानस्यैवकार्यं भवितुमर्हति । शेषं तूक्तार्थम् ॥ ४ ॥

सू० अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥२।१।५॥

वेदान्तपारिजातसौरभः ।

"पृथिव्यऽब्रवीत्ते हेमे प्राणा अहं श्रेयसे विवदमानाब्रह्म जग्मुः"इत्यादौ तु तदभिमानिनीनां देवतानां व्यपदेशः "हन्ताहमिमास्तिस्रो देवता"इति विशेषणात् । "अग्निर्वाग्भूत्वा मुखं प्राविशदि"त्याद्यनुगतेश्च ॥ ५ ॥

वेदान्तकौस्तुभः ।

ननु "तं पृथिव्यब्रवीन्मृदब्रवीदापोऽ[illegible]शङ्काया ते हेमे प्राणाअहं श्रेयसे वि[illegible]तं स्याप्य समं जग्मुः, ते ह वाचमूचुस्त्वं [illegible]ति श्वेताश्वतरोपनिषदि श्रुतिभिरुपादेयस्या[illegible]मिन्द्रियधारणामि"ति, काठके च [illegible]धारणहेतुज्ञानस्य साधनतयाशिष्टैर्गृहीतः" द्विलक्षणत्वा[illegible]स्त्वं तत्र ध्येयोऽपि श्रीपुरुषोत्तमइति साङ्ग्च-

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ।

तुशब्दउक्तशङ्कानिराकरणपरः । नोपादेयश्चेतनत्वव्यपदेशोयेन ब्रह्मप्रकृतिकत्वं तस्य स्यात् । किन्तु पृथिव्याद्यभिमानिनीनां देवतानां "तं पृथिव्यब्रवीदि"त्यादिव्यपदेशोऽस्ति । कस्मात्? "विशेषानुगतिभ्याम्" । "हन्ता हमिमास्तिस्रोदेवता" इति पृथिव्यादेर्देवताशब्देन विशेषणात्, एताह वै देवता अहं श्रेयसे विवदमाना"इति "ता वा एता देवताः प्राणे निःश्रेयसं विदित्वे"ति चेन्द्रियाणां देवताशब्देन विशेषणात् । "अग्निर्वाग्भूत्वा मुखं प्राविशत् आदित्यश्चक्षुर्भुत्वाक्षिणी"त्यादिषु वागाद्यभिमानित्वेनाग्न्यादीनामनुगतेश्च अनुगतिश्रवणाच्च । तस्माद्ब्रह्मविलक्षत्वादस्य न ब्रह्मप्रकृतिकत्वमिति पूर्वपक्षे ॥ ५ ॥

वेदान्तकौस्तुमप्रभा ।

मतानामपि भूतेन्द्रियाणां क्वचिच्चेतनत्वं श्रूयते ।
ब्रवीत्, आपोवा अकामयन्त आपो-
न्ते"ति "ते हेमे प्राणाअहं
वाचमूचुस्त्वं न उद्गाये-

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ।

तु शब्दः शङ्कानिरासार्थः । श्रुत्या पृथिव्यादिशब्दैस्तदभिमानिन्यश्चेतना देवतास्तत्र तत्र व्यपदिश्यन्ते । कुतः ? "विशेषानुगतिभ्याम्" "हन्ता हमिमास्तिस्रोदेवता" इति पृथिव्यादेर्देवताशब्देन विशेषणात् । "एता ह वै देवता अहं श्रेयसे विवदमाना" इति "तावा एतादेवताः प्राणोनिःश्रेयसं विदित्वा" इति च कौषीतकिभिरिन्द्रियाणां देवताशब्देन विशिष्याभिधानाच्च । तथा "अग्निर्वाग्भूत्वा मुखं प्राविशत्, आदित्यश्चक्षुर्भूत्वाक्षिणी" त्यादिषु वागाद्यभिमानित्वेनाग्न्यादीनामनुप्रवेशश्रवणात् चेत्यतोनाचेतनस्य विश्वस्य चेतनं विलक्षणं ब्रह्मकारणम् । अपि तु जगन्नब्रह्मोपादानकं तद्विलक्षणत्वात् । यद्यद्विलक्षणं तन्न तदुपादानकं, यथामृद्विलक्षणारुचकादयः । जगत्प्रधानोपादानकमचेतनत्वादिधर्मवत्त्वेन तत्साहृश्यात् । यदेवं, तदेवं, मृद्विकारघटादिवत् । जगद्यदि प्रधानोपादेयं न स्यात्तर्ह्यचेतनत्वादिधर्मवदपि नस्यादित्यादितर्कसहकृतस्मृत्यनुरोधेन जगतः प्रधानोपानकत्वं वेदान्ताः प्रतिपादयन्तीति ॥ ५ ॥

सू० दृश्यते तु २।१।६॥

वेदान्तपारिजातसौरभः ।

तत्रोच्यते पुरुषाद्विलक्षणस्य याद्विलक्षणस्य वृश्चिकस्योत्- विलक्षणत्वाज्जगतो वक्तव्यम् ॥ ६ ॥

दृश्यशङ्काया रुन्नतं स्याप्य समं "ति श्वेताश्वतरोपनिषदि तामिन्द्रियधारणामि"ति, काठके च धारणाहेतुज्ञानस्य साधनतयाशिष्टैर्गृहीत." स्त्रं तत्र ध्येयोऽपि श्रीपुरुषोत्तमइति साङ्गच-

वेदान्तकौस्तुभः ।

हेतोर्व्यभिचारोऽस्तीत्याह —

दृश्यते तु ।

तुशब्दः पूर्वपक्षनिरासार्थः । यदुक्तं नास्य जगतोब्रह्मप्रकृतिकत्वं तद्विलक्षणत्वादिति, तन्न, यतः पुरुषाद्विलक्षणानां नखलोमादीनां* गोमयादृश्चिकस्य विलक्षणस्योत्पत्तिर्दृश्यते तस्मादित्यर्थः ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

एवं प्राप्ते, राद्धान्तः —

दृश्यते तु ।

तुः शब्दः पूर्वपक्षव्यावृत्त्यर्थः । यदुक्तं जगन्नचेतनोपादेयमत्यन्तवैलक्षण्यादित्यादि, तदयुक्तमाभासमात्रत्वात् । तथा हि यत्र यत्रोपादानोपादेयभावस्तत्र तत्र सादृश्यमिति व्याप्तिर्न तावन्नियता, यतस्तथात्वं स्यात् । दृश्यते हि विलक्षणयोरपि कार्यकारणभावः । यथा भुक्तादन्नात्केशनखादिरूपस्य विलक्षणस्य गोमयाच्च वृश्चिकस्य, मक्षिकादिभ्यः कृम्यादेर्व्याघ्रस्य, दावाग्निदग्धकदलीकाण्डाद्वेत्राङ्कुरस्य वादेः पलाण्डुलशुनाङ्कुरस्य कार्यस्योत्पत्तिभावे सर्वथा सादृश्यं विव-

---

*कोत्सर्गात्पौदिनाख्य

कथ
था
न

तिविरुद्धत्वेनोपेक्षणीय इति। केवलचित्तवृत्ति-
रोधमात्रेण मुक्त्यसम्भवात् तत्प्राधान्यविषयं
गशास्त्रमनुपादेयमेव। प्रधानं ब्रह्मसम्बन्ध-
हीनमुपादानं निमित्तमात्रमीश्वरोजगत्कारण-
मिति तन्मतं, तदप्ययुक्तमेव, वेदविरुद्धत्वात्।
अन्येऽपि योगशास्त्रे बहवोदोषाः सन्ति। निष्प्र-
योजनत्वादिह नोदाहृताः। श्रुतिस्मृतिगतयोग-
शब्दश्च परमात्मध्यानादिविषयः। मोक्षधर्मादिषु
सांख्ययोगयोः प्रशंसावचनं त्वविरुद्धांशाभिप्रा-
यम्। तस्मात्प्रकृतसमन्वयस्य ब्रह्मकारणत्व-
बोधकस्य योगस्मृत्या न विरोधइति सिद्धम्॥ ३॥

इति योगप्रत्युक्त्याधिकरणम्। २॥

वेदान्तकौस्तुभप्रभा।

एतेनैव योगस्मृतिरपि प्रत्युक्तेत्याह —

एतेन योगः प्रत्युक्तः।

अतिदेशरूपमिदं सूत्रम्। तत्त्वं नाम असादृश्यशङ्कायां सादृश्यप्रतिपादनं, केयमसादृश्यशङ्केति, "त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निवेश्ये"ति श्वेताश्वतरोपनिषदि "तं योगमिति मन्यन्ते स्थिरामिन्द्रियधारणामि"ति, काठके च "योगः परमश्रेयोऽसाधारणहेतुकज्ञानस्य साधनतयाशिष्टैर्गृहीतः" तत्परमिदं योगशास्त्रं तत्र ध्येयोऽपि श्रीपुरुषोत्तमइति साङ्ग्य-

स्मृतेरसादृश्याद्वेदान्तोपयोगित्वात्तेन वेदान्तोपबृंहणं युक्त मन्दानां शङ्का मा भूदिति साङ्ख्यस्मृतेः सादृश्यं दर्शयन्स एतेनेति । एतेन साङ्ख्यस्मृतिनिरासेन योगस्मृतिरपि निरा बोध्या । समानं साङ्ख्यानामिवात्रापि परमेश्वरानधिष्ठि प्रधानस्य स्वातन्त्र्येणोपादानत्वप्रतिपादनात्, परमेश्वरस्य निमि त्तमात्रत्वाङ्गीकाराच्च । ध्यातुश्चेतनस्याचेतनवर्गस्य च ब्रह्मतादा त्म्यानभ्युपगमाच्च । "अथ योगानुशासनमि" त्यादियोगस्मृतेरपि वेदान्तविरोधस्तुल्यएव । अतोनानया वेदान्तोपबृंहणं युक्तम् किन्तु तत्रस्थविरुद्धांशस्य निरासएव श्रेयानिति । एवं च सति "त्रिरुन्नतमि"त्यादौ योगाङ्गत्वेन पद्मासनाद्यभिधीयते । यच्च तत्कारणं साङ्ख्ययोगाधिगम्यमि"ति श्रुतौ साङ्ख्ययोगशब्दाभ्यां ज्ञानं निष्कामकर्म च तत् खलु तदन्यद्वैदिकमेव । तस्मादुक्त लक्षणं ब्रह्मैव जगत्कारणमिति ॥ ३ ॥

इति योगप्रत्युक्त्यधिकरणम् ॥ २ ॥

सू० न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥२।१।४॥

वेदान्तपारिजातसौरभः ।

तर्कबलेन प्रत्यवतिष्ठते । जगतोन चेतन-प्रकृतिकत्वं विलक्षणत्वात् । विलक्षणत्वञ्च "विज्ञा-नञ्चाविज्ञानञ्चाभवदि " त्यादिशब्दादप्यस्यावग-न्तव्यम् ॥ ४ ॥

कथनद्वारा पराभिमतस्योपादानोपादेययोः सर्वथा सादृश्यनियमस्य प्रतिषेधमात्रं क्रियते, न तु सर्वथा तद्वैलक्षण्यं*साध्यते । अतोब्रह्मात्मकत्वात्कारणावस्थायामपि जगत्सद्भावोऽस्त्येव । "जगदऽसदि"ति वचनं च प्रतिषेधमात्रमर्थशून्यं तस्य भावरूपत्वं तस्माच्च "सदेव सौम्य ! इदमग्र आसीदि"ति श्रुतेः ॥ ७ ॥

वेदान्तकौस्तुभप्रभा ।

ननु यदि विलक्षणयोरपि कार्यकारणभावस्तर्हि द्रव्यान्तरत्वेनोपादाने ब्रह्मणि उत्पत्तेः पूर्वमुपादेयं जगदसदिति प्रसज्येत । असतएवोत्पत्तिः स्यादित्यसत्कार्यवादस्त्वयाङ्गीकृतः स्यादिति चेत्तत्राह, —

असदिति चेन्न, प्रतिषेधमात्रत्वात् ।

कारणात्कार्य्यस्य विलक्षणत्वे उत्पत्तेः पूर्वमेकत्वावधारणात्कारणे कार्यं न विद्यते इति चेन्नैष दोषः । कुतः ? प्रतीतिकार्यकारणयोः सर्वथा सादृश्यनियमस्य प्रतिषेधमात्रत्वात् । पूर्वसूत्रे हि कार्यकारणयोः सर्वथा सादृश्यनियमाभावोऽभिहितः । नतु कारणात्कार्यस्य द्रव्यान्तरत्वमपि कारण-

---

* सृष्टेः प्राक् सूक्ष्मरूपेण कारणाविलक्षणमासीत्, स्थूलरूपेण कार्यावस्थायां दृश्यते इति भावः ।

ऽ हेतुं प्रकारान्तरेण विवृणोति जगदित्यादिना ।

द्रव्यमेव स्वविलक्षणकार्य'कारेण परिणमते इत्यङ्गीकृतत्वात् । कार्यं यथा सत्तथा "तदनन्यत्वमि"ति सूत्रव्याख्याने वक्ष्यामः ॥ ७ ॥

सू० अपीतौ तद्वत्प्रसंगादसमञ्जसम् ॥ २।१।८ ॥

वेदान्तपारिजातसौरभः ।

आक्षेपः —

प्रलयसमये कार्य्यवत्कारणस्याप्यचेतनत्वादिप्राप्तिप्रसङ्गाज्जगदुपादानं ब्रह्मेत्यसमञ्जसम् ॥ ८ ॥

वेदान्तकौस्तुभः ।

पुनरप्याक्षेपः —

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ।

ननु "सत्यं ज्ञानमनन्तं ब्रह्म, अपहतपाप्मा, विजरोविमृत्युः, यः सर्वज्ञः सर्ववित्"-इत्यादिश्रुतिनिर्णीतं चेतनत्वानन्तत्वापहतपाप्मत्वादिधर्म्मकं ब्रह्म जगदुपादानमित्यभ्युपगम्यते यदुत्तसमञ्जसम् । कस्मात् ? "अपीतौ तद्वत्प्रसङ्गात्" अपीतौ प्रलये तद्वत् उपादेयवदुपादान-

स्यापि अचेतनत्वपरिच्छिन्नत्वाशुद्धत्वादिप्राप्ति-प्रसङ्गात् । प्रलयवेलायाम् अचेतनत्वादिमज्जग-त्सृष्टिप्रतिलोमक्रमेणोपादाने चेतनत्वादिगुणके ब्रह्मणि लीयमानं तक्रं दुग्धे पतितं दुग्धमिव स्वधर्मैर्ब्रह्म दूषयेदित्यर्थः ॥ ८ ॥

वेदान्तकौस्तुभप्रभा ।

ननु स्यादेतन्मृदघटयोरिव सुवर्णकुण्डलयोरिव च कार्य-कारणयोर्द्वैक्यम् । तथाऽपि कार्यस्य जगतउपादाने ब्रह्मणि प्रलयवेलायां सत्त्वात् कार्यगताः सर्वेपि धर्माअचेतनत्वपरिच्छि-न्नत्वाशुद्धत्वाज्ञत्वकर्मवश्यत्वादयोब्रह्मण्येव प्रसज्येरन् । तदा तेन तस्याभेदात् । तथा सति"सत्यं ज्ञानमनन्तं ब्रह्म, अपहतपाप्मा, विजरोविमृत्युः, यः सर्वज्ञः सर्ववित्" इत्याद्युपनिषद्वाक्यानाम-सामञ्जस्यं स्यादिति पुनराक्षिपति —

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ।

जगतोब्रह्मोपादानकत्वे अपीतौ प्रलये तद्वत्कार्यस्येव ब्रह्मणो ऽप्यचेतनत्वादिप्राप्तेः प्रसङ्गादसमञ्जसं वेदान्तवाक्यम् । "अपीतौ" इात सृष्ट्यादिप्रदर्शनार्थ : ॥ ८ ॥

सू० न तु दृष्टान्तभावात् २।१।९

वेदान्तपारिजातसौरभः ।

समाधानम् । तद्वत्प्रसङ्गोनैवाऽस्ति । यथा

पृथिवीविकारस्तस्यां विलीयमानस्तां न दूषयति, तथा ब्रह्मविकारः संसारः ॥ ९ ॥

वेदान्तकौस्तुभः ।

परिहरति —

न तु दृष्टान्तभावात् ।

तद्वत्प्रसङ्गोनतु नास्त्येव । यतोऽसमञ्जसं भवेत् । कुतः ? "दृष्टान्तभावात्" । विकारः उपादाने लीयमानः स्वधर्मैरुपादानं न दूषयतीत्यस्मिन्नर्थे दृष्टान्तानां सत्त्वात् । यथा कटककुण्डलादयोविकारा अपीतिं गच्छन्तः स्वधर्मैः सुवर्णपिण्डं न दूषयन्ति । यथा च पृथिवीविकाराः पृथिव्यां लीयमानाः स्वधर्मैः पृथिवीं न दूषयन्ति, तथा चेतनाचेतनात्मकमिदम् जगत् चिदचिच्छक्तिमति ब्रह्मणि लीयमानं चिदचिच्छक्तिमद्ब्रह्म नैव दूषयतीत्यर्थः ॥ ९ ॥

वेदान्तकौस्तुभप्रभा ।

तत्पूर्वकत्वात्सृष्ट्यादेः उत्पत्तावपि ब्रह्मणस्तद्धर्मापत्तिरित्यत्रोत्तरमाह —

न तु दृष्टान्तभावात् ।

तुशब्दः प्रसक्तस्यासम्भाव्यत्वद्योतकः । नैव तद्धर्मप्रसङ्गः । कुतः?

एकस्यैव कार्यकारणावस्थाद्वयान्वयेऽपि कारणस्य शुद्धतयावस्थितौ दृष्टान्तस्य भावाद्विद्यमानत्वात् । यथा एक एव सुवर्णपिण्डकार्यावस्थायां स्वपरिणामभूतकटककुण्डलाद्यात्मनावस्थितः, पुनस्तेषां शक्त्यात्मना स्वस्मिन्नप्यये च न तद्धर्मैः स्वयं संस्पृश्यते । शक्तिधर्माणां शक्तिगतत्वनियमात् । यथा वा मृत्पिण्डः स्वपरिणतघटादिधर्मैः, यथा च पृथ्वी स्वविकारचतुर्विधभूतग्रामधर्मैर्न संस्पृश्यते, एवं ब्रह्मापि कार्यावस्थायां व्यक्तनामरूपचिदचिदात्मकजगदाकारेण स्थितमपि न तद्धर्मैः संस्पृश्यते । अचिन्त्यानन्तशक्तिमत्तया, निरतिशयानन्दैकस्वभावतया च, तद्विलक्षणत्वात् । पुनस्तस्मिंस्तस्याप्यये च ब्रह्मशक्तिधर्माः परिच्छिन्नत्वाज्ञत्वकर्मवश्यत्वादयोब्रह्मशक्तिभूतचिदचिद्वस्तुगता-एव स्युरिति नासङ्गे शुद्धे ब्रह्मणि तेषां प्रसङ्ग इत्यतोन किञ्चिदसमञ्जसम् ॥ ९ ॥

सू० स्वपक्षे दोषाच्च ॥२।१।१०॥

वेदान्तपारिजातसौरभः ।

वेदविरुद्धवादी सांख्योवक्तुमक्षमस्तत्पक्षेऽप्युक्तदोषयोगात् ॥ १० ॥

वेदान्तकौस्तुभः ।

अस्मदीये वेदैकमूले पक्षे सामञ्जस्यमितोऽपि सांख्योवक्तुं न क्षमइत्याह —

स्वपक्षे दोषाच्च ।

न श्रुतिमूलस्यास्मत्पक्षस्यासामञ्जस्यम्, वेदान्तसिद्धान्तानभिज्ञेन साङ्ख्येन कार्य्यकारणयोर्विलक्षणत्वादुपादानोपादेयभावानुपपत्तिरुक्ता । सृष्टेः पूर्वं कार्य्यस्यासत्त्वप्रसङ्गउक्तः । प्रलयवेलायां तद्वत्प्रसङ्गश्चोक्तः । एतेषां सांख्यपक्षेऽपि तुल्यत्वात् । नीरूपान्निरवयवात्प्रधानात् रूपादिमतः सावयवस्य कार्यस्योत्पत्त्यभ्युपगमात् कार्य्यकारणयोर्विलक्षणत्वादुपादानोपादेयभावानुपपत्तिः । सृष्टेः प्राक् स्थूलपदाभावात्कार्यस्य तदानीमसत्त्वप्रसङ्गगः । अपीतौ प्रकृतेर्जगत्वत्स्थूलत्वप्रसङ्गइत्यर्थः ॥ १० ॥

वेदान्तकौस्तुभप्रभा ।

किञ्च त्वत्सम्भावितदोषास्त्वदभिमते प्रधानकारणवादेऽपि समानाइत्याह —

स्वपक्षे दोषाच्च ।

तथाहि त्रिगुणमचेतनं निरवयवं प्रधानं तत्कार्याकारेण परिणमते इति भवतोराद्धान्तः । "तत्र निरवयवान्नीरूपात्प्रधानात्सावयवस्य रूपादिमतः कार्यस्योत्पत्तेरसम्भवे वैशेषाभावात् । "यत्रोभयोः समोदोषः परिहारोऽपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" इति न्यायात् । इतरथा सर्वस्यापि कार्यमात्रस्य निरवयवत्वं नीरूपत्वं च स्यात् । तथात्वे

च कार्यप्रत्यक्षं न स्यात्, नामरूपादिना विभक्तं कार्यं च नोपलभ्येतेति संक्षेपः ॥ १० ॥

सू० तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः । २ । १ । ११ ॥

वेदान्तपारिजातसौरभः ।

तर्कानवस्थानाच्चोक्तसिद्धांतस्य नासामञ्जस्यम् । दृढतर्केणवेदविरुद्धे प्रधानादिके जगत्कारणेऽनुमिते तु तादृशेन तर्केण सत्प्रतिपक्षसंभवात् । एवमेवतार्किकविप्रतिपत्त्याऽनिर्मोक्षप्रसङ्गाद्वेदोक्तस्यैवोपादेयत्वमिति सिद्धम् ॥ ११ ॥

वेदान्तकौस्तुभः ।

तर्काप्रतिष्ठानादप्यन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ।

चार्थेऽपि शब्दः । उक्तसिद्धान्तस्य श्रुतिमूलस्य नासामञ्जस्यम्, तर्कमूलस्य साङ्ख्यसिद्धान्तस्यैवासामञ्जस्यम्, उक्तदोषयोगात् । "तर्काप्रतिष्ठानाच्च" तर्कानवस्थानाच्च । एकेन तर्ककुशलेनानुमितोऽर्थोऽन्येन प्रतिषिध्यतेऽन्येना-

लकतर्कश्च "तदुपबृंहणायोपादेयोमन्तव्य"इति श्रुतेः । न तु तद्विरुद्धः । "शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिस्मृती"इति भारतात् । तर्कोनाम प्रमाणानुग्राहकऊहः । अज्ञातनिश्चये वस्तुनि क्रियमाणास्तत्त्वज्ञानैकप्रयोजनः । "यथाऽग्नेर्विस्फुलिङ्गाः" इति श्रुत्या प्रत्यगात्मनोजन्मप्रतीयते "न जायते म्रियते वे"तिश्रुत्या च तदभावस्तत्रात्मनित्यानित्यत्वसंशये, आत्मा नित्य एव यदि नित्योन स्यात्तर्हि कृतनाशाकृताभ्यागमप्रसङ्गः स्यादित्यादिरूपः "अविनाशी वा अरे ! आत्मानुच्छित्तिधर्मे"त्यादिशास्त्रमूलकत्वात्प्रमाणसहायत्वेन गृह्यते । यदि प्रपञ्चोमिथ्या न स्यात्तर्ह्यनिर्मोक्षप्रसङ्गः स्यात् । यदि सेश्वरं सवेदं जगन्मिथ्या न स्यात्तर्हि निर्विशेषाद्वैतसिद्धान्तसिद्धिर्न स्यादित्यादिरूपश्च शास्त्रनिर्मूलत्वान्निषिद्ध्यते । "आगमस्याविरोधेन ऊहनं तर्कउच्यते" इति वचनात् । "अज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थऊहस्तर्कः" इतिन्यायसूत्राच्च । एवं तर्कग्राहकश्रुत्यादेः श्रुतिमूलकतर्कविषयत्वं, तर्कनिषेधकश्रुत्यादेश्च शास्त्रनिर्मूलतर्कनिषेधविषयत्वमिति विवेकः उक्तः । तस्मादचिन्त्यानन्ताघटघटनापटीयः शक्तिमत्तया निःशेषदोषगन्धाघ्रातमाहात्म्यं सार्वज्ञ्याद्यनन्तसद्गुणाश्रयं परं ब्रह्मैव जगत्कारणं न प्रधानमिति ॥ ११ ॥

इति विलक्षणत्वाधिकरणम् ॥ ३ ॥

सू०एतेन शिष्टापरिग्रहाअपि व्याख्याताः । २।१ १२ ॥

वेदान्तपारिजातसौरभः ।

एतेन सांख्यपक्षनिरासेन परिशिष्टाःवेद-विरुद्धकारणवादिनो ऽन्येऽपि प्रत्युक्ताः ॥ १२ ॥

वेदान्तकौस्तुभः ।

इदानीं परपक्षनिराकरणप्रकारं परिशिष्टेषु पक्षेष्वतिदिशति —

एतेन शिष्टापरिग्रहाअपि व्याख्याताः ।

एतेन प्रधानजगत्कारणवादनिराकरणप्रकारेण शिष्टापरिग्रहाव्याख्याता निरस्तावेदितव्याः । शिष्टाः परिशिष्टाः कपिलपतञ्जलिभ्यामन्ये न विद्यते वेदस्य परिग्रहोयेष्वित्यपरिग्रहाः ते च ते च तथा । तेषां पक्षेणापि तर्कमूलेन ब्रह्मकारणवादोन विरुध्यते इति सिद्धम् ॥ १२ ॥

इति शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

वेदान्तकौस्तुभप्रभा ।

एतेन शिष्टापरिग्रहाअपि व्याख्याताः ।

अतिदेशसूत्रमिदम् । परिगृह्यन्ते इति परिग्रहा न परिग्रहाः अपरिग्रहाः शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः । शिष्टैर्मनुव्यासादेभिः केनचिदप्यंशेनापरिगृहीताइत्यर्थः । यद्वा शिष्टाः परिशिष्टाः कपिलपतञ्जलिभ्यामन्ये न विद्यते वेदस्य परिग्रहोयेष्वित्यपरिग्रहाः

शिष्टाश्च तेऽपरिग्रहाश्च शिष्टापरिग्रहाः वेदमगृह्णन्तः केवल-तर्कपराः । कणभक्षाक्षपादक्षपणकभिक्षुप्रभृतिपरमाणवादिकार-वादाअपि एतेन वेदविरोधिप्रधानकारणवादनिरासेन निरस्ता-वेदितव्यास्तेषामपि तर्कमूलत्वाविशेषात् ॥ १२ ॥

इति शिष्टापरिग्रहाधिकरणम् ॥ ४ ॥

सू० भोक्त्रापत्तेरविभागश्चे-त्स्याल्लोकवत् । २ । १ । १३ ॥

वेदान्तपारिजातसौरभः ।

ब्रह्मणोजगदुपादानत्वे जीवरूपेण ब्रह्मणएव सुखदुःखभोक्तृत्वापत्तेर्वेदप्रसिद्धोभोक्तृनियन्तृवि-भागोन स्यादिति चेदविभागे ऽपि समुद्रतरङ्ग्यो-रिव सूर्यतत्प्रभयोरिव तयोर्विभागः स्यात् ॥१३॥

वेदान्तकौस्तुभः ।

पुनरिदानीं विरोधमाशङ्क्य, निराकरोति —

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ।

ब्रह्मणोहि समानातिशयशून्यस्य जगदुपा-दानत्वे भोक्तृभोग्ययोरविभागः स्यात् । कुतः ? "भोक्त्रापत्तेः" सर्वस्य कार्यमात्रस्य कारणान-

न्यत्वेन भोक्तुर्जीवस्य भोग्यात्मकत्वापत्तेः, भोग्यस्य च शरीरेन्द्रियविषयलक्षणस्य भोक्त्रापत्तेः । लोक वेदप्रसिद्धो भोक्तृभोग्यविभागोब्रह्मकारणवादे न-घटेतेत्यर्थः । किञ्च भोक्तृनियन्तृविभागोऽपि न-स्यात्, भोक्तृवर्गस्य नियन्त्रनन्यत्वेन भोक्तुर्निय-न्तृत्वापत्तेः, नियन्तुः परमात्मनोभोक्त्रापतेः । लोके तावत्"जीवोभोक्ता देहादिकं भोग्यमितिभोक्तृ-भोग्यविभागः प्रसिद्धः । "पिप्पलं स्वाद्वत्ती"ति वेदे च । एवं भोक्तृनियन्तृविभागोऽपि लोक-प्रसिद्धः । "भगवदधीनं मम सुखं दुःखं चे"ति शिष्टाचारात् । वेदे च "एष एव साधु कर्म कार-यति, अनीशश्चात्मा वध्यते, भोक्तृभावादि"त्यादौ प्रसिद्धः । एवं खलु भोक्त्रापत्तेरविभागस्तस्मा-द्ब्रह्मकारणवादोन युक्त इति चेदित्यत्र सिद्धा-न्तमाह । "स्याल्लोकवदि"ति । अस्मन्मतेऽपि भोक्तृ-भोग्ययोर्भोक्तृनियन्त्रोश्च विभागः लोकवत्स्या-देव । यथा लोके मृत्पिण्डोपादानकानां घटश-रावादीनां सुवर्णोपादानकानां कटककुण्डलादीनां समुद्रोपादानकानां फेनतरङ्गादीनां वृक्षोपादान-कानां फलपत्रादीनां च कारणानन्यत्वेऽपि पर-

स्परं विभागोऽस्ति । तथा ब्रह्मोपादनकत्वेन तदनन्ययोरपि भोक्तृभोग्ययोः परस्परं विभागः स्यात्। एवं भोक्तृनियन्त्रोरपि अविभागेऽपि विभागः स्यात् । यथा मृदोऽभिन्नाअपि स्वभावतः घटशरावादयः मृद्व्यतिरिक्तस्थितिप्रवृत्त्यभावात्। मृदः सकाशाद्भिन्ना अपि स्वभावतः एव, स्वासाधरणधर्मवत्त्वात् । एवं सुवर्णकुण्डलादौ बोध्यम् । तथा ब्रह्मजीवयोरपि स्वाभाविकोभेदाभेदसम्बन्धः। अत्र नैवासामञ्जस्यम्। तस्माद्ब्रह्मकारणवादे नोक्तविरोधइति सिद्धम् ॥ १३ ॥

इति भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

वेदान्तकौस्तुभप्रभा ।

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्।

पुनरप्याशङ्क्य, समाधत्ते । ननु ब्रह्मैव जगदुपादानमिति यत्तत्युक्तं?न वा?इति संशये, न युक्तमिति पूर्वः पक्षः । तथा सति कार्यकारणयोरभेदनियमेन ब्रह्मणएव कार्यकारणरूपत्वाज्जीवब्रह्मणोः स्वभावविभागः । "अजोह्येकोजुषमाणोऽनुशेते, तयोरन्यः पिप्पलं स्वाद्वत्ति अनीशश्चात्मा बध्यते भोक्तृभावादि" त्यादिश्रुत्युक्तोन सम्भवति । अविभागे च सति ब्रह्मणोऽपि जीववत्सुखदुःखभोक्तृत्वापतेः । न च "सम्भोगप्राप्तिरितिचेन्न वैशेष्यादि"त्यत्र परमात्मनः सम्भोगप्रसङ्गः परिहृतइति वाच्यं, तत्रोपास्यतयोपासकहृत्स्थस्यैकशरीरान्तर्वर्त्तितामात्रेण सम्भोग-

प्रसङ्गेन भवतीत्युक्तम्, अत्र तु जीवब्रह्मणोरनन्यत्वाङ्गीकारेण तद्वत्तस्यापि तत्प्रसङ्गस्य दुर्वारत्वाद्, कार्यगतसर्वदोषाश्रयत्वप्रसङ्गाच्च प्रधानकारणवादएव श्रेष्ठइति चेत्तत्रोत्तरम् । "स्याल्लोकवदि"ति । लोके यथा मृत्पिण्डजन्यस्य मृन्मयस्य घटाद्यवस्थापन्नस्य मृदमन्तरेण पृथक्स्थितिप्रवृत्त्यनर्हतया मृदभिन्नत्वेऽपि स्वरूपस्वभावनामरूपसङ्ख्याव्यवहारादिभेदः सुप्रसिद्धः, तद्वद्ब्रह्मोपादानकस्य जगतोऽपि ब्रह्मव्यतिरेकेण पृथक्स्थितिप्रवृत्त्यनर्हतया ब्रह्माभिन्नत्वेऽपि स्वरूपस्वभावादिभेदस्य श्रुतिस्मृतिसूत्रसिद्धस्य स्वाभाविकत्वात् । अयं भावः, न वयं ब्रह्मणउपादानत्वेऽपि तस्य चेतनाचेतनयोश्च स्वरूपैक्यमङ्गीकुर्मः, येनोक्तः दोषः स्यात् । अपि तु "अस्थूलमनण्वह्रस्वमदीर्घमपाणिपादः, अणोरणीयान्महतोमहीयान्, अणुह्येष आत्मा, अनीशश्चात्मा बध्यते भोक्तृभावात्, गौरनाद्यन्तवती जनित्री भूतभावनी सितासिता च रक्ता च" इत्यादि श्रुत्युक्तं स्वरूपस्वभावादिवैलक्षण्यं स्वाभाविकं ब्रूमः । अनन्यत्वं च कारणं विना कार्यस्य, आत्मानं विनात्मीयस्य व्यापकं विना व्याप्यस्याधारं विनाधेयस्य, पृथक्स्थितिप्रवृत्त्यनर्हत्वेनेति सुखदुःखभोक्तृत्वस्य च पुण्यापुण्यकर्मप्रयुक्तत्वान्न परब्रह्मणि तत्प्रसङ्गः । परब्रह्मणस्तु अपहतपाप्मत्वादिधर्मवत्तया कर्मसम्बन्धगन्धलेशासम्भवात् ॥ १३ ॥

इति भोक्त्रापत्त्यधिकरणम् ॥ ५ ॥

सू० तदनन्यत्वमारम्भणशब्दादिभ्यः । २ । १ । १४ ॥

वेदान्तपारिजातसौरभः ।

कार्य्यस्य कारणानन्यत्वमस्ति, नत्वत्यन्तभिन्नत्वं, कुतः ? "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं, ऐतदात्म्यमिदं सर्वं, तत्सत्यं तत्त्वमसि सर्वं खल्विदं ब्रह्म" इत्यादिभ्यः ॥ १४ ॥

वेदान्तकौस्तुभः ।

प्रथमाध्याये चिदचिद्भिन्नत्वेन ब्रह्म बहुशो वर्णितं स्वासाधरणपदार्थस्वरूपविवेकार्थम् । इह तु कारणाद्ब्रह्मणः कार्य्यस्य जगतः पृथक्स्थितिप्रवृत्त्याद्यभावादनन्यत्वम् "असदिति चेन्न, प्रतिषेधमात्रत्वादि" त्यादौ प्रतिपादितम्। अथेदानीमुक्तसिद्धान्तं दृढयितुं कारणात्कार्यस्यानन्यत्वं नास्ति, कार्य्यं चोत्पद्यते इति वैशेषिकाआहुस्तन्मतं निराकरोति —

तदनन्यत्वमारम्भणशब्दादिभ्यः ।

तयोः कार्य्यकारणयोरनन्यत्वं, तस्य कार्य्यस्य जगतः कारणाद्ब्रह्मणोऽनन्यत्वमिति वा, तस्मात्कारणाद्वा कार्यस्यानन्यत्वमिति विग्रहः । तस्मात्परमकारणाच्चिदचिच्छक्तिमतोऽपरिच्छिन्नादेका-

द्वितीयादिशब्दार्थात्कारणावस्थया कार्य्यावस्थया च स्वेच्छयैव स्थातुं समर्थात्सर्वप्रपञ्चपूर्ववर्त्तिनोब्रह्मणः सकाशाच्चिदचिद्रूपस्य परिच्छिन्नस्यानेकनामरूपस्य परतन्त्रस्य कार्य्यस्यानन्यत्वमित्यर्थः । तत्र प्रमाणमाह। "आरम्भणशब्दादिभ्यः"इति, आरम्भणशब्दः आदिर्येषां वाक्यानां तान्यारम्भणशब्दादीनि वाक्यानि तेभ्यः "वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यं, सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयं, तदैक्षत बहु स्यां प्रजायेय, तत्तेजोऽसृजत, ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा तत्त्वमसि, सर्वं खल्विदं ब्रह्म, तज्जलानिति, तद्वेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत" इत्यादिभ्यः । एवं जातीयकान्यन्यान्यपि बहूनि वाक्यानि कारणभूताद्ब्रह्मणः कार्य्यभूतस्य जगतोऽनन्यत्वं प्रतिपादयन्ति, विस्तरभयान्नोदाहृतानि । तत्रारम्भणशब्दस्यायमर्थः । छान्दोगाः "येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि"त्येकोपादानकारणविज्ञानेन सर्वकार्य्यविज्ञानं प्रतिज्ञाय, तत्सिद्धये दृष्टान्तमाहुः । "यथा सौम्य!

एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यमि"ति । यथैकेन मृत्पिण्डेन मृद्द्रव्यतया विज्ञातेन सर्वं मृन्मयं मृद्विकारजातं मृदात्मकतया विज्ञातं स्यात् । यतोहि तथाभूतं कार्य्यजातं वाचा वागिन्द्रियेणारभ्यते व्यवह्रियते इति वाचारम्भणं, तद्विविधं, विकारोऽर्थः, नामधेयं शब्दश्च, तदेतदुभयमालम्ब्य वाग्व्यापारः प्रवर्त्तते । घटेनोदकमाहरेति, अतः पृथुबुध्नोदरत्वादिलक्षणः घटादिनामकोजलाहरणादिव्यवहारसाधकोविकारोमृत्तिकैवेति सत्यम्, कारणाभिन्नं कार्य्यं व्यक्तिबुद्ध्यादिभेदादितिमतमसत्यमित्यर्थः । नहि मृद्भिन्ने वातादौ घटव्यक्तिबुद्ध्यादिकल्पना शक्या कर्तुम् । यद्यसदेव कार्यमुत्पद्यते, तर्हि सर्वत्र सर्वोत्पत्तिप्रसङ्गः, कारकव्यापारवैयर्थ्यप्रसङ्गश्च स्यादित्यलं विस्तरेण ॥ १४ ॥

वेदान्तकौस्तुभप्रभा ।

अथ यदुक्तं कार्यस्य कारणादनन्यत्वं तदिदानीं स्पष्टमाह —

तदनन्यत्वमारम्भणशब्दादिभ्यः ।

तत्र कार्यं मिथ्याऽनिर्वचनीयं वा ? असद्रूपं वा?सद्रूपं वा?इति संशये, आहुरेके, "असच्चेन्न प्रतीयेत, सच्चेन्न बाध्येत, प्रतीयते बाध्यते च, अतः सदसद्विलक्षणमनिर्वचनीयमेवाभ्युपगन्तव्यम्, अनिर्वचनीयत्वादेव मिथ्यात्वमिति, प्रपञ्चोयदि मिथ्या न स्यात्तर्हि ज्ञाननिवर्त्योऽपि न स्यात् । दृश्यते हि लोके मिथ्यापदार्थस्य शुक्तिरजतादेरधिष्ठानज्ञानान्निवृत्तिरतोऽध्यस्तोऽयं प्रपञ्चो ज्ञाननिवर्त्यत्वादिति, ज्ञाननिवर्त्यत्वान्यथाऽनुपपत्तिर्जगन्मिथ्यात्वे मानमिति तन्न, मिथ्यात्वानिर्वचनीयत्वादेर्लक्षणप्रमाणानुपपत्त्या पूर्वैर्विस्तरतोनिरस्तत्वादत्रोपरम्यते । किञ्च नहि ज्ञानमज्ञानस्यैव मिथ्याभूतस्य निवर्त्तकमिति नियमः, ज्ञानमात्रेण ज्ञानसमानविषयकाज्ञानानुपादानकस्य सत्यस्य तज्ज्ञानप्रागभावस्य घटादिज्ञानेन पटादिज्ञानस्य प्रत्यभिज्ञादिना संस्कारस्य यथा दोषदर्शनेन रागादेः सेत्वादिदर्शनेन ब्रह्महत्यादेश्च सत्यस्यैव निवृत्तिदर्शनात् । ननु सेत्वादिदर्शनमज्ञाननिवृत्तिद्वारेणादृष्टद्वारेण वा निवर्त्तकं ? साक्षान्निवर्त्तकत्वेऽपि न ज्ञानत्वेन, किन्तु विहिताक्रियात्वेनेति चेन्न, प्रकृतेऽपि साम्यात्, श्रुतदर्शनत्यागेन तत्प्राप्तिस्तज्जन्यादृष्टं वा निवर्त्तकं कल्प्यते चेदिहापि श्रवणज्ञानोत्तरब्रह्मध्यानं तज्जन्यादृष्टं वा निवर्त्तकमिति वक्तुं शक्यत्वात् । "तस्याभिध्यानादिति" श्रुतेः । ननु सेतुदर्शनमात्रं न निवर्त्तकं, किन्तु दूरगमनादिविशिष्टमिति चेन्न, अत्रापि ज्ञानमात्रं न निवर्त्तकं, किन्तु नियमाधीतवेदान्तश्रवणादिनियमविशिष्टमन्यथा भाषाप्रबन्धादिश्रवणेऽपि असम्भावनादियुक्तस्याज्ञाननिवृत्त्यापत्तेः । किञ्च शूद्रादीनामपि म्लेच्छभाषानिरूपितवेदान्तार्थश्रवणादिनाऽपि मोक्षप्रसङ्गात् । नच नियमाध्ययनादीनामधि-

कारसम्पादनेनैवोपक्षीणत्वान्नज्ञानसहकारित्वमिति वाच्यं, प्रकृतेऽपि दूरगमनादीनामधिकारसम्पादनेनैव नैराकांक्ष्यसाम्यात् । न च "दृष्ट्वैव तं मुच्यते" इति दर्शनमात्रस्य निवर्त्तकत्वश्रवणादिति वाच्यं, "प्रकृतेऽपि सेतुं दृष्ट्वा ब्रह्महत्यां व्यपोहती"ति सेतोश्चाक्षुषज्ञानस्यैव निवर्त्तकत्वश्रवणात् । किञ्च लोकेऽदृष्टत्वेऽपि विपक्षे बाधकाभावात् श्रुतिबलात्सत्यस्यापि बन्धस्य निवृत्तिः किं न स्यादन्यथा लोकेऽधिष्ठानतत्त्वे साक्षात्कृते कर्मवशादपि निरुपाधिकभ्रमानुवृत्तेः जीवन्मुक्तिदशायां कर्मवशादनुवृतस्य जगतः सत्यत्वमेव स्यात् । किञ्च तव मतेऽपि लोकेऽत्यन्ताप्रसिद्धस्यापि व्याप्तिशून्यस्याश्रौतस्यानाद्यध्यासस्य प्रतिपादनेन ह्यत्यन्ताप्रसिद्धाङ्गीकारसाम्यात्, न ह्यनाद्यध्यासे श्रुतिर्मानं नापि लोकप्रसिद्धाव्याप्तिः । यत्राध्यासस्तत्रानादित्वमिति प्रत्युत सादिव्याप्तिः शुक्तिरूप्यादौ प्रसिद्धा, किन्तु युक्तिमात्रं मानं, तथाऽपि कुलधर्मतया तवाङ्गीकारः । अस्माकं तु श्रुतिबलात्सत्यस्यैव श्रौतब्रह्मज्ञानान्निवृत्त्यङ्गीकारे कोवा दोषइति मनीषिभिर्विवेचनीयम् । ननु ज्ञानैकनिवर्त्यस्य किं नाम सत्यत्वं न तावदज्ञानाजन्यत्वं "मायां तु प्रकृतिमि"ति श्रुतिविरोधात् मायाविद्ययोरैक्यात् । नापि स्वाधिष्ठाने स्वभावशून्यत्वमस्थूलादिश्रुतिविरोधात् । नापि व्यवहारकाले बाधशून्यत्वं तर्हि व्यावहारिकमेव सत्त्वमागतमेवाध्यस्तत्वं तच्च श्रुत्यर्थयोग्यताज्ञानार्थं वर्णनीयमेवेति चेन्न. सर्वस्य जगतः "तत्तेजोऽसृजत, तस्माद्वा एतस्मादात्मनआः सम्भूतः नारायणाज्जायते प्राणः, अहं सर्वस्य प्रभवः " इत्यादि स्मृतिप्रमाणेन ब्रह्मजन्यतयाऽज्ञानजन्यत्वाभावात्सत्यत्वमेव । ना "मायांतु"इति श्रुतिविरोधः, तस्याः प्रकृतिपदवाच्यश्रीपुरुषोत्तमाधीनाचित्प्रकृतिप्रतिपादनेनैव नैराकाङ्क्ष्यान्नाज्ञानपरत्वं मायाशब्दस्य ज्ञाने शक्त्यभावात्। यदुक्तं स्वाधिष्ठानइत्यादि तत्तुच्छम्"गौरनाद्यन्त

वतो"ति श्रुतिबलात्तद्वतपरतन्त्रसतायाश्चानाद्यनन्तत्वाभ्युपगमस्यादोषात् । श्रुतेश्च सर्वविलक्षणब्रह्मप्रतिपादनपरतया प्रपञ्चनिषेधपरत्वाभावात् । यच्चोक्तं व्यवहारकाले बाधशून्यत्वमित्यादि, तदपि तुच्छमनाद्यनन्तत्वविधायकश्रुत्यैवैतद्विकल्पस्य निरासात्। किञ्च संस्कारसापेक्षगरुड़भ्रमरादिध्यानज्ञाननिवर्त्ययोर्विषकीटत्वादौ सत्यत्वदर्शनेन श्रवणादिजनितसंस्कारसापेक्षज्ञाननिवर्त्यस्य प्रपञ्चस्य सत्यत्वमेव स्यात्। किञ्च लोके निवृत्तिनिवर्त्ययोः समानसत्ताकत्वनियमात् अज्ञाननिवृत्तिवदज्ञानमपि तात्त्विकं स्यात्, ज्ञानज्ञेययोर्दोषाधिष्ठानयोश्च समानसत्ताकत्वनियमात् ब्रह्मवदज्ञानमपि सत्यं स्यात् । किञ्च यथानादिभावरूपस्याज्ञानस्यान्यत्राहष्टाऽपि निवृत्तिः श्रुतिबलादङ्गीकृता, तथा प्रकृतेऽपि किं न स्यात् । किञ्च शङ्खस्य श्वेतत्वानुमित्यादिना तदीयस्य श्वेतत्वविषयकाज्ञानस्यारोपितपीतत्वस्य वा निवृत्तिवत्त्वन्मते बिम्बप्रतिबिम्बयोरैक्यसाक्षात्कारेणैक्याज्ञानस्यारोपितभेदस्य वा निवृत्तिश्चेत् श्वेतत्वानुमित्यादिना तदज्ञाननिवृत्तावज्ञानकार्यस्यारोपितपीतत्वादेरननुवृत्तिर्न स्यात् । नच तस्य सोपाधिकत्वेन यावदुपाधिस्थायित्वनियमान्नोक्तदोषइति वाच्यं, उपादाननिवृत्तौ कार्यानुवृत्त्ययोगात्, ज्ञानस्य स्वप्रागभावनिवर्त्तनइवाज्ञाननिवर्तनेऽप्यन्यानपेक्षणात्। अपि च चरमसाक्षात्कारेण जीवन्मुक्तिदशानुवृतस्याज्ञानलेशस्य वाऽज्ञानसंस्कारस्य वा प्रारब्धकर्मादेर्वा निवृत्तिः किं न स्यात् ? तस्मात्वयाप्यज्ञानस्यारोपितभेदस्य वाज्ञानविरोधिनएव ज्ञानेन निवृत्तिर्विरोधश्च कार्यनिरुप्यइत्येववक्तव्यं एतन्ममापि समानम्, ज्ञाननिवर्त्यत्वेन तावत्सत्त्वं मिथ्यात्वं वानियामकमपि तु ज्ञानविरोधित्वमेवेति सिद्धमित्यलं विस्तरेण । वस्तुतस्तु भगवत्प्रसादादेव बन्धानिवृत्तिर्न प्रकारान्तरेण । "शृण्वन्तोऽपि बहवोयं न विदुः, यमेवैष वृणुते तेन

लभ्यः, यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण" इत्यन्वयव्यतिरेकश्रुतेः । "मत्प्रसादात्तरिष्यती"ति स्मृतेश्च । नचैवं ज्ञानस्य वैयर्थ्यापत्त्या तत्प्रतिपादकशास्त्रध्वाकोपप्रसङ्गइति वाच्यं, तस्य तत्प्रसादहेतुत्वात् । तथाह श्रीप्रल्हादः "एवं ज्ञाते सभगवाननादिः पुरुषोत्तमः प्रसीदत्यच्युते तस्मिन्प्रसन्ने क्लेशसंक्षयः तस्मिन्प्रसन्ने किमिहास्त्यलभ्यमि"त्यादिना अतोज्ञानस्य कारणात्वं भगवत्प्रसादस्यावान्तरव्यापारत्वमित्युभयशास्त्रस्याविरोधादित्यलं प्रासङ्गिकेन । अथपराहतं च सतकैरेतदन्यथानुपपत्तिरूपं प्रमाणम् । तर्काश्च प्रपञ्चोयदि सत्योन स्यात्तर्हि श्रीपुरुषोत्तमस्य परब्रह्मणः परिपाल्योन स्यात्, तत्परिपाल्यत्वं च श्रुतिस्मृतिसूत्रैरुद्घुष्यमाणं तस्मात्सत्यमेवेति । तथाहि अध्यस्तेप्रवृत्तिरधिष्ठानसाक्षात्काराभाववतएव पुरुषस्य दृश्यते घटते च, नतु शुक्तिं शुक्तित्वेन साक्षादनुभवितुः शुक्तिरूप्यादानेप्रवृत्तिः, स्वाग्निकपुत्रादिगजतुरगादिपालनार्थाप्रवृत्तिश्च जाग्रतोऽनुन्मतस्य कस्य चिद्दृष्टा युक्ता वा, तथा सर्वस्याधिष्ठानतत्वं सर्वदा पश्यतः परमेश्वरस्य प्रपञ्चमिथ्यात्वे कथं तस्य पालने प्रवृत्तिरिति , पण्डितंमन्यैर्वैदिकत्वाभिमानिभिरेकाग्रमनसा विचारणीयं, परमेश्वरस्याज्ञत्वकल्पनायां परमेश्वरत्वमेव न स्यात्, सर्वज्ञत्वे च मिथ्यावस्तुपरिपालने प्रवृत्त्यसभवएव । अन्यथा परमेश्वरस्य भ्रान्तत्वप्रसक्त्या तत्प्रत्तिपादकवेदोदत्ततिलाञ्जलिः स्यात् । नन्वैन्द्रजालिकवत्तस्य मिथ्यापालनं भवत्वितिचेन्न, दृष्टान्तवैषम्यात्, ऐन्द्रजालिकोमन्त्रौषधादिव लादतीतानागतान् देशान्तरस्थितांश्च सतएव पदार्थान्प्रदर्शयत्येव, नत्वपरोक्षतया स्वयं पश्यति पालयति वा, प्रकृते तु "यः सर्वज्ञः सर्ववित्, स्वाभाविकी ज्ञानबलक्रिया च नामरूपे व्याकरवाणि, आकाशोह वै नामरूपयोर्निर्वहिता. सर्वाणि रूपाणि विचित्य धीरो नामानि

कृत्वाऽभिवदन्मदास्ते । एकं बीजं बहुधा यः करोती"त्यादिश्रुतिभ्यईक्षणबहुभवनसङ्कल्पपूर्वकसृष्ट्यादिकर्तृत्वम् । "स्वयमात्मानमकुरुत, सच्च त्यच्चाभवदि"त्यादिना बहुभवितृत्वेनोपादानत्वं चोपलभ्यते इति विपरीतत्वादृष्टान्तस्येत्यर्थः । नन्वैन्द्रजालिकस्य स्वमायया ऽमोहितस्य विषयापरोक्षत्वाभावे पश्यन्त्विदमामूफलमिति प्रतिज्ञावचनं तथैव प्रदर्शयितृत्वं चानुपपन्नम्, एतदन्यथाऽनुपपत्त्या तस्य विषयापरोक्षमस्तीत्यवश्यमङ्गीकार्यमिति चेन्न, तस्यान्यथोपपन्नत्वात् । तथा हि यथा वैद्योगुरूपदेशादिना ज्ञातौषधिप्रभावोभविष्यद्रोगनाशादिविषयकापरोक्षाभावेऽपीदमौषधमिमं रोगं सद्योनाशयति, पश्यन्त्वस्य प्रभावमिति वदति ददाति च, तथैन्द्रजालिकोऽप्यस्मान्मन्त्रादेरेते भ्राम्यन्तीति ज्ञातमन्त्रादिप्रभावः पश्यन्त्विदमित्यादि वदति दर्शयति चेति भावः । न चैन्द्रजालिकस्याप्यैन्द्रजालिकान्तरात्स्वसृष्टानां रज्ज्वादर्शनात् । तथात्वे च नोक्तवैषम्यमिति चेन्न, भ्रमजनकस्वमन्त्रौषधादिगतसामर्थ्यस्यैव रज्ज्वाद्यन्न विषयस्येति । ननु मम पक्षे परमेश्वरस्यापि व्यावहारिकत्वेन तद्गुणशक्त्यादीनां सार्वज्ञ्यादीनामपि तथात्वेन पारमार्थिकत्वाभावात् । तथा चाह भाष्यकारः, "ईश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारे प्रपञ्चबीजभूते सर्वज्ञेश्वरस्य मायाशक्तिः प्रकृतिरि "ति श्रुतिस्मृत्योरभिलप्येते, ताभ्यामन्यः सर्वज्ञईश्वरः, "आकाशोह वै नाम० नामरूपे० सर्वाणि रूपाणि० एकं बीजमि " त्यादिश्रुतिभ्यः । एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरोभवति व्योमेव घटकरकाद्युपाध्यनुरोधि । स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्यात्मकोपाधिप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातानुरोधिनोजीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये तदेवमविद्यात्मको-

पाधिपरिच्छेदापेक्षमेवेश्वरस्येश्वरत्वं सर्वज्ञत्वं सर्वशक्तित्वं, न परमार्थतोविद्ययाऽपास्तसर्वोपाधिस्वरूपआत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहारउपपद्यते इत्यादिनेति चेन्न, अश्रौतत्वेन कल्पनामात्रत्वात् । तथाहि परमेश्वरस्य मिथ्यात्वे किं मानमिति वक्तव्यम् ?। न च"आकाशोह वै" इत्यादिश्रुतयइति पूर्वमेवोक्ताइति वाच्यम्, तासु मिथ्याव्यावहारिकादिप्रतिपादकपदानामेकतमस्याप्यदर्शनात् । प्रत्युत नामरूपादिहेतुत्वप्रतिपादनपराणां पदानामेवोपलभ्यमानत्वात् । अतएव न नामरूपयोरपि मिथ्यात्वम्, "यस्य नाम महद्यशः, अथ नामधेयं सत्यस्य सत्यं, प्राणावै सत्यं, तेषामेष सत्यमि"त्यादिना सत्यत्वश्रवणात् । नापि तस्य ज्ञानशक्त्यादीनां व्यावहारिकत्वं वक्तुं शक्यम्, "परास्य शक्तिर्विधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च"इति कण्ठरवेण स्वाभाविकत्वश्रवणात् । नच तासां व्यावहारिकसत्त्वपरत्वं तत्त्वञ्च ज्ञानबाध्यत्वं भेदवाक्यानां प्रत्यक्षादिप्रमाणगम्यभेदविषयकत्वेनानुवादपरत्वाभ्युपगमादितिवाच्यम्, आपातोक्तेः । तथाहि "जीवब्रह्मभेदे प्रत्यक्षादीनामप्रसरादि "ति विवरणाचार्यवचनात् प्रत्यक्षादिशक्यभावेन भेदवाक्यानां स्वार्थे एव प्रामाण्यम्, अन्यथा स्वरूपस्यापि बाधोऽभ्युपगन्तव्यः, स्वाभाविकत्वसाम्यात् । किञ्च घटोऽस्तीति प्रत्यक्षेण निर्विशेषाधिष्ठानवस्तुनोगम्यत्वादभेदवाक्यानामेव—तदनुवादपरत्वेन—स्वार्थे—ऽप्रामाण्यं, प्रत्यक्षगृहीतग्राहित्वात् । तथाच तवैव सिद्धान्तविरोधः, अन्यथा विवरणवाक्यभङ्गः।किञ्च"ईश्वरस्यात्मभूते इवे"त्यस्य कोवाऽर्थोविवक्षितः ?। स्वरूपात्यन्ताभिन्नत्वं वा ? शुक्तिरजतवदसत्त्वस्य प्रतीयमानत्वं वा?स्वरूपापृथक्सिद्धत्वमात्रं वा?नाद्यः, श्रुतिप्रमितत्वात् । अन्यथा "नामैव ब्रह्म रूपमेव ब्रह्मे"ति प्रतीत्यापत्तेः । नापि द्वितीयः, प्रतीयमानत्वे प्रमाणाभावात्, प्रत्युत "अथ नामधेयं

सत्यस्य सत्यमि"ति सत्यत्वश्रवणात्। "व्याकरवाणी"ति व्यक्तीकरणश्रुतेश्च। अन्यथा "प्रत्यापयामी"तिश्रवणं स्यात्। चरमश्लोकदिष्टापत्तिः, तदात्मकत्वेन स्वरूपापृथक्सिद्धत्वस्य सिद्धान्तेऽप्यङ्गीकारात्। "ऐतदात्म्यमिदं सर्वमि"ति श्रुतेः। नाप्यनिर्वचनीयत्वम्, अनिर्वचनीयख्यातिनिरासे तस्य पूर्वाचार्यैर्विस्तरेण निरस्तत्वात्। तस्मात्सदेव। किञ्चेश्वरस्यातात्त्विकत्वे निरीश्वरसाङ्ख्यादिभ्योऽवैदिकेभ्यस्तव सिद्धान्तस्य परवञ्चनं विना कोवा विशेषः?। सर्वस्य वेदस्य सार्वज्ञ्यसर्वशक्त्यादिनिलयपरब्रह्मपरत्वेन भवतां पारिभाषिततर्कमात्रं विना प्रमाणान्तरं नास्तीत्यलं कुतर्कनिरासैः। किञ्च यदि प्रपञ्चमिथ्यावादः श्रौतः स्यात्तर्हि शुक्तिरजतादिदृष्टान्तावेदे उपन्यस्ताः स्युः। यद्यनिर्वचनीयवादः सूत्रकाराभिप्रेतः स्यात्तर्हि सूत्रितोऽपि स्यान्नतु तथा दृश्यते, तस्मात्कार्यं सदेवेत्यादितर्काश्रत्रानुसन्धेयाः। ननु *ब्रह्मज्ञानेतरबाध्यत्वे, सद्भिन्नत्वे, च सति चिदन्यन्मिथ्या, दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्च, शुक्तिरूप्यवदित्यनुमानमत्रप्रमाणमिति चेन्न, तस्य पक्षसाध्यहेतुदृष्टान्तानामसम्भवेनाभासमात्रत्वात्। तथाहि चिदन्यद्रूपः पक्षः प्रमितो ? न वा ?। नाद्यः, प्रमितस्य निषेद्धुमशक्यत्वात्। ननु प्रपञ्चस्य प्रत्यक्षगोचरत्वेऽपि सत्त्वानधीकरणत्वा-

---

* सद्भिन्नत्वं सत्त्वेन प्रतीत्यर्हम्, ब्रह्मज्ञानेतरबाध्यत्वं, तत्र-सिद्धसाधनवारणाय प्रथमविशेषणम्, अत्र पक्षतावच्छेदकसमानाधिकरणेन साध्यसिद्धेरुद्देश्यत्वात्पक्षैकदेशे साध्यसिद्धावपि सिद्धसाधनतेति मते शुक्तिरूप्ये सिद्धसाधनवारणाय ब्रह्मज्ञानेतरबाध्यत्वं पक्षविशेषणं, यदि पुनः पक्षतावच्छेदेनैव साध्यसिद्धिरुद्देश्या तदैकदेशे साध्यसिद्धावपि सिद्धसाधनभावात् द्वारकं विशेषणमनुपादेयम्, इतरविशेषणद्वयं तु तुच्छे ब्रह्मणि च वारणायादरणीयमेव।

दिना मिथ्यात्वं वक्तुं शक्यमेवेति चेन्न, तव मते निर्विशेष स्य शुद्धस्य ब्रह्मणोऽपि सत्त्वानधिकरणत्वाभ्युपगमात्तत्राति-व्याप्तिः, शुद्धं ब्रह्ममिथ्या सत्त्वानधिकरणत्वात्, तवाभिप्रेत-प्रपञ्चवदित्यनुमानात् । न द्वितीयः, शशशृङ्गं तीक्ष्णाग्रं, शृङ्ग-त्वात्, हरिणशृङ्गवत्, खपुष्पं गन्धवत्, पुष्पत्वात्प्रसिद्धपुष्प-वदिति प्रयोगस्यैवाश्रयासिद्धत्वाच्च । अथास्य साध्योऽपि दुर्निरूपः, तथाहि साध्यमत्र मिथ्यात्वं, तच्च सत्यं वा ? तुच्छं वा ? । आद्ये, मिथ्यात्वस्य सत्यत्वे अद्वैतभङ्गः । द्वितीये मिथ्यात्वस्य मिथ्यात्वे प्रपञ्चस्य सत्यत्वापत्तिः, घटाभावाभावस्य घटरूपत्ववज्जगन्मिथ्यात्वमिथ्यात्वस्य सद्रूपत्वात्, सिद्धसा-धनतापत्तिश्च । यथा केन चिल्लौकिकेनोक्तं देवदत्तोमृतः, परेण चाप्तेन निर्णीयोक्तस्तदभावः । एवं चाप्तवाक्याद्देवदत्तमरणस्य मृषात्वे तस्य जीवनं सिद्धं, तद्वत् मिथ्यात्वस्याबाध्यत्वेऽद्वैतहानिः बाध्यते जगतः सत्यत्वमित्युभयथाऽपि पाशारज्जूइत्यर्थः । किञ्च किं तावन्मिथ्यात्वं ? नच सदसत्त्वानधिकरणत्वं च सत्त्वावि-शिष्टासत्त्वाभावरूपमिति वाच्यं, सदेकस्वभावे जगति विशिष्टा-भावस्येष्टत्वात् । नच सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं द्वयमिति वाच्यं, सत्त्वासत्त्वयोरेकतराभावेऽपरस्य सत्त्वा-वश्यकत्वेन व्याघातात्, निर्धर्मकब्रह्मवत्, सत्त्वराहित्येऽपि सद्रूप-त्वोपपत्त्या मिथ्यात्वासिद्धेः । एतेन सत्त्वात्यन्ताभावविशिष्टा-सत्त्वात्यन्ताभावरूपं विशिष्टं तत्त्वमित्यपि निरस्तं, दोषसाम्यात् । ननु क्वचिदुपाधौ सत्त्वेनाप्रतीयमानत्वमसत्त्वं, त्रिकालाबाध्यत्वं सत्त्वं, तयोरभावः साध्यइतिचेन्न, असल्लक्षणस्यासङ्गे ब्रह्मण्य-तिव्याप्तेः । तस्याप्युक्तासत्त्वाङ्गीकारे सङ्गिन्नेति विशेषणस्य वैय-र्थ्यापत्तेः, शब्दाभासेन तुच्छस्यापि क्वचिदुपाधौ सत्त्वेन धीसम्भ-वाच्च, उक्तासत्त्वाभावस्य शून्यवादिप्रपञ्चे स्वीकाराच्च, लाघवा-

त्सत्त्वासत्त्वयोः परस्परभावस्यैवौचित्याच्च। नन्वेकेनैव सर्वानुगतेन ब्रह्मसत्त्वेन सर्वत्र सदितिज्ञानोपपत्तौ प्रत्येकं सद्रूपत्वकल्पनमयुक्तमन्यथाऽनुगतव्यवहारानुपपत्तेरिति चेन्न, सत्तात्रैविध्यस्य त्वयाऽपि स्वीकारात्, लाघवेन "यदासीत्तदधीनमासीदि" तिश्रुतेः प्रामाणिकपरतन्त्रसत्तयाऽप्यनुगतधीदर्शनाच्च। एतेन सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं साध्यमिति निरस्तं, निर्धर्मकेब्रह्मण्यतिव्याप्तेश्च। नच सद्रूपं ब्रह्म तत्तदभावाधिकरणमिति वाच्यं, प्रपञ्चेऽपि साम्यात्। नच ब्रह्मणोनिर्धर्मकत्वात्सत्त्वासत्त्ववत्तत्तदधिकरणत्वमपि नास्तीति वाच्यं, निर्धर्मकत्वहेतुसत्त्वासत्त्वाभ्यां व्याघातात्, सत्त्वासत्त्वाद्यनधिकरणत्वनिषेधे सदसत्त्वाधिकरणत्वापत्तेरिति साध्यासम्भवः। एवं हेतूनामप्याभासत्वमेव। तत्र दृश्यत्वं नाम किम्वृत्तिव्याप्यत्वं ? वा फलव्याप्यत्वं ?वोभयव्याप्तं वा? नाद्यः, ब्रह्मण्यतिव्याप्तेः, तस्यापि वेदान्तजन्यवृत्तिविषयत्वात्। अन्यथा वेदान्तस्य वैयर्थ्यापत्तेः। नच "यत्तदद्रेश्यमि"ति श्रुतेः शुद्धं न दृश्यं, किन्तूपहितमेव, तस्य मिथ्यात्वं चेष्टापन्नम्। नहि वृत्तिदशायामनुपहितं तद्भवतीतिवाच्यम्, उपहितभाने उपधेयभानावश्यकत्वात्, प्रसिद्धार्थकयत्तच्छब्दयोरयोगाच्च। विशिष्टभाने विशेष्यभानं ह्यावश्यकं, नहि दण्डीति ज्ञाने पुरुषस्य विषयता नास्ति, नच विशेष्यतापन्नं मिथ्यैवेति वाच्यम्, अधिष्ठानस्याधिकसत्ताकनियमेन विशेष्यतापन्नस्य मृषात्वेऽधिष्ठानत्वासम्भवात्। नहि विशेष्यतापन्नं सर्वथा ज्ञानाविषयं ह्यधिष्ठानं भवति, जगतोऽपि विशेष्यतापन्नत्वादिना मिथ्यात्वं, स्वरूपेण तु सत्यत्वमित्यापत्त्याऽद्वैतहानिः स्यात्। किञ्च शुद्धस्याविषयत्वे मोक्षाभावप्रसङ्गः, उपहितज्ञानेनैव मोक्षसिद्ध्याऽपसिद्धान्तापत्तेश्च। किञ्च सत्यस्य शुद्धस्यैव व्यावहारिकघटाद्यधिष्ठानस्य घटादिगोचरचाक्षुषादिवृत्तिविषयतायाः सत्वान्न ह्यधिष्ठानमविषयीकृत्या-

ध्यस्तं वृत्तिर्विषयीकरोति "मनस्यैवानुद्रष्टव्यं, दृश्यते त्वग्रया बुद्ध्ये"ति श्रुतेः।न चोपहितविषयकैवेयं श्रुतिरिति वाच्यं, त्वन्मत-भाष्यविरोधात् । तथाहि "तदव्यक्तमाह ही"ति सूत्रभाष्ये अव्यक्तं परं ब्रह्मेन्द्रियाग्राह्यं निरूप्य, "अपि च संराधने प्रत्यक्षा-नुमानाभ्यामि "ति सूत्रभाष्ये च अपि चैनमात्मानं निरस्त-समस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्तीत्यादिना परस्यैव पश्यतेः क्रियायाः कर्मत्वस्वीकारेण तद्बाधात्, तत्रोदाहृतश्रुति-स्मृतीनां "ततस्तु तं पश्यति निष्कलं ध्यायमानः"इति "ज्योतिः पश्यन्ति युञ्जानाः योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनमि" त्यादीनां बाधाच्च । किञ्चोक्तश्रुत्यादीनां यदि शुद्धविषयकत्वं नाङ्गीक्रियते, तर्हि शुद्धस्य ज्ञानाभावे तादवस्थ्ये तदाच्छादक-मूलाज्ञानस्याप्यनिवृत्त्याऽनिर्मोक्षप्रसङ्गः । सबलज्ञानस्य मोक्षासा-धकत्वाभ्युपगमात् । "परात्परं पुरिशयं पुरुषमीक्षते"इत्यादिना परात्परस्यैव ब्रह्मणोदर्शनक्रियाकर्मश्रवणाच्च । तद्बाधोऽपि दुःपरि-हरः । नापि फलव्याप्यत्वम्, अतीन्द्रियेष्वपञ्चीकृतभूतेषु चोदनै-कवेद्यधर्मादौ तव मते साक्ष्येकवेद्ये सुखादौ तदभावेना-व्याप्तिप्रसङ्गात्तेषां सत्यत्वापत्तेः । सुखादयोधर्मादयश्च सत्याः, फल व्याप्यत्वराहित्यात्, ब्रह्मवदिति प्रयोगात् । नाप्युभयव्याप्यत्वं तत्त्वं, विशेषस्य सामान्यानतिरेकेण वृत्तिव्याप्यत्वाभ्युपगमादेव दृश्यत्वसिद्ध्या ब्रह्मणयतिव्याप्तिप्रसङ्गस्य दुर्वारत्वादिति संक्षेपः। नापि जड़त्वं हेतुः तत्त्वं न तावदज्ञानत्वं, वृत्तिज्ञाने भागा-सिद्धेः, आत्मनि व्यभिचाराच्च । तथाहि आत्मरूपं ज्ञानं सवि-षयं ? न वा ? आद्ये, स्वविषयं ? परविषयं वा ? नाद्यः, त्वया ऽनभ्युपगमात् । न द्वितीयः, मोक्षे परस्याभावात्, त्वन्मते वर्त्तमानस्यैव विषयत्वात् । न चार्थोपलक्षितप्रकाशस्यैव ज्ञान-त्वात् तस्य मोक्षेऽप्यनपायइति वाच्यम्, यदा कदाचिद्विषय-

सम्बन्धान्मोक्षेज्ञानत्ववद्यदा कदाचिद्दुःखादिसम्बन्धाद्दुःखित्वाद्यापत्तेः । अभावादिषु सप्रतियोगित्वादेरिव ज्ञाने सविषयत्वस्यापि स्वाभाविकस्य धर्मिसमसत्ताकस्य दर्शनात् । न च सविषयत्वं ज्ञानस्य विषयेण सहाध्यासिकः सम्बन्धः । स च न स्वाभाविकः, एतद्धेत्वधीनमिथ्यात्वसिद्धेः, प्रागाध्यासिकसम्बन्धासिद्धेः । मोक्षे अध्यासिकसम्बन्धासिद्धेरिति वाच्यम्, अज्ञानेच्छादेरिव ज्ञानस्यापि सविषयतायाः स्वाभाविकत्वात् । भोक्तृभोज्यं विना भुजेरिव, ज्ञातृज्ञेयं विना ज्ञानस्यासम्भवात् । न चानादौ तदनपेक्षा, अनादेः प्रागभावस्य प्रतियोग्यपेक्षायाजात्यादेर्व्यक्त्यपेक्षायाअज्ञानस्य विषयाश्रयापेक्षायादर्शनात् । ज्ञानस्य ज्ञानत्वं हि ज्ञेयोल्लेखित्वं, तच्चातीतादिज्ञानस्याप्यङ्गतम्, तच्च तवानिष्टं, उल्लेखस्य तव संसारत्वेन मोक्षे तदुल्लेखे तद्विप्लवप्रसङ्गात् । नापि ज्ञानस्य निर्विषयत्वं सम्भवति ज्ञानत्वहानेः, अर्थप्रकाशत्वरूपज्ञानस्वभावाभावे घटादेरपि ज्ञानत्वापातात्, ज्ञातुर्ज्ञप्रकाशस्य ज्ञानत्वादिति विवरणोक्तिबाधाच्च । किञ्चात्मरूपं ज्ञानं प्रमा ? भ्रमः ? वा, नाद्यः, तद्वेद्यस्याविद्यादेः सत्यत्वापत्तेः । नान्त्यः, भ्रमस्य दोषजन्यत्वनियमेनात्मनस्तदभावात् । उभयभिन्नत्वे ज्ञानमेव न स्यात् । नच तार्किकाभिमतेश्वरज्ञानवत् घटादिनिर्विकल्पकवच्चोभयवैलक्षण्येऽपि ज्ञानत्वोपपत्तिः, ईश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वस्य भ्रमत्वे दोषजन्यत्वस्य चापत्तेः, निर्विकल्पकस्य तद्वति तत्प्रकारकत्वाभावादिति वाच्यं, अबाधितार्थकत्वरूपयाथार्थ्यप्रामाण्यस्येश्वरीयज्ञानादावत्तेः, विशेष्यावृत्त्यप्रकारकत्वरूपप्रामाण्यस्येश्वरज्ञाननिर्विकल्पकयोरङ्गतत्वाच्च । प्रमासामान्ये च न गुणजन्यत्वं नियामकं, किन्तु तद्विशेषे एव । प्रमामात्रे च नानुमतोगुणइति मणिकृतोक्तेः, किन्तु दोषाजन्यत्वमेव हि तन्नियामकम्, नापि ज्ञान-

पदजन्यप्रतीतिविशेष्यभिन्नत्वं जडत्वं, वृत्त्यात्मकज्ञाने भागासिद्धेः, लाक्षणिकज्ञानपदजन्यधीविशेष्यत्वस्य देहेन्द्रियादावपि सत्त्वेनासिद्धेः। नाप्यनात्मत्वं जडत्वं, तथाहि आत्मत्वं न जातिः, तस्यैकत्वात्, विशिष्टानां भेदेऽपि पक्षान्तःपातित्वात् प्रतियोग्यसिद्ध्या तदभावासिद्धेः। नचानानन्दत्वं जडत्वं, वैषयिकानन्दे भागासिद्धेः। नच सोऽपि ब्रह्मानन्दइति वाच्यं, क्षीरनीरपानजन्यानन्दानां तारतम्योपलब्ध्या ब्रह्मत्वासंभवात्। नच दुःखनिष्ठोत्कर्षापकर्षयोरानन्दे उपचारः, दुःखलेशाप्रतीतावप्यानन्दतारतम्यस्य प्रतीतेः। नाप्यज्ञातृत्वं जडत्वं, तव मतेऽन्तःकरणस्य ज्ञातृत्वेन तत्राव्याप्तेः, शुद्धे ब्रह्मण्यतिव्याप्तेश्च; शुद्धं ब्रह्म मिथ्या, अज्ञातृत्वादाकाशादिवदित्याभाससाम्यात्। नच कल्पितज्ञातृत्वं शुद्धेऽपि स्वीक्रियते इति वाच्यं, कल्पितेन हेत्वभावेनातिव्याप्त्यनुद्धरात्, शुद्धत्वभङ्गाच्च, शुद्धाशुद्धविभागासिद्धेश्चेति संक्षेपः। नापि परिच्छिन्नत्वस्य हेतुत्वम्, आभाससाम्यात्। तथाहि तत्त्वं नाम देशकालवस्तुपरिच्छेदबत्त्वं, तत्रात्यन्ताभावप्रतियोगित्वं देशपरिच्छिन्नत्वं, ध्वंसाभावप्रतियोगित्वं कालपरिच्छिन्नत्वम्, अन्योऽन्याभावप्रतियोगित्वं वस्तुपरिच्छिन्नत्वमिति विवेकः। तत्र नाद्यद्वितीयौ आकाशरूपदेशस्य कालस्य चापरिच्छिन्नत्वेन तत्राव्याप्तेः, आकाशवत्सर्वगतश्च नित्यः "सदेव सौम्येदमग्रआसीत्, अथ मर्त्योऽमृतोभवति सर्वमात्मैवाभूत्, अथ संपत्स्ये" इत्यादिश्रुतिभिः सदा सर्वत्र कार्यदर्शनादित्यादियुक्त्या धार्मिग्राहिणा सात्त्विणा च तथात्वावगमात्। नच "आत्मनः आकाशः सम्भूतः" इत्याकाशस्य कालपरिच्छेदश्रवणादुक्तविरोधइति वाच्यं, भूताकाशस्योत्पत्तिनाशादिसम्भवेऽपि अव्याकृताकाशस्य तदयोगात्। नहि पूर्त्तिं विनाऽवकाशनाशः सम्भवति, एतेन विमतं मिथ्या, विभक्तत्वात्। सन् घटः सन्घटः इति घटादिकमननुगतमनु-

गतसद्रूपे विभज्यते इति निरस्तम् । नीलोघटोनीलः पटोघटश्चलति पटश्चलति, असन्नृशृङ्गमसत् खपुष्पमित्यादौ नीलादिषु घटादीनामसति नृशृङ्गादीनामध्यासापत्तेः । अयं सर्पोऽयं सर्पइति रज्जुमालादिष्वननुगतेष्वनुगतस्य सर्पस्यारोपवदननुगतेषु घटादिष्वनुगतसद्रूपस्यारोपापत्तेश्च, खण्डोगौर्मुण्डोगौरित्यादावनुगतगोत्वादौ व्यक्तेरारोपापत्तेश्च । नच सद्रूपब्रह्मभिन्नगोत्वादेरनभ्युपगमान्नोक्तदोषइति वाच्यम्, अगवादिव्यावृत्तस्य गवादिवैलक्षण्यव्यवहारस्यानुपपत्तेः, सद्रूपस्य सर्वानुगतत्वेन व्यावृत्तेरसम्भवात् । नच तत्तद्व्यक्तिविशिष्टं सत्सामान्यमेव तत्तद्व्यवहारजनकमिति वाच्यं, तत्तद्व्यक्तिविशिष्टस्य मिथ्याभूतस्य व्यक्त्यनधिष्ठानत्वेन तत्र व्यक्तेरध्यासायोगात् । तत्सामान्यव्यक्त्योराध्यासिकसम्बन्धातिरिक्तसम्बन्धस्य त्वयाऽनङ्गीकारात् । एतेन घटादिकं सद्रूपेकल्पितं प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात्, प्रत्येकं चन्द्रानुविद्धजलतरङ्गचन्द्रवदिति निरस्तम् । रूपादिहीनस्य ब्रह्मणश्चाक्षुषत्वायोगात् चक्षुरादिगृहीतस्य दृश्यस्य मिथ्यात्वेन घटाद्यनधिष्ठानत्वात् । किञ्च ब्रह्मणः सर्वेन्द्रियग्राह्यत्वे घटादिवन्मिथ्यात्वस्यावश्यं भावात्, अधिष्ठानरूपनिर्विशेषं वस्तु मिथ्या, इन्द्रियगोचरत्वात्तव मते घटादिवदित्यनुमानात् । किञ्च ब्रह्मणइन्द्रियग्राह्यत्वाङ्गीकारे महावाक्योपदेशस्यानुवादकत्वापत्तेः, महावाक्योपदेशोन स्वार्थपरः, इन्द्रियगृहीतग्राहकत्वेनानुवादरूपत्वात्, अग्निर्हिमस्य भेषजमिति वाक्यवदित्यनुमानात् । एतेन द्रव्यग्रहे रूपाद्यपेक्षा, ब्रह्मणस्तु द्रव्यत्वाभावेन तदनपेक्षत्वान्नोक्तदोषावकाशः "अस्थूलमनण्विति परिमाणनिषेधादिति निरस्तम् । उक्तश्रुतेः प्राकृतपरिमाणनिषेधेन नैराकांक्ष्यात् । अन्यथा "अणोरणीयान्महतोमहीयानि"त्यादिश्रुतिव्याकोपात् । नापि तृतीयोऽन्योऽन्याभावप्रतियोगित्वरूपोवस्तुपरिच्छेद-

रूपोहेतुः, अनृतादौ ब्रह्मात्यन्ताभावान्योऽन्याभावयोः सत्वात्तत्रा-तिव्याप्तेः, ब्रह्म मिथ्या, अनृताद्यन्योऽन्याभावप्रतियोगित्वात्तव मते घटपटादिवदित्यनुमानात् । नन्वनृतादौ ब्रह्मात्यन्ताभावान्योऽन्या-भावयोर्मिथ्यात्वात् तत्र ब्रह्मसंसर्गस्य चाभिन्नत्वान्नोक्तदोषइति चेन्न, तथात्वे मिथ्यात्वाभिन्नत्वसंसर्गयोस्तात्त्विकत्वापत्त्या तद्धिया पारमार्थिकस्यैवाभावस्याकामेनापि त्वयाऽङ्गीकार्यत्वात्, सन्दिग्धानैकान्त्यस्य दुर्वारत्वात्, अप्रयोजकत्वाच्च । किञ्च ब्रह्म-भिन्नत्वस्य तात्त्विकस्य प्रपञ्चेऽप्यभावात् ब्रह्मण्यनृतव्यावृत्ति-स्तात्त्विकी तया तस्य तथात्वमनुमातुं शक्यते, कल्पित-स्य त्वात्मनि सत्त्वात् सिद्धं दृश्यत्वादिहेतूनामाभासत्वं सोपाधि-कत्वात् । उपाधयश्च, सप्रकारकधीबाधार्हत्वम्, अध्यस्ताधिकदोष-प्रयुक्तभानत्वं, प्रतिभासमात्रशरीरत्वं चेत्यादयः । देहात्मैक्याध्यास-स्यापि सप्रकारकभेदविषयकज्ञानबाधयोग्यत्वात् न तत्र साध्याव्याप्तिः । नच सप्रकारकेति अध्यस्ताधिकेति च, विशे-षणवैयर्थ्यं, तद्धिनैवोपाधेः साध्यव्यापकत्वादिति वाच्यं, विशिष्टा भावस्यातिरिक्तत्वेन तद्विशिष्टस्यैव साध्यव्यापकतया वैयर्थ्यो-भावात्, तावन्मात्रस्य तु साधनव्यापकत्वान्नोपाधित्वमिति संक्षेपः । किञ्चास्य प्रयोगस्य दृष्टान्तोऽपि दुर्निरूपः, शुक्त्यादेः पक्षान्तः-पातित्वेन तत्प्रयोगस्याभासमात्रत्वात् । न च माऽस्तु शुक्त्यादि-दृष्टान्तः व्यतिरेकिदृष्टान्तस्य ब्रह्मणः सत्त्वान्नोक्तदोषावकाशइति वाच्यं, विकल्पासहत्वात् । तथा हि शुद्धस्य दृष्टान्तत्वं ? विशि-ष्टस्य वा ? नाद्यः, सर्वप्रमाणागोचरस्य ब्रह्मणः शशशृङ्गकल्प-त्वेन दृष्टान्तानर्हत्वात्, प्रमाणविषयत्वे शुद्धत्वहानेरद्वैतभङ्गाच्च । न द्वितीयः, विशिष्टस्य पक्षान्तः पातित्वात्, तव मते व्यतिरेका-नुमानानङ्गीकाराच्च । तस्मात्पक्षादीनामाभासत्वेनापातरमणीय-त्वमुक्तानुमानस्येति सिद्धम् । किञ्च विश्वं यदि कल्पितं

স্যাত্তর্হি সাধিষ্ঠানং স্যাত্, সামান্যতোজ্ঞাতত্বে সতি অজ্ঞাত-বিশেষবত্ত্বস্যাধিষ্ঠানত্বপ্রযোজকস্য নির্বিশেষে নিঃসামান্যে ব্রহ্ম-ণ্যসম্ভবাত্। বিশ্বং যদি কল্পিতং স্যাত্তর্হি সপ্রধানং স্যাত্, ন চৈবমস্তি তস্মান্ন তথা। বিশ্বং যদ্যধ্যস্তং স্যাত্তর্হি সসংস্কারং স্যান্নতু তদস্তি, তস্মান্ন তথা। নচ স্বেনাধ্যস্তঃ স্বারোপহেতু-রিতি বাচ্যং, ভ্রমাত্পূর্বং স্বস্য কার্যানুমেয়সংস্কারাধ্যাসকারণ-ত্বাসম্ভবাত্। অন্যথা ভ্রমহেতুসংস্কারস্যাধিষ্ঠানসমসত্তাকত্বং দুর্বারম্। ন চ সংস্কারোঽজ্ঞাতোব্যাবহারিকঃ স্বেনারোপিতঃ স্বাধ্যাস-হেতুরস্ত্যেবেতি বাচ্যম্, অজ্ঞাতস্যাধ্যস্তত্বে মানাভাবেন পারমার্থি-কত্বপ্রসঙ্গাত্। কিঞ্চ বিশ্বং যদ্যধ্যস্তং স্যাত্তর্হি সসাদৃশ্যং স্যান্নচৈবমস্তি তস্মান্ন তথা। ন চ পীতঃ শঙ্খইতি সাদৃশ্যং বিনাঽপি ভ্রমোদৃষ্টইতি বাচ্যং, দ্রব্যত্বাদিনা তত্রাপি সাদৃশ্য-জ্ঞানবত্ত্বস্যানুমেয়ত্বাত্, স্বর্ণময়শঙ্খমূর্ত্তৌ তস্য প্রত্যক্ষসিদ্ধত্বাচ্চ। কিঞ্চ বিশ্বং যদ্যধ্যস্তং স্যাত্তর্হ্যনাদিকর্মাদিজন্যং ন স্যাত্, অধ্যাসানাদিত্বস্য ক্বাঽপি প্রসিদ্ধ্যভাবাত্, প্রত্যুত সাদিত্বস্য শুক্তিরূপ্যাদৌ দর্শনাত্তস্মান্নাধ্যস্তত্বমিত্যাদিপ্রতিকূলতর্কৈঃ প্রতিহতমিদমনুমানং ন প্রামাণ্যার্হমিত্যলং বিস্তরেণ। অপ্রমাণত্বা-ত্সূত্রকারপক্ষহীনত্বাচ্চোপেক্ষণীয়োঽয়মনির্বচনীয়বাদোমুমুক্ষুভিঃ। অসদ্বাদস্ত্বগ্রে নিরস্যতে। তস্মাত্সদেবেদং বিশ্বং "সদেব সৌম্যেদমগ্রআসীদি"তি শ্রুতেঃ। "সত্বাচ্চাবরস্যে"তি বক্ষ্যমাণ-সূত্রাচ্চ। তচ্চ কার্যং কারণাত্মকত্বাত্তদপৃথক্সিদ্ধমিত্যাহ ভগ-বান্সূত্রকারঃ। "তদনন্যত্বমিতি"। তস্য কার্যস্য ব্রহ্মণঃ সকাশা-দনন্যত্বং, যদ্বা তস্মাত্কারণাত্ ব্রহ্মণোঽনন্যত্বং তদাত্মকত্বা দিনাঽপৃথক্সিদ্ধত্বং কার্যস্য জগতঃ। তত্র প্রমাণমাহ। "আর-ম্ভণশব্দাদিভ্যঃ"ইতি আরম্ভণশব্দাদির্যেষাং "বিকারোনামধেয়ং মৃত্তিকেত্যেব সত্যং, সদেব সৌম্যেদমগ্রআসীদেকমেবাদ্বিতীয়ং, তদৈ-

च्चत बहु स्यां प्रजायेय, तत्तेजोऽसृजत, ऐतदात्म्यमिदं सर्वं, तत्सत्यं, स आत्मा तत्त्वमसि, सर्वं खल्विदं ब्रह्म, तज्जलानिति, तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियते" त्यादीनां तान्यारम्भणशब्दादीनि तेभ्योवाक्येभ्यः प्रमाणेभ्यः । अत्रामनन्ति छन्दोगाः । "येनाश्रुतं श्रुतं भवती"त्यादिना ह्येकोपादानकारणविज्ञानेन सर्वकार्यविज्ञानं प्रतिज्ञाय तत्सिद्धये दृष्टान्तोपन्यासः । "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यमि"ति । यथेति दृष्टान्ते मृत्पिण्डेन मृद्द्रव्यरूपतया विज्ञातेन सर्वं मृन्मयं मृद्विकारजातं घटशरावोदञ्चनादिकं मृदात्मकतया विज्ञातं भवति, तत्तदवस्थाविशेषमात्रत्वादुपादेयजातस्य स्वोपादानापृथक्सिद्धत्वादित्याह, वाचारम्भणमिति । कार्यजातं वाचा वागिन्द्रियेणारभ्यते "घटेन जलमाहरे"त्यादिना व्यवह्रियते इति वाचारम्भणं "कृत्य ल्युटोबहुलमि"ति कर्मणि ल्युट् । तद्विविधं विकारोनामधेयं चेति, तत्र कम्बुग्रीवादिमद्द्रव्यक्तिविशेषरूपो विकारशब्दवाच्यः, नामधेयं च घटादिशब्दवाच्यः शब्दविशेषएव । ननु यथा कारणं मृत्तिका स्वतन्त्रसत्ताश्रयत्वात्सत्या तथा घटादीनां कार्याणामपि पृथक्स्वतन्त्रसत्त्वं भवतु, उपलभ्यमानत्वादित्यत्राह, मृत्तिकेत्येव सत्यमिति । एवकारोऽन्ययोगव्यवच्छेदार्थः । इति शब्दः कारणपरामर्शपरः । मृत्तिकाकारणभूतैव स्वतन्त्रसत्ताश्रया, न तु तथा घटादिकार्यं स्वातन्त्र्येण सत्यं, कारणव्यतिरेकेणानुपलभ्यमानत्वात्, तदन्वितस्य चोपलभ्यमानत्वाच्चेति दृष्टान्तः । एवमाकाशादिप्रपञ्चजातस्य ब्रह्मोपादेयतया तदात्मकतया च स्वतन्त्रसत्ताऽनधिकरणत्वात् स्वोपादानकारणभूतब्रह्मापृथक्सत्त्वमेवेति सिद्धान्तः । "ऐतदात्म्यमिदं सर्वमि"ति श्रुतेः । "वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च" इत्यादिस्मृतेश्च ।

यत्तु कैश्चित्स्वकपोलकल्पितानश्रौतदृष्टान्तान् शुक्तिरूप्यमृगतृष्णोदकादीनुपन्यस्याकाशादि कार्यस्य मृषात्वं प्रतिपादयद्भिरेतत्सूत्रं विवर्त्तपरत्वेन व्याख्यायते, तदसमीचीनं, प्रतिज्ञादृष्टान्तासम्भवात् । तथाहि "येनाश्रुतं श्रुतमि"त्यादि श्रौतप्रतिज्ञावाक्ये कारणाविज्ञानेन कार्यविज्ञानं प्रतिज्ञातं, तत्र किं तावत्कारणं शुद्धं निर्विशेषं ब्रह्म वा ? उपहितं वा ? नाद्यः, तस्य कारणात्वानभ्युपगमात्, तत्र प्रमाणाभावेन तद्विज्ञानस्यैवासम्भवाच्च । "तमेव विदित्वाऽतिमृत्युमेति, यदाचर्मवदाकाशं वेष्टयिष्यन्ति मानवाः" इत्यन्वयव्यतिरेकश्रुतिव्याकोपाच्च, तज्ज्ञानाभावेऽनिर्मोक्षप्रसङ्गाच्च । न द्वितीयः, तद्विज्ञानस्य मोक्षाहेतुत्वेनाप्रयोजकत्वात्, उपहितस्यैव ब्रह्मणोजगत्कारणत्वेन तज्ज्ञानेन तदुपादेयज्ञाने जातेऽपि तस्य मोक्षाहेतुत्वेन मिथ्यात्वेन चानिर्मोक्षप्रसङ्गस्यावश्यं भावात् । अन्यथोपहितं ब्रह्मैव मुक्तोपसृप्यं स्यात् शुद्धस्यासिद्धेश्चेत्यर्थः । किञ्च शुक्तिरूप्यमृगतृष्णोदकादिदृष्टान्तानामप्यप्रामाण्यम्, अश्रौतत्वात्, श्रौततात्पर्यविरोधाच्च । मृत्तिकाद्युपादानपदार्थज्ञानाद्यथा घटादितत्कार्यजातस्य विज्ञानं तदुपादेयत्वात्सर्वप्राणिगोचरं, न तथा शुक्तिज्ञानाद्रूप्यमात्रस्य ऊषरज्ञानाद्वाउदकमात्रस्य ज्ञानं कस्याप्यनुन्मत्तस्य जायते, उपादेयत्वाभावात् । तस्मादृष्टान्ताभासत्वमेव तेषामिति सिद्धं "लौकिकपरीक्षकाणां यत्र बुद्धिसाम्यं सदृष्टान्तः"इति गौतमीयलक्षणसूत्रात् । ननु घटादीनामपि मृदादावध्यस्तत्वेन विवर्त्तपक्षेऽपि दृष्टान्तत्वसम्भवान्नाभासत्वमिति चेन्न, मृदादिज्ञानेन घटादीनां बाधादर्शनात्, बाधं विना चारोपेमानान्तराभावात् मृदादिज्ञानेऽपि घटादीनां पूर्ववद्विद्यमानानां प्रातीतिकत्वासम्भवाच्च । किञ्च व्यावहारिकविवक्षायां मृदादिवत् कारकव्यापारसाध्यानां जलाहरणादिकार्योपयुक्तानां चावस्थाविशेषाणां घटादीनामपि सत्त्वात् तात्त्विकसत्त्वविवक्षायां च

मृदादेरपि सत्यत्वाभावाच्च दृष्टान्ताभासत्वम् । ननु घटादयोन तावन्मृदादिमात्रेऽध्यस्ताः किन्तु मृदाद्यवच्छिन्नचेतने एव, तथात्वे च मृदाद्यवच्छिन्नतत्त्वज्ञानाभावात्तदबाधोयुक्तएवेति चेन्न, प्रमाणहीनत्वात्, श्रौतदृष्टान्तविरुद्धत्वाच्च । नहि श्रुतौ मृदाद्यवच्छिन्नचेतनविज्ञानेन सर्वं मृन्मयं विज्ञातं स्यादिति दृष्टान्तउपन्यस्तः, किन्तु मृत्पिण्डमात्रएव, तस्मात्कपोलकल्पितपारिभाषिकमात्रत्वाद्दृष्टान्ताभासत्वमेव । ननु "शुक्तौ ज्ञातायां रूप्यं तत्त्वतोज्ञातं भवति, साहि तस्य तत्त्वं, एवं ब्रह्मज्ञानात्सर्वं तत्त्वतोज्ञातं भवती"ति श्रीवाचस्पतिमिश्रैर्भामतीप्रबन्धे प्रतिपादनात् । किञ्च यथाघटकरकाद्याकाशानां महाकाशादनन्यत्वं, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं, दृष्टनष्टस्वरूपत्वात्, स्वरूपेणानुपाख्यत्वादेवमस्य भोग्यभोक्त्रादिप्रपञ्चस्य ब्रह्मव्यतिरेकेणाभावइति द्रष्टव्यमि "त्यादि श्रीभगवत्पादैर्भाष्यकारैरुक्तत्वात्कथं प्रलापइति चेन्न, एवं तर्हि ब्रह्मज्ञानेन ब्रह्मैव ज्ञातं भवतीत्यर्थ उक्तः स्यात् । तच्चायुक्तं, सर्वमिति साधारणश्रवणात्स्वस्य स्वहेतुत्वायोगात्, "येनाश्रुतमिति" श्रुतिगताश्रुतादिपदवैयर्थ्याच्च । किञ्च तत्त्वं नाम स्वासाधारणं स्वरूपं, स्वासाधारणधर्मोवा, नतु भ्रमाधिष्ठानं, श्रौतदृष्टान्तानां मृत्पिण्डादीनां घटाद्यधिष्ठानत्वाभावात्, अन्यथा रजतादिवत् घटादीनामपि बाधप्रसक्तेः बाधाभावान्यथानुपपतेरप्यत्र प्रामाण्यात् । एवं दार्ष्टान्तेऽपि ब्रह्मज्ञानात्प्रपञ्चाबाधदर्शनस्याप्यनध्यस्तत्वे मानत्वं बोध्यम् । अन्यथा शुक्तितत्त्वज्ञानाद्रूप्यनाशवद्ब्रह्मज्ञानात्सर्वनाशापत्त्या सर्वविज्ञानासम्भवादिति भावः । अपि च वाचारम्भणशब्दस्य मिथ्यार्थकत्वे योगरूढ्योरभावात्, वाचारब्धकाव्यादेर्मिथ्यात्वादर्शनात्, वागालम्बनमात्रमिति व्याख्यानेऽश्रुतकल्पनात्, त्वया नामधेयमित्यस्यापि नाम मात्रं ह्येतदिति व्याख्यात-

त्वेन पौनरुक्त्याच्च । ननु "कोभवानिति निर्देशोवाचारम्भोह्यनर्थक"इति स्मृत्या वाचारम्भशब्दस्य मिथ्यापरत्वदर्शनात्तथाऽत्रापि बोध्यमिति चेन्न, स्मृतावपि पूर्वोक्तरूढ्याद्यभावेन त्वदिष्टपरत्वाभावात् । तथा हि देहानां प्रकृत्युपादेयत्वेन प्राकृतत्वाविशेषात् "कोभवानिति निर्दशो"देहविषयकप्रश्नोऽनर्थकः प्रकृतेः स्वतन्त्रभिन्नतया निर्धारणरूपार्थशून्यः, किन्तु वाचारम्भोवाग्व्यवहारयोग्य इति स्मृत्यर्थः । अन्यथा शब्दमात्रस्यापि वागिन्द्रियारभ्यत्वसाम्यात् वाचेति वैयर्थ्यापत्तेः । अर्थासत्त्वेन वागादिप्रयोगस्य त्वयैवानुभूतत्वात्, न तु त्वदन्यैः कैश्चिदिति भावः । ननु वाचारम्भणनामधेयपदाभ्यां विचारासहत्वं विवक्षितं, तथा हि भूविकारस्य घटादेः स्वरूपविचारे विकारोमिथ्या भूःसत्या, तत्स्वरूपविचारे च साऽपि मिथ्या, तद्धेतुभूतापञ्चीकृतभूतान्येव सत्यानि, तत्स्वरूपविचारे च तेषामपि मिथ्यात्वं, किन्तु तत्परमकारणं ब्रह्मैव सत्यमिति मृत्तिकेत्येव सत्यमिति, सत्यमित्यत्र हेतुर्वाचारम्भणं विकारोनामधेयं वाङ्मात्रं विचारासहं, तस्मान्निर्विकारं ब्रह्मैव सत्यमिति चेन्न, विपरीतत्वात् । तथा च विकारस्य कारणात्पृथक्सत्त्वासिद्ध्या स्वतन्त्रसत्ताभावमेव बोधयति श्रुतिः, न तु स्वरूपेण मृषात्वम्, अन्यथा विचारासहत्वमात्रेण मिथ्यात्वकल्पनायां ब्रह्मणोऽपि "न सत्तन्नासदुच्यते" इति स्मृतेः सदसद्भ्यां विचारासहत्वेन मिथ्यात्वप्रसक्तेर्दुर्वारत्वात्, ब्रह्म मिथ्या, सदसद्भ्यां विचारासहत्वात्, तव मते पृथिव्यादिवदिति प्रयोगात् । किञ्च विकारोनामधेयमित्यत्र साक्षात्कण्ठरवेण विकारशब्दपाठादपि विवर्त्तासिद्धेः, यदि श्रुतेर्विवर्त्तोऽभिप्रेतः स्यात्तर्हि विकारइति मृत्पिण्डादिदृष्टान्तांश्च न श्रावयेत् । अपि तु भ्रान्तिर्नामधेयमिति ब्रूयात्, शुक्तिरजतादिदृष्टान्तांश्चोपन्यसेत् । नहि विवर्त्तकार्यं विकारोऽपि तु भ्रममात्रमन्यथा विवर्त्तएव न

स्यात् । किञ्च यदि नामरूपात्मकं कार्यमनृतमेव तर्हि वेदान्तशास्त्रस्य तद्विचारस्य चापि मृषात्वाविशेषेण तस्मात्सद्रूपब्रह्मभावापत्तिलक्षणमोक्षस्यापि कथमिव सिद्धिरिति मनीषिभिर्वैदिकम्मन्यैर्विचारणीयमेकाग्रमनसा, "कथमसतः सज्जायेते"ति श्रुतेः "साधनं चेदवश्यं च परमार्थास्तिता भवेत् । सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते" इति भट्टपादैरुक्तत्वाच्च ॥ १४ ॥

सू० भावे चोपलब्धेः । २।१।१५

वेदान्तपारिजातसौरभः ।

तदनन्यत्वं कारणसद्भावे कार्य्योपलब्धेः॥१५॥

वेदान्तकौस्तुभः ।

इतोऽपि कारणानन्यत्वं कार्य्यस्येत्याह —

भावे चोपलब्धेः ।

कार्य्यस्य कारणादनन्यत्वं कुतोऽवगम्यते? कारणसद्भावे च सति कार्यस्योपलब्धेः । "सन्मूलाः सौम्येमाः प्रजाः" इत्यादिश्रुतेः॥ १५ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वसत्यमपि प्रतिबिम्बं बिम्बस्य रेख्यारोपितोवर्णश्चार्थस्य वर्णदैर्घ्यादिकं नगोनागइत्यर्थभेदस्य शङ्खाविषं मरणस्य सवितृसुषिरादिश्चारिष्टादेः रज्जुसर्पोभयकम्पादेः स्वाप्निकः स्त्री-

सङ्गमः सुखस्य स्वाप्नोऽर्थः शुभाशुभयोः साधकं दृष्टम्, आह च भगवान्भाष्यकारः "नैष दोषः शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः, स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात् । तथा च श्रुतिः "यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शनः"इत्यसत्यस्वप्ननिदर्शनेन सत्यसमृद्धेः प्रतिपत्तिं दर्शयति, तथा प्रत्यक्षदर्शनेषु केषु चिदनिष्टेषु जातेषु न चिरमिव जीविष्यतीति विद्यादित्युक्ता, अथ "स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ती"त्यादिना तेन तेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यते इति दर्शयति, प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानामीदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते, ईदृशेनासाध्वागमः"इति "तथाऽऽकारादिसत्यात्तरप्रतिपत्तिर्दृष्टारेखानृतात्तरप्रतिपत्तेरि"त्यादिनेति चेत्तत्राह भगवान्सूत्रकारः —

भावे चोपलब्धेः ।

कारणस्य सद्भावे सत्येव कार्योपलब्धिर्दृष्टचरा । यथा मृदादिभावे एव घटादिकार्योपलम्भोनान्यथा, देशान्तरे कालान्तरे वा, तस्मात्सदेवोपादानं, उपादेयस्य तदनन्यत्वं च । ननु चाग्निकार्ये धूमे गोमयादिकार्ये वृश्चिकादौ चानन्यत्वं न दृश्यते, तत्रोच्यते, अग्निर्हि निमित्तकारणं पितेव पुत्रस्य, विनष्टेऽप्यग्नौ धूमस्थितिदर्शनात्, अग्निसंयुक्तार्द्रेन्धनाद्धि धूमोजायते गन्धैक्याच्चार्द्रेन्धकार्यमेव धूमः, वृश्चिकादौ चाद्यकारणपृथिवीद्रव्यत्वेनान्यत्वोपलब्धेः । नापि पूर्वोक्तव्यभिचारकल्पना युक्ता, सर्वत्र कारणस्य सत्त्वात् । तथा हि निमित्तकारणं पितेव व्याप्तेः प्रतिबिम्बे सत्त्वात् तज्ज्ञानस्यैव सतो बिम्बानुमितिजनकत्वाच्च न व्यभिचारः, रेखायाश्च वर्णे पदस्यार्थे दृष्ट

सङ्केतितत्वेन रेखास्मारितवर्णस्यैव बोधकत्वात्, रेखाभेदज्ञानवतामपि तथा बोधात्, दीर्घत्वादिकं वर्णगतं सत्यमेव, तार्किकमते नानादीर्घादयोऽनित्यावर्णाः, सिद्धान्ते तु नित्याएव, त्वन्मते त्वनित्याएव, शास्त्रयोन्यधिकरणे वेदानित्यत्वस्य त्वयाङ्गीकारात्, दीर्घत्वादिज्ञानस्यैव हेतुत्वेन मतान्तरेऽप्यनुपपत्त्यभावात्, शङ्कानिमित्तभयजन्यधातुव्याकुलतैव मरणहेतुर्नाविषं पुत्रमरणश्रवणवत्, भारतयुद्धादौ घटोत्कचादिभिः शक्तिविशेषात्सृष्टमर्थक्रियाकारिगजादिकं सत्यमेव, सवितृसुषिररज्जुसर्पज्ञानमेवारिष्टभयादिहेतुः सत्यप्यर्थे तदज्ञाने भयाद्यभावात्, स्वाप्नस्त्रीज्ञानस्यैव सुखहेतुत्वं, न तु तत्सङ्गमस्य तदज्ञानां तदभावात्, स्वाप्निकपदार्थानामपि परमात्मसृज्यत्वेन सत्कार्यजनकत्वात्, नासतः क्वापि कार्यकारित्वमिति भावः। किञ्चैकत्र सतएवान्यत्रारोपोनियतः स्वरूपेणासतः खपुष्पादेः क्वचिदप्यारोपादर्शनात्। नचारोपे तद्विषयकप्रतीतिमात्रमेवापेक्षितं, नतु विषयसत्त्वमपीति वाच्यं, असतः प्रतीतेरेवासम्भवात्। ननु शुक्तौ रजतप्रतीतिवत् रज्जौ सर्पप्रतीतिवच्च भेदप्रतीतेरपि दोषमात्रकारणमपेक्षितं, न विषयसद्भावइति चेन्न, त्वन्मते दोषमात्रकारणस्यापि तुच्छत्वसाम्येन ततः प्रतीतिरूपकार्योत्पत्तेरसम्भवात्, कार्यस्य कारणसत्तापेक्षत्वनियमात्। न चासत्यस्याप्यारोपितसर्पस्य भयकम्पादिजनकत्वदर्शनात् उक्तहेतोर्व्यभिचारइति वाच्यं, स्वरूपेणासतः कार्योत्पत्त्यनुकूलशक्तिमत्त्वाभावात्, आरोपितसर्पस्थलेऽपि सर्पज्ञानस्यैव भयादिहेतुत्वं नारोपितविषयस्येति पूर्वमेवोक्तम्, अन्यथा सर्पज्ञानाभाववतो बालस्य भ्रमोभयादिश्च भवेत्, ननु तदस्ति, प्रत्युत सत्यसर्पस्यापि बालै. स्वहस्तस्पर्शदर्शनात्। न चासतोऽपि रज्जुसर्पादेः स्वज्ञानजनकताइव भयकम्पादिजनकतापि किं न

स्यादिति वाच्यं, तत्रापि दोषस्यैव ज्ञानजनकत्वान्नारोपितविषयस्य । अन्यथाऽसत्यपि तमोदोषे रज्जौ सर्पज्ञानोत्पत्तिः केन वार्यते तवाभिप्रेतासतः कारणस्य विद्यमानत्वात् । एवं च मृगतृष्णाजलेन मृगादीनां तृष्णानिवृत्तिः, गुञ्जारोपिताग्निना शीतनिवृत्तिः, विषारोपितामृतेन मरणाभावः, शूद्रात् ब्राह्मण्यां जातस्य चाण्डालस्य ब्राह्मणत्वेन ज्ञातस्य वेदाधिकारः, तत्कृतयज्ञस्य ज्योतिष्टोमादेः स्वर्गादिजनकत्वम्, आरोपितात्मत्वादेश्च देहादेः श्रवणादितोमुक्तिः, स्वाग्निकयज्ञादेश्च स्वर्गादिप्राप्तिश्च स्यादिति भाव । तस्मात्सदेवोपादानमिति सिद्धम् ॥ १५ ॥

सू०सत्वाच्चावरस्य २।१।१६ ॥

वेदान्तपारिजातसौरभः ।

"ब्रह्म वा इदमग्रआसीदि"ति सामानाधिकरण्यनिर्देशेनावरकालीनस्य कार्य्यस्य कारणे सत्त्वात्तदनन्यत्वम् ॥ १६ ॥

वेदान्तकौस्तुभः ।

इतोऽपि तदनन्यत्वमित्याह—

सत्त्वाच्चावरस्य ।

"सदेव सौम्येदमग्रआसीदि"ति"ब्रह्म वा इदमग्रआसीदि"ति सामानाधिकरण्यनिर्देशादवरस्य

कार्य्यस्येदम्पदवाच्यस्य कारणे सत्त्वात्तदनन्यत्वं निश्चीयते ॥ १६ ॥

वेदान्तकौस्तुभप्रभा ।

तथैव कार्यमपि सदेवोत्पद्यते इत्याह—

सत्त्वाच्चावरस्य ।

अवरस्य कार्यस्य कारणे सत्त्वात् यत्र यस्याभावेन तत्ततः उत्पद्यते, यथाऽग्नेर्व्रीह्यङ्कुरादिः सिकताभ्यस्तैलमित्यर्थः । यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, तथा कार्यरूपं विश्वमपि त्रिषु कालेषु सत्त्वं न व्यभिचरतीति परैरपि तथैवोक्तेः । अन्यथा "सदेव सौम्येदमग्रआसीदात्मा वा इदमग्रआसीदि"त्यादाविदं शब्दगृहीतस्य कार्यस्य भूतकालीनसत्तायोगश्रवणस्य बाधात्, अत्यन्ताभावप्रतियोगिनोऽवस्तुत्वेन कालसम्बन्धासम्भवात् । ननु स्वाप्नरथादिसृष्टिदर्शने विषयस्य दुर्निरूपत्वेन मृषात्वं सुप्रसिद्धं, तद्वज्जाग्रत्प्रपञ्चस्यापि मृषात्वमेव । तथा च विषयासिद्ध्या तज्ज्ञानमपि मृषैवेति चेन्न, विषयस्य तत्रापि सत्त्वात् । तथा हि स्वाप्नपदार्थस्येश्वरसृज्यत्वेन याथात्म्यसद्रूपत्वात् आकाशादिवत् । एवं च तद्विषयकज्ञानयाथार्थ्यस्य विवादोनिरवकाशः । ननु यदि स्वाप्नसृष्टिः पारमेश्वरीया तर्हि तात्कालिकबाधोन स्यात्, तत्समीपवर्त्तिभिरन्यपुरुषैश्चानुभूयेत, नतु तदस्ति, तस्माज्जीवसृष्टिरेवातस्तन्मिथ्यात्वस्य सुतरां सिद्धिरिति चेन्न, तावदीश्वरसृष्टेः सर्वस्या अप्याकाशादिवद्बहुकालावस्थायित्वनियमोवक्तुं शक्यः, तत्सङ्कल्पानुसारित्वात्, तत्कार्यस्य तत्र कस्य चिदाकाशादेर्महाप्रलयावसानावस्थितिरितरस्य देवदत्तपुत्रादेर्यत्किञ्चित्कालावस्थायित्व-

नियमः कस्य चित्पदार्थस्य तात्कालिकोत्पत्तिविनाशयोगश्च प्रत्यक्षादिप्रमाणसिद्धः, तस्मात् स्थितिकालस्य तत्कर्त्तृपरमेश्वरसङ्कल्पाधीनत्वेन बह्वल्पकालावस्थानानियमान्नोक्तदोषावकाशः, । नापि समीपवर्त्तिभिरननुभूयमानत्वं मिथ्यात्वे नियामकं, देवदत्तादिमनोगतसुखदुःखादेरन्यैरननुभूयमानत्वेऽपि तस्य मिथ्यात्वाभावात्, तथा प्रकृतेऽपि बोध्यम् । नच मनोगतसुखादेर्जीवजन्यत्वामिति शङ्कनीयम् ईश्वरसृज्यत्वस्य श्रीमुखगीतत्वात् "सुखं दुःखमि"त्यारभ्य, "भवन्ति भावाभूतानां मत्तएवे"ति वाक्येन । किञ्च तत्तत्प्राणिपुण्यापुण्यानुरूपतत्तत्पुरुषानुभाव्यतावत्कालावस्थानानुकूलभगवत्सङ्कल्पसृष्टाएव, स्वाप्नपदार्थान जीवसृष्टास्तेषां बद्धावस्थायां सत्यसङ्कल्पत्वाभावात् । अन्यथा तेषां सुखमेव सर्वदा स्यान्नकदाचिदपि दुःखयोगः, जाग्रत्समयेऽपि स्वसङ्कल्पानुसारिणोसृष्टिं कुर्युः, न तु तथा दृश्यते, प्रमाणाभावादसम्भवाच्च । किञ्च "एषु जाग्रति कामं कामं पुरुषोनिर्मिमाणस्तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते, तस्मिन्लोकाः श्रिताः सर्वे तदुनात्येति कश्चने"ति स्वाप्नसृष्टिश्रुत्युक्तलिङ्गानि न कथमपि जीवात्मन्यन्वेतुं शक्यानि परमेश्वरासाधारणधर्मत्वाद्विशेषार्थस्तु तृतीयाध्याये तत्प्रकरणे वक्ष्यते, तस्मात्परमेश्वरसृज्याएव स्वाप्नपदार्था इति सिद्धम् । किञ्च तत्कार्यकारित्वान्यथानुपपत्तिरपि तत्सत्यत्वे मानत्वेनानुसन्धेया, किञ्च ब्रह्मणः सर्वकारणत्वान्यथानुपपत्तिश्चापि स्वाप्नपदार्थानां तत्सृज्यत्वे प्रमाणम् । ननु ब्रह्मणः सर्वोपादानत्वाऽनुपपत्तिः तथा ह्यचेतनस्य परिणामिसत्तायोगाद्भवतु तत्कारणत्वं ब्रह्मणः, चेतनस्य तु कूटस्थसत्ताश्रयत्वेन जन्माद्यसम्भवात् कथं तत्कारणत्वमन्यथाऽनित्यत्वापतेः । प्रत्यगात्मानोऽनित्याः जन्मादिमत्त्वात् घटादिवदिति प्रयोगात् "न जायते म्रियते वा विपश्चिदि"त्यादि शास्त्रव्याकोपात् कृतना-

शादिप्रसङ्गाच्चेति चेन्न, प्रामादिकोक्तेः, स्नानादिकर्मणां मध्ये फलं दातुमुन्मुखस्य प्रबलस्यैकतमस्य कर्मविशेषस्य फलानुभूतये तदनुकूलदेहादिसंयोगे सति तद्भोगार्हज्ञानशक्त्यादिविकाशस्य जीवजन्मपदार्थत्वात् अत्यन्तविस्मृतिपूर्वकस्थूलदेहादिवियोगेन भोगाद्यनर्हतापत्तेश्च मृत्युनाशादिपदार्थत्वान्नोक्तदोषावकाशः । वस्तुनस्तु अस्याः शङ्कायाउन्मत्तप्रलापत्वमेव । श्रुतेस्तावत्सर्वकार्यं प्रत्येव ब्रह्मणः कारणत्वप्रतिपादकत्वेन जीवे तत्प्रसङ्गाभावात्, यदि प्रत्यगात्माकार्यं स्याद्ब्रह्मणश्च तदुपादानत्वाभावे सर्वकारणत्वे न्यूनताप्रशक्तिः स्यान्नतु तदस्ति, तस्यानाद्यनन्तकूटस्थत्वश्रवणादिति भावः । ननु "अनादिनिधनानित्ये"ति वेदस्याप्यनाद्यनन्तत्वश्रवणात्तत् कारणत्वं ब्रह्मणोऽनुपपन्नं, तथात्वे च ब्रह्मणः समस्तकारणत्वेऽव्याव्याप्तिरिति चेन्न, तस्यापि निःश्वसितन्यायेनाविर्भावकारणत्वस्य ब्रह्मगतत्वेनोक्तदोषानवकाशात्, "अस्य महतोभूतस्य निःश्वसितमेतद्यद्ऋग्वेदोयजुर्वेदसामवेद" इति श्रुतेरुक्तन्याये मानत्वात् । "तस्माद्यज्ञात्सर्वहुतऋचः सामानि जज्ञिरे" इति श्रुतेश्च तदाविर्भावे मानत्वात् । "वेदानां जन्मादयस्तु निर्विकारित्वेनैवाविर्भावतिरोभावमात्रत्वं, नत्वानुपूर्व्यन्यथाभाव" इति - सिद्धान्तुसेतुकायां - "श्रीसुन्दरभट्टपादोक्तेः" । अचेतनप्राकृतवर्गस्याकाशादेस्तु परिणामिसत्ताकत्वेन स्थूलसूक्ष्मावस्थान्तरव्यक्ताव्यक्तनामरूपान्तरविभागेनावस्थितिरेवोत्पत्तिलयशब्दाभ्यां प्रतिपाद्यते, नतु तार्किकवत् असतोजन्मनाशौ शशशृङ्गादावतिप्रसङ्गात्, नाप्यन्येषामिवारोपापवादौ श्रुतिप्रमाणशून्यत्वादिति संक्षेपः । एवं मिथ्यात्वे प्रमाणासिद्धया कार्यं सदेव स्वोपादानब्रह्मापृथक्सिद्धं चोपादानात्मकत्वादुपादेयमात्रस्येति सिद्धम् "सदेव सौम्य ! एतदात्म्यमित्यादि"श्रुतेरिति राद्धान्तः । "सदसच्छब्दयोः पञ्चमहाभूतपरत्वस्य श्रुत्यैव कण्ठरवेणव्याख्यातत्वात् "यदन्यद्वा-

योरन्तरिक्षाच्चैतत्सद्वायुरन्तरिक्षं चासदि"ति श्रुतेः। अन्यथा "न सत्तन्नासदुच्यते"इति स्मृत्याऽऽत्मनोऽप्यनिर्वचनीयत्वप्रसङ्गा दितिपूर्वमेवोक्तमत्र विस्तरेण ॥ १६ ॥

सू० असद्व्यपदेशान्नेति चेन्न धर्म्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च २।१।१७॥

वेदान्तपारजातसौरभः।

"असद्वाइदमग्रआसीदि"त्यसद्व्यपदेशात्कार्य-स्य सृष्टेः प्राक् न सत्त्वमिति चेन्न, सूक्ष्मत्वेन तादृग् व्यपदेशोऽस्ति। कुतोऽवगम्यते ? "तत्स-दासीदि"तिवाक्यशेषात्। यद्यसदेव कार्यमुत्प-द्यते तर्हि वन्ध्येर्यवाद्यङ्कुरोत्पत्तिः कुतो नास्तीति युक्तेः "सदेव सौम्येदमग्रआसीदि"ति शब्दान्तराच्च ॥ १७ ॥

वेदान्तकौस्तुभः।

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च।

ननु सत्कार्य्यवादोन युक्ततरः, कुतः ?

"असद्वाइदमग्रआसीदि"त्यादिनोत्पत्तेः प्रागसत्त्वव्यपदेशादिति चेन्न,कुतः? धर्मान्तरेण तादृशव्यपदेशात् । अभिव्यक्तनामरूपत्वलक्षणाद्धर्मादनभिव्यक्तनामरूपत्वलक्षणं धमान्तरं, तेन धर्मान्तरेण"असद्वाइदमग्रआसीदि"ति जगद्व्यपदिश्यते, नासत्स्वरूपतोऽभिधीयते। नन्वेवं कुतोऽवगम्यते ? इत्यत्रोच्यते, वाक्यशेषादिति। वाक्यशेषे हि "तत्सदासीदि"ति तत्पदेन प्रकृतपरामर्शोऽस्ति, ततः उपक्रमगतोऽसच्छब्दोऽनभिव्यक्तनामरूपभूत—सूक्ष्मवस्तुवाचकइति गम्यते । कार्यस्य सत्त्वे हेत्वन्तरमाह, युक्तेरिति। युक्तेरपि कार्यस्य सत्त्वं निश्चीयतइत्यर्थः । का सा युक्तिर्यया सत्त्वं निश्चीयते कार्यस्य, इत्यत्रोच्यते, अस्मत्पक्षे सर्वं नामरूपं प्रत्यक्षादिप्रमाणगम्यं सत्यमेवोपलब्धेः । सद्रूपत्वान्मृत्पिण्डात्कर्त्रा घटः संपाद्यते, तत्र मृत्पिण्डस्येव घटस्यापि सत्त्वं प्रत्यक्षतोऽवगम्यते । अतः कारकव्यापारोऽपि सार्थकोभवति। ननु मृत्पिण्डवद्घटस्य सत्त्वात्कारकव्यापारोऽनर्थकइति चेन्न, तस्याभिव्यक्त्यर्थत्वात्। प्रागनभिव्यक्तोऽपि घटोऽभिव्यक्तः क्रियतेऽतोन कारकव्यापारोऽनर्थकः ।

वेदोक्तानि नामरूपाणि यथा पूर्वाणि व्यवह्रियन्ते, नास्मत्पक्षे नामरूपव्यवहारोऽभूत्पूर्व इति बोध्यम् । असत्कार्य्योत्पत्तिस्तु न सङ्गच्छते, अग्नेः सकाशाद्यवाङ्कुरोत्पत्त्यदर्शनात् । नच तत्र तादृशकार्यजनने शक्तिर्नास्ति, विस्फुल्लिङ्गोत्पादनशक्तिरस्तीति वाच्यम्, परिज्ञातपरिमाणात्सुवर्णादेरुत्पन्ने कार्येऽधिकस्य परिमाणान्तरस्या*नुपलब्धेः । तथा अग्निविकारभूतास्तत्कणाः§ प्रत्यक्षप्रमाणगम्याः सर्वैरुपलभ्यन्ते । कपोलकल्पिताभूतपूर्ववस्तूत्पादकशक्तिवादे प्रमाणाभावात् । तस्मादसत्कार्यवादोऽयुक्तः, कारकव्यापारोऽपि तन्मतेऽनर्थकः, घटार्थमृत्खननमर्दनारोपणादिकारकव्यापारस्योपादाना×दविषयत्वात् उपादानाभावे किमाश्रित्य कर्त्ता तथा कुर्यात्, कार्यस्य घटादेस्तदानीमनुत्पन्नत्वात् । विनापि मृत्पिण्डं व्यापारमात्रेण घटोत्पत्तिप्रसङ्गाच्चेति

---

* असत्कार्योत्पत्तिवादिपक्षे तु सुवर्णपरिमाणात्कुण्डलादि परिमाणस्य पार्थक्यापत्तिः स्यादितिभावः ।

§ नहि काचित्शक्तिरग्निभिन्नान्कणानुत्पादयतीतिभावः ।

× उपादानविषयत्वात्, इत्यपि पाठः ।

सुधीभिश्चिन्त्यम् । अत्र बहुविधोविवादोमुमुक्षुपरिश्रमभयान्नोद्घाट्यते । प्रकृते तु जगत्कारणस्य ब्रह्मणोऽनन्तशक्तिमत्त्वात्सर्वमनवद्यम् । पुनः कार्यस्य सत्यत्वे हेत्वन्तरमाह, " शब्दान्तराच्चेति " पूर्वोदाहृतात् "असद्वाइदमग्रआसीदि"त्यस्माच्छब्दादन्यः सुष्ठुसत्कार्यबोधकः शब्दः शब्दान्तरः, "सदेव सोम्येदमग्रआसीदि"ति तस्मादपि सदेव कार्यमुत्पद्यते इत्यर्थः ॥ १७ ॥

वेदान्तकौस्तुभप्रभा ।

ननु माऽस्तु कार्यस्याध्यस्तत्वासिद्ध्या मिथ्यात्वमनिर्वचनीयत्वे प्रमाणाभावात्, किन्त्वसत्त्वमेवास्तु प्रपञ्चस्य, तत्र श्रुतिप्रमाणस्य सत्त्वादित्याक्षिप्योतिष्ठन्त्यसत्कार्यवादिनोवैशेषिकादयः—

असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्ततराच्च ।

तथा चायं तेषामभिप्रायः कार्यमसदेव कारणवैलक्षण्यात् । तथा हि नहि कार्यकारणविषयकज्ञानस्यैकरूपत्वनियमः शब्दभेदात्, घटः पटइति शब्दात्कार्यप्रत्ययः. मृत्तन्तव इति शब्दात्कारणप्रत्ययः, जलाहरणादिदेहाच्छादनादिच घटपटादेः कार्यस्य फलं कुड्यनिर्माणादि रज्जुनिर्माणादि च मृत्तन्त्वादिकारणस्य फलम् । नहि घटादिना कुण्डयनिर्माणादिसम्भवोनाऽपि मृदादिना जलाहरणादिसम्भवश्चेत्यन्वयव्यतिरेकेण फलभेदाच्च । कालभेदा-

दपि प्राक्कालीनं कारणमुत्तरकालीनं च कार्यं आकृतिसङ्ख्या भेदाच्च पिण्डाकारमेकसङ्ख्याकं च कारणं, कम्बुग्रीवपृथुवृत्तोदराकारमनेकसङ्ख्याकं च कार्यं किञ्च कार्यस्य सत्त्वे कारकव्यापारवैयर्थ्याच्चेत्यादिभ्योहेतुभ्यः कार्यस्यासत्त्वमिति तात्पर्येण शङ्क्यते कणभक्षादिभिः । ननु "असदेवेदमग्रआसीत्, असद्वाइदमग्रआसीदि"त्यादिश्रुतिभिः कार्यस्योत्पत्तेः प्राक्कालेऽसत्त्वव्यपदेशात्कथं सत्त्वमिति चेत्तत्रोतरमाह भगवान्सूत्रकारः । नेति । प्रागपि कार्यस्यासत्त्वं व्यपदिश्यते इति नाशासनीयम् । तत्र हेतुमाह, धर्मान्तरेणेति । अभिव्यक्तनामरूपात्सत्त्वधर्माद्धर्मान्तरमनभिव्यक्तनामरूपमसत्त्वं, तेन योगादियं श्रुतिरसत्त्वं व्यपदिशति । नतु स्वरूपासत्त्वं, सत्त्वासत्त्वे हि द्रव्यधर्मौ अनभिव्यक्तनामरूपकमतिसूक्ष्ममासीदित्यर्थः । तत्र हेतुः । वाक्यशेषादिति । उपक्रमे जाते संशये वाक्यशेषाद्विनिर्श्चीयते तात्पर्यमिति प्रेक्षावतां प्रक्रिया, यथा "अक्ताशर्कराउपदध्यादि"त्युपक्रमे केनाक्ताइति सन्देहे तेजोवै घृतमिति वाक्यशेषादघृतेनेति निश्चयः । एवमत्राप्युपक्रमे "असदेवेदमग्रआसीदि"त्यादिना असदिति निर्दिष्टे तस्यैव पुनः "तत्सदासीदि"ति वाक्यशेषेण तच्छब्देन परामृश्य, सत्त्वाभिधानादसत्त्वसंशयं वारयति । असतः कालत्रयसम्बन्धायोगात्तथात्वे चासीदिति प्रयोगानुपपत्तेः, सच्छब्देन परामर्शानुपपत्तेश्च, अपिच "असद्वाइदामेत्यत्रापि "तदात्मानं स्वयमकुरुते "ति वाक्यशेषे विशेषश्रवणान्न स्वरूपासत्त्वं, किन्त्वव्यक्तनामरूपकत्वादतिसूक्ष्मं वस्त्वसच्छब्देनोच्यतइत्यर्थः । तस्मात्कार्यं सदेवोपलभ्यमानत्वात्, नह्यत्यन्तासतः खपुष्पादेः क्वाप्युपलब्धिर्दृष्टा चोपपन्ना वा । यदुक्तं कारणवैलक्षण्यादिति कार्यासत्त्वेहेतुः सोऽपि स्वरूपासिद्धत्वेनाभासरूपएव । नहि कारणान्वयहीनं कार्यं क्वाप्युपलभ्यते, नापि कालभेदात्तयोरत्यन्तभेदोवक्तुं शक्यः तस्यावस्था-

भेदविषयकत्वान्न द्रव्यपरत्वमसम्भवात्, कारणावस्थाभेदेनैवाकार-सङ्ख्याफलादिभेदस्याप्युपपद्यमानत्वेनोक्तदोषायोगात् । अन्यथा बालस्याप्यवस्थाभेदेन स्वरूपभेदोङ्गीक्रियतां, तर्कनिपुणैस्तथात्वे च योऽहं पितुरुत्सङ्गेऽक्रीडं सोऽहं वृद्धो बालांल्लालयामीति प्रत्यभिज्ञानुपपत्तेः, कृतनाशाकृताभ्यागमप्रसङ्गाच्च । नापि तस्य भावे कारकव्यापारवैयर्थ्यं, पूर्वानभिव्यक्तस्याभिव्यञ्जनेनैव तस्य सार्थक्योपपत्तेः । अन्यथाऽसतोऽभिव्यक्त्यङ्गीकारे कारकादिव्यापारेणाग्नेर्यवादीनां, जलमन्थनात् घृतादेः, सिकताभ्यस्तैलस्याप्यभिव्यक्तिप्रसङ्गात् । किन्त्वसत्कार्यवादिनामपि कारकव्यापारोऽनुपपन्नएव । प्रागुत्पत्तेः कार्यस्यासत्त्वेन कार्यादन्यत्रैव कारकव्यापारेण भवितव्यं, तत्रान्यत्वाविशेषात्तन्तुगतकारकव्यापारेण घटादीनामुत्पत्तिप्रसङ्गादित्यर्थः । तस्मान्नासत्त्वं कार्यस्येति भावः । किञ्च युक्तेः शब्दान्ताच्चेति हेतुद्वयेन कार्यस्य सत्त्वं निश्चीयतइत्यक्षरार्थः । तत्र युक्तिर्नाम अनुपपत्तिनिरासेनोपपत्ति समर्थनेन वस्तुनिर्णायकत्वाग्विसर्गः । तथा हि यद्यसदेव कार्यं तर्हि दध्यर्थिभिः क्षीरस्यैव घटार्थिभिर्मृदएव च ग्रहोन स्यात्, प्रत्युत विपर्ययश्च स्यात्, दध्यर्थिभिर्मृदादिग्रहः, घटार्थिभिश्च क्षीरादिग्रहः स्यादसत्त्वाविशेषात्सर्वत्र, नतु तदस्ति, तस्मान्न तथा, अतः कारणे व्यक्ताव्यक्तोभयावस्थायां कार्यस्य सद्भावः स्थूलसूक्ष्मव्यवस्थया सदसत्पदाभ्यां श्रुत्या व्यपदिश्यते इत्यर्थः । अन्यथा सर्वत्र सर्वाभावाविशेषेणाग्न्यादेरप्यङ्कुराद्युत्पत्तिः कथं न जायते ? ननु साम्येऽप्यसत्त्वे क्षीरे एव दधिघृतादेः काश्चिदतिशयोन मृदादौ मृद्येव घटस्य कश्चिदतिशयोन क्षीरादाविति चेन्न, अतिशयाङ्गीकारे प्रागवस्थायामसत्कार्यवादहानिः, सत्कार्यवादसिद्धिश्च, तव श्रीमुखे-

नैव सिद्धेति । नच सत्कार्यवादे कारकव्यापारवैयर्थ्यं शङ्क्यं, तस्य पूर्वमेव निरस्तत्वात्, कारणस्य कार्याकारव्यवस्थापकत्वेनैव तस्य सार्थकत्वात् । कारणमेव हि कार्याकारं प्रतिपद्यमानं कार्यमित्युच्यते कार्याकाराणां कारणात्मकत्वनियमात् "ऐतदात्म्यमिदं सर्वमि"ति श्रुतेः "वासुदेवात्मकान्याहुरि"ति स्मृतेश्चेत्यादियुक्ते कार्यस्य प्रागुत्पत्तेः सत्त्वनिश्चयात् । किञ्च शब्दान्तराच्चेति सत्त्वनिश्चयइति योज्यं पूर्वोदाहृतादसत्प्रतिपादकादसच्छब्दादन्यस्तद्विपर्ययप्रतिपादनपरः शब्दः शब्दान्तरः "सदेव सौम्येदमि" त्यादिस्तस्मादपीति यावत् । यद्वा "तद्धैके आहुः असदेवेदमग्रआसीदि"त्यसद्व्यपदेशपरस्ततोवैलक्षण्यपरः "कथमसतः सज्जायेते"ति शब्दान्तरस्तस्मादप्युत्पत्तेः प्राक्कार्यस्येदंशब्दाभिधेयस्य सत्त्वनिश्चयात् । अन्यथा तस्येदंशब्दव्यपदिष्टस्य कार्यस्य सच्छब्दवाच्येन कारणेन सह श्रूयमाणसामानाधिकरण्यस्यासम्भवोदुर्वारः, सदसतोरितरेतरात्यन्तविरुद्धयोः सामानाधिकरण्यसम्भवात् । एतेन "स्थाणुरेव चौर"इतिवत् "सर्वं खल्विदं ब्रह्मे"ति जगत्कारणयोः सामानाधिकरण्यं सूपपन्नमित्युक्तिर्निरस्ताऽश्रौतत्वादन्यथाऽसत्कार्यवादप्रसङ्गात्, । स्थाणुचौरयोरुपादानोपादेयत्वाभावेन दृष्टान्तासिद्धेश्च "तज्जलानिती"ति वाक्यशेषात् । एतेन कार्यकारणयोरत्यन्तभेदपक्षोऽपि निरस्तः । अत्यन्तभिन्नयोर्गोवाश्वयोरिव सामनाधिकरण्यासम्भवात् "गौरनाद्यन्तवती ऊर्ध्वमूलोऽर्वाक्शाखएषोऽश्वत्थः सनातनः, तत्सदासीत्, अथ नामधेयं सत्यस्य सत्यं प्राणावै सत्यं, अथैनमाहुः सत्यकर्मेति, सत्यं ह्येवेदमसौ सृजते, अदृष्टरूपामजां ध्रुवामि"त्यादिश्रुतिभ्यः "ऊर्ध्वं मूलमधः शाखमि"त्यादिस्मृतेश्च । ननूक्तश्रुत्यादीनां भेदपराणां व्यावहारिकसत्तापरत्वेन नैराकांक्ष्यान्न पारमार्थिकत्वमभेदपरश्रुत्यादीनां तु परमार्थसत्त्वपरत्वात्प्राबल्यमिति चेन्न, कपोलकल्पनां

विना प्रमाणान्तराभावात् । नच* षड्लिङ्गोपेतत्वेन प्राबल्यमिति वाच्यं, भेदपरश्रुत्यादीनामपि तथात्वस्य पूर्वाचार्यैः प्रतिपादित-त्वाद्विस्तरभियाऽत्रोपरम्यते । नचाभेदपराणां निरवकाशत्वेन प्राबल्यं, भेदपराणामपि तथात्वात् । नच तद्विषयभेदस्य प्रत्यक्षप्राप्तत्वेन तासामनुवादपरत्वमिति वाच्यं, निर्विशेषाधि-ष्ठानरूपसत्तायाअभेदशास्त्रविषयाया अपि घटोऽस्ति घट स्फूरति पटोऽस्तीति प्रत्यक्षप्राप्ततयाऽभेदश्रुतीनामपि तदनुवादपरत्वसा-म्यात् । किञ्चाभेदश्रुतिगम्यं निर्विशेषाद्वितीयं ब्रह्म तासां विष योन वेति ? नाद्यः, तस्य पदार्थत्वेन भेदशास्त्रवदभेदश्रुतीनामपि व्यवहारपरत्वं भवतां श्रीमुखेनैव सिद्धं, निर्विशेषाद्वितीयं ब्रह्म व्यावहारिकमभेदश्रुतिविषयत्वात्पदार्थत्वाच्च, तव मते व्योमा-दिवदिति प्रयोगात् । नाद्वितीयः, इदमर्थत्वेन शब्दादिप्रमाणा-गोचरे भेदशास्त्रवदभेदशास्त्रस्यापि व्यवहारविषयत्व सूपपन्नम् । किञ्च सर्वप्रमाणाविषयस्य शशशृङ्गायमाणत्वेन द्वितीयपरशास्त्र-स्यापि निर्विषयत्वेन बाधप्रसक्तेर्दुर्वारत्वात् । तव पक्षेऽभेद-शास्त्रस्य निर्विषयत्वेनैव बाधः । अस्मत्पक्षे तस्य सर्वज्ञसर्वशक्ते-र्विश्वकारणास्यैक्यप्रतिपादनपरत्वेनैव नैराकाङ्क्ष्यान्नोक्तदोषयोगः इत्यलं विस्तरेण । ननु यदि विवर्त्तपक्षानङ्गीकारस्तर्हि कोवापक्षो-ऽभिप्रेतः सङ्घातवादोवा ? आरम्भवादोवा ? परिणामवादोवा ? इति, नाद्यः, बाह्यपक्षप्रवेशात् । न द्वितीयः, तार्किकपक्षाबलम्बनप्रसङ्गात् । नापि चरमः, आनुमानिकसाङ्ख्यमतप्रवेशात्, पक्षान्तराभावा-च्चेति चेन्न, चरमपक्षस्यैवास्मदभिप्रेतत्वात्सूत्रकाराभिमतत्वाच्च,

---

* उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् ।
अर्थवादोपपत्तिश्च लिङ्गं तात्पर्यनिर्णये ॥ १ ॥

आत्मकृतेः परिणामात् । "स्वयमात्मानमकुरुते"ति श्रुतिसूत्राभ्यां, ननु आकाशकल्पस्य विभोर्वस्तुनः परिणामोऽसम्भवएव । तथा च ब्रह्म परिणामानर्हं भवितुमर्हं विभुपरिमाणाकत्वात्, निरवयवत्वाच्चाकाशवत्, इति चेन्न, परिणामस्वाभाव्यात् क्षीरवत् सर्वज्ञत्वात्सर्वशक्तिमत्वाच्च स्वेच्छयापरिणामयेदात्मानमिति शक्यते वक्तुं, ननु सावयवस्यैव क्षीरादेः परिणामदर्शनान्निरवयवस्येति तादवस्थ्यमेवास्य दोषस्येति चेन्न, क्षीरपरमाणवादौ तद्व्यभिचारात् । तथा हि नहि सावयवत्वं वस्तुपरिणामे प्रयोजकमपि तु वस्तुगता तादृशी शक्तिरेव । अन्यथा जलस्यापि सावयवत्वाविशेषेण दधिभावे परिणामापत्तेर्दुर्वारत्वात्, क्षीरावयवानां निरवयवत्वाच्च । अयम्भावः द्रव्यपरिणामेऽवयविगता शक्तिः कारणावयवगता वा ? नाद्यः, नहि द्रवद्रव्ये व्यतिरिक्तस्यावयवित्वं त्वयाऽभ्युपगम्यते । द्वितीये तु क्षीरावयवाः सावयवा?निरवयवावेति ? आद्ये, अनवस्थापत्तिः क्षीराब्धिः कुण्डे स्यादवयवानामानन्त्यात्, तस्मान्निरवयवाएवेत्यकामेनापि त्वयाऽभ्युपगन्तव्याः । एवं निरवयवस्य परिणामाभाववत्त्वनियमभङ्गात् विरुद्धोहेतुर्निरवयवत्वादिति, नापि विभोः परिणामाभावनियमः आकाशस्यापि वाय्वात्मना शब्दात्मना च परिणामदर्शनात् । "आकाशाद्वायुरि"ति श्रुतेः । एतेन द्वितीयस्यापि हेतोः सत्प्रतिपक्षत्वं दृष्टान्तविकलत्वं चोक्तं भवति । तथा च ब्रह्मपरिणामयोग्यं विभुत्वादाकाशवदिति, नच तस्यापि सावयवत्वं जन्यत्वादिनावगम्यते इति वाच्यं, अपश्चीकृतस्यात्र विवक्षितत्वात् । "आकाशवत्सर्वगतश्च नित्यः"इति श्रुतेः । ननु स्यादेतन्निरवयवस्यापि विभोस्तादृशशक्तियोगादेव परिणामस्तथापि तत्र कृत्स्नस्य ब्रह्मणः परिणामोऽभिप्रेत, ? तदेकदेशस्य वा ? आद्ये, सर्वस्यापि परिणतत्वान्मुक्तोपसृप्यब्रह्माभावप्रसङ्गः विकारित्वानित्यत्वप्रशक्तिश्च,

तथात्वे "नित्यं विभुं सर्वगतमि"त्यादिश्रुतिव्याकोपश्च । किञ्च विकारापन्नस्य कृत्स्नस्य ब्रह्मणोजगदाकारतया प्रत्यक्षगोचरत्वेन सर्वेषामपि प्राप्तत्वात् सर्वमोक्षप्रसङ्गः, साधनतत्प्रतिपादकशास्त्रतदुपदेष्टृणामानर्थक्यं च, न द्वितीयः, सदेशत्वापत्त्या सावयवत्वयोगेन "निष्कलं निष्क्रियं शान्तमि"त्यादिनिरवयवत्वप्रतिपादकशास्त्रव्याकोपाच्चायोग्यएव परिणामपक्षइति चेन्न, उदाहृतेष्वाकाशादिषु निरवयवत्वविभुत्वसाम्येऽपि निर्विकारित्वदर्शनेन निर्दोषत्वात् । तस्मान्निरवयवस्यापि विभोर्ब्रह्मणः परिणामेऽपि तादृशशक्तियोगादेवाविकारित्वमपीति ध्येयं, सोऽयं परिणामोन्यग्रोधधानादृष्टान्तेन षष्ठे*श्रुत्या वर्णितः । वस्ततस्तुशक्तिविक्षेपस्यैव परिणामशब्दवाच्यत्वाद्ब्रह्मस्वरूपपरिणामानभ्युपगमएवेति पूर्वमेवोक्तम् ॥ १७ ॥

सू०पटवच्च । २।१।१८ ॥

वेदान्तपारिजातसौरभः ।

यथा च पूर्वं संवेष्टितः पश्चात्प्रसारितः पटस्तद्वद्विश्वम् ॥ १८ ॥

वेदान्तकौस्तुभः ।

पटवच्च ।

यथा च संवेष्टितः पटः पटत्वेनागृह्यमाणो-

---

*छान्दोग्ये षष्ठे प्रपाठके ।

ऽपि नासद्भवति, किन्तु प्रकारान्तरेण स्थितः सदेव भवति, पुनः प्रसारितस्तु पटत्वेन गृह्यते। एवं खलु सृष्टेः प्रागनभिव्यक्तनामरूपत्वाद्विश्वत्वेनागृह्यमाणमपि विश्वं सदेव भवति। सृष्टेवेलायामभिव्यक्तनामरूपत्वात्स्पष्टमिदं विश्वं गृह्यते इत्यर्थः। यथा च कूर्माङ्गानि सङ्कुचितानि सद्रूपाण्यपि न दृश्यन्ते, एतावता नासद्रूपाणि भवन्ति, पुनः प्रसार्यमाणानि गृह्यन्ते। यथा च बीजे सूक्ष्मरूपेण सदेव स्थितोन्यग्रोधः स्थूलत्वेनाविर्भवति, एवमिदं जगत्सदेव जायते। "प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः। एवं भूतानि भूतात्मा सृष्ट्वा संहरते पुनः" इति महाभारतात् "न्यग्रोधः सुमहानल्पे यथा बीजे व्यस्थितः। संयमे विश्वमखिलं बीजभूते तथा त्वयी"ति विष्णुपुराणात् ॥ १८ ॥

वेदान्तकौस्तुभप्रभा।

एवं च न कश्चन दोषइत्यादितात्पर्यं बुद्धौ कृत्वा सूत्रयति भगवान्बादरायणः —

पटवच्च।

यथा सङ्कुचितः पटः पटत्वेनागृह्यमाणोऽपि पटएव, प्रसारणे

तु स्पष्टं प्रत्यक्षतया गृह्यते, तथा तिरोभावसमयेऽनभिव्यक्तं विश्वं नामरूपाभ्यामगृह्यमाणमपि सदेवाविर्भावसमये तु प्रत्यक्षागमादिना स्पष्टं नामरूपाभ्यां गृह्यते इति सूत्रार्थः । तथोक्तं वैष्णवे श्रीध्रुवेण "न्यग्रोधः सुमहानल्पे यथा बीजे व्यवस्थितः । संयमे विश्वमखिलं बीजभूते तथा त्वयि ॥ बीजादङ्कुरसम्भूतोन्यग्रोधः ससमुत्थितः । विस्तारं च यथा याति त्वत्तः सृष्टौ तथा जगदि"त्यादिना ॥ १८ ॥

सू० यथा च प्राणादिः २।१।१९॥

वेदान्तपारिजातसौरभः ।

यथा च प्राणापानादिवायुः प्राणायामादिना निरुद्धः स्वरूपेणावतिष्ठते, विगतनिरोधश्चाञ्जसा तत्तद्रूपेणावगृह्यते तथेदमपि ॥ १९ ॥

वेदान्तकौस्तुभः ।

यथा च प्राणादिः ।

यथा च खलु तद्वत्सृष्टेः निरुद्धोहि प्राणापानादिवृत्तिर्वायुः प्राणापानादिविशेषरूपेणागृह्यमाणोऽपि सदेव भवति, ततोसुक्षायान्श्च तत्तद्विशेषरूपेण स्पष्टतया गृह्यते, तद्वत्सृष्टेः प्राग्नभिव्यक्तनामरूपं कार्यं तत्तन्नामरूपाभ्यामगृह्यते

इत्यर्थः । तस्माद्ब्रह्मोपादानकत्वाद्ब्रह्मवत्सत्यं, ब्रह्माभिन्नत्वेऽपि ब्रह्माभिन्नं जगदिति सिद्धम् ॥ १६ ॥

इत्यारम्भणाधिकरणम् ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

उक्तसिद्धान्तासिद्धये तदुपोद्बलनरूपं दृष्टान्तान्तरमाह भगवान्सूत्रकारः —

यथा च प्राणादिः ।

यथा प्राणायामसङ्कुचितशक्तिः प्राणः प्राणापानादिना विशेषरूपेणागृह्यमाणोऽपि सूक्ष्मसद्रूपप्राणापानादिविशेषवानेव । मुक्तायामस्तु तत्तद्विशेषरूपेणाकुञ्चनप्रसारणादिकार्यान्वथानुपपत्त्या स्पष्टं गृह्यते, तद्वत्सृष्टेः प्राक् अनभिव्यक्तनामरूपकं कार्यं तत्तन्नामरूपाभ्यामगृह्यमाणमपि स्वोपादाने सदेव, सृष्टिसमये तु व्याकृतनामरूपत्वात् स्पष्टं गृह्यतइत्यत्तरार्थः । ननु कार्यस्य सत्त्वमनुपपन्नं, तथाहि । "सदेव सोम्येदमग्रआसीदेकमेवाद्वितीयं, नेह नानास्ति किञ्चन, मृत्योः समृत्युमाप्नोति, यइह नानेव पश्यती"त्यादिश्रुतिभिः सावधारणाभिरन्वयव्यतिरेकेण कारणैकत्वनिश्चायिकाभिः कारणेतरवस्तुमात्रस्य निषिध्यमानत्वान्मृषात्वमेव, तस्माद्रज्जुज्ञानेन सर्पादिबाधवत् ब्रह्मात्मत्वज्ञानेन शारीरत्वस्य बाधे तत्कृतसर्वव्यवहारस्यापि बाधः स्यादिति, "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतेः । तथैवाह च भगवान्भाष्यकारः, "मृत्तिकेत्येव सत्यमि"ति, प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात् वाचारम्भणशब्देन च विकारजातस्यानृतत्वाभिधानात् । दार्ष्टान्तिकेऽपि "ऐतदात्म्यमिदं सर्वं तत्सत्यमि"ति च परमकारणस्यैकस्य सत्यत्वावधारणात् ।

"सआत्मा तत्त्वमसि श्वेतकेतो!" इति च शारीरस्य ब्रह्मभावोपदेशात् स्वयं प्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते नयत्नान्तरसाध्यमतश्चैवं शास्त्रीयं ब्रह्मात्मत्वमवगम्यमानं स्वाभाविकस्य शारीरत्वस्य बाधकं सम्पद्यते--रज्ज्वादिबुद्धयइव सर्पादिबुद्धीनां बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविकोव्यवहारोबाधितोभवतीत्यादिनेति चेन्न, एकत्वावधारणश्रुतीनां जगत्कारणसार्वज्ञ्यादिमत्परब्रह्मैकत्वपरत्वेन "नेहनाने" त्यादिश्रुतीनां च कारणगतस्वतन्त्रसत्तावच्छिन्नवस्तुमात्रनिषेधपरत्वेन चासमत्पक्षे स्वार्थे एव प्रामाण्यात्, न तावत्कारणैकत्वावधारणं निषेधश्चेतरस्य वस्तुजातस्यानृतत्वे नियामकम् । अपि तु स्वविषयसमसत्ताकत्वनिषेधमात्रएव । यथा चोलराजा एकोऽद्वितीयोऽभूदिति वाक्यं न तद्राजान्तरमात्रस्य तत्सेनादीनां वा निषेधपरं, किन्तु तत्तुल्यनृपान्तरस्य निषेधमात्रपरमेव । एवं प्रकृतेऽपि समञ्जसम् । किञ्च कार्यजातस्यानृतत्वेऽसत्कार्यवादापत्त्या वैदिकत्वं दत्ततिलाञ्जलिः स्यात् "असत्यमप्रतिष्ठं च जगदाहुरनीश्वरमि"ति आसुरपक्षाभ्युपगमश्च, "सदेव सौम्येदमग्रआसीत्, सत्त्वाच्चावरस्ये"त्यादिशास्त्रव्याकोपश्च । नापि "यत्र त्वस्ये"ति श्रुतिः प्रपञ्चबाधपरा, किन्तु कारकजातस्य स्वतन्त्रसत्तानिषेधेन तस्य ब्रह्मात्मकत्वविधानपरेति सर्वं समञ्जसम् । अन्यथा "सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वशः" इत्यादिश्रुतिविरोधात् । श्रुत्यर्थस्तु सदेवेत्यत्र स्वतन्त्रसत्ताश्रयः सत्पदार्थः । "आत्मा हि परमः स्वतन्त्रोऽधिगुणः" इति श्रुतेः, एकपदं ब्रह्मणः चराचराभ्यामुत्कर्षरूपप्राधान्यं विधत्ते "एके मुख्यान्यकेवलाः" इत्यमरोक्तेः । एकशब्दोऽयमन्यप्रधानासहायसङ्ख्याप्रथमसमानवाचीति "एकोगोत्रे" इति सूत्रे

कैयटोक्तेश्च । सहायान्तरशून्यत्वोत्कर्षपरोवा "षण्णान्ताः षडि"ति सूत्रे एकशब्दोऽयं बह्वर्थः । अस्ति सङ्ख्यार्थेऽस्त्यसहायवाची, "अस्त्यन्यार्थ"इति महाभाष्यकारोक्तेश्च । तथा च क्षराक्षराभ्यामुत्कृष्टमन्यसहायहीनमेकसङ्ख्याकमेकपदार्थः । "प्रधानक्षेत्रज्ञपतिः, अक्षरात्परतः परः"इत्यादिश्रुतेः । यस्मात्क्षरमतीतोऽहं, मत्तः परतरं नान्यदि"ति श्रीमुखोक्तेश्च, अयोगव्यवच्छेदार्थः प्रथम एव शब्दः, तदधिकोत्कृष्टव्यवच्छेदपरोद्वितीयः, स्वातिशयवस्तुशून्यइत्यर्थः । अद्वितीयशब्दश्च समाननिषेधपरः । "नतत्समश्चाभ्यधिकश्चे"ति श्रुतेः । "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः" इति स्मृतेश्च । यद्वा एकशब्दः सङ्ख्यापरः, एवाद्वितीयशब्दयोश्चेतनाचेतननिषेधपरत्वम्, उभयोरपि ब्रह्मसमस्वतन्त्रसत्ताकत्वाभावात् । किञ्च स्वगतानन्तासंख्येयज्ञानादिकारुण्यादिकल्याणधर्माणामपि स्वरूपेतरस्वतन्त्रसत्ताभावेन तद्गतस्वतन्त्रसत्तानिषेधोऽप्यविरुद्धः । "यदासीत्तदधीनमासीदि"ति श्रुतेः । तथाच चेतनाचेतनानां स्वगतधर्माणां च तदात्मकत्वाद्यविशेषेण तदपृथक्सिद्धत्वात् "ऐतदात्म्यमिदं सर्वमि"त्यग्रिमवाक्यात् "वासुदेवात्मकान्याहुरि"ति स्मृतेश्च । एषएव स्वतन्त्रसत्ताश्रयः सत्पदार्थः आत्मा यस्य स तदात्मा तस्य भावस्तत्त्वमिति श्रुत्यर्थः । सदात्मकमिति यावत् । नन्वस्य वाक्यस्य सजातीयादिभेदशून्यपरत्वमेव, तत्र चेतनवृत्तिभेदः सजातीयभेदः, जडभेदोविजातीयभेदः धर्मभेदः स्वगतभेदस्तथा च त्रिविधभेदस्य श्रुत्यैव निषिद्धत्वेन तद्विषयस्य कथं पारमार्थिकत्वमिति चेन्न, स्वप्राङ्गणोऽवधावनमात्रत्वात् । तथा हि अद्वितीयपदेनैव द्वितीयपदार्थमात्रस्य निषेधसिद्धौ पदान्तरवैयर्थ्यात्, ब्रह्मेतरस्य त्रैकालिकनिषेधप्रतियोगित्वं वदन्तोऽत्र प्रष्टव्याः, श्रुत्याभिहितद्वितीयमात्राभावः कालत्रयेऽस्ति ?

न वा ? नाद्यः, स्वो*क्तव्याघातात् । अन्त्ये, द्वितीयस्य सत्त्वापत्तेः । नच नाभावोद्वितीयोऽद्वैतविरोधीति वाच्यम्, अभावत्वाधेयत्वाधारत्वादि भावैरविनाभूतेनातिशयोऽप्यद्वैतभङ्गात्, अभावत्वरूपप्रवृत्तिनिमित्तसम्भवेन वेदान्तानां सखण्डार्थत्वापत्तेश्च । किञ्च कोवा सत्पदार्थः ? शुद्धोवोपहितोऽव्याकृतोवा ? नाद्यः, "तदैक्षत बहु स्यामि"तिश्रुत्येक्षणबहुभवनसंकल्पयोगश्रवणादन्यथा शुद्धत्वभङ्गात्, त्वया शुद्धस्य पदार्थत्वानङ्गीकाराच्च । अन्यथा मिथ्यात्वप्रसङ्गात् । शुद्धं ब्रह्म मिथ्या पदार्थत्वात्तव मते घटादिवदित्यनुमानात् । द्वितीये, ततोमायाभूतोपाधिर्भिन्नोऽभिन्नोवा ? नाद्यः, द्वैतापत्तेः । नान्त्यः, उपाधिर्ब्रह्मेति सिद्धान्तापत्तेः, उपहितस्य पारमार्थिकसत्ताऽसम्भवाच्च । अन्यथा तस्यैव मुक्तगम्यत्वेन शुद्धस्याप्रयोजकत्वापत्तेश्च । नाप्यव्याकृतः, सिद्धान्तभङ्गादस्मदिष्टत्वाच्च । अव्याकृतस्य जीवादिभेदेऽपि नास्माकं हानिः, जीवादीनां तादात्म्यसम्बन्धाभ्युपगमात्, ब्रह्मणः सविशेषत्वाङ्गीकाराच्च । अव्याकृतं नाम भूतसूक्ष्माणि कर्मसंस्कारसहिताश्च जीवास्तदन्तर्यामी परमेश्वरश्चाधिष्ठाता एतेषां समुदायः तस्य चानेकविशेषत्वात्सुतरां तव सिद्धान्तभङ्गः, उक्तव्याख्याविरोधश्च । अन्यथा भूतसूक्ष्माभावेऽसत्कार्यवादापत्तिः, जीवानङ्गीकारे कृतनाशादिप्रसङ्गः, सृष्टिवैचित्र्यहेतुभूतकर्माभावे सृष्टयभावप्रसङ्गः, तस्याः साम्यप्रसङ्गश्च, ब्रह्मणि वैषम्यनैर्घृण्यप्रसक्तिश्च । परमेश्वरानङ्गीकारे स्रष्टृभावेन सृष्टयसम्भवः, बाह्यपक्षाङ्गीकारप्रसङ्गाच्च । किञ्च द्वितीयमात्रनिषेधे श्रुतावग्रपदवैयर्थ्यम् । किञ्च कोवाऽद्वितीयपदार्थः, न द्वितीयोऽद्वितीयइति नञ्समासे नञर्थस्तु* षड्विधः । तत्र न तावत्सा-

---

* श्रुतेः सजातीयादिभेदनिषेधपरत्वप्रतिपादनव्याघातात् ।

ꣳ तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ॥
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ १ ॥

दृश्यं द्वितीयसदृशमिति पदार्थापत्तेः, निर्विशेषे सादृश्यधर्मासम्भवाच्च । नाप्यभावः, "असदेव सभवति, असद्ब्रह्मेति वेद चेदि"ति निन्दाश्रवणात् । नापि तदन्यत्वं, द्वैतापत्तिप्रसङ्गात् । नापि तदल्पता, ईषद्द्वितीयइति पदार्थः स्यात् । नाप्यप्राशस्त्यं अप्रशस्तद्वितीयइत्यर्थः स्यात् । नापि विरोधोऽनङ्गीकारात् । किञ्चाद्वितीयपदस्य द्वितीयाभावमात्रसङ्कोचापेक्षया सकलकल्पनाऽविरोधाय स्वतन्त्रसत्तावच्छिन्नद्वितीयनिषेधपरत्वस्यैवौचित्यात् । नचावान्तरतात्पर्येण द्वितीयाभावसिद्धिर्महातात्पर्येण चाखण्डार्थसिद्धिरिति वाच्यं, द्वितीयाभावस्य सत्त्वेऽद्वैतहानिः । मृषात्वे द्वैतस्य सत्यत्वापत्तिः । द्वितीयाभावविशिष्टतया ज्ञाते ब्रह्मणि विशेष्यमात्रे सन्देहाद्यभावेन तत्र तात्पर्यकल्पनस्याप्रामाणिकत्वात् । अन्यथा शब्दमात्रस्य तात्पर्यद्वयं स्वीकृत्याखण्डार्थकत्वापत्तिरिति सङ्क्षेपः । एतेन"आत्मा वा इदमग्रआसीन्नान्यत्किञ्चनमिषत्, एकोह वै नारायणआसीदि"त्यादिश्रुतयोपि व्याख्याताः, तुल्यार्थत्वात् । अथ"नेह नाने"ति, इह जगत्कारणे ब्रह्मणि नानात्वं नास्ति, तस्य सर्वास्वप्युपनिषत्स्वेकत्वावधारणात् । कारणनानात्वदर्शनस्य फलमाह । "मृत्योः समृत्युमाप्नोतीति नित्यसंसारी भवति परमेश्वरे नानात्वदर्शित्वात्" इव शब्दोऽल्पार्थः "इवोपमायामल्पे चे"ति कोशात् । स च कैमुत्यन्यायपरः, कारणे ब्रह्मणि यद्यल्पनानात्वदर्शनस्येदृक्फलं किं पुनर्बहुत्वेनेत्यर्थः । एतेन "द्वितीयाद्वै भयं भवती"त्यपि श्रुतिर्व्याख्याता तुल्यार्थत्वात् । ननु कारणे ब्रह्मणि भेदाप्रसक्तिरप्रसक्तस्य च निषेधायोगादिति चेन्न, जगत्कारणेऽनेकत्वप्राप्तेः, शास्त्रसिद्धत्वात् "जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः । जीवे प्रलयमृच्छन्ति न जीवात्कारणं परमि"ति "ब्रह्मा देवानां प्रथमः सम्बभूव, विश्वस्य कर्त्ता भुवनस्य गोप्ता, न सन्नचा-

सच्छिव एव केवलः, स्वभावमेके कवयोवदन्ति, कालं तथाऽन्ये" इत्यादिश्रुतिभिः कारणनानात्वस्य सुप्रसक्तत्वात् । इहेति । विशेषणान्नानात्वमात्रनिषेधसम्भवः निषेधतदाधारब्रह्मणोर्निषेधनिषेध्ययोर्नानात्वतदभावयोश्च भेदावश्यकत्वादिति संक्षेपः । अथ नाना शब्दोऽत्र विनार्थकः "विनऽन्यां नानाऽौ न सहे"ति सूत्रे महाभाष्यकारैर्नानाविनाशब्दयोरेकार्थत्वोक्तेः । तथा चैवं योजना, इह जगति नाना स्वोपादानं परमेश्वरं विना किञ्चनापि वस्तुजातं नास्ति, सर्वकार्यत्वावच्छिन्नस्य स्वोपादानाविना भूतत्वात् । "यच्चापि सर्वभूतानां बीजं तदहमर्जुन । न तदस्ति विना यत्स्यान्मया भूतं चराचरमि"ति श्रीमुखोक्तेः । अन्यत्स्पष्टं, "सर्वं तं परादाद्यआत्मनोऽन्यत्सर्वं वेदे"तिश्रुत्यन्तराच्च। एतेनैव "नाना विष्णुं मोक्षदोनान्यदेवः"इत्यपि श्रुतिर्व्याख्याता, विष्णुं विनाऽन्यदेवोब्रह्मादिर्मोक्षदोनास्तीत्यर्थः । "बन्धकोभवपाशेन भवपाशाच्च मोचकः । कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः" इति स्मृतेः "संसारबन्धस्थितिमोक्षहेतुरि"ति श्रुत्यन्तराच्चेति । अथ "यत्र त्वस्ये"ति यत्र यस्यां ध्रुवास्मृत्याख्यावस्थायामस्य विदुषः सर्वे कर्तृकरणकर्मादिकारकजातमात्मैवाभूदिति आत्मशब्दोऽत्र विश्वात्मभूतपरब्रह्मपरः ब्रह्मात्मकत्वेन तदपृथक्सिद्धत्वात्तत्तत्तावविधानमविरुद्धं ब्रह्मैव ब्रह्मापृथक्सिद्धमेवाभूत् तर्हि केन स्वतन्त्रसत्तावच्छिन्नकरणेन कं वा स्वतन्त्रत्वेन पृथक्वस्तुजातं कर्मकारकरूपं, कोवा स्वतन्त्रभूतोद्रष्टा कर्तृकारकरूपःपश्येदिति योजना, सर्वकारकजातस्य तत्प्रयोज्यतया केषु चिदपि कर्त्रादिषु स्वातन्त्र्याभावेन "स्वतन्त्रः कर्त्ते"ति सूत्रोक्तकर्त्रादिकारकलक्षणासमन्वयेन तत्ताभावात् तदात्मकतत्प्रयोज्यतदाध्येयतद्वाप्यत्वाद्यवच्छिन्नैस्तत्तत्कारकैस्तत्तत्कर्मकारयिता श्रीपुरुषोतमएव "एषएव साधु कर्म कारयति, तं

यमेभ्योलोकेभ्यउन्निनीषते, स कारयेत्पुण्यमथापि पापमि "त्यादि-श्रुतेः । तस्मात्तदात्मकेन करणेन तदात्मकं वस्तुजातं तदात्मको द्रष्टेत्यर्थः । ऐतदात्म्यमिदं सर्वमि"ति श्रुतेरिति संक्षेपार्थः । तस्मात्कार्यं सदेव, कारणादनन्यं चेति सिद्धम् ॥ १६ ॥

इत्यारम्भणाधिकरणम् ॥ ६ ॥

सू० इतरव्यपदेशाद्धिताकरणा-दिदोषप्रसक्तिः ।२।१।२०॥

वेदान्तपारिजातसौरभः ।

आक्षेपः, ब्रह्मकारणवादे "अयमात्माब्रह्मे"ति जीवस्य ब्रह्मत्वनिरूपणात्सर्वक्लेशालयजगज्जननेनात्मनोहिताकरणादिदोषप्रसक्तिः ॥ २० ॥

वेदान्तकौस्तुभः ।

पूर्वत्र कार्य्यकारणयोरत्यन्तभेदोनिराकृतः । इदानीं चेतनाचेतनयोरत्यन्ताभेदशङ्काभावाद्विशेषतोब्रह्मजीवयोरत्यन्ताभेदमाशंक्य निराकरोति —

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ।

ननु ब्रह्मणोजगत्स्रष्टृत्वे त्रिविधतापभूमिजगदुत्पा-

कारणत्वे विशेषाभावात् । एतेन परमाणुकारण-वादोऽपि निरस्तोबोध्यः ॥ २८ ॥

वेदान्तकौस्तुभप्रभा ।

स्वपक्षे दोषाच्च ।

प्रधानकारणवादेऽपि त्रिगुणस्य प्रधानस्य निरवयवत्वाभ्युपगमान्महदाद्याकारेण परिणामे कृत्स्नप्रसक्तिर्निरवयवत्वप्रतिज्ञाहानिर्वेति दोषः समानः । गुणाएव तस्यावयवाइति चेत्, तत्रापि गुणसमूहस्य प्रधानत्वे गुणानां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां तेषां स्थूलमहदाद्यारम्भकत्वासिद्धिः । गुणैरारब्धस्य प्रधानत्वे प्रधानं कारणमिति सिद्धान्तविरोधइति वैशेषिकमतेऽप्येवं दोषाः, परमाणूनां निरवयवत्वाभ्युपगमात् ॥ २८ ॥

सू० सर्वोपेता च सातद्दर्शनात् ।

२ । १ । २९ ॥

वेदान्तपारिजातसौरभः ।

"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे"त्यादिश्रुतेः सा देवता सर्वशक्त्युपेता सर्वं कर्तुं समर्था भवति ॥ २९ ॥

वेदान्तकौस्तुभः ।

परमपुरुषस्य सर्वशक्तिमत्त्वं दर्शयति —

ब्रह्म जगत्कर्त्तृ ब्रूमः, "आत्मानमन्तरोयमयती"ति भेदव्यपदेशान्न तयोरत्यन्ताभेदोऽस्ति यतोहिताकरणादिदोषप्रसक्तिः स्यात् ॥ २१ ॥

वेदान्तकौस्तुभः ।

इतिपूर्वपक्षे सिद्धान्तमाह, —

अधिकं तु भेदनिर्देशात् ।

तुशब्दः पूर्वपक्षं व्यावर्त्तयति । यतः शारीरात्सर्वज्ञं सर्वशक्तिं सर्वेश्वरं समानातिशयशून्यं जगदभिन्ननिमित्तोपादानकारणमधिकमुत्कृष्टं ब्रह्म ब्रूमः । अतोहिताकरणादिदोषप्रसक्तिर्नास्ति । अधिकत्वे हेतुः "भेदनिर्देशादि"ति "आत्मा वाअरे ! द्रष्टव्यः, ब्रह्मविदाप्नोति परं, यआत्मानमन्तरोयमयती"ति ब्रह्मजीवयोर्भेदनिर्देशात् । अयमर्थः, यथा "सर्वं खल्विदं ब्रह्मे"त्यत्राचिद्वर्गस्य स्वरूपेण ब्रह्माभिन्नत्वासम्भवात्तज्जत्वादिना ब्रह्माभिन्नत्वमङ्गीक्रियते, तथा शारीरस्योक्तभेदश्रुतिप्रामाण्यात्स्वरूपतोब्रह्माभिन्नत्वासम्भवाद्ब्रह्मनिरपेक्षस्थितिप्रवृत्त्यभावाद्ब्रह्माभिन्नत्वं " तत्त्वमस्या "दिवाक्यैरभिधीयते, नतु स्वरूपतः । एवमभेदे ऽपि

भेदव्यपदेशान्नेह हिताकरणादिदोषप्रसक्ति-
रिति ॥ २१ ॥

वेदान्तकौस्तुभप्रभा ।

नह्याध्यात्मकादिविविधदुःखहेतुरूपे कार्ये स्वाधीनोबुद्धिमान्प्रवर्त्तते, जीवब्रह्मणोर्भेदवादिन्यः श्रुतयोजगतोब्रह्मणोऽनन्यत्वं वदद्भिर्भवद्भिरेवपरित्यक्ताः भेदे सत्यनन्यत्वासिद्धेः, तस्माद्ब्रह्मणोजगत् कारणत्वमनुपपन्नमिति प्राप्ते समाधत्ते —

अधिकं तु भेदनिर्देशात् ।

तुशब्दः पक्षव्यावृत्त्यर्थः । यत्सार्वज्ञ्याद्यनन्ताचिन्त्यासङ्ख्येय-कल्याणधर्माश्रयं जगदभिन्ननिमित्तोपादानकारणं तत्तस्माच्छारीरादधिकमुत्कृष्टं तदत्यन्तविलक्षणं परं ब्रह्मेति नोक्तदोषावकाशः । कुतः ? "भेदनिर्देशात्" "आत्मा वाऽरे ! द्रष्टव्यः श्रोतव्योमन्तव्यो-निदिध्यासितव्यः"इति कर्तृकर्मादिभेदस्य"ब्रह्मविदाप्नोति परमि"ति प्राप्तृप्राप्तव्यभेदस्य,"यआत्मानमन्तरोयमयती"ति नियन्तृनियम्य-भेदस्य, च निर्देशात् । अयं भावः, यदि चेतनस्य शारीरस्य जगत्कारणत्वं सूत्रकृतोऽभिप्रेतं स्यात्तर्हि तस्य सार्वज्ञ्यादिसर्वशक्त्ययोगेन हिताकरणादिदोषप्रसक्तिः स्यान्नतु तदस्ति, प्रत्युत तदत्यन्तविलक्षणस्य सर्वज्ञानशक्तिबलैश्वर्यादिकल्याणधर्मार्णवस्य परब्रह्मणः समस्तदोषगन्धाघ्रातमाहात्म्यस्य श्रीपुरुषोत्तमस्य स्वतन्त्रसत्ताश्रयस्य कारणत्वनिर्देशान्नोक्तदोषयोगः । एतेन वक्ष्माणोभेदाभेदलक्षणसिद्धान्तोऽपि सूत्रकृता सूचितः, तादात्म्यादभेदोक्तेः ब्रह्मणः स्वरूपेण भेदनिर्देशात् । तथा च पर-

तन्त्रसत्तावच्छिन्नस्वरूपेण भिन्नत्वेऽपि तदात्मकत्वादिना तदपृथक्त्वाद्भिन्नाभिन्नत्वमिति भावः ॥ २१ ॥

सू०अश्मादिवच्च तदनुपपत्तिः

॥ २ । १ । २२ ॥

वेदान्तपारिजातसौरभः ।

भूविकारवज्रवैदूर्य्यादिवद्ब्रह्माभिन्नोऽपि क्षेत्रज्ञः स्वस्वरूपतोभिन्नएवातः परोक्तस्यानुपपत्तिः ॥ २२ ॥

वेदान्तकौस्तुभः ।

अश्मादिवच्च तदनुपपत्तिः

अपि च यथा खलु लोके भूमिविकाराणामश्मनां वज्रवैदूर्यपद्मरागादीनां भूम्यात्मकत्वेन भूमित्वाविशेषेऽपि स्वरूपेण भिन्नत्वमेवास्ति, आदिशब्देन द्रुमादिविकाराणां पत्रादीनां ग्रहणं, यथा पत्रस्य द्रुमाभिन्नत्वेऽपि न द्रुमत्वम्, यद्वादिशब्देन वज्रादिप्रभा गृह्यते, सा हि वज्रावयभिन्नाऽपि भिन्ना दृश्यते । अतस्तस्याः प्रभावतोयथाऽभिन्नत्वेऽपि भिन्नत्वं, तथा शारीरस्य ब्रह्मात्मकत्वेन ब्रह्माभिन्नत्वेऽपि स्वरूपेण तद्भिन्न-

त्वं युज्यते, तत्तस्माज्जीवपरब्रह्मभेदेन संसार्य्य-संसारिव्यवस्थासिद्धौ विरोधाभावादनुपपत्तिः न परोक्तहिताकरणादिदोषप्रसक्तेरुपपत्तिरित्यविरोध-सिद्धिः ॥ २२ ॥ इतीतरव्यपदेशाधिकरणम् ॥ ७ ॥

वेदान्तकौस्तुभप्रभा ।

अश्मादिवच्च तदनुपपत्तिः ।

यथा लोके पृथिवीविकाराणामश्मनां वज्रवैदूर्यपद्मरागसूर्य-कान्तादीनां प्रहीणपाषाणादीनां च पृथिव्यात्मकतया पृथिवी-त्वाविशेषेऽपि नपृथिवीस्वरूपैक्यमुपपद्यते। आदिना लोष्टकाष्ठतृणा-दिग्रहः । तथा जीवस्य ब्रह्मात्मकत्वादिना ब्रह्मत्वाविशेषेऽपि न स्वरूपैक्यमिति परब्रह्मैव जीवकर्मानुगुणसुखदुःखहेतुजग-त्सर्गकर्तृइति तदनुपपत्तिः परकल्पितदोषानुपपत्तिः ॥ २२ ॥

इतीतरव्यपदेशाधिकरणम् ॥ ७ ॥

सू० उपसंहारदर्शनान्नेति चेन्न, क्षीरवद्धि ।२ । १ । २३॥

वेदान्तपारिजातसौरभः ।

कुम्भकारादीनामनेकोपकरणोपसंहारदर्शना द्ब्रह्मोपकरणरहितं ब्रह्म न जगत्कारणमिति

चेन्न, यतः क्षीरवत्कार्यकारेण ब्रह्म परिणमते स्वासाधारणशक्तिमत्त्वात् ॥ २३ ॥

वेदान्तकौस्तुभः ।

पूर्वत्र चिदचिच्छक्तेः सर्वात्मनः समानातिशयशून्यस्य सर्वेश्वरस्य जगत्कर्त्तृत्वे हिताकरणादिदोषप्रसक्तिर्निराकृता जीवस्य ब्रह्मात्मकत्वात्तदभिन्नस्याप्यनादिकर्मवशगस्य स्वरूपतो भिन्नत्वेन संसारार्हत्वादिदानीं ब्रह्मणोन जगत्कर्त्तृत्वं, बाह्यकारककलापाभावादित्याक्षिप्य, समाधत्ते —

उपसंहारदर्शनान्नेति चेन्न, क्षीरवद्धि ।

पूर्वसूत्रादादिशब्दोऽनुवर्त्तते । हिशब्दोहेतुवचनः । ननु लोके घटादिकार्यजनने मृद्दण्डादिबाह्योपकरणोपादान*दर्शनान्न ब्रह्मजगत्कर्त्तृ तस्यासहायत्वात् । कुतोऽवगम्यते ? इति चेदुच्यते । " सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयम्, एकोह वै नारायणआसीद्विष्णुस्तदासी-

* उपानयनदर्शनात् ।

द्धरिरेव केवलः" इत्यत्रे कारकप्रकारासम्भवबोधक-वाक्येभ्योब्रह्मणोऽसहायत्वं निश्चीयते इति चेन्न, कुतः ? हि यस्मात् क्षीरादिवत् ब्रह्मास्ति, यथा खलु लोके क्षीरनीरादिदधिहिमादिरूपकार्य्या-त्मना परिणमते, तत्र बाह्योपकरणाभावो-ऽस्ति, तथा चिदचिच्छक्तिमद्ब्रह्म जगदभिन्ननि-मित्तोपादानकारणं स्वाभाव्याद्भवितुमर्हति । न तस्य जगज्जनने कारककलापापेक्षा " पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया-चे"त्यादिश्रुतेः, *आतञ्चनं तु रसविशेषार्थम्, न दधिभावसम्पादकं, तदभावेऽपि दधिभावदर्शनात्, तत्सद्भावेऽपि जलादेर्दधिभावादर्शनाच्च। कुलालादे-र्निमित्तमात्रत्वान्मृदाद्यपेक्षा जायतेऽसामर्थ्याद्दण्ड-चक्राद्यपेक्षा घटादिजनने जायते। वेदोक्तेऽर्थे नित्यनिष्पन्नेऽप्यधिकारिसंशयनिरासायप्रतिवादि-मुखपिधानाय निःसंशयतया वेदार्थबोधाय च पुनः पुनराक्षेपः क्रियते ॥ २३ ॥

---

* जामण इति लोके ।

वेदान्तकौस्तुभप्रभा

उपसंहारदर्शनान्नेति चेन्न, क्षीरवद्धि ।

ननु पुनरपि ब्रह्मणोजगत्कारणत्वं न सम्भवति, कुतः ?उपसंहारदर्शनादिति । बाह्यकारकोपादानमुपसंहारः । लोके हि घटपटादिकार्य्यजननशक्तियुक्ताअपि कुलालतन्तुवायादयस्तदुपकरणमृद्दण्डचक्रसूत्रतन्तुतूरीवेमाद्यनेककारकाण्युपसंहृत्यैव तत्तत्कार्यं कुर्वाणा दृश्यन्ते, सृष्टेः प्राक्च बाह्यसाधनसामग्री नास्ति । "सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयमि"त्यादिश्रुतेस्तत्कथमसहायं ब्रह्म जगत्सृष्टौ प्रवर्त्तेत ? अतोन ब्रह्म जगत्कारणमिति चेत्, समाधत्ते, नेति । नहि कार्यजनिशक्तानां सर्वेषां बाह्यकारकोपादानसापेक्षत्वं दृष्टे, यथा हि क्षीरं दधिभावाय, नीरं हिमभावाय, स्वयमेव परिणमते तत्स्वाभाव्यात्, तथा ब्रह्मापि । नच क्षीरादावातञ्चनाद्यपेक्षतइति वाच्यं, तत्रातञ्चनस्य दधिभावानुपयोगित्वात्, किन्तु शैघ्र्याय, रसविशेषाय, च तदुपयुज्यते पयसः स्वतएव परिणामशक्तिः, कुलालादीनां त्वनीश्वरत्वेन स्वनः सामर्थ्याभावादुपसंहारसापेक्षत्वं युक्तं, ब्रह्म तु सर्वज्ञं सर्वशक्तिः "य सर्वज्ञः सर्ववित्, पराऽस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी"-त्यादिश्रुतेः ॥ २३ ॥

सू० देवादिवदपि लोके॥२।१।२४

वेदान्तपारिजातसौरभः ।

यथा देवादयः संकल्पमात्रेण स्वापेक्षितं

सृजन्ति तथा भगवानपि ॥ २४ ॥

वेदान्तकौस्तुभः।

ननु क्षीराद्यचेतनं, ब्रह्म च चेतनमिति दृष्टान्तदार्ष्टान्तयोर्विसमत्वमस्तीत्यत्राह —

देवादिवदपि लोके ।

अपि शब्दश्चेतनसादृश्यं सम्भावयति, न केवलं खलु जड सादृश्यं, चेतनैः शास्त्रावगतशक्तिभिरपि सादृश्यमस्ति । यथा लोके देवलोकादौ सर्वार्थावलोकनहेतौ शास्त्रे वा प्रसिद्धप्रभावाः देवाः पितरः ऋषयो नागाद्या बाह्यसाधनमनपेक्ष्य सङ्कल्पमात्रेण स्वापेक्षितानि वस्तूनि यथाकालं यथोपयोगं सृजन्ति, तन्तुनाभश्च स्वयमेव प्रवर्त्तते, तथा सर्वलोकवेदप्रथितप्रभावः सर्वज्ञः सर्वशक्तिः सत्यसङ्कल्पः श्रीपुरुषोत्तमः सर्वकर्मजातं सङ्कल्पमात्रेण करोति, न कश्चित्प्रसिद्धोपकरणदर्शननिबन्धनो विरोधइति सिद्धम् ॥ २४ ॥

इति उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

वेदान्तकौस्तुभप्रभा ।

देवादिवदपि लोके ।

अपि शब्दश्चेतनसादृश्यं सम्भावयति । यथा देवापितरऋषयः स्वेस्वे लोके बाह्यसाधनमनपेक्ष्याभिध्यानमात्रेण स्वापेक्षितानि वस्तूनि सृजन्ति, तन्तुनाभश्च स्वयमेव प्रवर्त्तते, बलाका च रेतः सेकमन्तरेण गर्भं धत्ते, तथाऽसौ पुरुषोत्तमः स्वसङ्कल्पमात्रेण सर्वं सृजतीति ॥ २४ ॥

इति उपसंहारदर्शनाधिकरणम् ॥ ८ ॥

सू० कृत्स्नप्रसक्तिर्निरवयवत्व-शब्दकोपोवा ।२।१।२५॥

वेदान्तपारिजातसौरभः ।

आक्षिपति, ब्रह्मणोजगत्प्रकृतित्वे तन्निरवयवत्वाङ्गीकारे कृत्स्नप्रसक्तिः, सावयवत्वे निरवयवत्ववादिशास्त्रविरुध्येत ॥ २५ ॥

वेदान्तकौस्तुभः ।

ननु यदि बाह्योपकरणमनपेक्ष्यैव जगदाकारेण ब्रह्म परिणमते, तर्हि स्वगतशक्त्यपेक्षाऽपि माऽस्तु? स्वरूपमात्रस्य तु विकल्पासह-

त्वाद्युपादानत्वानुपपत्त्या प्रधानमेवोपादानं भवत्वितीदानीमाक्षिप्य, बाह्योपकरणस्यानुपादेयत्वं निर्मूलत्वात्सापेक्षजगत्कर्तृत्वापादकत्वाच्च स्वशक्तीनां स्वानन्यानां शब्दमूलकत्वादुपादेयत्वमिति समाधत्ते·—

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवा ।

ननु "सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयम्, आत्मा वा इदमेकएवाग्रआसीदि" त्यादिश्रुतिवेद्यं जगत्कारणं ब्रह्म किं निरवयवम् ? उतसावयवं? कार्य्याकारेण परिणमते, निरवयवमिति चेत्, तर्हि क्षीरवत्कृत्स्नस्य ब्रह्मणः कार्यत्वप्रसक्तिर्भवेत्, कार्याभिन्नं संसारातीतं मुक्तगम्यं ब्रह्म नावशिष्येत्, दुर्ज्ञेयत्वादिविषयकशास्त्रव्याकोपप्रसङ्गः, सर्वमोक्षप्रसङ्गश्च भवेत्, जडत्वादिधर्मकं ब्रह्मापद्येत । तस्य सावयवत्वाङ्गीकारे तु कृत्स्नप्रसक्त्यादिदोषाः न भवन्ति । किं तु "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं दिव्योह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरोह्यजः" इत्यादिजगत्कारणस्य ब्रह्मणोनिरवयवत्वविषयकः

शब्दोविरुध्येत, तस्मात्प्रधानमेव जगदुपादानकारणं भवत्विति पूर्वः पक्षः ॥ २५ ॥

वेदान्तकौस्तुभप्रभा ।

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपोवा ।

पुनरप्याक्षिपति। ननु निरवयवं सावयवं वा ब्रह्म कार्याकारेणापरिणमते ? आद्ये, कृत्स्नस्य ब्रह्मणः क्षीरवत् कार्यरूपतापत्तौ कार्यातिरिक्तं ब्रह्म न स्यात्, कार्यस्य च सर्वप्रत्यक्षत्वात्सर्वमोक्षप्रसङ्गः। द्वितीये, निरवयवत्ववाचकः शब्दः "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं दिव्योह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरोह्यजः"इत्यादिः कुप्येद्विरुध्येत, अतो ब्रह्मणः परिणामानुपपत्तेर्जगदुपादानत्वं न सम्भवति, किन्तु प्रधानमेवैष्टव्यमित्याक्षेपे प्राप्ते ॥ २५ ॥

सू० श्रुतेस्तु शब्दमूलत्वात् ॥

२ । १ । २६ ॥

वेदान्तपारिजातसौरभः ।

समाधत्ते, नोक्तदोषोऽस्ति " सोऽकामयत बहु स्यां, स्वयमात्मानमकुरुत, सच्च त्यच्चाभवदेतावानस्य महिमा ततोज्यायांश्च पुरुषः, यथो-

र्णनाभिः सृजते तथा पुरुषाद्भवति विश्वमि"-त्यस्यार्थस्य शब्दमूलत्वादन्यं निर्मूलम् ॥ २६ ॥

वेदान्तकौस्तुभः ।

सिद्धान्तमाह —

श्रुतेस्तु शब्दमूलत्वात् ।

तुशब्दः पूर्वपक्षनिषेधार्थः । न हि कृत्स्न-प्रसक्तिर्निरवयशब्दकोपश्च, कुतः ? " श्रुतेः " जगदभिन्ननिमित्तोपादानत्वजगद्विलक्षणत्वपरिण-तशक्तिमत्त्वविषयकश्रुतिकदम्बादित्यर्थः । तथा च श्रुतयः । "सोऽकामयत बहु स्यां, स्वयमात्मानम-कुरुत, सच्च त्यच्चाभवदिति, "तत्सृष्ट्वा तदेवानु-प्राविशत्, सेयं देवतैक्षत, हन्ताहमिमास्तिस्रो-देवता, अनेन जीवेनात्मनानुप्रविश्य, यः पृथिव्यां-तिष्ठन् यं पृथिवी न वेद, अन्तः प्रविष्टः शास्ता जनानामेतावानस्य महिमा, ततोज्यायांश्च पुरुषः" इत्याद्याः । स्मृतिश्च "प्रकृतिं पुरुषं चापि प्रवि-श्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्ग-काले व्ययाव्ययावि"ति ऊर्णनाभिरिवबाह्यकार-कमनपेक्ष्य, ब्रह्मजगदाकारेण परिणमते । ततोन

निरवयवशब्दकोपोऽपि।तथा च श्रुतिः "यथोर्णनाभिः सृजते गृह्णते च, यथा सतः पुरुषात्केशलोमानि यथा पृथिव्याः औषधयः सम्भवन्ति, तथाऽक्षरात्सम्भवतीह विश्वमि"ति। स्मृतिश्च "प्रसार्य च यथाङ्गानि कुर्मः संहरते पुनः । एव भूतानि भूतात्मा सृष्ट्वा संहरते पुनरि"ति । पटस्य तन्तव इव स्वरूपोपादानभूताः कलाः भागा अवयवा यस्य न सन्ति तेन निष्कलं निरवयवं चिदचिच्छक्तिमद्ब्रह्म पठन्ति । ननु शक्तिविक्षेपलक्षणपरिणामाङ्गीकारे स्वरूपपरिणामाभावात्साङ्ख्यादिभ्यः कोविशेषः ? इति चेच्छ्रूयतां, ते हि कुलालान्मृत्पिण्डवत् पुरुषाद्भिन्नमतदात्मकं स्वाधीनास्थितिप्रवृत्त्यादिमद्द्रव्यं जगदुपादानकारणमङ्गीचक्रुः । औपनिषदं ब्रह्म तु एकमेव भोग्यशक्तिं विक्षिप्याकाशाद्यचेतनरूपेण परिणामयते, भोक्तृशक्तिं चेतनां देवादिरूपेण विक्षिप्य, तदन्तर्य्यामितयाऽनुप्रविष्टं स तत्तत्कर्मफलं भोजयाति – उपसंहरति च । प्रलयसमये कुर्मोऽङ्गानीव सूर्योरश्मीनिव । ननु बाह्यकारकसङ्घहेऽपि प्रकृते विरोधामावात्तन्त्रसिद्धं

प्रधानं घटजनने मृद्वत् बाह्योपकरणं जगज्जननानुरूपं भविष्यति ? किं शक्तिविक्षेपलक्षणेन परिणामेनेत्यत्र शब्दविरोधोभवतीत्याह, "शब्दमूलत्वादि"ति । शक्तिविक्षेपलक्षणः परिणामोगृह्यते शब्दमूलत्वात्, प्रधानाद्युपकरणस्वीकारे निर्मूलतापत्तिः, इतरसापेक्षजगत्कर्तृत्वप्रसङ्गः । " ऐतदात्म्यमिदं सर्वं खल्विदं ब्रह्म, यद्विज्ञातेन सर्वं विज्ञातं भवती"त्यादिश्रुतिव्याकोपश्च भवेदित्यर्थः ॥ २६ ॥

वेदान्तकौस्तुभप्रभा।

समाधत्ते —

श्रुतेस्तु शब्दमूलत्वात् ।

तुशब्दः आक्षेपनिरासार्थः । ब्रह्मणोजगदुपादानत्वेऽपि न तत्कृत्स्नप्रसक्तिः । कुतः ? श्रुतेः यथा जगदुपादानत्वं ब्रह्मणः श्रूयते, तथा कार्यवैलक्षण्येन सत्त्वं चापि श्रूयते "सोऽकामयत बहु स्यां स्वयमात्मानमकुरुत, सच्च त्यच्चाभवदि"त्यादिना "अस्थूलमनण्वह्रस्वमदीर्घमि"त्यादि, "एतावानस्य महिमातताेज्यायांश्च पुरुषइत्यादिना च । नापि निरवयवत्वशब्दकोपः, ऊर्णनाभेरिव शक्तिविक्षेपलक्षणपरिणामाङ्गीकारस्य पूर्वमुक्तत्वात्स्वरूपे परिणामानङ्गीकारात् ब्रह्म ह्यनन्तशक्तिभोग्यशक्ति विचित्र्याकाशाद्यचेतनरूपेण परिणामयते, भोक्तृशक्तिं चेतनाख्यां देवादिरूपेण

বিক্ষিপ্য, তদন্তর্যামিতয়া তৎফলং ভোজয়তি-উপসংহরতি চেতি, সূর্য্যোযথা স্বরশ্মীন্। ননূপমানমাত্রেণ কথং নির্দোষত্বসিদ্ধিরিতি চেত্তত্রাহ। শব্দমূলত্বাদিতি। উক্তবৈদিকসিদ্ধান্তস্য শব্দমূলত্বান্নির্দোষত্বমিত্যর্থঃ। তথা চ শ্রুতিঃ "যথোর্ণনাভিঃ সৃজতে গৃহ্লতে চ, যথা সতঃ পুরুষাৎকেশলোমানি, যথা পৃথিব্যামৌষধয়ঃ সম্ভবন্তি, তথাঽক্ষরাৎসম্ভবতীহ বিশ্বমি"তি "প্রসার্য্য চ যথাঽঙ্গানি কূর্মঃ" ইতি ভীষ্মোক্তেশ্চ। এবং চ যদ্যচেতনানামেব পরস্পরং পরিণামবৈচিত্র্যং পৃথিব্যামৌষধ্যাদিলক্ষণঃ পরিণামঃ অন্নস্য কেশনখদন্তপিশিতাদিলক্ষণঃ, চেতনোর্ণনাভেশ্চোর্ণাপরিণামোঽপ্রচ্যুতস্বরূপর্তয়ৈব প্রাণয়ন্তরেষ্বত্যন্তাসংভাব্যমানোদৃশ্যতে, কিমুত চেতনস্য, সর্বজ্ঞস্য, সর্বাচিন্ত্যশক্তেঃ, স্বতন্ত্রস্য, শাস্ত্রৈকসমধিগম্যস্য, জগৎকারণস্য, ব্রহ্মণ ইতি ভাবঃ। নহি ভাবানাং শক্যয়ঃ কেন চিৎপ্রাকৃতবুদ্ধিনা পরিচ্ছেত্তুং শক্যন্তে, তর্কাণামপ্রতিষ্ঠত্বাৎ ॥ ২৬ ॥

সূ০ আত্মনি চৈবং বিচিত্রাশ্চ হি ॥ ২।১।২৭ ॥

বেদান্তপারিজাতসৌরভঃ।

দেবাদিশরীরক্ষেত্রজ্ঞে যদা নানাবিকৃতয়ঃ সঙ্গতাঃ সন্তি, তদা সর্বশক্তৌ সর্বেশ্বরে জগৎকারণে কাঽনুপপত্তিঃ ॥ ২৭ ॥

वेदान्तकौस्तुभः।

उक्तार्थं कैमुत्यकन्यायेनोपबृंहति —

आत्मनि चैवं विचित्राश्च हि।

सत्यसङ्कल्पस्याचिन्त्यानन्तशक्तेरप्रच्युतस्वभावस्य जगज्जनने कृत्स्नप्रसक्त्यादिदोषा न सन्तीति किमाश्चर्यं, हि यस्माद्धेतोः आत्मनि च जीवे प्राप्तैश्वर्ये एवं कृत्स्नप्रसक्त्यादिदोषाभावेऽपि आत्मप्रभावानुरूपाः विचित्राः सृष्टयोदृश्यन्ते। द्वितीयश्चशब्दः केमुत्यद्योतकः । श्रुतिषु तावद्धंसादिसृष्टयोजीवकृताः सुप्रसिद्धाः । देवराजप्रभावसूचकाः स्मृतयः "तांस्तान्विकुरुते भावान्बहूनथ मुहुर्मुहुः । किरीटवज्रभृद्धन्वी मुकुटी बद्धकुण्डलः । भवत्यथ मुहूर्त्तेन चण्डालसमदर्शनः ॥ शिखी जटी चीरवासाः पुनर्भवति पुत्रक !। बृहच्छरीरः सूक्ष्मश्च पीवरोऽथ कृशस्तथा। गौरं श्यामं तथा कृष्णं वर्णं विकुरुते पुनः। विरूपोरूपवांश्चैव युवा वृद्धस्तथैव च । प्राज्ञोजडश्च मूर्खश्च ह्रस्वोदीर्घस्तथैव च। प्रतिलोमानुलोमश्च भवत्यथ शतक्रतुः । शुकवायसरूपी

च हंसकोकिलरूपवान् । सिंहव्याघ्रगजानां च रूपं धारयते पुनः" इत्याद्याः ॥ सूर्यसामर्थ्यपराः स्मृतयश्च "आश्चर्य्याणामनेकानां प्रतिष्ठा भगवान्रविः । यतोभूताः प्रजायन्ते सर्वे त्रैलोक्य संमताः इत्याद्याः । एवमन्येषामपि देवानां सृष्टिसामर्थ्यं शास्त्रादेवावगन्तव्यम् । "अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् । लोकपालान्सृजेयुश्च लोकानन्यांश्च कोपिताः " इति मुनीनां सामर्थ्यबोधिनी-स्मृतिः, "अहो प्रभावोब्रह्मर्षेश्च्यवनस्य महात्मनः । इच्छन्नेव तपोवीर्याल्लोकानन्यान्सृजेदपी"ति च्यवनप्रभाववादिनी स्मृतिः । वशिष्टधेनुसामर्थ्यपराः स्मृतयः "ऊर्ध्वांचितशिरोग्रीवा प्रबभौ रौद्रदर्शना । क्रोधरक्तेक्षणा सा गौर्हंभारवघनस्वना । आदित्यइव मध्याह्ने क्रोधदीप्तवपुर्बभौ । अङ्गारवर्षं मुञ्चन्ती मुहुर्वालधितोमहत् । असृजत्यल्हवान्पुच्छात्प्रस्रवात् द्राविडाञ्छकान् । योनिदेशाच्च यवनान् शकृतः शवरान्बहून् । चिचुकांश्च पुलिन्दांश्च चीणान् हूणान्सकेरलान् । ससर्ज्ज फेनतः सा गौर्म्लेच्छान्बहुविधानपी"त्याद्याः । एवमन्यास्मिन्नपि विशिष्टे आत्मनि

विचित्राः सृष्टयः सन्ति, विस्तरभयादनुपयोगाच्च नोदाहृताः । विशिष्टजीवेऽपि स्वसामर्थ्यानुरूपं भगवदत्तमेव किञ्चित्कार्य्यकर्तृत्वं, कृत्स्नजगत्कर्तृत्वं मुक्तजीवस्यापि नास्तीति जगद्व्यापारवर्जमित्यत्र स्फुटीभविष्यति ॥ २७ ॥

वेदान्तकौस्तुभप्रभा ।

आत्मनि चैवं विचित्राश्च हि ।

न चैतदाश्चर्यं, ब्रह्मणोविचित्रजगत्सृष्टृत्वेऽपि स्वरूपाप्रच्युतित्वमिति, हि यतआत्मनि जीवात्मनि च देवादिशरीरेऽप्रच्युतस्वरूपतयैव एवं विचित्राहस्त्यश्वादिसृष्टयोदृश्यन्ते, किमुत ब्रह्मणाइति द्वितीयश्चशब्दः कैमुत्यद्योतकः ॥ २७ ॥

सू० स्वपक्षे दोषाच्च । २ । १ । २८ ।

वेदान्तपारिजातसौरभः ।

अस्मत्पक्षास्तिष्ठतु, स्वपक्षेऽपि भवदुक्तदोषापातान्मूकीभावोयुक्तः ॥ २८ ॥

वेदान्तकौस्तुभः ।

स्वपक्षे दोषाच्च ।

चकारोवेदान्तविरुद्धवादनिराकरणार्थः । वे-

दान्तप्रतिकूलवादिनोहि साङ्ख्यादयोजगत्कारण-निर्णये वक्तुं नार्हाः। कुतः ? "स्वपक्षे दोषात्"। तत्र सांख्यास्त्रिगुणं निरवयवं प्रधानं महदाद्याकारेण परिणमते इत्यङ्गीचक्रुः। एवं सति कृत्स्नप्रसक्त्यादयोदोषास्तत्रापि भवेयुः। निरवयवस्य परिणामित्वासम्भवात्कारणत्वं च न सम्भवति, अन्यथा पुरुषस्यापि परिणामित्वापत्तेः। ननु सत्त्वरजस्तमांसि अवयवावर्त्तन्ते ऽतोनोक्तदोषप्रसङ्गः ? इति चेत्तदा पटस्येव प्रधानस्य कार्य्यत्वमवयवभूतानां तन्तूनामिव सत्त्वादीनां कारणत्वं भवतां मते भवेत्। ननु च तन्तुभिः पटवदपूर्वसंस्थानतया सत्त्वाद्यवयवैरारब्धं प्रधानं नाङ्गीक्रियते, किन्तु स्वासाधारणसंस्थानवत्साम्यावस्थापन्नसत्त्वादिसमुदायं प्रधानमित्युच्यते-इतिचेन्नैवमपि युक्तम्, तथात्वेऽपि सत्त्वादयः साम्यावस्थापन्नाः प्रधानं विसमाश्च जगच्चोत्पादयन्तीति तन्मतेंऽगीकार्यं स्यात्। किञ्च तेषामपि प्रत्येकं सावयवत्वेऽनवस्थादोषप्रसङ्गः स्यान्निरवयवत्वे तु कार्य्यकारणव्यवस्थाबाधप्रसङ्गः स्यात्, निरवयवानां सत्त्वादीनां समूहस्य कार्यत्वे

कारणत्वे विशेषाभावात् । एतेन परमाणुकारण-वादोऽपि निरस्तोबोध्यः ॥ २८ ॥

वेदान्तकौस्तुभप्रभा ।

स्वपक्षे दोषाश्च ।

प्रधानकारणवादेऽपि त्रिगुणास्य प्रधानस्य निरवयवत्वाभ्युपगमान्महदाद्याकारेण परिणामे कृत्स्नप्रसक्तिर्निरवयवत्वप्रतिज्ञाहानिर्वेति दोषः समानः । गुणाएव तस्यावयवाइति चेत्, तत्रापि गुणसमूहस्य प्रधानत्वे गुणानां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां तेषां स्थूलमहदाद्यारम्भकत्वासिद्धिः । गुणैरारब्धस्य प्रधानत्वे प्रधानं कारणमिति सिद्धान्तविरोधइति वैशेषिकमतेऽप्येवं दोषाः, परमाणूनां निरवयवत्वाभ्युपगमात् ॥ २८ ॥

सू० सर्वोपेता च सातद्दर्शनात् ।

२ । १ । २९ ॥

वेदान्तपारिजातसौरभः ।

"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चे"त्यादिश्रुतेः सा देवता सर्वशक्त्युपेता सर्वं कर्तुं समर्था भवति ॥ २९ ॥

वेदान्तकौस्तुभः ।

परमपुरुषस्य सर्वशक्तिमत्त्वं दर्शयति —

सर्वोपेता च सा तद्दर्शनात् ।

साङ्ख्यादिभिरभ्युपगतं विविधविचित्रजगज्जननानुरूपनानाशक्तिहीनं प्रधानादिलक्षणं जगत्कारणमयुक्तमाभाति, प्रकृते तु सानन्यशरणैरुपास्या देवता सर्वोपेता सर्वशक्त्युपेता चातो जगत्कारणं सैव भवितुमर्हति, न प्रधानादि, कुतः ? "तद्दर्शनात्" । तत्तां सर्वशक्त्युपेतां देवतां दर्शयतीति दर्शनं श्रुतिः । देवात्मशक्तिं स्वगुणैर्निगूढां पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, सत्यकामः सत्यसङ्कल्पः" इत्यादिश्रुतेः, शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः । शतशोब्रह्मणस्तास्तु सर्गाद्याभावशक्तयः ॥ भवन्ति तपतांश्रेष्ठ ! पावकस्य यथोष्णते" त्यादिस्मृतेश्च ॥ २९ ॥

वेदान्तकौस्तुभप्रभा।

सर्वोपेता च सा तद्दर्शनात् ।

पूर्वमुपादानस्य ब्रह्मणः सर्ववैलक्षण्येन सर्वशक्तियोगात् कृत्स्नप्रसक्त्यादयोदोषानिरस्ताः । तत्र न केवलं सर्ववैलक्षण्येन सर्वशक्त्युपेता सा परा देवतेत्युच्यते, अपि तु तद्दर्श-

नाञ्च, दर्शयतीति दर्शनं श्रुतिः सर्वशक्तियोगश्रुतेश्चेत्यर्थः। "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, सत्यकामः सत्यसङ्कल्पः"इत्यादिश्रुतेः ॥ २९ ॥

सू०विकरणत्वान्नेति चेत्तदुक्तम्।

२।१।३० ॥

वेदान्तपारिजातसौरभः ।

"न तस्य कार्यं करणं च विद्यते" इति करणनिषेधात्सर्वशक्त्युपेतस्यापि जगत्कर्त्तृत्वं न सङ्गच्छते, इति चेदत्र वक्तव्यमुत्तरं यत्तत्पूर्वत्रोक्तमेव ॥ ३० ॥

वेदान्तकौस्तुभः ।

विकरणत्वान्नेति चेत्तदुक्तम्।

नन्वस्तु सर्वशक्त्युपेतं ब्रह्म, तथापि तस्याधारपात्राद्युपकरणवर्ज्जस्य क्षीरस्येव भूमिजलाद्युपकरणरहितस्य बीजस्येव तत्तद्देशकालोचितोपकरणरहितानां देवादीनामिव शक्तिमत्त्वेऽपि कार्यकर्त्तृत्वं न सङ्गच्छते, "न तस्य कार्यं करणं च विद्यते" इत्यादिना तस्य विकरणत्वात्,

विगतकरणत्वावगमादितिचेत् ? यदत्र समाधानं वक्तव्यं तच्छन्दमूलत्वादित्यत्रोक्तम् । नित्यसिद्धानन्दैकरसस्यास्य परमात्मनः सर्वेश्वरस्य जगत्कर्तुः क्रियासाध्यानन्दार्थं कार्य्यं, यथेष्टकार्य्यजनने करणं च न विद्यते, सङ्कल्पमात्रेणैव नित्यानन्ताचिन्त्यशक्तियोगाद्विविधविचित्रकार्यकर्तृत्वादिति श्रुत्यर्थः । तथा च श्रुतयः । " आत्माऽऽनन्दमयः स्वेनैव पूर्णः रसोवै सः, सर्वकामः सर्वगन्धः सर्वरसः, अपाणिपादोजवनोगृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्याद्याः । न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन । नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणी"ति श्रीमन्मुखोक्तेश्च । तस्मात्परपक्षे एव पूर्वोक्तादोषाः सांन्ति, न वेदान्तसिद्धान्ते इति सिद्धम् ॥ ३० ॥

इति कृत्स्नप्रसक्त्यधिकरणम् ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

विकरणत्वान्नेति चेत्तदुक्तम् ।

सर्वशक्तिमत्त्वेपि "न तस्य कार्यं करणं च विद्यते" इति

करणरहितस्य तस्य न कार्यारम्भः सम्भवति, लोके हि देवादयः सर्वशक्तिमन्तोऽपि करणसम्पन्नाएव कार्याय प्रभवन्तीति चेन्नैवदत्र वक्तुं योग्यं तदुक्तं "शब्दमूलत्वादि"ति, श्रुत्यवगाह्ये तर्काप्रवेशात् । तथा च श्रुतिः, "अपाणिपादोजवनोगृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इति ॥ ३० ॥

इति कृत्स्नप्रसक्त्यधिकरणम् ॥ ९ ॥

सू० न प्रयोजनवत्त्वात् ।२।१।३१॥

वेदान्तपारिजातसौरभः ।

ननु नित्यावाप्तसमस्तकामः परः कर्त्ता न, कुतः ? कर्तुः प्रवृत्तेः प्रयोजनवत्त्वादिति ॥ ३१ ॥

वेदान्तकौस्तुभः ।

ननु स्यादेवं तथापि ब्रह्मणः स्वतोनित्याप्तकामस्य जगज्जनने प्रयोजनाभावान्न तत्कर्तृकमिदमितीदानीं शङ्कते —

न प्रयोजनवत्त्वात् ।

ननु ब्रह्मणोन जगत्कर्तृत्वं सङ्गच्छते, कुतः ? कर्तुः प्रवृत्तेः प्रयोजनवत्त्वात्तस्य नित्या-

वाप्तकामत्वात्, जगज्जनने प्रयोजनाभावादिति पूर्वः पक्षः ॥ ३१ ॥

वेदान्तकौस्तुभप्रभा ।

न प्रयोजनवत्त्वात् ।

पुनरप्याक्षिपति । न ब्रह्मणः कारणत्वं सम्भवति, सर्वप्रवृत्तीनां प्रयोजनवत्त्वात् । तस्य चाप्तसमस्तकामत्वेन प्रयोजनाभावादन्यथा स्वार्थप्रवृत्तौ पूर्णकामत्वहानिः, परार्थप्रवृत्तौ ऽनन्तदुःखबहुलं जगत्सृजतः करुणावत्तादिहानिः ॥ ३१ ॥

सू० लोकवत्तु लीलाकैवल्यम् ।

२ । १ । ३२ ॥

वेदान्तपारिजातसौरभः ।

तत्रोच्यते, परस्यैतद्रचनादिलोकप्रसिद्धनृपत्यादिक्रीडामात्रामिव युज्यते ॥ ३२ ॥

वेदान्तकौस्तुभः ।

सिद्धान्तमाह —

लोकवत्तु लीलाकैवल्यम् ।

तुशब्दः पूर्वपक्षनिरासार्थः । यथा खलु

लोके प्राप्तैश्वर्यस्य सार्वभौमस्य फलसङ्कल्पं विनैव विचित्रमक्षकन्दुकादिभिर्विक्रीडनं लीलामात्रं दृश्यते, तथा ब्रह्मणोऽपि लीलाकैवल्यं, केवलं विश्वोत्पादनादिक्रीडामात्रमित्यर्थः ॥ ३२ ॥

वेदान्तकौस्तुभप्रभा ।

इति चेत्तत्राह —

लोकवत्तु लीलाकैवल्यम् ।

तुशब्दश्चोद्यनिरासार्थः । आप्तसमस्तकामस्यापि परब्रह्मणो विचित्रविश्वसृष्टौ प्रवृत्तिर्लीलैव केवला, न तत्र प्रयोजनोद्देशः, लोकवत् । यथा लोके राजादीनां परिपूर्णकामानामपि क्रीडाप्रवृत्तिर्दृश्यते, यथा वा सुखोन्मत्तस्य सुखोद्रेकात्फलनिरपेक्षनर्तनादि ॥ ३२ ॥

सू० वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति । २।१।३३॥

वेदान्तपारिजातसौरभः ।

विषमसृष्टिसंहारादिनिमित्तवैषम्यनैर्घृण्ये जीवकर्मसापेक्षत्वात्पर्जन्यस्येव जगज्जन्मादि-

कर्त्तुर्न स्यातां, तथैव दर्शयति "पुण्यो वै पुण्येन कर्मणा, पापः पापेने"ति श्रुतिः ॥ ३३ ॥

वेदान्तकौस्तुभः ।

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ।

ननु ब्रह्म यदि लीलामात्रेण विश्वसृष्ट्यादि करोति तर्हि तस्य वैषम्यनैर्घृण्ये प्रसज्येयाताम् । देवमनुष्यतिर्य्यगादीन्विषमान्सृजतो वैषम्यं विषमसृष्टिकर्त्तृत्वं प्रसज्येत, त्रिविधतापालयं विश्वं सृजतस्तत्र तत्र विसक्तान् जीवान् प्रलयवेलायां प्रकृतौ विवेशयतः जरामरणादिदुःखदत्वेन च नैर्घृण्यं निर्दयत्वं प्रसज्येतेति चेन्न, वैषम्यनैर्घृण्ये नैव स्याताम् । कुतः ? "सापेक्षत्वात्" ब्रह्मणोहि देवादिरूपविषमजनोत्पादने विश्वसृष्ट्यादौ च पर्जन्यस्य विषमाङ्कुरोत्पादनादौ तत्तद्बीजसापेक्षत्ववत्तत्तत्कर्मसापेक्षत्वात् । नन्वेतदपि कुतोऽवगम्यते ? इत्यत्राह, दर्शयतीति "एष ह्येव साधु कर्म कारयति तं यमेभ्योलोकेभ्यउन्निनीषते, एष एवाऽसाधु कर्म कारयति, तं यम-

धोनिनीषते, पुण्योवै पुण्येन कर्मणा भवति पापः पापेन कर्मणा, साधुकारी साधुर्भवति पापकारी पापोभवती"ति भगवती श्रुतिर्दर्शयती-त्यर्थः ॥ ३३ ॥

वेदान्तकौस्तुभप्रभा ।

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ।

ननु लीलयापि ब्रह्मणोविश्वसृष्टिप्रवृत्तौ वैषम्यनैर्घृण्ये प्रसज्येयातां, वैषम्यं नाम देवमनुष्यादीनामुत्तममध्यमादिरूपविषमसृष्टिकर्तृत्वं, नैर्घृण्यं नाम दुर्विषहदुःखगर्भजगन्निर्मातृत्वेन तत्संहर्तृत्वेन च निर्दयालुता । तत्रोत्तरमाह, नेति । नेश्वरस्य वैषम्यनैर्घृण्ये प्रसज्येते, कुतः?सापेक्षत्वात् । तत्तत्प्राणिपुण्यापुण्यकर्मसापेक्षत्वादीश्वरस्य व्रीहियवाम्रादिसृष्टिवैचित्र्ये तत्तद्बीजगतासाधारणसामर्थ्यसापेक्षपर्जन्यवत् । न च सापेक्षत्वेऽप्राधान्यं, भृत्यादिसेवानुसारेण फलदातुराज्ञोऽप्राधान्यादर्शनात् । तथाहि दर्शयति श्रुतिः "पुण्योवै पुण्येन कर्मणा भवति पापः पापेन कर्मणा, साधुकारी साधुर्भवति, पापकारी पापो भवती"-त्यादिः ॥ ३३ ॥

सू० न कर्माऽविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ।२।१।३४॥

वेदान्तपारिजातसौरभः ।

ननु "सदेव सौम्येदमग्रआसीदेकमि"ति सृष्टेः प्रागविभागश्रवणात् कर्मसापेक्षत्वं परस्य न सङ्गच्छते, इति चेन्न, कर्मणां पूर्वसृष्टिस्थजीव-कृतानामनादित्वात्तदानीमपि सत्त्वात्पूर्वसृष्टि-रपि, अकस्मादुत्तरसृष्ट्यनुपपत्त्योपपद्यते च । "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयादि" त्यादावुपलभ्यते चापि ॥ ३४ ॥

वेदान्तकौस्तुभः ।

न कर्माऽविभागादिति चेन्नानादित्वादुपपद्यते चाप्युप-लभ्यते च ।

ननु सापेक्षत्वादिति हेतुर्न सङ्गच्छते, कुतः ? "कर्माऽविभागात्" "सदेव सौम्येदमग्र-आसीदेकमेवाद्वितीयामि"त्यादिना सृष्टेः प्राक् सर्वस्य जगतोऽविभागे निश्चिते सति क्षेत्रज्ञ-कर्मणामप्यविभागावधारणात् । सृष्टेः प्राक्कर्माणि सृज्य वैचित्र्यहेतुभूतानि न सन्तीत्यर्थः । यत्सापेक्षत्वं ब्रह्मणोभवेदिति चेन्न, कुतः ? सर्व-स्यानादित्वात् । पूर्वसृष्टौ क्षेत्रज्ञैः कृतानि पुण्या-

पुण्यमिश्राणि कर्माणयुत्तरसृष्टिगतवैचित्र्यनिमित्तानि भवन्तीत्यर्थः । सृष्टिप्रवाहोबीजाङ्कुरन्यायेन पूर्वोक्तयाऽभिव्यक्ताऽनभिव्यक्तकार्य्यविवस्थयोपपद्यते च । चकारात्पूर्वसृष्टिं विनाऽकस्मादुत्तरसृष्टेरनुपपत्तेश्च । उपलभ्यते चापि शास्त्रे "सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयदि"त्यादौ पूर्वसृष्टेः श्राद्धावोपदेशात्सृष्टिप्रवाहस्यानादित्वमुपलभ्यते इत्यर्थः । ऊर्द्धमूलोऽवाक्शाखएषोऽश्वत्थः सनातनः । ऊर्द्धमूलमधः शाखमश्वत्थं प्राहुरव्ययमि"त्यादिश्रुतिस्मृतिषु च संसारस्य सन्मूलत्वेन प्रवाहरूपतयासत्यत्वं चोपलभ्यते । पूर्वत्र सत्यत्वेन कार्य्यं निरूपितमेव। "अनाद्यन्तवती न जायते म्रियते वा विपश्चित्, प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी"ति चिदचित्पदार्थयोःपरमकारणशक्तिभूतयोरनादित्वं चोपलभ्यते ॥ ३४ ॥

वेदान्तकौस्तुभप्रभा ।

न कर्माऽविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ।

ननु "सदेव सौम्येदमग्रआसीदेकमेवे"ति सृष्टेः पूर्वं चेत्रब्र-

तत्कर्माविभागश्रवणात् कथं कर्मापेक्षया वैषम्याद्यप्रसक्तिरिति चेन्न, कुतः ? क्षेत्रज्ञानां तत्कर्मणां चानादित्वात्, संसारस्य हेतुहेतुमद्भावोपपत्तेः, पूर्वसृष्टिसम्पादितधर्माधर्मप्रपञ्चस्यात्यन्तिकनाशाभावात्, तदपेक्षयोत्तरसृष्टौ न किञ्चिद्बाधकमिति भावः। ननु कुतस्तेषामनादित्वमित्यतआह। उपपद्यते च। क्षेत्रज्ञाणां तत् कर्मप्रवाहाणां चानादित्वं, क्षेत्रज्ञानां स्वरूपतोऽनादित्वेऽप्यविभागश्रवणं च नामरूपविभागाभावादन्यथा कृतनाशादिप्रसङ्गात्। उपलभ्यते च क्षेत्रज्ञानामनादित्वं श्रुतिस्मृत्योः। "न जायते म्रियते वा विपश्चित्, अजोह्येकोजुषमाणोऽनुशेते, प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी"ति ॥ ३४ ॥

सू०सर्वधर्मोपपत्तेश्च।२।१।३५

वेदान्तपारिजातसौरभः।

सर्वेषां कारणधर्माणां ब्रह्मण्येवोपपत्तेश्चाविरोधसिद्धिः ॥ ३५ ॥

इति श्रीमद्भगवन्निम्बार्कविरचिते वेदान्तपारिजातसौरभे द्वितीयाऽध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तकौस्तुभः ।

सर्वधर्मोपपत्तेश्च ।

सर्वेषामुक्तानामनुक्तानां च जगत्कारणानुरूपाणां प्रधानादावनुपपन्नानां धर्माणां ब्रह्मणि श्रीपुरुषोत्तमे उपपत्तेश्च ब्रह्मणि शास्त्रसमन्वयो न कुतोऽपि विरुद्ध्यते इति सिद्धम् ॥ ३५ ॥

इति प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीश्रीनिवासाचार्य्येण विरचिते शारीरकमीमांसाभाष्ये श्रीमति वेदान्तकौस्तुभे द्वितीयाध्यायस्य प्रथमःपादः ॥ १ ॥

वेदान्तकौस्तुभप्रभा ।

सर्वधर्मोपपत्तेश्च ।

प्रधानपरमाणवादिष्वनुपपन्नानां सार्वज्ञ्यादीनां सर्वेषां धर्माणां कारणत्वोपपादकानां ब्रह्मण्येवोपपत्तेश्च ब्रह्मैव कारणं, न प्रधानादिः, परिमितशक्तित्वात् । ब्रह्मणश्चाचिन्त्यानन्तशक्तिमत्त्वात् सर्वमनवद्यमिति ॥ ३५ ॥

इति प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीश्रीकेशवकाश्मीरिभट्टविरचितायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ द्वितीयाध्यायप्रथमपादविवरणम् ॥ १ ॥

श्रीमते नियमानन्दाय नमः ।

द्वितीयाऽध्याये द्वितीयपादारम्भः ।

सू० रचनाऽनुपपत्तेश्च नाऽनुमानम् ॥२।२।१॥

वेदान्तपारिजातसौरभः ।

प्रधानमनुमानगम्यं न जगत्कारणं, कुतः ? सृज्यरचनानभिज्ञात्ततोविविधरचनानुपपत्तेश्च ॥१॥

वेदान्तकौस्तुभः ।

एवं हि पूर्वत्र मुमुक्षून्पपरमपुरुषगुणस्वरूपादिश्रवणमननादौ प्रवर्त्तयितुं भगवता सूत्रकृता श्रीपुरुषोत्तमस्य सर्वशक्तेः सर्वेश्वरस्य परमकारणस्य श्रीवासुदेवस्य जगज्जन्मादिकारणत्वं सुदृढं प्रतिपादितम् । "ईक्षतेर्नाशब्दमि"त्यादिना परपक्षाणामश्रोतत्वञ्च, दर्शितमिदानीमौपनिषदसिद्धान्तस्यैवोपादेयत्वसिद्धयेऽस्मिन्पादे भगवान्सूत्रकारः परोक्तयुक्तीनामाभासत्वं दर्शयति । न चौपनिषदसिद्धान्तप्रका-

शनेनैव मुमुक्षूणामुपकारे जाते किं परपक्ष-दूषणेनेति वाच्यम् ? यथा हिततममन्नमुत्सृज्या-हिते विषादौ प्रवृत्तं जनं तद्दोषकथनादिना-ततोनिषेधयित्वा तत्रैव तं नियोजयन्ति । तथा वेदविरुद्धात्पक्षान्निवारणाय स्वसिद्धान्ते मुमुक्षु-प्रवृत्तये च परपक्षदूषणसूचनस्य युक्तत्वात् । साङ्ख्या हि श्रुतिप्रोक्तं सर्वज्ञं सर्वशक्तिं श्रीपुरुषोत्तमं जगज्जन्मादिकारणमतिहाय, तत्सम्बन्धवर्जितामचेतनां गुणत्रयसाम्यभूतां प्रकृतिं जगत्कारणमाहुः । तदुक्तं षष्टिसंहिता-याम् । "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति-विकृतयः सप्त । षोडशश्च विकारो न प्रकृति-र्न विकृतिः पुरुषः" इति प्रकृतिसत्त्वे पञ्चहेतूनाहुः ॥ भेदानां परिमाणा१त्समन्वयात्२ शक्तितःप्रवृतेश्च ३ कार्य्यकारणविभागाद४विभागा५द्वैश्वरूप्यस्य कारणं प्रधानमिति, विश्वरूपमेव वैश्वरूप्यं वि-चित्रसन्निवेशं जगत्तस्य ये च परिमितास्ते सामा-न्यकारणपूर्वका यथा घटादयः । एवं परिमिता-महदहंकारौ पञ्चतन्मात्राण्येकादशेन्द्रियाणि पञ्च-महाभूतानीति भेदास्तेषामेकं देशकालापरिमितं

गुणत्रयसामान्यं कारणमस्ति । ये च यदन्विता दृश्यन्ते, ते तदेककारणपूर्वकाः । यथा मृदन्विताः शरावादयस्तत्पूर्वकाः, तथा सुखदुःखमोहान्विता बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हन्ति । तथा घटादिकार्य्याणां कारणशक्तितः प्रवृत्तिवन्महदादिकार्याणामपि कारणशक्तितः प्रवृत्तिर्वाच्या, एवं सति तादृशशक्तिमत्कारणं प्रधानम् । किञ्च कार्य्यस्य कुण्डलादेः सदृशात्कारणात्सुवर्णादेर्विभागस्तस्मिन्नेवाविभागश्च दृश्यते । एवं वैश्वरूप्यस्यापि विभागाविभागौ ताभ्याम*धिभूतं गुणत्रयसाम्यरूपं कारणमव्यक्तमनुमीयतइति प्राप्ते आह —

रचनाऽनुपपत्तेश्च नानुमानम् ।

अनुमीयते इत्यनुमानमब्रह्मात्मकं प्रधानं न जगत्कारणम्, कस्मात् ? रचनाऽनुपपत्तेः, अब्रह्मात्मकादानुमानिकादचेतनात्स्रष्टव्यज्ञानहीनात्प्रधानात् विचित्रकर्मानुरूपविविधभोग्यसंस्थान-

---

*भूतमात्रमधिकृत्य वर्त्तमानम् ।

विभिन्नजगद्रचनाऽनुपपत्तेः । लोके स्रष्टव्य-ज्ञानवतोविविधविचित्रप्रासादरथालङ्कारादिरचना-दर्शनात् । चकारः प्रधानसत्त्वसाधकानां हेतू-नां सत्प्रतिपक्षत्वं बोधयति । अब्रह्मात्मकं साङ्ख्याभिमतं प्रधानमसत्, तदनुपलब्धेः, यदेवं तदेवं खपुष्पवत्, यन्नैवं तन्नैवं, द्युमणि-वत्, इति साध्याभावसाधकप्रयोगात् ॥ १ ॥

वेदान्तकौस्तुभप्रभा।

साङ्ख्यतार्किकबौद्धैश्च जैनैः पाशुपतादिभिः ।
दुर्विज्ञेयं गुरुं कृष्णं निम्बार्कं समुपाश्रये ॥ १ ॥

एवं परोद्भावितदूषणपरिहारपूर्वकं परब्रह्मणोविश्वजन्मा-दिकारणत्वमुक्तम् । इदानीं परपक्षान्निराकर्तुं परपादः प्रवर्त्यते । *अन्यथा परतन्त्रप्रज्ञाः प्राणिनस्तेषांधीः परपक्षाणां प्रामाणि-कत्वशङ्क्या तेष्वेवावलम्बेरन्नतु वैदिकपक्षमाद्रियेरन्, पूर्वंतु-"ईक्षतेर्नाशब्दं, कामाच्च नानुमानापेक्षा, एतेन सर्वे व्याख्याता-व्याख्याताः" इत्यादिना तदुद्भावितवैदिकवाक्यानामतत्परत्वमुक्त-

---

* परपादप्रवर्त्तनाभावे ।

धीःमहाजनपरिग्रहीतत्वाद्युक्तिगाढत्वसम्भावनात् सर्वज्ञभाषि-तत्वाच्च ।

মিহ তু বাক্যান্যনপেক্ষ্য স্বাতন্ত্র্যেণ তদ্যুক্তয়ঃ প্রতিষিধ্যন্তে ইতি ন পুনরুক্তিঃ। তত্র সাঙ্খ্যা মন্যন্তে, ত্রিগুণমচেতনং প্রধানং জগৎকারণং, তস্য সত্ত্বে পঞ্চহেতূনাহুস্তথা হি ভেদানাং পরিমাণাৎ, সমন্বয়াচ্ছক্তিতঃ, প্রবৃত্তেশ্চ কার্যকারণবিভাগাদবিভাগাদ্বৈশ্বরূপ্যস্যেতি, বিশ্বরূপমেব বৈশ্বরূপ্যং বিচিত্রসন্নিবেশং জগত্তস্য যে চ পরিমিতাস্তে সামান্যকারণপূর্বকাঃ যথা ঘটাদয়ঃ। এবং পরিমিতামহদাদিপৃথিব্যন্তাভেদাস্তেষামেকং দেশকালাপরিমিতং গুণত্রয়সামান্যং কারণমস্তি। যে চ যদন্বিতাদৃশ্যন্তে, তে তদেককারণপূর্বকাঃ, যথা মৃদন্বিতাঃ শরাবাদয়স্তৎপূর্বকাঃ। তথা সুখদুঃখমোহান্বিতা বা*ধ্যাত্মিকাভেদাঃ সুখদুঃখঃ§মোহাত্মকসামান্যকারণপূর্বকাভবিতুমর্হন্তি। তথা ঘটাদিকার্যাণাং কারণশক্তিতঃ প্রবৃত্তিবন্মহদাদিকার্যাণামপি কারণশক্তিতঃ প্রবৃত্তির্বাচ্যাতচ্ছক্তিমৎকারণমব্যক্তম্। কিঞ্চ কারণাৎকার্যস্য বিভাগোজন্ম, অবিভাগোলয়শ্চ, তত্র দৃশ্যতে। এতৌ বিভাগাবিভাগৌ বৈশ্বরূপ্যস্য বিচিত্রসন্নিবেশস্য জগতোদৃশ্যমানৌ ক্বচিৎকারণে বিশ্রান্তৌ বিভাগত্বাদবিভাগত্বাচ্চ, মৃদি ঘটবিভাগাবিভাগবদিতি ত্রিগুণস্য জগতোগুণত্রয়সাম্যরূপপ্রধানাদুৎপত্তিস্তস্মিন্নেব লয়শ্চেত্যনুমীয়তে ইতি প্রাপ্তে তত্রাহ —

রচনাঽনুপপত্তেশ্চ নানুমানম্।

জগদ্ধেতুতয়াঽনুমীয়তে ইত্যনুমানং প্রধানং ন জগৎকারণং, কুতঃ? রচনাঽনুপপত্তেঃ তৎস্বভাবাভিজ্ঞচেতনানধিষ্ঠিতং প্রধানং

---

*সুখদুঃখমোহাত্মকানি সত্ত্বরজস্তমাংসি।

§ বাহ্যংপৃথিব্যাদিভোগ্যংঅধ্যাত্মিকংশরীরাদিচভোগাধিষ্ঠানং

न विचित्रजगद्रचनासमर्थमचेतनत्वात् रथप्रासादादिरचनाहेतुभूतकेवलदार्वादिवदिति । च शब्देनान्वयानुपपत्तिः समुच्चीयते। न हि बाह्यारूपादयःसुखदुःखमोहान्विता अवभासन्ते, सुखादीनां चित्तधर्मत्वेन प्रतिपुरुषमन्तरेव सम्पद्यमानत्वात् । न बाह्यार्थाकारतयाऽनुगताः सुखादयः सम्पद्यन्ते चेतनस्यात्मीयवासनानुसारेण बाह्यविषयनिमित्तास्तूत्पद्यन्ते, इति सत्त्वादेश्चान्वितस्य द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासम्भवात् । नच सत्त्वादीन्यपि द्रव्याणि तेषां द्रव्यगुणतया प्रसिद्धेः शक्तितः प्रवृत्तेरित्यादिहेतवस्तु ब्रह्मण्युपपद्यन्ते, तस्याप्यपरिमितत्वात्, जगतस्तदधीनस्थितिप्रवृत्तित्वात् जगदुत्पत्तिलयवत्त्वादिति ॥ १ ॥

सू० प्रवृतेश्च ॥ २।२।२॥

वेदान्तपारिजातसौरभः ।

स्वतः प्रवृत्त्यनुपपत्तेश्च नानुमानम् ॥ २ ॥

वेदान्तकौस्तुभः ।

प्रवृत्तेश्च ।

अनुपपत्तेरित्याद्यनुवर्त्तते । अचेतनस्यानुमानिकस्य प्रधानस्य स्वतोगुणत्रयसाम्यावस्थाप्रच्युतिरूपायाः प्रवृत्तेरनुपपत्तेश्चाऽनुमानगम्यं प्रधानं न जगत्कारणम्, लोके चेतनाधिष्ठितानामेव रथादीनां कार्य्येषु प्रवृत्तिदर्शनात् ॥ २ ॥

न विचित्रजगद्रचनासमर्थमचेतनत्वात् रथप्रासादादिरचनाहेतुभूतकेवलदार्वादिवदिति । च शब्देनान्वयानुपपत्तिः समुच्चीयते । न हि बाह्यारूपादयःसुखदुःखमोहान्विता अवभासन्ते, सुखादीनां चित्तधर्मत्वेन प्रतिपुरुषमन्तरेव सम्पद्यमानत्वात् । न बाह्यार्थाकारतयाऽनुगताः सुखादयः सम्पद्यन्ते चेतनस्यात्मीयवासनानुसारेण बाह्यविषयनिमित्तास्तूत्पद्यन्ते, इति सत्त्वादेश्चान्वितस्य द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासम्भवात् । नच सत्त्वादीन्यपि द्रव्याणि तेषां द्रव्यगुणतया प्रसिद्धेः शक्तितः प्रवृत्तेरित्यादिहेतवस्तु ब्रह्मण्युपपद्यन्ते, तस्याप्यपरिमितत्वात्, जगतस्तद्धीनस्थितिप्रवृत्तित्वात् जगदुत्पत्तिलयवत्त्वादिति ॥ १ ॥

सू० प्रवृतेश्च ॥ २।२।२॥

वेदान्तपारिजातसौरभः ।

स्वतः प्रवृत्त्यनुपपत्तेश्च नानुमानम् ॥ २ ॥

वेदान्तकौस्तुभः ।

प्रवृत्तेश्च ।

अनुपपत्तेरित्याद्यनुवर्त्तते । अचेतनस्यानुमानिकस्य प्रधानस्य स्वतोगुणत्रयसाम्यावस्थाप्रच्युतिरूपायाः प्रवृत्तेरनुपपत्तेश्चाऽनुमानगम्यं प्रधानं न जगत्कारणम्, लोके चेतनाधिष्ठितानामेव रथादीनां कार्य्येषु प्रवृत्तिदर्शनात् ॥ २ ॥

वृक्षादिविवृद्धये स्वयं प्रवर्त्तते, स्पन्दते च। तथैव चेतनानपेक्षं प्रधानमपि विसमगुणं सन्नानाकारेण परिणमते इतिचेत्तत्रोच्यते । तत्रापीति । क्षीरादावपि चेतननिरपेक्षा प्रवृत्तिर्नोपपद्यते, अपि तु (चेतनाऽधिष्ठितमेव पयआदिकं दध्याद्याकारमापद्यते,) वत्सवत्सला धेनुः स्नेहात्पयः प्रवर्तयति द्रवत्वाच्च क्षराति । ननु च मृतेऽपि वत्से पयसोभावोदृश्यते, वत्सस्नेहात्पयः प्रवर्तयतीत्ययुक्तमिति चेन्न, तदा वत्सानुस्मृतेः । अथवा स्वामिस्नेहात्तथात्वोपपत्तेः। अम्बु च चेतनाधिष्ठितमेव हिमबुद्बुदाद्याकारं भवति, भूसंसर्गान्नानारसाकारं प्रतीयते च, निम्नदेशापेक्षया द्रवत्वात्स्यन्दते च, सर्वस्य चेतनाधिष्ठितत्वाच्च, सर्वं यथा सम्भवं सर्वत्रोपपद्यते । "योऽप्सु तिष्ठन्नेतस्य वा ऽक्षरस्य प्रशासने गार्गि ! प्राच्योऽन्या नद्यः स्यन्दते" इत्यादिश्रुतेः । तस्मान्नानुमानं जगत्कारणम् ॥ ३ ॥

( ) एतच्चिन्हाङ्कितपाठोऽधिकोदृश्यते पुस्तकान्तरे ।

वेदान्तकौस्तुभप्रभा ।

पयोऽम्बुवच्चेत्तत्रापि ।

ननु पयोयथा चेतनानऽधिष्ठितमेव दध्यात्मना स्वतः परिणामभानं दृश्यते, वत्सविवृद्धये प्रवर्त्तते च, अम्बु च जलधरविमुक्तमेकरसं जम्बीरामृनारिकेरादिविचित्ररसरूपेण स्वतः परिणामते, स्यन्दते च, लोकानुग्रहाय, तथा प्रधानमपीति चेत्तत्परिहरति । तत्राऽपीति । क्षीरादावपि चेतनाऽनधिष्ठिते प्रवृत्त्यनुपपत्तेः । तयोश्चेतनाधिष्ठितत्वं चान्तर्यामिब्राह्मणे "योऽप्सु तिष्ठन्नि"त्यादिऽश्रुतिसिद्धम् । वत्सवृद्धये च धेनुः पयः प्रवर्त्तयति द्रवत्वाच्च वत्सचूषणेन क्षरति । अम्बु च चेतनाधिष्ठितमेव निम्नदेशापेक्षया द्रवत्वात्स्यन्दते ॥ ३ ॥

सू० व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥२।२।४॥

वेदान्तपारिजातसौरभः ।

प्राज्ञेनाऽनधिष्ठितं प्रधानं न जगत्कारणं, कुतः ? तद्व्यतिरिक्तस्य सहकार्य्यन्तरस्यानवस्थितेर्यतस्तव तदनपेक्षत्वात् ॥ ४ ॥

वेदान्तकौस्तुभः ।

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ।

इतोऽपि जगत्कारणं नानुमानम् । कस्मात् ? "व्यतिरेकानवस्थितेः" प्राज्ञानधिष्ठितस्य स्वतन्त्रस्याचेतनस्यानुमानिकस्य प्रधानस्य जगत्कारणत्वे सर्वदा कार्य्यप्रसक्तौ कदाचिदपि कार्य्यव्यतिरेकस्यावस्थित्यभावापत्तेः । यद्वा प्रधानव्यतिरिक्तस्य प्रवर्त्यस्य प्रवर्त्तकस्य वाऽवस्थित्यभावादित्यर्थः । तत्रापि हेतुः । अनपेक्षत्वादिति । तव मते प्रधानस्य जगत्कर्त्तृत्वे सहकार्य्यनपेक्षत्वात् नच विचित्रं कर्म प्रधानप्रवर्त्तकमस्तीति वाच्यम्, कर्मणोजगत्कारणत्वापत्तेः, प्रधानस्य जगज्जनने स्वातन्त्र्यभङ्गापत्तेश्च, असम्भवाच्च । कर्म तु पुण्यमपुण्यं च सुखं दुःखं च फलमपि दातुं न शक्नोति । तत्कर्त्ताऽपि स्वतः फलं न प्राप्नोति । प्रकृतिसंसर्गदूषितक्षेत्रज्ञानुष्ठितं तत्कथं प्रधानं प्रवर्तयितुं शक्नुयात् । भगवदिच्छया तु कर्माणि फलन्ति, तत्कर्त्ता च फलं प्राप्नोति । "सुखं दुःखं भवोभावोभयं चाभयमेव च । अहिंसा समता तुष्टिस्तपोदानं

यशोऽयशः। भवन्ति भावा भूतानां मत्तएव पृथग्विधाः"इतिश्रीमुखवचनात्। नच पुरुषसन्निधिमात्रतः प्रधानं प्रवर्त्तते इति वाच्यम्, पुरुषसन्निधेर्नित्यत्वात्प्रवृत्तेरपि नित्यत्वापत्तेः। विशेषतस्तु "पुरुषाश्मवदि"त्यत्र स्फुटीभविष्यति ॥ ४ ॥

वेदान्तकौस्तुभप्रभा।

व्यतिरेकानवस्थितेश्चानपेक्षत्वात्।

प्रधानव्यतिरिक्तस्य प्रवर्त्तकस्य निवर्त्तकस्य वा हेत्वन्तरस्य सृष्टेः प्रागनवस्थितेरवस्थित्यभावात् प्रधानस्य स्वतः प्रवृत्तिः, सा च नित्या स्यादनपेक्षत्वात्। ततश्च सर्वदा सृष्टिरेव स्यात्। पुरुषसन्निधिरूपहेत्वन्तरस्वीकारेणापेक्षणादपि न केवलं प्रधानं परिणामकर्त्तृ सन्निधिसातत्येन प्रवृत्तिसातत्यापत्त्या प्रलयाभावोऽपवर्गाभावश्च ॥ ४ ॥

सू० अन्यत्राभावाच्च न तृणादिवत् ॥ २।२।५ ॥

वेदान्तपारिजातसौरभः।

अनडुहाद्युपभुक्ते तृणादौ क्षीराकारेण पारिणामाभावाद्वेन्वाद्युपभुक्तं तृणादि यथा स्वतः

क्षीरीभवति, तथाऽव्यक्तमपि महदाद्याकारेण परिणमते इति न वक्तव्यम् ॥ ५ ॥

वेदान्तकौस्तुभः।

अन्यत्राभावाच्च न तृणादिवत् ।

ननु यथा खलु तृणोदकादिक्षीरभावेन परिणमते, तथा निमित्तान्तरनिरपेक्षमेवाव्यक्तं महदाद्याकारेण परिणमते, तत्राह। नेति । नैवं वक्तुं शक्यम्, कुतः ? "अन्यत्राभावात्" अन्यत्र धेन्वादेरन्यत्रानडुहादौ तदुपभुक्तस्य तृणोदकादेः क्षीराकारेण परिणामाभावात्। चकारात् धेन्वाद्युपभुक्ततृणादिक्षीराकारपरिणामस्य प्राज्ञकर्तृकत्वाभ्युपगमात्। तथा प्रधानमपि प्राज्ञाऽधिष्ठितमेव महदाद्याकारेण परिणमते, नतु स्वतः इति भावः ॥ ५ ॥

वेदान्तकौस्तुभप्रभा।

अन्यत्राभावाच्च न तृणादिवत्।

नच यथा धेन्वाद्युपभुक्तं तृणोदकपल्वादि स्वयमेव क्षीराद्याकारेण परिणामते, तद्वत्प्रकृतिरपि महाद्याकारेण परिणंस्यत इति वक्तुं शक्यमन्यत्राभावात्, अन्यत्रानडुहाद्युप-

भुक्तेषु तेषु क्षीराकारेण परिणामाभावात् । अतः प्राज्ञाधिष्ठितमेव तृणादि क्षीरीभवति तथा प्रधानमपि ॥ ५ ॥

सू० अभ्युपगमेऽप्यर्थाभावात्

॥ २ । २ । ६ ॥

वेदान्तपारिजातसौरभः।

कथं चित्प्रवृत्त्यभ्युपगमेऽपि प्रधानं कारणं न भवति, तस्याचेतनत्वेन प्रवृत्तिप्रयोजनासम्भवात् ॥ ६ ॥

वेदान्तकौस्तुभः ।

अभ्युपगमेऽप्यर्थाभावात् ।

प्रवृत्तेश्चेत्यादिना प्रधानस्य स्वतः प्रवृत्तिसामर्थ्यं नास्त्यतोन तज्जगत्कारणमित्युक्तमथ हठात्प्रवृत्त्यभ्युपगमेऽपि न प्रधानं कारणं भवितुमर्हति, कुतः ? "अर्थाभावात्" सृष्टेः प्राक् स्वानन्दभूतानां पुरुषाणां भुक्तिमुक्तिनिरपेक्षतया स्वपरप्रयोजनानभिज्ञस्य प्रधानस्य जडत्वेन भोगाद्यनर्हतया वा प्रयोजनाभावात् । नचाप्तसमस्तकामस्य पुरुषोत्तमस्यापि जगज्जनने

किं प्रयोजनमिति वाच्यम्, "लोकवत्तु लीला-कैवल्यमि"त्युक्तत्वात् । यद्वा प्रधानं स्वतः प्रवर्त्तते, इत्येवं हठेन प्रयुक्तस्य वाक्यस्य स्वतआकाशो-धावतीतिवदर्थशून्यत्वादित्यर्थः ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

अभ्युपगमेऽप्यर्थाभावात् ।

एवं तावत्प्रधानस्य स्वतः प्रवृत्तिर्नास्ति जडत्वादित्युक्तम्, सा-चेत्तव हर्षायाऽस्माभिरभ्युपगम्येत, तथापि तया न किञ्चित्प्र-योजनं सिध्यति । तथाहि प्रधानप्रवृतेः किं प्रयोजनं भोगा वा ? अपवर्गो वा ? उभयं वे ? ति । आद्ये, प्रधानस्यातेतनत्वात्पुरुष-भोगार्था सेति चेत्प्रवृत्तेः प्राक्चैतन्यमात्रवपुषोनिर्विकारस्य निष्क्रि-यपुरुषस्य प्रकृतिदर्शनरूपभोगासंभवात्, सन्निधिमात्रं भोगहेतु-रितिचेत्सन्निधेर्नित्यत्वात् सन्ततत्तद्भोगप्रसङ्गादनिर्मोक्षप्रसङ्गः । द्वितीये, प्रवृत्तेः प्रागप्यपवर्गस्य सिद्धत्वादनर्थका सा । तृतीये, भोक्तव्यानामानन्त्यादनिर्मोक्षप्रसङ्गएवेति ॥ ६ ॥

सू०पुरुषाश्मवदिति चेत्तथापि ॥

॥ २।२।७ ॥

वेदान्तपारिजातसौरभः ।

यथा पङ्गुरन्धमश्मापः प्रवर्त्तयति तथा पुरुषः प्रधानमिति चेत्तथात्वे निष्क्रियत्वाऽभ्युपगम-

विरोधः । प्रधानस्य परप्रेर्यत्वेन जगत्कारणत्वे-ऽप्राधान्यप्रसङ्गः ॥ ७ ॥

वेदान्तकौस्तुभः ।

पुरुषाश्मवदिति चेत्तथाऽपि ।

ननु दैववशात्कांचित्कदाचित्सार्थपरिभ्रष्टः स्वेष्टदेशगमनकामः गमनशक्तिहीनः दृक्शक्तिमान् पङ्गुः दृक्शक्तिहीनं गमनशक्तिमन्तमन्धमुपलभ्य, तमधिष्ठाय यथा प्रवर्त्तयति, यथाच अयस्कान्तोऽश्मायः प्रवर्त्तयति, तथा खलु क्रियाशक्तिहीनोऽपि दृक्शक्तिमान्पुमान् दृक्शक्तिवर्जं प्रधानं सन्निधिमात्रेण प्रवर्त्तयति, तस्मात्प्रधानस्याचेतनत्वेऽपि सर्गादिप्रवृत्तेरुपपत्तिरिति चेदत्रोत्तरम् । तथाऽपीति । एवं भूताभ्यां दृष्टान्ताभ्यामपि दार्ष्टान्ते प्रवृत्तेरनुपपत्तिरेवेत्यर्थः । तथाहि पुरुषस्य प्रधानप्रवर्त्तकत्वाङ्गीकारे पुरुषोऽकर्त्तेति प्रतिज्ञाहानिः, प्रधानस्य पुरुषप्रवर्त्यत्वे प्रधानं स्वतन्त्रं जगत्कर्तृ हीति प्रतिज्ञाहानिः । पङ्गोर्हि चरणवर्जितत्वाद्गमनशक्तिरनाविर्भूतापि स गमनशक्तिमन्तं वाचा प्रेरयति ।

अन्धत्वादनाविर्भूतदृक्शक्तिरपि प्रेर्य्यः पुरुषस्तद्वचनानुसारेण चेतनत्वात्प्रवर्त्तते । अश्मात्तु पुरुषेणायसा संयोज्यमानोऽयः प्रवर्त्तयति । अयोऽपि स्वभावतोनैव प्रवर्त्तते । किञ्च सर्वत्र सर्वप्रेरकः सर्वज्ञः सर्वेश्वरः सर्वदा वर्त्तते इत्युक्तं "पयोऽम्बुवच्चेत्तत्रापी"ति । प्रकृतिपुरुषसन्निधेस्तु नित्यतयाऽपूर्वतत्सन्निध्यभावात्सृष्टिसंहारप्रक्रिया प्रकृतिपुरुषसन्निधिनिबन्धना बन्धमोक्षव्यवस्था च नोपपद्यते । नित्यप्रवृत्तिप्रसङ्गः प्रलयाभावप्रसङ्गश्च स्यात्प्रकृते तु "सर्वोपेता च से"त्युक्तत्वान्न कोऽपि दोषः ॥ ७ ॥

वेदान्तकौस्तुभप्रभा ।

पुरुषाश्मवदिति चेत्तथाऽपि ।

ननु यथा पङ्गुपुरुषोऽन्धपुरुषमधिष्ठाय, प्रवर्त्तयति, अश्मावाऽयस्कान्तोऽयः प्रवर्त्तयति, एवं पुरुषः प्रधानं प्रवर्त्तयिष्यतीति चेत् तत्रोच्यते । तथाऽपीति । तेनापि प्रकारेण नैव दोषान्निर्मोक्ष्यः, त्वया पुरुषस्य निष्क्रियत्वाभ्युपगमेन प्रवर्त्तकत्वासम्भवात्, तदभ्युपगमे च स्वसिद्धान्तविरोधः । पङ्गुर्हि वागादिभिरन्धं प्रवर्त्तयति, अयस्कान्तश्च सामीप्यात् । तव पुरुषस्य तु निष्क्रियनिर्गुणत्वान्न काश्चित्प्रवर्त्तनव्यापारोऽस्ति सन्निधिमात्रेण

प्रवर्त्तकत्वे प्रलयाभावोऽपवर्गाभावश्च सन्निधेर्नित्यत्वादित्युक्तमेव ॥ ७ ॥

सू० अङ्गित्वानुपपत्तेश्च ॥ २ । २ । ८ ॥

वेदान्तपारिजातसौरभः ।

प्रलये वेलायां साम्येनावस्थितानां गुणानां परस्पराङ्गाङ्गिभावासम्भवाच्च नानुमानं जगत्कारणम् ॥ ८ ॥

वेदान्तकौस्तुभः ।

अङ्गित्वानुपपत्तेश्च ।

इतोऽपि नानुमानं जगत्कारणम् । कुतः ? अङ्गित्वानुपपत्तेः । तथा हि प्राज्ञानधिष्ठितमनुमानसिद्धं भवदभिमतं गुणत्रयसाम्यभूतं प्रधानं जगदाकारेण किमङ्गाङ्गिभावमाश्रित्य परिणमते ? आहोस्वित्तन्नैरपेक्ष्येण ? आद्ये, सृष्टेः प्राक्साम्येनावस्थितानामन्योऽन्यनिरपेक्षाणां सत्त्वरजस्तमसामेकतमस्याङ्गित्वानुपपत्तेः प्रधानस्य जगत्कारणत्वं नोपपद्यते । द्वितीये गुणत्रयसाम्यभूतं कूटस्थं प्रधानं जगदाकारेण सुतरां नैव परि-

णंस्यते, अङ्गाङ्गिभावलक्षणवैषम्याभावात्। न च सृष्टिवेलायां साम्यावस्थाप्रच्युतिर्जायते, तया च गुणानामङ्गाङ्गिभावे सति जगदुत्पद्यते इति वाच्यम् ? विकल्पासहत्वात्। तदानीं स्वतः एव साम्यावस्थाप्रच्युतिर्भवद्भिरभ्युपगम्यते ? उत सर्वज्ञकृता ? नाद्यः पक्षः साधुः, निमित्तं विना स्वतः प्रच्युतेरसम्भवात्। यद्यत्सनिमित्तं तत्तत्प्रच्युतिमत्, बीजादिवत्। न यत्सनिमित्तम्, नतत्प्रच्युतिमत्, पुरुषवदिति प्रयोगाच्च। नापि द्वितीयः, अनभ्युपगमात्, परपक्षप्रवेशाच्च ॥ ८ ॥

वेदान्तकौस्तुभप्रभा।

अङ्गित्वानुपपत्तेश्च।

इतश्च प्रधानस्याप्रवृत्तिः प्रलये सत्त्वादीनां साम्येनावस्थितानां स्वरूपनाशभयात्परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेर्बाह्यस्य च कस्य चिद्वैषम्यहेतोरभावात्। "प्रकृतिं पुरुषं चैव प्रविश्याशुमहेश्वरः। क्षोभयामास योगेन परेण परमेश्वरः" इत्युक्तौ चेश्वराभ्युपगमेन वेदान्तवादएवेति नात्र नोविवादः "सदेवे"ति श्रुतेः ॥ ८ ॥

सू० अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥२।२।९॥

वेदान्तपारिजातसौरभः ।

प्रकारान्तरेण प्रधानानुमितौ च प्रधानस्य ज्ञातृत्वशक्तिवियोगान्न तत्कर्तृकं जगत् ॥ ९ ॥

वेदान्तकौस्तुभः ।

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ।

उक्तप्रकारादन्यथाऽङ्गाङ्गिभावपूर्वककार्य्योत्पत्तिर्यथा सम्भवेत्तथा प्रधानानुमितौ च क्रियमाणायां सत्यां ज्ञशक्तिवियोगात् प्रधानस्य ज्ञातृत्वशक्तिहीनत्वात् रचनानुपपत्त्यादयोदोषाः पूर्वोदाहृताः स्युः । तस्मान्नानुमानं जगत् कारणम् ॥ ९ ॥

वेदान्तकौस्तुभप्रभा ।

अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ।

नन्वन्यथा दूषितप्रकारभिन्नप्रकारान्तरेण गुणानानुमास्यामहे । तथाहि चलं गुणवृत्तमित्यभ्युपगमात्साम्यावस्थिताअपि गुणायथा कार्यं वैषम्योपगमयोग्याएवेति चेदेवमपीदमहमेवं करिष्यामीति प्रधानस्य ज्ञातृत्वशक्तिवियोगात्पूर्वोक्तारचनानुपपत्त्याद्यदोषादुष्परिहराएव । वैषम्योपगमयोग्यत्वेऽपि तेषां साम्यावस्थायां वैषम्यहेतोरभावेन वैषम्यासम्भवः । हेत्वभावेऽपि वैषम्यभाजश्चेत्सर्वदा वैषम्यं स्यादिति ॥ ९ ॥

सू० विप्रतिषेधाच्चासमञ्जसम् ।

॥ २ । २ । १० ॥

वेदान्तपारिजातसौरभः ।

असमञ्जसं कापिलं मतं, वेदान्तविरुद्धत्वात्पूर्वापरविरुद्धत्वाच्च ॥ १० ॥

वेदान्तकौस्तुभः ।

विप्रतिषेधाच्चासमञ्जसम् ।

सर्वथा कापिलं मतमसमञ्जसं भवति, कुतः ? विप्रतिषेधात्, वेदान्तविरोधात् । वेदान्ताः सर्वज्ञं सर्वशक्तिं सर्वेश्वरं जगज्जन्मादिकारणं सर्वप्रमाणनिरपेक्षाः स्वतः प्रमाणभूताः अनादिसिद्धाः प्रतिपादयन्ति, तद्विरुद्धत्वादचेतनकारणवादाभ्युपगमस्येत्यर्थः । "नैषा मतिस्तर्केणापनेये"ति श्रुत्या हेतुवादमात्रस्य प्रतिषेधितत्वाच्च पूर्वापरविरोधाच्च । ते हि सर्वगतं निर्धर्मकं चैतन्यमात्रं कैवल्यस्वरूपं पुष्करपलासवदसङ्गं निष्क्रियं पुरुषमाहुः । तस्मिन्पुनः प्रकृतिपुरुषसन्निधिमात्रतः प्रकृतेः कर्तृत्वमध्यस्याज्ञाना-

कर्तृत्वभोक्तृत्वादिधर्मकं तापत्रयसन्तप्तं संसारिणमपि तमेवाहुः । पुनः प्रकृतिपुरुषविज्ञानात्पुरुषस्यापवर्गमुपदिशन्ति । एवं पूर्वापरविरोधबाहुल्यं तत्र द्रष्टव्यम् । प्रकृते तु "न मां दुष्कृतिनोमूढाः प्रपद्यन्ते नराधमाः । माययाऽपहृतज्ञानाआसुरं भावमाश्रिताः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः । बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते । बहवोज्ञानतपसा पूता मद्भावमागताः"इति स्मृतेः । बन्धनकारणस्य बद्धस्य बन्धविमोचकस्यापूर्वस्य तच्चरणभावापत्तिलक्षणस्यापवर्गस्य च सूपपन्नत्वात्, न पूर्वापरविप्रतिषेधगन्धलेशोऽपि । तस्मात् श्रुतिसमन्वयस्य वेदविरुद्धेन युक्त्याभासविलशितेन कपिलपक्षेण नास्ति विरोधइति सिद्धम् ॥ १० ॥

इति रचनाऽनुपपत्त्यधिकरणम् ॥ १ ॥

वेदान्तकौस्तुभप्रभा ।

विप्रतिषेधाच्चासमञ्जसम् ।

पूर्वापरविरोधाच्चासमञ्जसं कापिलमतं, तथा ह्येवं ते वदन्ति, प्रकृतिः परार्था, दृश्या, भोग्या, पुरुषस्तु तस्माद्द्रष्टा, भोक्काधिष्ठाता,

साक्षी चेति, सा च तस्य भोगापवर्गार्थतया प्रयोजनवती, तयैव साधनभूतया स भोगमपवर्गं च लभते, इति च सच्च नित्यनिर्विकारचैतन्यमात्रस्वरूपोन द्रष्टा, न भोक्ता, न कर्त्तेत्यतएव न स बध्यते, न मोक्षार्थं यतते, न मुच्यते इति च । पुरुषसन्निधानमात्रेण पुरुषस्य चैतन्यं स्वस्यां स्वस्याश्च कर्तृत्वं पुरुषे चानुसन्धायाचेतना प्रकृतिरेव बध्यते, मोक्षार्थं यतते, मुच्यते चेति, पुरुषस्यानुपकारिणोभोगापवर्गरूपप्रयोजनं साधयन्ती, प्रकृतिरुपकारिणीति च वदन्ति, अध्यासरूपबन्धादयः पुरुषस्यापि सन्त्यन्यथा कस्तस्योपकारइत्येवमाद्यनेके विप्रतिषेधास्तत्स्मृतौ द्रष्टव्याः ॥ १० ॥

इति रचनाऽनुपपत्त्यधिकरणम् ॥ १ ॥

सू० महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ २ । २ । ११ ॥

वेदान्तपारिजातसौरभः ।

सावयवत्वेऽनवस्थाप्रसङ्गान्निरवयवत्वे परिणामान्तरोत्पादकत्वासम्भवात् परिमाणुभ्यां द्व्यणुकोत्पत्तेरसामञ्जस्यं, तेभ्यस्त्र्यणुकोत्पत्तेश्च सुतरामसामञ्जस्यं तद्वत्परमाणुकारणवाद्यभ्युपगतं सर्वमसमञ्जसं भवति ॥ ११ ॥

वेदान्तकौस्तुभः ।

ननु प्राज्ञाऽनधिष्ठितं प्रधानं माऽस्तु जगत्कारणं, परमेश्वरेच्छावशवर्त्तिपरमाणुपूगोऽस्तु जगतः कारणमित्याशङ्क्यैदानीं परमाणुकारणवादस्याप्यासामञ्जस्यमाह —

महद्दीर्घवद्वा ह्रस्वपरमण्डलाभ्याम् ।

एषा हि परमाणुकारणवादिनां प्रक्रिया, द्रव्यं द्रव्यान्तरं गुणश्च गुणान्तरमारभते, कार्य्यनिष्पत्तिश्च समवाय्यसमवायिनिमित्ताख्येभ्यः कारणेभ्यः खलु भवति, यथा तन्तुभिः समवायिकारणैस्तेषामितरेतरसंयोगेनासमवायि*कारणेन च तुरीवेमकुविन्दादिभिश्च निमित्तकारणैः पटनामकं कार्य्यमारभ्यते, तथा खलु पार्थिवाप्यतैजसवायवीयभेदाच्चतुर्विधाः परमाणवस्ते च नित्यानिरवयवारूपादिमन्तः पारिमाण्डल्यपरिमाणाः प्रलयेऽनारब्धकार्य्याअवतिष्ठन्ते । सृष्टिसमये कार्यनिष्पत्तौ परमाणवः समवायिकारणं, तत्संयोगोऽसमवायिकारणम्, अदृष्टमीश्वरेच्छा च

---

* असमवायिना च तुरी- इत्यपि पाठः ।

निमित्तकारणं भवति, तत्रेश्वरेच्छावशेनाद्यं कर्म वायवीयेषु परमाणुषूत्पद्यते, ततः संयोगस्तेन द्वाभ्यां परमाणुभ्यां द्व्यणुकं कार्य्यमुत्पद्यते, त्रिभिर्द्व्यणुकैस्त्र्यणुकमारभ्यते, चतुर्भिस्त्र्यणुकैश्चतुरणुकमित्येवं क्रमेण महान्वायुरुत्पद्यते, खेदोधूयमानस्तिष्ठति । तथैव तैजसेभ्यः परमाणुभ्योऽग्निरुत्पद्यते, भौमादिरूपेण जाज्वल्यमानस्तिष्ठति । एवमेवाप्येभ्यः परमाणुभ्योमहान् जलार्णवउत्पद्यते, पोप्लुयमानस्तिष्ठति । तथैव खलु पार्थिवेभ्यः परमाणुभ्योमहती पृथिव्युत्पद्यते, सा हि मृत्पाषाणादिरूपा निश्चला तिष्ठति। कारणगुणैश्च कार्य्यगुणाआरभ्यन्ते । यथा तन्तुगतगुणेन पटगतगुणः अरुणेभ्यस्तन्तुभ्योऽरुणपटदर्शनात् । तथा परमाणुगतशुक्लादिगुणेभ्यो द्व्यणुकगतशुक्लादिगुणआरभ्यते परमाण्वोर्द्व्यणुकारम्भकयोर्ह्रस्वत्वसङ्ख्या च द्व्यणुकेऽणुत्वं ह्रस्वत्वं च परिमाणान्तरमारभते, परमाणुपरिमाणरूपपारिमाण्डल्यं तु न द्व्यणुके पारिमाण्डल्यान्तरमारभते, ततोऽप्यतिसौक्ष्म्यापत्तेः । एवं संहारावसरेऽपि परमेश्वरेच्छावशात्परमाणु-

षु कर्म, तेन संयोगनाशस्तेन द्व्यणुकनाशः इत्येवं क्रमेण पृथिव्यादिनाशइति । सा निराक्रियते । सूत्रे वाशब्दोऽनुक्तसमुच्चयार्थः । असमञ्जसमिति पूर्वतोवर्त्तते । ह्रस्वपरिमण्डलाभ्यामिति पदं यथा सम्भवं विभज्य योजनीयम् । एवं सति परिमण्डलद्व्याद्ह्रस्वद्व्यणुकोत्पत्तिवादवत् ह्रस्वेभ्योमहद्दीर्घत्र्यणुकोत्पत्तिवादवच्चान्यदपि तदुक्तं सर्वमसमञ्जसमिति सूत्राक्षरयोजना । अयमर्थः । परमाणुभ्यां द्व्यणुकोत्पत्त्यसम्भवस्तदसम्भवे सुतरां द्व्यणुकेभ्यस्त्र्यणुकोत्पत्त्यसम्भवः। एवमेव परमाणुकारणवादिभिर्यदुक्तं तदन्यदपि सर्वमसमञ्जसमेव । तथाहि इह तन्त्वाद्यवयवानां स्वांशैः षड्भिः* पार्श्वैः संयुज्यमानानामेव पटाद्यवयव्युत्पादकत्वं दृश्यते दिक् षट्कयोगात्परमाणोः षडंशासिद्धिस्तथोक्तम् "षट्केन युगपद्योगात्परमाणोः षडंशते"ति । तस्मात्परमाणवोऽपि सावयवाएव कार्यजनकाः स्युस्तेषां तथात्वे सति

---

* तन्त्वादेरवयवानां द्व्यणुकानां षड्भिः पार्श्वैः परमाणुभिः ।

कार्य्यत्वापत्तिः द्व्यणुकवदवयवित्वात् परमाण्वव-
यवा अपि स्वांशैः षड्भिः पार्श्वैः संयुज्यमानाः
परमाणोः सावयवत्वसमर्थकाः सावयवाभवेयुरेवं
तदवयवा अपीत्येवमनवस्था स्यात् । परमाणूनां
निरवयवत्वाङ्गीकारे निष्प्रदेशस्य परमाणुशत-
स्यापि संयोगे पारिमाण्डल्यानतिरिक्तपरिमाणतया-
ऽणुत्वह्रस्वत्वाद्यसिद्धिर्भवेदेवं द्व्यणुकोत्पत्त्यसम्भव-
स्तदभावे त्र्यणुकाद्युत्पत्त्यसम्भवाज्जगदुत्पत्त्य-
सम्भवोभवेत् ॥ ११ ॥

वेदान्तकौस्तुभप्रभा ।

असतोऽभावाद्भावउत्पद्यते इति तत्परिहरति, नेति । कुतः ? "अदृष्टत्वात्" असतः शशविषाणादेरङ्कुरोत्पत्त्यदर्शनात् । अभावस्य निरूपाख्यत्वाच्छशविषाणाबीजाभावयोः कोविशेषः । ततश्च कारणानियमानुपपत्तिरिति सर्वं सर्वस्मादुपपद्येत । ननु बीजमनुपमृद्य नाङ्कुरः प्रादुर्भवति, क्षीरमुपमृद्य, दधीव । मृत्पिण्डमुपमृद्य घटइव च बीजमुपमृद्यैवाङ्कुरउत्पद्यते, इत्यतोभावाद्भावोत्पत्तिरिति चेन्न, तत्र बीजसंस्थानमात्रं निवर्त्ततेऽविरोधिबीजद्रव्यमेव त्वङ्कुराकारेणावस्थान्तरतया परिणामतइति प्रत्यक्षमेतन्न प्रत्याख्यातुं शक्यम् ॥ २६ ॥

पृथिव्युत्पद्यते । कारणगुणेभ्यश्च कार्ये गुणान्तरमुत्पद्यते । यथा परमाणुगतशुक्लादिभ्योद्व्यणुकशुक्लादिः तद्वतद्वित्वसङ्ख्यातश्च द्व्यणुके ह्रस्वत्वाणुत्वे परिमाणे चोत्पद्येते, परमाणुपरिमाणरूपपारिमाण्डल्यं तु न द्व्यणुके पारिमाण्डल्यान्तरमारभते, ततोऽप्यतिसौक्ष्म्यापत्तेः द्व्यणुकगतत्रित्वसङ्ख्यातस्त्र्यणुके महत्वदीर्घत्वपरिमाणे चोत्पद्येते, द्व्यणुकगतह्रस्वत्वाणुत्वे तु महत्वादेर्नारम्भके प्रथमानुपपत्तेः, संहारे चेश्वरेच्छया परमाणुषु कर्म, तेन संयोगनाशस्तेन द्व्यणुकनाशइत्येवं क्रमेण पृथिव्यादिनाशइति तस्याप्यसामञ्जस्यं प्रतिपाद्यते ——

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ।

पूर्वतोऽसमञ्जसमिति वर्त्तते । वेति चार्थे । अनुक्तं ह्रस्वद्व्यणुकवादिति समुच्चिनोति । ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमाणुभ्यां महद्दीर्घवत् त्र्यणुकोत्पत्तिवादवत् अणुह्रस्वद्व्यणुकोत्पत्तिवादवच्चान्यदपि काणादमतं सर्वमसमञ्जसमिति । तथाहि तन्त्वाद्यवयवानां स्वांशैः षड्भिः पार्श्वैः संयुज्यमानानामेव पटाद्यवयव्युत्पादकत्वदर्शनात्परमाणवोऽपि सावयवा एव द्व्यणुकाद्युत्पादकाःस्युः । अन्यथा परमाणुसहस्रस्यापि संयोगेपारिमाण्डल्यानतिरिक्तपरिमाणतयाऽणुत्वह्रस्वत्वमहत्वाद्यसिद्धिर्भवेत्, कारणबहुत्वेन कार्यमहत्वोत्पत्तेश्च कल्पनामात्रत्वात् । तेषां सावयवत्वाङ्गीकारे चानवस्था ॥ ११ ॥

सू० उभयथाऽपि न कर्मातस्तदभावः ॥ २ । २ । १२ ॥

वेदान्तपारिजातसौरभः ।

अदृष्टस्य परमाणुवृत्तित्वाऽसम्भवादात्मसम्बन्धिनस्तस्य परमाणुगतकर्मप्रेरकत्वासम्भवाच्चेत्येवमुभयथाऽप्याद्यं कर्म परमाणुगतं न सम्भवत्यतः कर्मनिबन्धनसंयोगपूर्वकद्व्यणुकादिक्रमेण जगदुद्भवस्याभावः ॥ १२ ॥

वेदान्तकौस्तुभः।

महद्दीर्घवदन्यदपि तदुक्तं सर्वमसमञ्जसमिति यदुक्तं तद्विवृणोति —

उभयथाऽपि न कर्मातस्तदभावः ।

उभयथाऽपि परमाणुषु सृष्टिवेलायां कर्म न सम्भवत्यतोहेतोः कर्मासम्भवात्तदभावः परमाणुसंयोगपूर्वकद्व्यणुकाद्युद्भवक्रमेण जगज्जन्माद्यभावइत्यर्थः। उभयथेति। आद्यं कर्म स्वत उत्पद्यते ? उत परमाणुप्रभावात् ? नाद्यः पक्षः, असम्भवात् । नक्काऽपि स्वतआविर्भूय कर्म जलमानेतुं घटेन प्रवर्त्तते, न च वाच्यं किञ्चिन्निमित्तमाश्रित्योत्पद्यते इति, तदा जीवप्रयत्न-

प्रकम्पाभिघाताद्यभावात् । न द्वितीयः, अचेतनत्वेन कर्मप्रवर्त्तकत्वानुपपत्त्या परमाणूनां चेतनत्वापत्तेः । न खलु प्रासादादिनिर्माणे पाषाणादयोऽन्योऽन्यकर्माभिरेकीभूय प्रवर्त्तन्ते । यद्वाऽदृष्टहेतुकं परमाणुषु तदा हि कर्म जायते, तत्रोभयथा कर्मनिषेधः । तथाहि परमाणुनिष्ठकर्मबोधकमदृष्टं परमाणुवृत्ति ? किम्वा जीववृत्ति ? नाद्यः पक्षः, जीवपुण्याऽपुण्याऽनुष्ठानजनितत्वेनादृष्टस्याचेतनवृत्तित्वासम्भवात् । अदृष्टस्याप्यचेतनतया कर्मबोधकत्वासम्भवाच्च, परमाणुषु पुण्यापुण्यानुष्ठानासम्भवात् अगत्या स्वभावसिद्धमदृष्टमङ्गीकार्यं स्यात् । तदा सर्वदा कर्मोद्भवप्रसङ्गाच्च । न द्वितीयः, जीववृत्तेरदृष्टस्य सुतरां जडगतकर्मचोदनाऽसम्भवात्, एवमुभयथाऽपि न कर्म । यद्वा जीवप्रयुक्तमीश्वरप्रयुक्तं वा कर्म न सम्भवति, तथा हि किं जीवः आद्यं कर्म स्वगतादृष्टतः सन्निधितश्चैतन्यगुणतोवा जनयति ? नाद्यः, पूर्वोक्तदूषणात् । न सन्निधितश्च, जीवपरमाणुसन्निधेर्नित्यतया नित्योत्पादकत्वप्रसङ्गात् । नैव चैतन्यतः, तदा चैतन्याभावात् ।

नचेश्वरप्रयुक्तं कर्म प्रवर्त्तते, किं भवन्मते ईश्वरोवेदप्रोक्तः ? उतानुमानादिसिद्धः ? । वेदप्रोक्तइति चेत्तर्हि " एतदात्म्यमिदं सर्वं, सच्च त्यच्चाभवदि "त्यादिश्रुतिप्रक्रियायां कृतविश्वासस्तच्चरणानुरागरसमत्तः सन् विज्वरोभव । किं तव परमाणुकारणवादेन अनुमानादिसिद्धश्चेदीश्वरस्तर्हि तस्य स्वरूपसिद्धिरेव नास्तीति पूर्वत्रोपपादितम् ॥ १२ ॥

वेदान्तकौस्तुभप्रभा ।

किमत्रान्यदसमञ्जसं तत्राह —

उभयथाऽपि न कर्मातस्तदभावः ।

आद्यकर्मोत्पत्तिरनुपपन्ना प्रलये यत्नाभिघातादीनां कर्महेतूनामभावात् । शरीरप्रविष्टे हि मनस्यात्ममनः संयोगे सत्यात्मगुणस्य प्रयत्नस्य जायमानत्वात्तदा च शरीराभावात्सन संम्भवति, ईश्वरेच्छायाश्च नित्यत्वेन नित्यं तत्प्रसङ्गः स्यात्, न चादृष्टस्यात्र हेतुत्वं कल्प्यते इति वाच्यं, विकल्पासहत्वात् । तथाहि परमाणुगतमाद्यं कर्म स्वगतादृष्टप्रयुक्तमात्मगतादृष्टप्रयुक्तं वा ? नाद्यः, अदृष्टस्यात्मासाधारणधर्मविशेषस्य परमाणुवृत्तित्वासम्भवात्, अनभ्युपगमाच्च । अभ्युपगमे च सदोत्पादकत्वप्रसङ्गादपसिद्धान्तापत्तेश्च, अदृष्टस्याचेतनत्वेन प्रवर्त्तकत्वासम्भवाच्च । न द्वितीयः । तस्यात्मगतत्वेऽपि तदात्मनां

चैतन्याभावेन कार्य्योत्पादनयोग्यताऽसम्भवात् । अन्यथा प्रलयाभावप्रसङ्गोदुर्वारः, तदेवं नियतस्य कस्य चित्कर्महेतोरभावान्न कर्मोत्पत्तिस्तदभावाच्च न संयोगः, नापि विभागस्तथात्वे च सर्गप्रलयोरभावएव स्यात् ॥ १२ ॥

सू० समवायाभ्युगमाच्च साम्यादनवस्थितेः । २ । २ । १३ ॥

वेदान्तपारिजातसौरभः ।

समवायाभ्युपगमाच्च परमाणुकारणपक्षासम्भवः, यथा द्व्यणुकं समवायसम्बन्धेन स्वकारणे समवैत्यत्यन्तभिन्नत्वात्तथा समवायोऽपि समवायिभ्यां समवायसम्बन्धान्तरेण सम्बध्येतात्यन्तभेदसाम्यात्सोऽपि सम्बन्धान्तरेणेत्यनवस्थानात् ॥ १३ ॥

वेदान्तकौस्तुभः ।

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ।

तदभावइत्यनुवर्त्तते । इतोऽपि तस्याः परमाणुसंयोगपूर्वकद्व्यणुकाद्युत्पत्तिक्रमेण जग-

ज्जन्मादिप्रक्रियायाअभावः । कस्मात् ? समवायाभ्युपगमात् । युतसिद्धानां संयोगः सम्बन्धः, यथा रज्जूघटयोः, अयुतसिद्धानां तु समवायः सम्बन्धः, यथेह तन्तुषु पटः, कपालयोर्घटः, गवि गोत्वं, पटे शुक्लादिरूपं, समवायसम्बन्धेन तिष्ठति कार्यकारणादिलक्षणानां पदार्थानां सम्बन्धः समवायएव, सचैकोनित्यः सर्वगतोव्योमवादिष्यते, इदृक् समवायाभ्युपगमादित्यर्थः । ननु समवायाभ्युपगमे कोदोषोऽस्ति ? इत्यत्राह "साङ्ख्यादनवस्थितेरि"ति यथा द्व्यणुकं समवायिकारणादत्यन्तं भिन्नं तत्समवायमवश्यमपेक्षते, तथा समवायोऽपि समवायिभ्यामत्यन्तं भिन्नः सन्नितरेण समवायलक्षणेन सम्बन्धेन समवायिभ्यामवश्यं सम्बध्येतात्यन्ताभिन्नत्वसाम्यात् । असम्बद्धस्य सम्बन्धत्वादर्शनाच्च । सोऽपि समवायान्तरेण सोऽप्यन्येनेत्यनवस्थितेरपसिद्धान्तापत्तिदोषः स्यादित्यर्थः ॥ १३ ॥

वेदान्तकौस्तुभप्रभा।

अथायुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः समवायः, यथेह तन्तुषु पटः, गवि गोत्वं, पटे शुक्लादिरूपमिति कार्यकारण-

योः सामान्यविशेषयोर्गुणगुणिनोश्च सम्बन्धः समवायएव, स चैकोनित्यः सर्वगतोव्योमवदिष्यते युतसिद्धानां तु संयोगः सम्बन्धः, यथा पृथक्सिद्धयोरज्जूघटयोरित्यपि तत्सिद्धान्तस्तत्र समवायसम्बन्धं निराकरोति —

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ।

तदभावइत्यनुवर्त्तते । कार्यकारणयोः समवायाभ्युपगमाच्च प्रकृतकरणभुक्प्रक्रियाऽसम्भवः । कुतः ? साम्यात्, समवायस्यापि सम्बन्धित्वसाम्यात् । तथाहि यथा द्व्यणुकं समवायसम्बन्धेन स्वकारणे समवैत्यत्यन्तभिन्नत्वात्, तथा समवायोऽपि समवायिभ्यां समवायसम्बन्धान्तरेण सम्बध्येत, अत्यन्तभेदसाम्यात् । सोऽपि सम्बन्धान्तरेणेत्यनवस्थानात् । अतोन समवायाभ्युपगमः प्रामाणिकः । नच समवायस्य स्वयं सम्बन्धरूपत्वान्न सम्बन्धान्तरापेक्षेति वाच्यं, संयोगस्यापि सम्बन्धरूपत्वसाम्येन समवायाऽनपेक्षत्वापत्तेः । तथात्वे च संयोगस्य संयोगिभ्यां सम्बन्धः समवायपूर्वकइति प्रतिज्ञाभङ्गापत्तेः । न च संयोगोगुणत्वात्समवायमपेक्षतइति वाच्यं, पारिभाषिकमात्रत्वात्, समवायस्यापि गुणत्वं वक्तुं शक्यते, न च कार्यकारणयोरयुतसिद्धत्वं कारणस्य पूर्वसिद्धत्वात्कार्यस्योत्तरकालीनत्वात्, तथात्वेऽपृथक्सिद्धत्वासम्भवात् । न चान्यतरापेक्षत्वमयुतसिद्धत्वमिति वाच्यं, तथापि द्वयोः सतोः सम्बन्धइति कृत्वोत्पन्नं कार्यं क्षणमात्रं पृथगवस्थाय समवायेन सम्बध्यतइति दूषणस्य तादवस्थ्यात् । अथोत्पत्तिरेव समवायइत्यप्ययुक्तं, तथात्वे समवायस्य नित्यत्वासम्भवात्, उत्पत्तिनित्यत्वयोरत्यन्तविरोधात्, उत्पत्तेर्नित्यत्वाङ्गीकारे कार्यत्वावच्छिन्नस्य नित्यत्वापत्तेः, कारक-

व्यापारानर्थक्याच्च । तस्मात्तादात्म्यलक्षण एव सम्बन्धोन समवायकृत इति ॥ १३ ॥

सू० नित्यमेव च भावात् ॥

२ । २ । १४ ॥

वेदान्तपारिजातसौरभः ।

परमाणूनां प्रवृत्तिस्वभावत्वे प्रवृत्ते भावान्नित्यसृष्टिप्रसङ्गादन्यथा नित्यप्रलयप्रसङ्गात्तदभावः ॥ १४ ॥

वेदान्तकौस्तुभः ।

नित्यमेव च भावात् ।

इतोऽपि परमाणुकारणवादिप्रक्रियायाअभाव एव । कुतः ? परमाणूनां प्रवृत्तिस्वभावत्वेऽङ्गीकृते प्रवृत्तेर्नित्यमेव भावप्रसङ्गात् प्रलयोन स्यादित्यर्थः । तेषां निवृत्तिस्वभावत्वे निवृत्तेर्नित्यमेव भावात्सृष्ट्यभावप्रसङ्गः स्यादित्यर्थः ॥ १४ ॥

वेदान्तकौस्तुभप्रभा ।

नित्यमेव च भावात् ।

परमाणूनां प्रवृतिस्वभावत्वे प्रवृतेर्भावान्नित्यसृष्टिप्रसङ्ग

इत्यक्षरार्थः । अयमभिप्रायः, परमाणवः प्रवृत्तिस्वभावाः ? निवृत्तिस्वभावाः ? उभयशीलाः ? अनुभयशीलावा ? । आद्ये, सृष्टेर्नित्यत्वं प्रलयाभावश्च । द्वितीये, सर्गाभावोनित्यप्रलयप्रसक्तिश्च । न तृतीयचतुर्थौ, उभयस्वभावत्वस्येतरेतरविरोधात्सर्वथाऽनुपपत्तिरिति ॥ १४ ॥

सू० रूपादिमत्त्वाच्च विपर्य्ययोदर्शनात् ॥ २ । २ । १५ ॥

वेदान्तपारिजातसौरभः ।

परमाणूनां कार्य्यानुसारेण रूपादिमत्त्वाच्च नित्यत्वविपर्य्ययोऽनित्यत्वं स्यात्, रूपादिमतां घटादीनामनित्यत्वं दर्शनादन्यथा कार्यं रूपादिहीनं स्यात् ॥ १५ ॥

वेदान्तकौस्तुभः ।

रूपादिमत्त्वाच्च विपर्ययोदर्शनात् ।

कार्य्यस्य रूपादिमत्त्वात् परमाणवोऽपि रूपादिमन्तोऽभ्युपगम्यन्ते, तथा चतुर्विधानां परमाणूनां रूपादिमत्त्वात् रूपरसगन्धस्पर्शवत्त्वान्नित्यत्वादिविपर्य्ययोऽनित्यत्वादिः प्रसज्येत,

रूपादिमतां घटादीनामनित्यत्वादिदर्शनात् । तेषां रूपादिमत्त्वानङ्गीकारे कार्य्यस्य रूपादिमत्त्वं विरुद्धमापद्येत, " रूपादिमन्तोनित्याश्चे" ति प्रतिज्ञाहानिश्च प्रसज्येत । अतोऽपि तदभावएवेति चकारार्थः । नाहि दृष्टानुसारेणादृष्टोऽर्थोनिर्णेतुं शक्यः । अतोयथाश्रुतिजगत्कारणं प्रतिपत्तव्यमिति भावः ॥ १५ ॥

वेदान्तकौस्तुभप्रभा ।

रूपादिमत्त्वाच्च विपर्ययोदर्शनात् ।

परमाणवोरूपादिगुणवन्तोन वा ? आद्ये, रूपादिमत्त्वाच्च परमाणूनां नित्यत्वविपर्ययोऽनित्यत्वं स्यात्, रूपादिमतां घटादीनामनित्यत्वदर्शनात् । परमाणवोऽनित्यारूपादिमद्द्रव्यत्वात्, घटादिवदिति प्रयोगात् । द्वितीये, सिद्धान्तभङ्गात्, कार्य्यस्यापि रूपादिशून्यत्वापत्तेश्च । अथ रूपादिर्नेष्येत कार्ये रूपादिमन्न स्यादतोरूपादिमन्तोनित्याश्चेति तव वचनात् ॥ १५ ॥

सू० उभयथा च दोषात् ॥

॥ २ । २ । १६ ॥

वेदान्तपारिजातसौरभः ।

यद्युपचितगुणाः परमाणवस्तदा पृथिव्य-

प्तेजोवायूनां तुल्यतापत्तिरपचितगुणाइत्यत्रापि सर्वेषां परमाणूनां प्रत्येकमेकैकगुणयोगेन पृथिव्यादीनामपि कारणगुणानुगुण्येन प्रत्येकमेकैकगुणयोगः स्यादित्युभयथाऽपि दोषात्तदभाव एव ॥ १६ ॥

वेदान्तकौस्तुभः ।

उभयथा च दोषात् ।

इतोऽपि परमाणुकारणवाद्यभिमतप्रक्रियाया अभावएव । कुतः ? परमाणूनामुपचितगुणवत्त्वाङ्गीकारेऽपचितगुणवत्त्वाङ्गीकारे चेत्युभयप्रकारेऽपि दोषात् । तथाहि तेषामुपचितगुणवत्त्वाङ्गीकारे सर्वेषां तुल्यत्वापत्तेः, कार्य्यगुणानां कारणगुणपूर्वकत्वात्सर्वे रूपरसादयोहि कारणगुणाः सर्वेषु कार्य्येषु प्रसज्येरन् । अप्स्वपि गन्धप्रसङ्गः, तेजसि गन्धरसयोः प्रसङ्गः, वायौ रूपरसगन्धानाञ्च प्रसङ्गः, परमाणूनां स्थूलत्वप्रसङ्गश्च स्यात् । उपचितगुणायाः भूमेः स्थूलत्वदर्शनात्, अपचितगुणवत्त्वे च सर्वेषामेकैकोगुणः स्यात् । एवं सति तेजसि स्पर्शोन स्यादप्सु रूपस्पर्शौ न

स्यातां, पृथिव्यां रूपस्पर्शरसा न स्युः। तत्त्वत्परमाणुषु तत्तद्गुणाभावात्। इतरथा सर्वत्र सर्वप्रसङ्गापत्तेः। ननु रूपरसगन्धस्पर्शवती पृथिवी दृश्यते, रूपरसस्पर्शगुणयुता आपश्च दृश्यन्ते, रूपस्पर्शवत्तेजश्च, स्पर्शवान्वायुश्च, दृश्यते। तदानुगुण्येन केचिदुपचितगुणाः केचिदपचितगुणाः परिकल्प्यन्ते ऽतोनोक्तदोषइति चेन्न, तथाप्युपचितगुणानां परमाणूत्वव्याघातात्। प्रकृते श्रुतिमूले सिद्धान्ते तु न कोऽपि दोषः, जगतः सर्वज्ञसर्वशक्तिसर्वेश्वरोपादानकत्वात्॥ १६॥

वेदान्तकौस्तुभप्रभा।

उभयथा च दोषात्।

परमाणूनामुपचितगुणवत्त्वाङ्गीकारे सर्वेषां तुल्यत्वापत्तेः अप्स्वपि गन्धउपलभ्येत, तेजसि गन्धरसौ, वायौ रूपरसगन्धाश्च, तेषां स्थौल्यहेतुत्वात्, परमाणूनामपि स्थूलत्वापत्त्याऽपरमाणुत्वप्रसङ्गात्। अपचितगुणवत्त्वे च सर्वेषामेकैकोगुणः स्यात्तथात्वे च तेजसि स्पर्शोनस्यादप्सु रूपस्पर्शौ, पृथिव्यां रूपस्पर्शरसा न स्युः, कारणगुणपूर्वकत्वात्कार्य्यगुणानामित्युभयथापि दोषादिति सूत्रार्थः। ननु केचिदुपचितगुणाः केचिदपचितगुणा इति विचित्रत्वाङ्गीकारइति चेन्न, तथाऽप्युपचितगुणानां परमाणुत्वहानि-

प्रसङ्गात्, दृश्यादृश्यादिमूर्त्तामूर्ताद्यवान्तरविचित्रतायागुणोपचय-निबन्धनत्वात्, चतुर्विधपरमाणूनां स्वतोभेदात् । सिद्धान्ते तु महाभूतवृत्तिगुणानां नियमश्रुतिसिद्धत्वेन दोषाभावादिति भावः । शब्दस्पर्शरूपरसगन्धाः पृथिव्यागुणास्तेषु गन्धहीनाश्चत्वारोऽपांगुणास्तेषु रसहीनास्त्रयोगुणाअग्नेः, शब्दस्पर्शाविति वायोः "शब्दएकआकाशस्ये"ति लौकिकोपनिषच्छ्रुतेः "आकाशवायुतेजांसि सलिलं पृथिवी तथा । शब्दादिभिर्गुणैर्ब्रह्मन्संयुक्तान्युत्तरोत्तरैरि"ति विष्णुपुराणोक्तेश्च, सर्वज्ञसर्वशक्तिब्रह्माधिष्ठितत्वाच्च महाभूतादिप्रपञ्चस्येत्यलं प्रासङ्गिकेन ॥ १६ ॥

सू० अपरिग्रहाच्चात्यन्तमनपेक्षा ॥२ । २। १७॥

वेदान्तपारिजातसौरभः ।

परमाणुकारणवादस्य शिष्टैः परित्यक्तत्वादत्यन्तमुपेक्षा मुमुक्षुभिः कार्या ॥ १७ ॥

वेदान्तकौस्तुभः ।

अपरिग्रहाच्चात्यन्तमनपेक्षा ।

प्रधानकारणवादस्य श्रुतिविरुद्धत्वेन युक्तिविरुद्धत्वेन च परित्यक्तस्यापि कश्चित्सत्कार्यवादाद्यंशोहि वैदिकैर्गृहीतः । अस्य तु वैशेषिकपरि-

कल्पितपरमाणुकारणवादस्य केनाऽप्यंशेनापरिग्रहात् शिष्टैः परित्यक्तत्वात्, युक्तिविरुद्धत्वाद्वेदबाह्यत्वाच्चात्यन्तमनपेक्षा श्रेयस्कामैरनादरणीयः परमाणुकारणवादइत्यर्थः । तस्माद्ब्रह्मकारणवादस्य दूरतोहेयेन परमाणुकारणवादेन न कोऽपि विरोधइति सिद्धम् ॥ १७ ॥ इति महद्दीर्घाधिकरणम् ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

अपरिग्रहाच्चात्यन्तमनपेक्षा ।

प्रधानकारणवादस्य काश्चित्सत्कार्यवादाद्यंशोमन्वादिभिरौपनिषदैर्गृहीतः, असत्कार्यवादस्य, वैशेषिकादिपरिकल्पितपरमाणुकारणवादस्य च केनाऽप्यंशेनापरिग्रहादत्यन्तमनपेक्षाऽतिशयेनानादरणीयोऽयं पक्षः श्रेयोऽर्थिभिरिति सूत्रकृतोऽभिप्रायः ॥ १७ ॥

इति महद्दीर्घाधिकरणम् ॥ २ ॥

सू०समुदाये उभयहेतुकेऽपि तदप्राप्तिः ॥ २ । २ । १८ ॥

वेदान्तपारिजातसौरभः ।

सुगतमतं निराकरोति, भूतभौतिकचित्तचैत्तिके समुदायेऽभ्युपगम्यमानेऽपि समुदायि--

नामचेतनत्वादन्यस्य संहतिहेतोरनभ्युपगमाच्च समुदायासम्भवः ॥ १८ ॥

वेदान्तकौस्तुभः ।

कपिलोहि सत्कार्यवाद्यब्रह्मात्मकं प्रधानं जगत्कारणं मन्यते । स च ब्रह्मकारणवादाद्वैदिकात्प्रातिकूलवादित्वेन निराकृतः । ततोऽपि निकृष्टबुद्धिः कणादोऽसत्कार्य्यवादी जगत्कारणं च बहुविधं मन्यतेऽतोमहद्भिरुद्धवादित्वेन निराकृतः । इदानीं ततोऽप्यतिनिकृष्टस्तत्साद्दश्याद्बौद्धपक्षोनिराक्रियते —

समुदाये उभयहेतुकेऽपि तदप्राप्तिः ।

बुद्धोपदिष्टआगमे बुद्धिभेदाच्चतुर्भिस्तदनुगैश्चत्वारः पक्षाः कृताः, ते च बुद्धानुयायिनो—वैभाषिक१ सौत्रान्तिक२ योगाचार३ माध्यमिक४ संज्ञकाः, तत्र बाह्यार्थास्तित्ववादिना*वाद्यौ, तत्रापि ब्रह्मार्थप्रत्यक्षवादी पूर्वः× तन्मते घटादयोबाह्यार्थाः प्रत्यक्षप्रमाणगम्याः । विज्ञानानुमेयबाह्यार्थवाद्यपरः, तन्मते घटाद्या-

* वैभाषिकसौत्रान्तिकौ । × वैभाषिकः ।

कारेणोत्पन्नेन विज्ञानेन प्रत्यक्षेणाप्रत्यक्षाघटादयो-बाह्यार्था अनुमीयन्ते । निरालम्बनविज्ञानास्तित्व-वादी त्रि*तीयः । सबाह्यार्थाः स्वप्नार्थकल्पाइति वदति । एते हि स्वाभिमतं वस्तु क्षणिकमाहुः । सर्वं शून्यमिति चतु†र्थस्य मतम् । साहि संस्कार-मालम्ब्य ग्राह्यग्राहकाकारविमुक्तासंवित्सन्तति-र्निर्वातस्थप्रदीपवत्क्षणपरम्परयाऽवतिष्ठते, नष्टे तु संस्कारे सा प्रदीपवदेव निर्बाणमृच्छति । सेयमाभवप्राप्तिरपवर्गइति मन्यते । अन्येतु सन्तत्यविच्छेदमिच्छन्ति । तत्र योगाचारस्य माध्यमिकस्य च मतमग्रे निरासिष्यते, अस्मि-न्नधिकरणे तु बाह्यार्थास्तित्ववादिनोर्वैभाषिक-सौत्रान्तिकयोर्मतमेकीकृत्य निरस्यते, एवं तावा-हतुः, रूप-विज्ञान-वेदना-संज्ञा-संस्कारा-ख्याः पञ्च-स्कन्धाः । तत्र रूपस्कन्धोनाम पृथिव्यादीनि चत्वारि भूतानि, भौतिकं च शरीरेन्द्रियविषय-रूपम् । तत्र रूपरसगन्धस्पर्शाः खरस्वभावाः पार्थिवाः परमाणवः पृथिवीरूपेण संहन्यन्ते,

---

* योगाचारः । † माध्यमिकस्य ।

रूपरसस्पर्शाः स्नेहस्वभावाआप्याः परमाणवः सलिलात्मना संहन्यन्ते, रूपस्पर्शाउष्णस्वभावास्तैजसास्तेजोरूपेण संहन्यन्ते, तथा स्पर्शाईरणस्वभावावायवीयावायुरूपेण संहन्यन्ते । पृथिव्यादिचतुष्टयं च शरीरेन्द्रियविषयरूपेण संहन्यते, इत्येवमेते चतुर्विधाः क्षणिकाः परमाणवोभूतभौतिकसङ्घातहेतुत्वं प्रतिपद्यन्ते। सोऽयं परमाणुहेतुकोभूतभौतिकलक्षणोरूपस्कन्धोबाह्यसमुदायः, विज्ञानस्कन्धोनामाभ्यन्तरोऽहम्प्रत्ययसमारूढोघटज्ञानं पटज्ञानमित्येवमविच्छेदेन वर्तमानोविज्ञानप्रवाहः। अयमेवकर्त्ता भोक्ता चात्मा च अस्मादेव सर्वोहि लौकिकोव्यवहारः प्रवर्त्तते । वेदनास्कन्धश्च सुखवेदना दुःखवेदना चेति । संज्ञास्कन्धोनाम उपलक्षणप्रत्ययोयथा स्वस्तिमती गोरिति स्वस्तिमत्तया गौरुपलक्ष्यते, संस्कारस्कन्धोनाम रागद्वेषमोहमदमात्सर्य्यभयशोकविषादादयश्चैतसिकाधर्माः, ते चामी चतुर्विधाः *

---

* विज्ञान१ वेदना२ संज्ञा३ संस्काराख्याः४ ।

स्कन्धाश्चित्तचैत्तिकाउच्यन्ते। तत्र विज्ञानस्कन्धश्चित्तमात्मेति चोच्यते। अन्ये चैत्याइति सर्वव्यवहारास्पदभावेनान्तः संहन्यन्ते। सोऽयं विज्ञानादिचतुःस्कन्धीहेतुक आभ्यन्तरः समुदायः, समुदायद्वयादन्यदात्माकाशादिस्वरूपतएव नास्ति, तावेतौ लोकयात्रामावहतः सिद्धे च लोकव्यवहारे नित्येनात्मना नास्ति प्रयोजनमिति मन्येते×। तत्रेदमभिधीयते, उक्तप्रकारेणोभयहेतुकेऽपि समुदाये समूहेऽभ्युपगम्यमाने तदप्राप्तिः, तस्योभयहेतुकस्याप्यप्राप्तिरसम्भवएव। अचेतनानां समुदायिनामन्योऽन्यनिरपेक्षत्वेन स्वतः समुदायासम्भवात्। क्षणिकत्वाच्चातोभूतभौतिकः समुदायश्चित्तचैत्तिकसमुदायश्च नोपपद्यतेइत्यर्थः। नित्यस्य भोक्तुश्चेतनस्य प्रशासितुः संहन्तुः सर्वज्ञस्य सर्वेश्वरस्यानभ्युपगमाच्च। परमाणूनामतीन्द्रियत्वेन लोकस्याप्यतीन्द्रियत्वप्रसङ्गाच्च लुप्येत लोकयात्रा। अनादिवेदबोधितब्रह्मत्यागाददृष्टाश्रुतपरमाण्वादिसमुदायाङ्गीकारात्तत्सं-

---

* वैभाषिकसौत्रान्तिकौ।

हातिहेत्वसम्भवाच्च दुष्टामिदं मतामिति भावः ॥ १८ ॥

वेदान्तकौस्तुभप्रभा ।

बौद्धसिद्धान्तस्याप्यसत्कार्यवादिवैशेषिकसिद्धान्तसादृश्यात्तदनन्तरं तन्निरासायाह —

समुदायउभयहेतुकेऽपि तदप्राप्तिः ।

बौद्धसिद्धान्तग्राहिणोहि चत्वारस्तत्र बाह्यार्थास्तित्ववादिनौ वैभाषिकसौत्रान्तिकौ, तयोरपि बाह्यार्थप्रत्यक्षवादी आद्यः, विज्ञानानुमेयबाह्यार्थवादी द्वितीयः, निरालम्बनविज्ञानास्तित्ववादी योगाचारः, त्रयोऽप्येते स्वाभ्युपगतं वस्तु क्षणिकं वदन्ति । सर्वशून्यवादी माध्यमिकः, सचाऽऽसंस्कारक्षयात् ग्राह्यग्राहकाकारविमुक्तासंवित्सन्ततिर्निर्वातस्थदीपवत् क्षणपरम्परयाऽवतिष्ठते, संस्कारक्षये सा प्रदीपवदेव निर्वाणमृच्छति, सेयमभावप्राप्तिरपवर्गइति मन्यते । अन्ये तु सन्तत्यविच्छेदमिच्छन्ति । तत्र बाह्यार्थास्तित्ववादिमतं भूतभौतिकचित्तचैत्यभेदेन समुदायद्वयं, तथाहि रूपं- विज्ञान- वेदना- संज्ञा- संस्काराख्याः- पञ्चस्कन्धाः । तत्र रूपस्कन्धोनाम पृथिव्यादीनि चत्वारि भूतानि, भौतिकं च शरीरेन्द्रियविषयरूपम् । तत्र रूपरसगन्धस्पर्शाः खरस्वभावाः पार्थिवाः परमाणवः पृथिवीरूपेण संहताः पृथिवीव्यापारायावतिष्ठन्ते, रूपरसस्पर्शाः स्नेहस्वभावाआप्याः परमाणवः सलिलात्मना संहन्यन्ते, रूपस्पर्शोऽष्णस्वभावास्तैजसातेजोरूपेण संहताः, तथा स्पर्शाईरणस्वभावावायवीया-

वायुरूपेण संहन्यन्ते, पृथिव्यादिचतुष्टयं च शरीरेन्द्रियविषयरूपेण संहन्यते, इत्येवमेते चतुर्विधाक्षणिकाः परमाणवो भूतभौतिकसंघातहेतुत्वं प्रतिपद्यन्ते । सोऽयं परमाणुहेतुकोभूतभौतिकरूपोरूपस्कन्धोबाह्यसमुदायः । विज्ञानस्कन्धोनामाभ्यन्तरोऽहं *प्रत्ययसमारूढोघटज्ञानं पटज्ञानमित्येवमविच्छेदेन वर्त्तमानोविज्ञानधृःसन्तानः, अयमेव कर्त्ता, भोक्ता, चात्मा, नाऽन्योनित्योऽस्तीति । वेदनास्कन्धश्च सुखवेदना दुःखवेदना च, संज्ञास्कन्धोनामोपलक्षणप्रत्ययोयथा स्वस्तिमती गौरिति स्वस्तिमत्तया गौरुपलक्ष्यते । ध्वजेन गृहं दण्डेन पुरुषइति, संस्कारस्कन्धोनाम रागद्वेषमोहमदमात्सर्यभयशोकविषादादयश्चैतासिकाधर्माः, ते चामी चतुर्विधाः स्कन्धाश्चित्त×चैतिकाउच्यन्ते, सर्वव्यवहारास्पदभावेनान्तः संहन्यन्ते । सोऽयं विज्ञानादिचतुःस्कन्धोहेतुकआन्तरः समुदायः सर्वं वस्तुजातं समुदायद्वयरूपं, यदतोऽन्यत्तत्सर्वमवस्तु कालाकाशादि, तावेतौ लोकयात्रामावहतः सिद्धे च लोकव्यवहारे नित्येनात्मना नास्ति प्रयोजनमिति मन्येते । तत्रेदमभिधीयते, उभयहेतुकेऽपि समुदायेऽभ्युपगम्यमाने तदप्राप्तिः समुदायासम्भवः, न तावत्स्वतः समुदायापत्तिः, समुदायिनामचेतनत्वात्, क्षणिकत्वाच्च, नाप्यन्यतः, नित्यस्य भोक्तुः प्रशासितुः संहन्तुश्चेतनस्यानभ्युपगमात् । समुदायासिद्धौ स्थूलाभावेन व्यवहारोन सिध्येत्परमाणूनां च क्षणध्वंसित्वातीन्द्रियत्वान्न तैर्व्यवहारोऽस्तीति लुप्येत लोकयात्रा ॥ १८ ॥

---

* ग्राहकाभिमानं ।

धृः आलयविज्ञानधारा ।

× विज्ञानस्कन्धश्चित्तमात्मेति चोच्यते अन्ये चैत्याः

सू० इतरेतरप्रत्ययत्वादुपपन्न-मिति चेन्न, सङ्घातभावाऽनिमित्तत्वात् ॥ २।२।१६॥

वेदान्तपारिजातसौरभः ।

अविद्यासंस्कारविज्ञाननामरूपषडायतनादीनामितरेतरहेतुत्वेन सङ्घातादिकमुपपन्नमित्यपि न, तेषामपि संघातं प्रत्यकारणत्वात् ॥ १६॥

वेदान्तकौस्तुभः ।

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न, सङ्घातभावाऽनिमित्तत्वात् ।

ननु चेतनस्य सर्वज्ञस्य संहन्तुरनभ्युपगमेऽपि क्षतिर्नास्ति । यतोऽस्मदीयपक्षे अविद्यादीनामितरेतरप्रत्ययत्वात् । कार्य्यं प्रतिहेतुतयाऽयते गच्छतीति प्रत्ययोहेतुस्तस्य भावस्तत्त्वं तस्मात्सर्वं सङ्घातादिकमुपपन्नं भवति । तथाहि विज्ञानसन्तानस्यानादिकालप्रवृत्ताअविद्यादयोहेतवोऽभ्यु-

पगम्यन्ते, तत्राविद्याशब्दोभ्रान्तिवचनः, अस्थिरे स्थिरबुद्धिरमार्गे मार्गबुद्धिरिति । तया विषयेषु रूपादिषु रागादिलक्षणः संस्कारोजन्यते । तेनैव प्रवृत्तिकाले प्रवृत्तिर्भवति, प्रवृत्तिः पुण्यापुण्य-कर्मात्मिका "अस्ति कर्माऽस्ति विपाक" इतिबुद्धवच-नात् । तेनैव च विज्ञानं जा*यते । ततः पृथिव्यादि-चतुष्टयं शरीरसमुदायकारणभूतमुत्पद्यते, तदेव नामाश्रयत्वेन नामेत्युच्यते । ततः शरीरं, ततः पञ्च-⁰बुद्धीन्द्रियमनोरूपं षडायतनं, ततः स्पर्शः, ततो-वेदना सुखादिका, ततः पुनरविद्यादयः, एवं घटीयन्त्रवदावर्त्तमानेषु भावेषु, अर्थात्सङ्घातउप-पद्यते, अतः खलु सर्वमस्मद्दर्शनमुपपन्नमिति चेन्न, कुतः ? सङ्घातभावानिमित्तत्वात् । अविद्यादीनां सङ्घातभावं प्रति अनिमित्तत्वात् । नहि दूरस्थे पुरुषे जायमानास्थाणुरयमिति भ्रान्तिभूताऽविद्या पूर्वसिद्धस्य पुरुषस्य संहतिकारणमिति वक्तुं शक्यम् । तथा तन्निमित्तानां रागादीनामपि सङ्घातभावं प्रति अनिमित्तत्वं बोध्यम् ॥ १९ ॥

---

* ज्ञायते । ⁰ पञ्चज्ञानेन्द्रियमनोरूपम् ।

वेदान्तकौस्तुभप्रभा ।

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न सङ्घातभावाऽनिमित्तत्वात् ।

कार्यं प्रत्ययते गच्छतीति व्युत्पत्तेः प्रत्यय*शब्दोहेतुवाची । नन्वितरेतरहेतुत्वादुपपन्नमस्मद्दर्शनम् । तथाहि योऽयं विज्ञानस्कन्धोऽहं प्रत्ययसमारूढः सन्ततिरूपेण वर्त्तते तस्याविद्यादयोऽनादिकालप्रवृत्ताहेतवः, सच तेषामिति अविद्यानामविपरीतबुद्धिः, अस्थिरे स्थिरदृष्टिरमार्गे मार्गदृष्टिरिति । तया रागद्वेषादिलक्षणसंस्कारस्कन्धोजन्यते, ततः पुण्यापुण्यकर्मलक्षणाप्रवृत्तिः, ततोजन्मशरीरग्रहणम्, ततः पञ्चबुद्धीन्द्रियमनोरूपं षडायतनं, ततः षड्विज्ञानानीन्द्रियमनोविषयेषु रूपादिषूत्पद्यन्ते, तदेवं प्रमातृप्रमाणप्रमेयव्यवहारसिद्धेः सर्वमुपपन्नमिति चेत्परिहरति । नेति । कुतः ? " सङ्घातभावाऽनिमित्तत्वात् " नह्यविद्यादीनां भूतभौतिकसङ्घातापत्तौ निमित्तत्वमुपपद्यते पूर्वपूर्वक्षणस्योत्तरोत्तरहेतुत्वेऽपि न सङ्घातापत्तिहेतुत्वं, विज्ञानस्य क्षणिकत्वात् । कर्मणोऽपि क्षणिकत्वादुत्पत्तिनिरोधमात्रं सर्वत्र भवेत् । न सङ्घातापत्तौ सामर्थ्यं शक्यं कल्पयितुं, प्रमाणाभावात् ॥ १९ ॥

सू० उत्तरोत्पादे च पूर्वनिरोधात् ॥ २ । २ । २० ॥

---

* प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुश्चिति नानार्थवर्गः ।

वेदान्तकौस्तुभप्रभा ।

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न सङ्घातभावाऽनिमित्तत्वात् ।

कार्यं प्रत्ययते गच्छतीति व्युत्पत्तेः प्रत्यय*शब्दोहेतुवाची । नन्वितरेतरहेतुत्वादुपपन्नमस्मदर्शनम् । तथाहि योऽयं विज्ञानस्कन्धोऽह प्रत्ययसमारूढः सन्ततिरूपेण वर्त्तते तस्याविद्यादयोऽनादिकालप्रवृत्ताहेतव', सच तेषामिति अविद्यानामविपरीतबुद्धिः, अस्थिरे स्थिरदृष्टिरमार्गे मार्गदृष्टिरिति । तया रागद्वेषादिलक्षणसंस्कारस्कन्धोजन्यते, ततः पुण्यापुण्यकर्मलक्षणाप्रवृत्तिः, ततोजन्मशरीरग्रहणम्, ततः पञ्चबुद्धीन्द्रियमनोरूपं षडायतनं, ततः षड्विज्ञानानीन्द्रियमनोविषयेषु रूपादिषूत्पद्यन्ते, तदेवं प्रमातृप्रमाणप्रमेयव्यवहारसिद्धेः सर्वमुपपन्नमिति चेत्तत्परिहरति । नेति । कुतः ? " सङ्घातभावाऽनिमित्तत्वात् " नह्यविद्यादीनां भूतभौतिकसङ्घातापत्तौ निमित्तत्वमुपपद्यते पूर्वपूर्वक्षणस्योत्तरोत्तरहेतुत्वेऽपि न सङ्घातापत्तिहेतुत्वं, विज्ञानस्य क्षणिकत्वात् । कर्मणोऽपि क्षणिकत्वादुत्पत्तिनिरोधमात्रं सर्वत्र भवेत् । न सङ्घातापत्तौ सामर्थ्यं शक्यं कल्पयितुं, प्रमाणाभावात् ॥ १९ ॥

सू० उत्तरोत्पादे च पूर्वनिरोधात् ॥ २ । २ । २० ॥

---

* प्रत्ययोऽर्थीनशपथज्ञानविश्वासहेतुष्विति नानार्थवर्गः ।

असम्भवात् । किञ्चानुत्पन्नोनाम तदभावएव । तस्य हेतुत्वे सर्वस्य सर्वत्रोत्पत्तिप्रसङ्गः स्यात्प्रतिबन्धकाभावात् । नापि त्रितीयः, पुनः सर्वस्य सर्वत्रोत्पत्त्यापत्तेः पूर्वस्य विनष्टत्वात् । न च वाच्यमुत्तरक्षणोत्पत्तिपर्य्यन्तं पूर्वक्षणोऽवतिष्ठतइति, क्षणिकत्वहानिप्रसङ्गात् ॥ २० ॥

वेदान्तकौस्तुभप्रभा ।

उत्तरोत्पादे च पूर्वनिरोधात् ।

एवं पूर्वक्षणस्योत्तरहेतुत्वमभ्युपगम्यापि सङ्गातानुपपत्तिरित्युक्तमथेदानीं हेतुत्वस्याप्यसम्भवउपपाद्यते । उत्तरक्षणस्योत्पत्तिवेलायां पूर्वक्षणस्य निरोधात् विनष्टत्वात् उत्तरक्षणं प्रतिहेतुत्वानुपपत्तिरेव । तथाहि पूर्वस्तावद्घटक्षणः, स किमुत्पन्नः सन्नुत्तरहेतुरनुत्पन्नोवा ? नानुत्पन्नः, शशविषाणतुल्यत्वात् । नाप्युत्पन्नः, अभाववत्तुच्छत्वात्, उत्पन्नविनष्टस्यानुत्पन्नस्य चाभावत्वाविशेषात् । अभावस्य हेतुत्वे सर्वं सर्वत्र सर्वदोत्पद्येत । ननु पूर्वक्षणविनाशउत्तरक्षणोत्पत्तिश्च युगपद्भवेतां तुलान्तयोर्नामोन्नामवदिति चेन्न, तत्र मध्ये सूत्रधारणादन्तयोश्च युगपदुपस्थितयोरेकस्य गुरुत्वान्नामस्तद्रहितस्योन्नामइति, न चात्रोत्तरोत्पत्तिकाले पूर्वस्य स्थितिरिष्यते, येनासौ तद्धेतुत्वं प्रतिपद्येत, अवतिष्ठते चेत् क्षणिकत्वहानिः । किञ्च कारणधर्मानुविधायित्वमन्तरेणेदं कार्यमिदं कारणमिति कल्पनायामतिप्रसङ्गोमृदन्विताः शरावादयोदृश्यन्ते सुवर्णान्विताश्च कुण्डला-

दयो, नचाकारसमर्पणो सामर्थ्यं क्षणिकत्वात्तस्मान्नित्यपक्षे एव कार्यकारणव्यवस्था युज्यते प्रत्यक्षप्रत्यभिज्ञानाच्च कुम्भादीनां नित्यत्वम् । ननु च नित्यत्वेऽपि कार्यकारणाभावोनोपपद्यते, क्रमयौगपद्याभ्यामर्थ क्रियाविरोधात् । किकुश*लस्थोव्रीहिरङ्कुरजननस्वभावः ? अतत्स्वभावोवा ? यद्यतत् स्वभावोन कदाचिदपि जनयेत् । अथ तत् स्वभावस्तदानीमेवोत्पादयेत्ततश्च यानि कर्माणि व्रीहिणा कर्तव्यानि तानि सर्वाणि युगपत्कुर्यात् । नच सामग्रीवशेनाङ्कुरं जनयेदतत्स्वभावत्वे सामग्र्या अङ्किञ्चित्करत्वात् । यच्चोक्तं प्रत्यभिज्ञानाच्च नित्यत्वमिति तदनैकान्तिकं, प्रदीपज्वालादिष्वदर्शनात् । यदि च नित्योभावः स्यादन्ते विनाशदर्शनं न प्राप्नुयात् । अथ मुद्गरादिना घटस्य विनाशः क्रियत इति चेत्तदयुक्तं, तथाहि विनाशः किं द्रव्यभिन्नोऽभिन्नोवा क्रियते ? आद्ये, घटस्य किमापातं यथा घटे कृते घटस्य न किञ्चिद्भवति, तथा विनाशेऽपि भिन्ने । द्वितीये घटस्वरूपमेव विनाशस्तच्च कुलालेन कृतमिति मुद्गरः किमपरं करोति । अथ मन्यसे घटस्य सम्बन्धी विनाशः क्रियते इति, तत्र कः सम्बन्धः, किन्तादात्म्यलक्षणस्तदुत्पत्तिलक्षणोवा ? आद्ये पूर्वोक्तमेव दूषणं तादात्म्यं तत्स्वभावता सा च कुलालेन कृतेति । द्वितीये घटमुद्गराभ्यां विनाशउत्पाद्यतइति घटस्य न किञ्चिदिति । तस्मात्स्वाभाविकोविनाशएष्टव्यइति । अत्रोच्यते, योऽयं विकल्पकृतः स तवैव सिद्धान्तं बाधते, कथं विसदृशसन्तानोत्पत्तिप्रतिनिरोधाय योऽयमन्त्योघटक्षणोऽभिमतोयतः कपालोत्पत्तिरिष्यते, स सदृशसन्तानजननस्वभावोघटक्षणत्वादतीतानन्तरघटक्षणवदित्यसावेव विसदृशसन्तानजननस्वभावोऽप्यभ्युपेयेत । अन्यथा कुम्भकारा-

* मृन्मयस्थूलपात्रम्, भान्यरत्नापात्रं वा ।

दारभ्य, कपालपङ्क्तिरेव स्यादेवं सति मुद्गरेण घटक्षणस्य सदृशसन्तानजननस्वभावता विनाश्यते विसदृशसन्तानजननस्वभावता चोत्पाद्यते इत्यवश्यमभ्युपगन्तव्यम्, अन्यथा कपालोत्पत्त्यसम्भवात् । ततश्च भवता सहेतुकं विनाशमभ्युपगच्छता विकल्पः परित्यक्तः, यदि विकल्पोऽङ्गीक्रियते तर्हि विसदृशसन्तानस्त्यक्तव्यइति सिद्धहानिर्दृष्टविरोधश्च । तत्र यथा तव सदृशसन्तानजननस्वभावविनाशोमुद्गरेण क्रियते, तथा ममापि घटविनाशएव क्रियतइति स्थितः सहेतुकोविनाशः प्रत्यभिज्ञानाच्च कालान्तरावस्थायित्वं, ज्वालादिष्वपि सामान्यं समाश्रित्य प्रत्यभिज्ञावृद्धिह्रासदर्शनात् व्यक्तीनामनित्यतैव, यद्यवस्थापिनी व्यक्तिः स्यात् गृहदाहादिष्वपि सामान्यं समाश्रित्य प्रत्यभिज्ञाप्रसङ्गइत्यव्यभिचारः प्रत्यभिज्ञायाः । नहि क्षणिकत्वं प्रत्यक्षमनुभूयते, प्रथमोत्पन्ने निर्विकल्पज्ञाने विशेषापरामर्शात् । यच्चोक्तं क्रमयोगपद्याभ्यामर्थक्रियाविरोधादिति ससमानोयोसावन्त्योव्रीहिक्षणोयस्माद्ङ्कुरोत्पत्तिरिष्यते, सोऽप्यङ्कुरजननस्वभावोन भवति व्रीहिक्षणत्वादनन्तरातीतव्रीहिक्षणवत् । नहि समानसन्ततावकस्माद्विलक्षणक्षणान्तरोत्पत्तिसम्भवः, अथ सहकारिवशादुत्पादकइति चेन्ममापि तदविशिष्टमिति । किञ्च विनाशोत्पादौ भावव्यतिरिक्तावव्यतिरिक्तौवा ? आद्ये, भावस्य क्षणत्रयप्रसङ्गः, उत्पत्तिक्षणः स्थितिक्षणोनाशक्षणश्चेति । द्वितीये तूत्पादविनाशयोरभावाद्भावोनित्यः स्यात् । किञ्च विनाशोनामाभावः, सच किं भावस्य पूर्वभावी ? सहभावीवा ? पश्चाद्भावी वा ? इति । आद्ये भावोत्पत्तिर्न स्यात् । द्वितीयेऽप्यविरोधाद्भावस्य शाश्वतत्वप्रसङ्गः । तृतीये सहेतुकोविनाशः प्राप्नोतीति दिक् ॥ २० ॥

सू० असति प्रतिज्ञोपरोधो-यौगपद्यमन्यथा ॥ २।२ २१ ॥

वेदान्तपारिजातसौरभः ।

असति हेतौ कार्य्योत्पत्त्यऽभ्युपगमे चतुर्भ्यो-हेतुभ्यइन्द्रियालोकमनस्कारविषयेभ्यो विज्ञानो-त्पत्तिरित्यस्याः प्रतिज्ञायाबाधः स्यात्, सति हेतौ कार्योत्पादाङ्गीकारे पूर्वस्मिन् क्षणे स्थिते सति क्षणान्तरोत्पत्तिर्भवेदिदं यौगपद्यं भवतां क्षणिक-वादिनां मते स्यात् ॥ २१ ॥

वेदान्तकौस्तुभः ।

निर्हेतुकोत्पत्तिं दूषयति —

असति प्रतिज्ञोपरोधोयौगपद्यमन्यथा ।

ननु हेतुं विनैवास्तूत्तरोत्पादएवं सति नोक्तदोषइति चेदत्रोच्यते, असत्यपि हेतौ यदि कार्योत्पादोऽभ्युपगम्यते तदा प्रतिज्ञोपरोधः स्यात्। तथाहि, चक्षुरादीन्द्रियलक्षणोऽधिपतिप्रत्ययः

प्रकाशलक्षणःसहकारिप्रत्ययः, मनस्कार*लक्षणः समनन्तरप्रत्ययः, विषयलक्षण×आलम्बनप्रत्ययश्चेति विज्ञानोत्पत्तौ भवतां कारणचतुष्टयप्रतिज्ञायाः उपरोधोहानिः स्यात्किञ्च निर्हेतुककार्य्योत्पादाङ्गीकारेऽपि पूर्वोक्तः सर्वत्र सर्वोत्पत्तिदोषोदुर्वारः स्यात् । अथैतद्दोषपरिहारायान्यथाङ्गीकारे कार्य्यं सति हेतौ उत्पद्यते इत्यङ्गीकारे यौगः‡पद्यं स्यात्, हेतुहेतुमतोरेकस्मिन् काले युगपत्स्थितिः स्यात् । पूर्वोक्तोदोषस्तद्वस्थः स्यादित्यर्थः । तथाहि । किं पूर्वः घटक्षणः अपरस्य घटक्षणस्य स्वकाले हेतुर्भवति ? किम्वा जायमानस्योत्तरक्षणस्योत्पत्तिवेलायां स्थितः सन्तद्धेतुर्भवति ? उभयथाऽपि यौगपद्यम्, आद्ये सर्वेषां क्षणानामेकस्मिन् काले उपलब्धिः प्रसज्येत । पूर्वापरव्यवहारोच्छेदप्रसङ्गश्च, द्वितीये क्षणिकत्वहानिः, क्षणद्वयस्थायित्वात् । एकत्र यौगपद्येन क्षणद्वयोपलब्धिप्रसङ्गः स्यात् ॥ २१ ॥

---

* मनसा विषयसङ्कल्पः ।

× विषयलक्षणोघटादिरालम्बनप्रत्ययश्चेत्यपि पाठः ।

‡ कार्यकारणयोर्घटक्षणयोर्यौगपद्यं स्यात् ।

वेदान्तकौस्तुभप्रभा ।

एवं क्षणिकवादिमते पूर्वक्षणस्य निरोधग्रस्तत्वान्नोत्तरक्षण-हेतुत्वं सम्भवतीत्युक्तमथासतः उत्पत्तिर्निरस्यन्ते —

असति प्रतिज्ञोपरोधोयौगपद्यमन्यथा ।

असति हेतौ कार्यमुत्पद्यते चेत्प्रतिज्ञायाउपरोधोहानिः स्यात् । चतुर्भ्यः कारणेभ्यः कार्योत्पत्तिरितीयं प्रतिज्ञा हीयेत । अधिपतिप्रत्ययः, सहकारिप्रत्ययः, समनन्तरप्रत्ययः, आलम्बनप्रत्यय-श्चेति, विज्ञानोत्पत्तौ कारणचतुष्टयमिति वः प्रतिज्ञा, तत्र चक्षुरादिहन्द्रियमधिपतिप्रत्ययः, प्रकाशसहकारिप्रत्ययः, मन-स्कारः समनन्तरप्रत्ययोघटादिरालम्बनप्रत्ययउच्यते, निर्हेतु-कोत्पत्तौ च प्रतिबन्धाभावात्सर्वं सर्वत्रोत्पद्येत । अन्यथा हेतौ सत्येव कार्यं जायते चेत्तर्हि द्वयोः कार्यकारणयोर्घटक्षणयोर्यौगपद्यं स्यात् । कार्योत्पत्तिकालं यावत्कारणस्यावस्थानात् । क्षणवादहानिः नैहि विनष्टस्य पितुः पुत्रोत्पत्तौ सामर्थ्यं दृष्टम् ॥ २१ ॥

सू० प्रतिसंख्याऽप्रतिसंख्या-निरोधाऽप्राप्तिरविच्छेदात् ॥

२ । २ । २२ ॥

वेदान्तपारिजातसौरभः ।

सहेतुकनिर्हेतुकयोर्निरोधयोरसम्भवः, सन्तान-

विच्छेदस्यासम्भवात्सन्तानिनां च प्रत्यभिज्ञायमानत्वाच्च ॥ २२ ॥

वेदान्तकौस्तुभः ।

एवं तावत्पराभ्युपगतउद्धवोनिराकृतस्तदभ्युपगतोनिराधोऽपि निरस्यते —

प्रतिसंख्याऽप्रतिसंख्यानिरोधाऽप्राप्तिरविच्छेदात् ।

बुद्धिपूर्वकोनिरोधः प्रतिसङ्ख्यानिरोधः । अतत्पूर्वकोनिरोधोऽप्रतिसङ्ख्यानिरोधइति द्विविधोनिरोधस्तैरभ्युपेतः, तत्र मुद्गराभिघातादिहेतुकः सदृशसन्तानावसानरूपउपलब्ध्यर्हः स्थूलोभावविनाशोबुद्धिपूर्वकइत्युच्यते । उपलब्ध्यनर्हः सूक्ष्मोनिर्हेतुकः सदृशसन्ताने प्रतिक्षणभावी भावविनाशोऽबुद्धिपूर्वकइत्युच्यते । तयोर्निरोधयोः सन्ताने सन्तानिषु चाप्राप्तिः असम्भवः, कुतः? सन्तानस्याविच्छेदात् । नहि तावत्सहेतुकोविनाशः सन्तानस्य सम्भवति । तथाहि भवद्भिः पूर्वस्मिन्सन्तानिनि प्रतिक्षणभाविभावविनाशाङ्गीकारात्, विनष्टेऽपि उत्तरस्य तद्धेतुकस्यासतोह्येवोत्पादोऽङ्गीक्रियते, एवं मुद्गराभिघातादिना

तत्क्षणे क्षणिके सन्तानिनि विनष्टेऽपि बाधकाभावादुत्तरसन्तान्युद्भूत्पत्तिसिद्ध्या सन्तानसिद्धौ सन्तानस्य सहेतुकनिरोधेन सम्भवतीत्यर्थः । सिद्धान्ते तु सतएव मृदादेरवस्थाभेदौ उत्पत्तिनिरो*धौ उच्येते । भवन्मते तु सर्वदा मुद्गरशताभिघातेनापि सन्तानविच्छेदानुपपत्तिरिति भावः। किञ्च चर्मसन्तानिनोयदि हेतुना विनाशस्तर्हि हेतुं विनेतरेषामपि विनाशायोगात् घटस्थानेऽनेकघटोपलब्धिप्रसङ्गः । नच सदृशसन्ताने प्रतिक्षणभाविनिर्हेतुकोविनाशस्तेषां जायतेऽतोनायं दोषइति वाच्यम्, चरमसन्तानिनोऽपि तादृशे विनाशे सिद्धे सहेतुकविनाशस्य वैयर्थ्यापत्तेः। नच मुद्गरादिनापि विसदृशसन्तानोत्पत्तिरस्तीति नोक्तदोषइति वाच्यम्, मुद्गरादिनापि विनष्टे पूर्वस्मिन् सन्तानिनि तत्सदृशोत्तरोत्पादे बाधकाभावात्प्राप्ते सति विसदृशसन्तानासम्भवात्,

---

ध्रुं सन्तानोत्पत्तिसिद्ध्या इत्यपि पाठः ।

* अवस्थाविषयकौ उत्पत्तिनिरोधौ, नतु सत्ताविषयकौ इति भावः, अतोनित्यप्रलये ऽपि अस्मन्मतेन वस्तुसत्ताहानिरिति बोध्यम् ।

विसदृशोत्पत्तौ हेत्वभावाच्च । सन्तानस्य निर्हेतुकविनाशोऽपि न सम्भवति, सर्वप्रपञ्चादर्शनप्रसङ्गात् । एवं सन्तानिषु तयोरप्राप्तिः, तत्र निर्हेतुके तत्तत्सन्तानिविनाशे स्वीकृते पुनः क्षणिकस्य सन्तानिनोमुद्गरादिना नाशासम्भवात् । निर्हेतुकोऽपि विनाशोवस्तूच्छेदकोन सम्भवति, सन्तानिनां घटादीनां प्रत्यभिज्ञायमानत्वात् ॥ २२॥

वेदान्तकौस्तुभप्रभा ।

एवमाद्यसूत्राभ्यां समुदायं निरस्य, द्वाभ्यां कार्यकारणभावक्षणिकत्वे च निरस्य, सम्प्रति तदभिमतोद्विविधविनाशो निरस्यते ——

प्रतिसङ्ख्या*ऽप्रतिसङ्ख्यानिरोधाप्राप्तिरविच्छेदात् ।

मुद्गराभिघातादिहेतुकः सदृशसन्तानावसानरूपः स्थूलोयोभावविनाशः स प्रतिसङ्ख्यानिरोधः, सूक्ष्मस्वाभाविकोनिर्हेतुकः, सदृशसन्ताने प्रतिक्षणभावी योभावविनाशः सोऽप्रतिसङ्ख्यानिरोधस्तयोरप्राप्तिरसम्भवः, कुतः ? अविच्छेदात्, उत्पत्तिविनाशधर्मभाविनोद्रव्यस्याविच्छेदात्, एतौहि सन्तानगोचरौ स्यातां, ? सन्तानिगोचरौवा ? नाद्यः, सन्तानेषु सन्तानिनामविच्छिन्नत्वेन सन्तानविच्छेदस्यासम्भवात्, तस्यावस्तुत्वाभ्युपगमात् । न द्वितीयः,

---

* प्रतिकूलासंख्यासन्तं भावमसन्तं करोतीत्येवं रूपा संख्या बुद्धिः प्रतिसंख्या तया विरोधोनाशः ।

सन्तानिनां घटादीनां प्रत्यभिज्ञानान्न सूक्ष्मोन स्थूलोविनाशः,त्वत्पक्षे विनाशस्य भावाव्यतिरेकान्न हेतुना विनाशः क्रियते, यस्य तु व्यतिरिक्तोविनाशस्तस्य सहेतुकोविनाश. ॥ २२ ॥

सू० उभयथा च दोषात् ।

॥ २।२।२३ ॥

वेदान्तपारिजातसौरभः ।

सन्तानस्य सन्तानिव्यतिरिक्तवस्तुत्वाभावात्तसन्तानिनां च क्षणिकत्वादविद्यादिनिरोधोमोक्षइत्यपि तन्मतमसङ्गतम् ॥ २३ ॥

वेदान्तकौस्तुभः ।

उभयथा च दोषात् ।

इतोऽपि सौगतमतमसङ्गतम् । कुतः ? तदभिमतेऽपवर्गे उभयथाऽपि दोषात् । तथाहि अविद्यादिनिरोधस्तैर्मोक्षोऽभ्युपेतः, स सन्तानस्य सन्तानिनां वा ? नाद्यः । सन्तानिव्यतिरिक्तस्य सन्तानस्यावस्तुत्वेन मोक्षानर्हत्वात् । न द्वितीयः । सन्तानिनां क्षणिकत्वात् । किञ्च स अविद्यादिनिरोधलक्षणोमोक्षः सहेतुकोनिर्हेतुकोवा ? आद्ये, अथ सत्यचतुष्टयाभ्यासान्मुक्तिः, समुदायसत्यं,

निरोधसत्यं, दुःखसत्यं, मार्गसत्यं, चेति, सर्वमुत्पत्तिमदिति यन्निर्णयज्ञानं तत्समुदायसत्यं, सर्वं क्षणिकमिति निरोधसत्यं, सर्वं दुःखात्मकमिति दुःखसत्यं, सर्वं शून्यं, सर्वं निरात्मकमिति मार्गसत्यमित्येवं भावयतोरागादिनिवृत्तावभ्युपगम्यमानायां निर्हेतुकोविनाशइतीयं प्रतिज्ञा हीयेत । द्वितीये, साधनोपदेशानर्थक्यप्रसङ्गइत्युभयथा दोषः ॥ २३ ॥

वेदान्तकौस्तुभप्रभा ।

उभथा च दोषात् ।

अविद्यादिनिरोधस्तैर्मोक्षोऽभिमतः, स निरोधः सहेतुकः ? निर्हेतुको वा ? आद्ये, अथ सत्यचतुष्टयाभ्यासान्मुक्तिः, समुदायसत्यं, निरोधसत्यं, दुःखसत्यं, मार्गसत्यं, चेति, सर्वमुत्पत्तिमदिति यन्निर्णयज्ञानं तत्समुदायसत्यं, सर्वं क्षणिकमिति निरोधसत्यं, सर्वं दुःखात्मकमिति दुःखसत्यं, सर्वं शून्यं सर्वं निरात्मकमिति मार्गसत्यं. इत्येवं भावयतोरागादिनिवृत्तावभ्युपगम्यमानायां निर्हेतुकोविनाशइतीयं प्रतिज्ञा हीयेत । द्वितीये, साधनोपदेशानर्थक्यप्रसङ्गइत्युभयथाऽपि दोषादसमञ्जसं सौगतमतम् ॥ २३ ॥

सू० आकाशे चाविशेषात् ॥

२ । २ । २४ ॥

वेदान्तपारिजातसौरभः ।

आकाशे च तैरभावप्रतिज्ञा कृता, सा न युक्ता, पृथिव्यादिभिरविशेषात् ॥ २४ ॥

वेदान्तकौस्तुभः ।

ते च बुद्धिपूर्वकनाशोभावानामबुद्धिपूर्वकनाशआकाशं चेति त्रयमवस्तु सन्निरूपाख्यं निर्हेतुकं तुच्छमित्याहुस्तत्रोभयप्रकारकोनिरोधो निराकृतः । प्रसङ्गादविद्यादिनिरोधलक्षणोमोक्षो दूषितोऽवशिष्टमाकाशस्य निरूपाख्यत्वं दूषयति श्रुत्युक्तसिद्धान्तवादी भगवान्सूत्रकारः —

आकाशे चाविशेषात् ।

आकाशेऽवस्तुत्वप्रतिज्ञा न* युक्ता, आकाशस्य भूम्यादिभिर्वस्तुत्वाविशेषात् । भूचराभुवि यथा, जलचराजले यथा धावन्ति, तथा खगमाः खे धावन्ति, च शब्दाद्वस्त्वन्तरवदाकाशस्यापि जन्यत्वश्रवणात् । "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी"ति "आकाशस्य

* नासतोदृष्टत्वादिति वक्ष्यमाणात् नकारः आकृष्यते ।

স্থিতির্যাবদ্যাবচ্চ জগতঃ স্থিতিঃ। তাবন্মম স্থিতির্ভূয়াজ্জগদ্দুঃখানি নিঘ্নতঃ" ইতি দয়াপরেণ বদতা বুদ্ধেনাপ্যাকাশস্য ভাবত্বমভ্যনুজ্ঞাতম্ ॥ ২৪ ॥

বেদান্তকৌস্তুভপ্রভা।

আকাশে চাবিশেষাৎ।

আবরণাভাবমাত্রমাকাশমিতি তন্মতম্। তত্রাহ, আকাশে অভাবপ্রতিজ্ঞা ন যুক্তা, কুতঃ ?"অবিশেষাৎ" বায্বাদেরিব তস্যাপি ভাবরূপত্বেন প্রতিপত্তেরবিশেষাৎ। "আত্মনআকাশঃ সম্ভূতঃ"-ইত্যাদিশ্রুতিপ্রামাণ্যাৎ "আকাশস্য স্থিতির্যাবদ্যাবচ্চ জগতঃ স্থিতিঃ। তাবন্মম স্থিতির্ভূয়াৎ জগদ্দুঃখানি নিঘ্নতঃ" ইতি দয়াপরেণ বদতা বুদ্ধেনাপ্যাকাশস্য ভাবত্বমভ্যনুজ্ঞাতম্। কিঞ্চ চক্ষুষা বিশিষ্টমাকাশং গৃহ্যতে, পঞ্চীকরণেন তস্য রূপবত্ত্বাৎ রোহিত-শুক্লকৃষ্ণবর্ণতেজোবন্ন রূপিদ্রব্যসমবায়িত্বাচ্চ। যে পুনঃ শব্দ-গুণানুমেয়মাকাশমিচ্ছন্তি, তেষাং তন্ন সিধ্যতি, শব্দস্যাকাশেন সহ সম্বন্ধাগৃহণাৎ, অসত্যপি শব্দে নভসি বুদ্ধ্যুৎপত্তেঃ শ্রূয়মাণোঽপি শব্দে তদ্দ্বারেণাকাশে বুদ্ধ্যনুৎপত্তেশ্চ ॥ ২৪ ॥

সূ০অনুস্মৃতেশ্চ ॥ ২।২।২৫ ॥

বেদান্তপারিজাতসৌরভঃ।

ইদং তদিতি প্রত্যভিজ্ঞা চ তদ্দর্শনমসৎ ॥ ২৫ ॥

वेदान्तकौस्तुभः ।

अनुस्मृतेश्च ।

इतोऽपि क्षणिकवादो न युक्तः, कुतः ? "अनुस्मृतेः" स्वानुभूतवस्तुविषयकानुस्मरणात् । अतो नित्यानुभवितात्मावश्यमाश्रयणीयः । अन्यथा सर्वव्यवहारोच्छेदप्रसङ्गः ॥ २५ ॥

वेदान्तकौस्तुभप्रभा ।

अनुस्मृतेश्च ।

अनुस्मृतेश्चाप्ययुक्तं सौगतमतम् । अनुभूते वस्तुनि पश्चादुत्पद्यमानं विज्ञानमनुस्मृतिः प्रत्यभिज्ञानमित्यर्थः । अहमिदमदर्शमिति यः पूर्वेद्युरनुभूतवान्सोऽहमिदानीमिदमनुभवामीति क्षणाभङ्गवादिनोऽनुस्मृतिर्नोपपद्यते तदभावात्सर्वव्यवहारलोपप्रसङ्गः । सर्वश्च लोकोऽहमस्मीति प्रत्यभिजानाति । नाहं, नास्मीति, कश्चिदवैति आजन्मनआमरणादेतस्मिन्नन्तराले सोऽहमस्मीत्यनुसन्दधानः, कथमिव बौद्धोनापत्रपते । यएवात्मा नास्तीति निराकरोति स एवासित्वमात्मा निराकरणस्य प्रमाता, न ह्यात्मानमात्मा निराकरोति । नच सादृश्यनिबन्धनोऽयं व्यवहारः, क्षणिकवादे सदृशयोर्वस्तुनोगृहीतुरेकस्य स्थायिनोऽभावात्सादृश्यनिमित्तं प्रत्यभिज्ञानमिति मिथ्यालापएवान्यथा क्षणिकत्वप्रतिज्ञाहानिः । आत्मव्यतिरिक्ते हि पदार्थे भावाभावप्रत्ययौ भवतोनात्मन्यभावप्रत्ययआत्मानं लभते । न चैकसन्तानत्वे सतीति विशेषणं सम्भवति, सन्तानिव्यतिरिक्तस्य सन्तानस्यानभ्युप-

गमेन सएवात्मा स्यान्नास्ति विवादः। तस्मात्त्वत्पक्षे सन्तानिनोविज्ञानक्षणाः परस्परं भिन्नाएव सन्ति तत्प्रातर्दृष्टे वस्तुनि मध्यान्हे स्मृतिर्नोपपद्यते। तत्र द्रष्टुः स्मर्तुश्च कार्यकारणभावाभावात्। नच विज्ञातरि नष्टे पूर्वोपलब्धेः स्मरणं युक्तं, नचान्यदृष्टमन्यः स्मरति स्मरणं खलु पूर्वज्ञातस्य समानेन ज्ञात्राग्रहणं, नच विज्ञानसन्तानस्य परलोकगमनं सम्भवति, यत् "अन्तराभवदेहमनुप्रविश्य, विज्ञानसन्तानपरलोकं गच्छती"ति मन्यते, अन्तराभवदेहकल्पनायां प्रमाणाभावात्। नच मरणावेलायां मण्डुकवदुत्प्लुत्यविज्ञानक्षणाः "प्रविशत्यमूर्त्तत्वात्"। नच प्रेरकोऽस्ति कर्म प्रेरकमि"ति चेत्तादृशकर्मणि प्रमाणाभावात्। ततश्च स्वर्गनरकगमनाभावात्ततआगत्यगर्भप्रवेशासिद्धेरुत्पत्तिभावानुपपत्तिरिति दिक्। एतेन पराभिमतोदृष्टिसृष्टिवादोऽपि निरस्तः। तत्राप्यर्थतः क्षणिकत्वाविशेषात् ॥ २५ ॥

सू० नासतोऽदृष्टत्वात् ॥ २।२।२६॥

वेदान्तपारिजातसौरभः।

अभावाद्भावोन जायते ऽदृष्टत्वात् ॥ २६ ॥

वेदान्तकौस्तुभः।

नासतोऽदृष्टत्वात्।

सौगतैरभावाद्भावोत्पत्तिरभ्युपेता, सा न युक्ता। कस्मात्? "असतः" मृदाद्यभावात्

घटाद्युत्पत्तेरदृष्टत्वात् । सतस्तुमृत्पिण्डादेस्तदुत्पत्तेर्दृष्टत्वात् ॥ २६ ॥

वेदान्तकौस्तुभप्रभा ।

यद्यतैरभ्युपगतप्रभावाद्भावोत्पत्तिरिति तत्राह —

नासतोऽदृष्टत्वात् ।

असतोऽभावाद्भावउत्पद्यते इति तत्परिहरति, नेति । कुतः ? "अदृष्टत्वात्" असतः शशविषाणादेरङ्कुरोत्पत्त्यदर्शनात् । अभावस्य निरूपाख्यत्वाच्छशविषाणाबीजाभावयोः कोविशेषः । ततश्च कारणानियमानुपपत्तिरिति सर्वं सर्वस्मादुपपद्येत । ननु बीजमनुपमृद्य नाङ्कुरः प्रादुर्भवति, क्षीरमुपमृद्य, दधीव । मृत्पिण्डमुपमृद्य घटइव च बीजमुपमृद्यैवाङ्कुरउत्पद्यते, इत्यतोभावाद्भावोत्पत्तिरिति चेन्न, तत्र बीजसंस्थानमात्रं निवर्त्ततेऽविरोधिबीजद्रव्यमेव त्वङ्कुराकारेणावस्थान्तरतया परिणामतइति प्रत्यक्षमेतन्न प्रत्याख्यातुं शक्यम् ॥ २६ ॥

सू० उदासीनानामपि चैवं सिद्धिः ॥२।२।२७॥

वेदान्तपारिजातसौरभः ।

अन्यथाऽनुपायतोविद्याद्यर्थासिद्धिः स्यात्॥२७॥

वेदान्तकौस्तुभः ।

उदासीनानामपि चैवं सिद्धिः ।

अपि च भवद्भिर्यथाऽभावाद्भावोत्पत्तिरङ्गीकृता, एवमुदासीनानां स्वाभिमतकार्य्यसाधकोपकरणत्यागिनामुपकरणाभावमात्रतः स्वाभिमतकार्य्यसिद्धिः प्रसज्येत, नच निर्यत्नस्य विद्यादिलाभः, न चाकृतदारोनैष्ठिकः पुत्रमौरसं प्राप्नोति । तस्माद्वैभाषिकसौत्रान्तिकमतेन युक्त्याभासमूलेन श्रुतिसिद्धान्तस्य न विरोधइति सिद्धम् ॥ २७ ॥ इति समुदायाधिकरणम् ॥ ३ ॥

वेदान्तकौस्तुभप्रभा ।

उदासीनानामपि चैवं सिद्धिः ।

अभावाद्भावोत्पत्तावुदासीनानां प्रयत्नशून्यानामप्यैहिकामुष्मिकसर्वार्थसिद्धिः स्यादभावस्य सुलभत्वादिति ॥ २७ ॥

इति समुदायाधिकरणम् ॥ ३ ॥

सू० नाऽभावउपलब्धेः ।२ । २ ।२८॥

वेदान्तपारिजातसौरभः ॥

विज्ञानमात्रास्तित्ववाद्यभिमतोबाह्यस्याभावो

न, किन्तु भावएव । कुतः ? उपलब्धेः ॥२८॥

वेदान्तकौस्तुभः ।

इदानीं योगाचारपक्षोनिरस्यते —

नाऽभावउपलब्धेः ।

विज्ञानमात्रास्तित्ववादी योगाचारोबौद्धो-विज्ञानव्यतिरिक्तानां भावानामभावं मन्यते । तथाहि विचित्रोबाह्योऽर्थोस्तीति भ्रमः, क्षणिकं बिचित्रं विज्ञानं साकारं प्रत्यक्षं चास्ति, नीलं पीतमिति साकारं विज्ञानमेव प्रकाशते, बहिष्टार्थास्तित्ववादिभिरपि तत्तद्विचित्रविषयेन्द्रिय-सन्निकर्षजन्यस्य ज्ञानस्य तत्तद्विषयाकारत्वम-वश्यमङ्गीकरणीयं, एवं सति तेनैवाकारेण सर्व-व्यवहारासिद्धौ किम्बहिष्टार्थकल्पनया, प्रदीप-वत्स्वप्रकाशकत्वात्प्रत्यक्षश्च तत्, अप्रत्यक्षस्योप-लम्भे तस्य स्वपरोत्पन्नयोर्विज्ञानयोरविशेषप्रसङ्गः स्यात् । अस्ति च विशेषः खलु स्वोत्पन्नेन विज्ञानेन पुरुषः प्रवृत्तौ निवृत्तौ च प्रवर्त्तते निवर्त्तते च, उक्तं च विप्रभिक्षुणाऽपि "अप्रत्यक्षोप-लम्भस्य नार्थदृष्टिः प्रसिद्ध्यति । अविभागोऽपि

बुद्ध्यात्माविपर्य्यासितदर्शनैः*ग्राह्यग्राहकसम्वित्ति भेदवानिव लक्ष्यत"इति । तत्र ग्राह्याकारः प्रमेयं, ग्राहकाकारः प्रमाणं, स्वसंवित्तिः फलमिति त्रयमेकस्मिन्विज्ञानेऽवकल्पते, तस्मान्नास्ति बाह्यार्थः । इतश्च सहोपलम्भनियमान्न भेदो-नीलतद्धियोः, यदैव नीलज्ञानं तदेव नीलमुपलभ्यते । तस्मादनयोरभेदः इति । इतश्च बाह्यार्थशून्योजाग्रत्प्रत्ययः प्रत्ययत्वात्स्वप्नादिप्रत्ययवत् । ननु कथं बाह्यार्थाभावे प्रत्ययवैचित्र्यमित्यत्रोच्यते, वासनावैचित्र्यात्, बीजाङ्कुरवद्विज्ञानानां वासनानां चान्योऽन्यं निमित्तनैमित्तिकभावेन वैचित्र्यस्योपपन्नत्वादिति प्राप्ते ब्रूमः । बाह्यार्थस्याभावोन घटेत । कस्मात् ? " उपलब्धेः " विज्ञानव्यतिरिक्तस्य बाह्यार्थस्य प्रत्यक्षतउपलब्धेः । यद्यपि उक्तलक्षणोजीवोनित्यज्ञानस्वरूपः सूर्य्यस्य प्रभेव तद्धर्मभूतं ज्ञानं च नित्यमेव । तथापि अनादिमायानिबन्धनेनाज्ञानेनावृतज्ञानत्वाज्जन्मनि जन्मनि एकस्मिन्नपि

---

* विपर्ययदर्शनैः इत्यपि पाठः ।

जन्मनि च पदार्थावधारणे मुह्यति । तत्र परमात्मना स्थापितान्सूर्यादीन् पितृपितामहादिसञ्चितांश्चार्थान् पूर्वसिद्धान् पुनः परिजनवचनाद्वेत्ति च, अतोनाभावोऽस्ति ज्ञानभिन्नस्य पदार्थस्य सूर्याचन्द्रमसौ पावकः पर्वतः पृथिवी जलं गौरश्वइत्याद्यनुभवसिद्धत्वादित्यर्थः । यदुक्तं वहिष्टार्थास्तित्ववादिभिरपि तत्तद्विचित्रविषयेन्द्रियसन्निकर्षजन्यस्य ज्ञानस्य तत्तद्विषयाकारत्वमवश्यमङ्गीकरणीयमेवं सति तेनैवाकारेण सर्वव्यवहारसिद्धौ किम्वहिष्टार्थकल्पनयेति, तन्न। विषयं विना विषयिनस्तत्सारूप्यात्मकतदाकारत्वासिद्धेः । एवं ज्ञानव्यतिरिक्तोबाह्यार्थस्तद्व्यतिरिक्तं तद्विषयकं ज्ञानं यच्चोक्तं सहोपलम्भनियमाच्च । न भेदोनीलतद्धियोरिति तदपि न, सहोपलम्भकथनमात्रेणैव भेदाङ्गीकारात् ॥ २८ ॥

वेदान्तकौस्तुभप्रभा ।

अथ विज्ञानवादियोगाचारपक्षोनिरस्यते —

नाभावउपलब्धेः ।

शमथविपश्यना युगनद्धवाही मार्गोयोगः । तत्र शमथेति समाधिरुच्यते । विपश्यना सम्यग्दर्शनलक्षणोयथा युगनद्धौ

बलीवर्दा वहतस्तथा यामागः सम्यग्दर्शनवाहा स योगस्तना-
चरतीति योगाचारउच्यते। किं पुनः सम्यग्दर्शनं सर्वं बाह्यार्थ-
शून्यं विज्ञानं सर्वं क्षणिकं सर्वं निरात्मकमिति कथं पुनर्विज्ञानमात्रं
प्रतिज्ञायते, साकारं प्रत्यक्षं च विज्ञानं नीलं पीतमिति हि साकारं
विज्ञानमेव प्रकाशते, प्रत्यक्षं च तत्प्रदीपवत्प्रकाशकत्वादप्रत्यक्ष-
स्योपलम्भे तस्य* स्वपरोत्पन्नयोर्विज्ञानयोरविशेषप्रसङ्गः । अस्ति
च विशेषः स्वोत्पन्नेन विज्ञानेन पीतमिति हि साकारं व्यव-
हारं पुरुषोनिर्वर्त्तयति। तथा चोक्तं विज्ञप्तिभुग्णा। "अप्रत्यक्षोप-
लम्भस्य नार्थदृष्टिः प्रसिध्यति। अविभागोऽपि बुद्ध्यात्मा विपर्या-
सितदर्शनैः । ग्राह्यग्राहकसम्वित्तिभेदवानिव लक्ष्यते" इति
तत्र ग्राह्याकारः प्रमेयं ग्राहकाकारः प्रमाणं स्वसम्वित्तिः फल-
मिति त्रयमेकस्मिन्विज्ञानेऽवकल्पते। तस्मान्नास्ति बाह्यार्थः। इतश्च
सहोपलम्भनियमान्न भेदोनीलतद्धियोः, यदैव नीलज्ञानं तदैव
नीलमुपलभ्यते तस्मादनयोरभेदइति, इतश्च बाह्यार्थशून्योजाग्रत्
प्रत्ययः प्रत्ययत्वात्स्वप्नप्रत्ययवत्। कथं बाह्यार्थाभावे प्रत्ययवै-
चित्र्यमिति चेद्वासनावैचित्र्यात्। बीजाङ्कुरवद्विज्ञानानां वास-
नानां चान्योऽन्यं निमित्तनैमित्तिकभावेन वैचित्र्यस्योपपन्नत्वात्वा-
दिति प्राप्ते, अत्रोच्यते, न बाह्यार्थस्याभावः। कुतः? उपलब्धेः।
सहि बहिर्देशसम्बन्धः प्रत्यक्षमुपलभ्यते, पावकः पर्वतः पृथिवी
सलिलमित्याकारवान्निराकारं च विज्ञानमन्तर्देशेऽहङ्कारसमारूढं
विज्ञानमात्मापरोक्षमुत्पद्यते, तयोर्ज्ञानज्ञेययोर्भिन्नदेशयोरनुभूयमा-
नयोः कथमेवैकत्वमाश्रीयते, क्षीरोदकयोस्तु परसंसर्गात्स्यादे-
कत्वाभिमानः, प्रत्यक्षत्वं तु विज्ञानस्यास्माकमप्यभीष्टमेव । न पुनः

---

* अप्रत्यक्षत्वस्य ।

पूर्वमेव विज्ञानं प्रत्यक्षमनुभूयते । ग्राह्याकारोपश्लेषमन्तरेण ग्राह्याकारपुरःसरमेव हि सम्वेदनं सम्वेदयितुरपरोक्षीभवति । घटसम्वेदनं पटसम्वेदनमिति हि वेद्याकारपूर्वकमेव निर्दिश्यते । यदुक्तं सहोपलम्भनियमादिति तदनिरूपिताभिधानं साहित्यस्यार्थभेदहेतुकत्वात् । सहत्वं नामैकदेशवर्त्तित्वमेककालवर्त्तित्वं वा, द्वयोर्भिन्नयोः पदार्थयोस्ततश्च भिन्नोपलम्भनियमादिति हेत्वर्थोऽभेदइति प्रतिज्ञा, सोऽयं प्रतिज्ञाहेत्वोर्विरोधः । प्रतिज्ञायां सत्यां हेतुर्बाध्यते, तस्मिन्प्रतिज्ञा बाध्यते इति, नच दृष्टान्तोऽस्ति ग्राह्यग्राहकयोरभेदे द्विचन्द्रज्ञानादिष्वपि ग्राह्यग्राहकयोर्भेदोदृष्टोमीमांसकैरिति सङ्क्षेपः ॥ २८ ॥

सू० वैधर्म्याच्च न स्वप्नादिवत् ॥२।२।२९॥

वेदान्तपारिजातसौरभः ।

स्वप्नादिप्रत्ययदृष्टान्तेनापि न जाग्रत्प्रत्ययार्थाभावः प्रतिपादयितुं शक्यः, दृष्टान्तदार्ष्टान्तयोर्वैषम्यात्स्वप्नज्ञानस्यापि सालम्बनाच्च ॥ २९ ॥

वेदान्तकौस्तुभः ।

यदुक्तं बाह्यार्थशून्योजाग्रत्प्रत्ययः प्रत्ययत्वात् स्वप्नादिप्रत्ययवदित्यत्रोच्यते —

वैधर्म्याच्च न स्वप्नादिवत् ।

स्वप्नादिवत्स्वप्नप्रत्ययवत् मनोरथप्रत्ययवच्च जाग्रत्प्रत्ययोनिरालम्बनइति न वक्तव्यम् । कुतः? "वैधर्म्यात्" जागरितस्वप्नप्रत्ययययोरवहितकरणजन्यत्वानवहितकरणजन्यत्वरूपवैधर्म्यात् । चकारात्स्वप्नप्रत्ययस्यापि सालम्बनत्वात् ॥ २६ ॥

वेदान्तकौस्तुभप्रभा ।

यच्चोक्तं स्वप्नप्रत्ययवदिति तत्राह —

वैधर्म्याच्च न स्वप्नादिवत् ।

स्वप्नमनोरथज्ञानवद्भवितुं जागरितज्ञानानि नार्हन्ति । कुतः? वैधर्म्यात् । निद्रादिदोषदुष्टकरणजन्यानि बाधितानि च स्वप्नज्ञानानि, जागरितज्ञानानि तु तद्विलक्षणानि इति न तत्साधर्म्यं, न च प्रत्ययत्वात् स्वप्नप्रत्ययत्वं मिथ्यात्वे हेतुरभिप्रेयेत । स्वप्नज्ञानस्य मिथ्यात्वासिद्धेः प्रबोधप्रत्ययस्य बाधकस्यापि मिथ्यात्वादृष्टान्ताभावः, तस्माज्जाग्रत्प्रत्ययस्य मिथ्यात्वमनुमानेन साधयितुमशक्यं, प्रत्यक्षानुभवस्य बलीयस्त्वात् । ये तु बौद्धमतावलम्बिनोमायावादिनस्तेऽप्यनेन न्यायेन सूत्रकारेणैव निरस्तावेदितव्याः । यदि बाह्योऽर्थोनाभिप्रेतः स्यात्, किमर्थमित्थं यतेत सूत्रकारः । अतोऽर्थवैचित्र्यकृतमेव ज्ञानवैचित्र्यं, तत्तदर्थव्यवहारयोग्यतापादनरूपतया साक्षात्प्रतीयमानस्य ज्ञानस्य तत्तदर्थसम्बन्धाधीनं, न स्वतोनिराकारत्वात्सम्बन्धश्च संयोग-

लक्षणः, ज्ञानमपि हि द्रव्यमेव, प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वे विरोधाभावात् ॥ २९ ॥

सू० न भावोऽनुपलब्धेः ॥

२ । २ । ३० ॥

वेदान्तपारिजातसौरभः ।

किञ्च ज्ञानवैचित्र्यार्थोवासनानां भावोऽभिप्रेतः, स न सम्भवति, तव मते बाह्यार्थानामनुपलब्धेः ३० ॥

वेदान्तकौस्तुभः ।

न भावोऽनुपलब्धेः ।

किञ्च ज्ञानस्य निरालम्बनत्वे घटज्ञानं नीलज्ञानं पीतज्ञानमित्यादिवैचित्र्यं न घटेत । वासना ज्ञानवैचित्र्यकारणमिति चेत् ? वासनानां भावोहि तव मते न सम्भवति । कुतः ? "अनुपलब्धेः" वासनाकारणानुपलब्धेः । बाह्यार्थानुभवः वासनाहेतुः । स न सम्भवति, बाह्यार्थानभ्युपगमात् ॥ ३० ॥

———

वेदान्तकौस्तुभप्रभा ।

यदप्युक्तं बाह्यार्थाभावेऽपि वासनानिबन्धनं ज्ञानवैचित्र्यं स्यादिति तत्राह —

न भावोऽनुपलब्धेः ।

वासनानां भावो न, कुतः ? अनुपलब्धेः निर्हेतुकविनाशिनां ज्ञानानामनुवर्त्तमानस्थिराकारस्याप्राप्तेः विनष्टेन पूर्वज्ञानेन उत्पन्नमुत्तरज्ञानं कथं वास्यते । बाह्यार्थानुपलब्धेरपि प्रत्यर्थं नानारूपवासनानां ह्यर्थोपलब्धिनिमित्तत्वात् । किञ्च वासना नाम अनुभवजनितः स्मृतिहेतुः संस्कारः । तस्य चाश्रयं विना ज्ञेयाकारवैचित्र्ये सामर्थ्यं कल्पयितुं न शक्यम् । ननु आलयविज्ञानमहं प्रत्ययाख्यं तेन घटादिज्ञानैर्वासनाआधार्यन्ते, ताभ्यश्च घटादिज्ञानानीति परस्परहेतुहेतुमद्भावेन विज्ञानवासनाचक्रं प्रवर्त्तते इति चेन्न, विज्ञानस्कन्धमात्रवादिनः कुतोव्यतिरिक्तावासनास्तदभ्युपगमे विज्ञानवादहानिः ॥ ३० ॥

सू० क्षणिकत्वात् । २।२।३१।

वेदान्तपारिजातसौरभः ।

न वासनाभावआश्रयस्य तव मते क्षणिकत्वात् ॥ ३१ ॥

वेदान्तकौस्तुभः ।

क्षणिकत्वात् ।

इतोऽपि वासनाभावो न सम्भवति, कुतः ?

आश्रयस्य अहमित्यालयविज्ञानस्य सन्तानिनां च क्षणिकत्वात् । अतोऽर्थवैचित्र्यकृतं ज्ञानवैचित्र्यं, तस्माद्योगाचारमतेन बालभाषितेन न श्रुतिसिद्धान्तस्य विरोधइतिसिद्धम् ॥ ३१ ॥

इत्युपलब्ध्यधिकरणम् । ४ ।

वेदान्तकौस्तुभप्रभा ।

क्षणिकत्वात् ।

नेति वर्त्तते । आलयविज्ञानस्य चाधारत्वं नोपपद्यते । कुतः ? क्षणिकत्वात् प्रवृत्तिविज्ञानवदिति सङ्क्षेपः ॥ ३१ ॥

इत्युपलब्ध्यधिकरणम् ॥ ४ ॥

सू० सर्वथानुपपत्तेश्च । २।२।३२।

वेदान्तपारिजातसौरभः ।

शून्यवादोऽपि भ्रान्तिमूलः । सर्वथानुपपन्नत्वात् । प्रत्यक्षादिप्रमाणविरोधात् ॥ ३२ ॥

वेदान्तकौस्तुभः ।

इदानीं माध्यमिकाभिमतः सर्वशून्यवादो निरस्यते —

सर्वथानुपपत्तेश्च ।

शिष्यबुद्धिवैशद्यार्थाः सर्वज्ञप्रोक्तागमस्थाः सर्वेऽर्थाः नतु वस्तुतः सन्ति, उत्पत्तिनाशासम्भवात् । अभावात्तावद्भावोत्पत्तिर्न सङ्गच्छते, भावाद्भावोहि विलक्षणः ? सदृशः ? वा जायते । आद्ये सर्वतः सर्वोत्पत्तिप्रसङ्गः। द्वितीये पिष्टपेषणवन्नैष्फल्यं स्यादुत्पत्तेर्दुर्निरूप्यत्वान्निरोधोदुर्निरूप्यः। तस्माच्छून्यवादोवरीयानतोहि शून्यापत्तिर्मोक्षः, इत्येव बुद्धाभिप्रायः । युक्तं चैतत्, शून्यस्यानन्यासिद्धत्वात् । द्रष्टृदृश्यादिव्यवहारस्तु भ्रममात्रमित्यत्र ब्रूमः । सर्वशून्यवादोन युक्तः । कुतः ? सर्वशून्यवादिनोऽसत्यत्वे सर्वस्य सत्यत्वप्रसङ्गात्सत्यत्वे प्रतिज्ञाहानिप्रसङ्गात्, शून्यवादस्य सर्वथानुपपत्तेश्चानुपपन्नं सर्वं शून्यमिति दर्शनम्, वादिप्रतिवादिभ्यां सर्वस्य जगतः सत्यत्वेनोपलम्भात्, शून्यत्वे प्रमाणाभावाच्च, क्षणिकत्वादिभावप्रतिपादकबुद्धागमविरोधाच्च।सर्वं शून्यमिति वदतोमाध्यमिकस्य कार्योत्पत्तिविनाशानभिज्ञस्य चक्षुर्दोषेण भास्करमपश्यत उलूकस्येव मतं सर्वथा दुष्टमिति भावः। तन्मतेन श्रुतिमार्गस्य न विरोध-

गन्धोऽपीति सिद्धम् ॥ ३२ ॥

इति सर्वथानुपपत्त्यधिकरणम् ॥ ५ ॥

वेदान्तकौस्तुभप्रभा ।

अथ सर्वशून्यवादिमाध्यमिकपक्षोनिरस्यते —

सर्वथानुपपत्तेश्च ।

शून्यवादएव बुद्धमतस्य पराकाष्ठा, शिष्यबुद्धिवैशद्याय बाह्यार्थाद्यभ्युपगमेन तत्र क्षणिकत्वादयस्तेन कल्पिताः । नच बाह्यार्थाद्यटादयोविज्ञानं च सर्वे भावाः सन्ति उत्पत्त्यनिरूपणात्तेषां शून्यापत्तिरेव च मोक्षइत्येव बुद्धाभिप्रायः, स्वतः सिद्धं हि शून्यं, न हेतुसाध्यं, सतएव हि हेतुरपेक्ष्यतेऽसतश्च पदार्थस्य न भावाद्भावाद्वोत्पत्ति सम्भवति । घटादिर्हि पिण्डादिकमनुपमृद्य नोत्पद्यते पश्चादभावादुत्पद्यमानश्चाभावात्मकएव स्यात्, स्वतः परतोवाप्युत्पत्तिर्न सम्भवति । स्वतश्चेत् आत्माश्रयदोषापत्तेः प्रयोजनाभावाच्च । परतश्चोत्पत्तौ परत्वाविशेषात्सर्वतः सर्वोत्पत्तिप्रसङ्गः जनेरभावादेव न विनाशः, अतोजनिनाशसदसदादिकं भ्रान्तिरेवेति शून्यमेव तत्त्वमिति प्राप्ते आह । सर्वथेति । नेत्यनुवर्त्तते । त्वदभिमतं सर्वशून्यत्वं न सम्भवति, सर्वं शून्यमिति वादे सर्वस्य सत्त्वंवा ? असत्त्वं वा ? सदसत्त्वं वा ? प्रतिजानतस्तव सर्वथा नाभीष्टसिद्धिः, कुतः ? "अनुपपत्तेः" । सर्वशून्यत्वानुपपत्तेः । लोके भावाभावशब्दयोस्तद्बुद्धयोश्च विद्यमानवस्त्ववस्थाविशेषएव भावाभावरूपोविषयः प्रमाणेनोपलभ्यमानघटाद्यवस्थाविशेषोभावबुद्धिविषयः, तद्विरोधि-

पिण्डकपालाकाराद्यवस्थाविशेषोऽभावबुद्धिविषयः । ततश्च सर्वं सदिति सर्वमसदिति वा प्रतिजानता विद्यमानवस्त्ववस्थाविशेषयोगितैव प्रतिज्ञातास्तीति न त्वदभिमततुच्छतासिद्धिः । किञ्च येन प्रमाणेन शून्यत्वं साध्यते तस्यासत्यत्वे सर्वस्य सत्यत्वापत्तिरिति सर्वथा शून्यवादोऽनुपपन्नएवेति ॥ ३२ ॥

इति सर्वथाऽनुपपत्त्यधिकरणम् ॥ ५ ॥

सू० नैकस्मिन्नसम्भवात् ॥

२ । २ । ३३ ॥

वेदान्तपारिजातसौरभः ।

जैनावस्तुमात्रेऽस्तित्वनास्तित्वानादिविरुद्धधर्मद्वयं योजयन्ति, तन्नोपपद्यते । एकस्मिन् वस्तुनि सत्त्वासत्त्वादेर्विरुद्धधर्मस्य छायातपवद्युगपदसम्भवात् ॥ ३३ ॥

वेदान्तकौस्तुभः ।

मुक्तकच्छबौद्धमतं निरस्तमिदानीं विवसनानां जैनानां मतं निराक्रियते —

नैकस्मिन्नसम्भवात् ।

ते हि जीवाजीवात्मकं निरीश्वरं जगदाहुः । परमाणूनां जगत्कारणत्वञ्चाहुः । अस्तित्वनास्तित्वा-

दिविरुद्धधर्म्मद्वयं पदार्थेषु कल्पयन्ति । तथाहि जीवाजीवाश्रवसंवरनिर्जरबन्धमोक्षाइति तेषां शास्त्रसङ्ग्रहभूताः सप्त पदार्थाः । तत्र जीवाश्चेतनाः ज्ञानदर्शनसुखवीर्य्यगुणैर्युक्ताः । तत्र जीवाऽजीवविवेकेन पदार्थावगमोज्ञानम् । रागद्वेषशून्यतया पदार्थावलोकनं दर्शनम् । बद्धानां वैषयिकं, मुक्तानां स्वात्मभूतं सुखम् । एवं वीर्य्यं च यथायथमूह्यम् । ते च जीवाः सावयवाः देहपरिमाणाः, तत्र केचिद्बद्धात्मानः, केचिन्मुक्तात्मानः, केचिन्नित्यसिद्धाः, ये मुक्तात्मानस्ते सर्वज्ञाः निरतिशयसुखाश्चासते । जीवभोग्यवस्तुजातमजीवः, सच धर्माधर्मपु*द्गलकालाकाशभेदभिन्नः । तत्र च सम्यक् प्रवृत्त्युनुमेयोद्रव्यविशेषोधर्मः, अमुक्तानां स्थितिहेतुरधर्मः, वर्णगन्धरसस्पर्शवद्द्रव्यं पुद्गलः । स द्विधा परमाणुतत्सङ्घातभेदात् । पृथिव्यादिहेतवः परमाणवस्ते च न तार्किकादीनामिव चतुर्द्धा, किन्त्वेकस्वभावाः । पृथिव्यादिभेदस्तु परिणामकृतः । पृथिव्यादि-

---

* शरीरम्

चतुष्टयं तनुभुवनादिकश्च तत्सङ्घातः । कालस्तु चिरक्षिप्रभूतादिव्यवहारहेतुरणुरूपोद्रव्यविशेषः । आवरणाभावः आकाशः । स द्विधा, अलोकाकाशः, सांसारिकः । अलोकाऽऽकाशोमुक्ताश्रयः । आश्रावयति पुरुषं विषयेष्वितीन्द्रियप्रवृत्तिराश्रवः, कर्त्तारमभिव्याप्याश्रवत्यनुगच्छतीत्याश्रवं कर्मेति वा । इन्द्रियवृत्तीः संवृणोतीति संवरइन्द्रियनिरोधः समाधिरूपः । पूर्वसञ्चितं कल्मषं निर्जरयतीति निर्जरोनामास्नानमौनवीरासननिष्ठ्यूतभोजनतप्तशिलारोहणकेशोपलुञ्चनादिलक्षणमर्हदुपदेशावगतं तपः । बन्धस्त्वष्टविधः कर्मलक्षणः । तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमन्तरीयमिति चत्वारि घातिकर्माणि जीवगुणानां ज्ञानदर्शनसुखवीर्याख्यानां प्रतिघातकराणि, वेदनीयं नामिकं गोत्रिकमायुष्कमिति चत्वार्यघातिकर्माणि, शरीरतदभिमानतन्निबन्धनसुखाद्यपेक्षोपेक्षाहेतुभूतानि । बन्धनिवृत्तौ नित्यसिद्धार्हदनुग्रहात्स्वाभाविकात्मस्वरूपाविर्भावोमोक्षोभवतीति । तेषामेवापरः प्रपञ्चः पञ्चास्तिकायोनाम । तथाहि, जीवास्तिकायः । पुद्गलास्ति कायः । धर्मास्ति कायः । अधर्मास्ति-

कायः । आकाशास्तिकायश्चेति । अनेकदेशवर्त्ति-साङ्केतिकपदार्थवाची अस्तिकायशब्दः, जीवश्चासावस्तिकायश्चेत्येवं सर्वत्र कर्मधारयः । इमञ्च सप्तभङ्गीनयं सर्वत्र योजन्ति । स्यादस्ति,स्यान्नास्ति, स्यादवक्तव्यः, स्यादस्तिच नास्तिच, स्यादस्तिचावक्तव्यश्च, स्यान्नास्तिचावक्तव्यश्च, स्यादस्तिच नास्तिचावक्तव्यश्चेति, अस्तित्वादिसप्तभङ्गानां समाहारः । सप्तभङ्गीतन्नयोयुक्तिः । स्यादिति तिङन्तप्रतिरूपकमव्ययम्, किञ्चिदर्थे वर्त्तमानं बोध्यम् । किञ्चिदस्ति किञ्चिन्नास्तीत्येवं योजनीयम् । अयं भावः । सर्वं वस्तुजातं द्रव्यपर्यायात्मकमनैकान्तिकं द्रव्यरूपस्य चैकत्वात्स्थिरत्वात्सहुद्धिबोध्यत्वात्तदात्मना सत्त्वैकत्वनित्यत्वाद्युपपद्येत । पर्यायाश्च द्रव्यस्यावस्थाविशेषाः घटत्वपटत्वादिरूपास्तेषां चानेकत्वादस्थिरत्वादसहुद्धिबोध्यत्वात्तदात्मना हि असत्त्वाऽनित्यत्वादिकमुपपद्येतेत्यत्र ब्रूमः, नैवं वाच्यम् । कस्मात् ? एकस्मिन्पदार्थे किञ्चिदस्ति किञ्चिन्नास्तीत्यादिसप्तभङ्गयुक्तेरसम्भवात् । नहि तमःप्रकाशयोर्युगपदेकत्रोपलम्भोद्रष्टः श्रुतोवा ? एव-

मेकत्रास्तित्वनास्तित्वादिविरुद्धधर्म्मद्वयस्यास्मभवएव । ननु भवन्मतेऽपि एकस्मिन्धर्मिणि विरुद्धधर्मद्वयाङ्गीकारोऽस्ति । तथा "सर्वं खल्विदं ब्रह्मे" त्यादिषु एकत्वं प्रतिपाद्यते "प्रधानक्षेत्रज्ञपतिर्गुणेशः द्वासुपर्णे" त्यादावनेकत्वं च प्रतिपाद्यतइति चेन्न, अस्यार्थस्य युक्तिमूलत्वाभावात्, श्रुतिभिरेव परस्पराविरोधेन यथार्थं निर्णीतत्वात् । तथा सर्वस्य चिदचिदात्मकस्य जगतः स्वरूपतोब्रह्माभिन्नत्वासम्भवात्तज्जत्वादिना तदधीनस्थितिप्रवृत्तिमत्तयैव खलु ब्रह्माभिन्नत्वम् । स्वरूपतस्तु चिदचिद्ब्रह्मपदार्थानां भेदएव द्वैतश्रुतिप्रामाण्यात्, यथा पत्रपुष्पादीनां स्वरूपतोभिन्नानां पृथक् प्रवृत्त्याद्यभावात् वृक्षाभिन्नत्वं, यथा चेन्द्रियाणां स्वरूपतः प्राणाभिन्नानामपि प्राणायत्ततया प्राणाभिन्नत्वमविरुद्धम् । इत्थं जगद्ब्रह्मणोर्भेदाभेदौ स्वाभाविकौ श्रुतिस्मृतिसूत्रसाधितौ भवतः । कोऽत्र विरोधः । एवमेव भिन्नाभिन्नलक्षणं जगद्ब्रह्मसम्बन्धं वाक्यशेषोदृढयति "तज्जलानिती"ति, इति शब्दोहेतुवचनः । यतस्तस्मात्परमकारणाज्जायतइति तज्जं, तस्मिँल्लीयतइति तल्लं,

तस्मिन्नानिति चेष्टतइति तदनं, तज्जश्च तल्लश्च-तदनश्च तज्जलान् । अवयवलोपश्छान्दसः। किञ्च एकस्मिन् जगत्कारणे प्रमाणप्राप्ते बहूनां परमाणूनां कारणत्वं नोपपद्यते, गौरवात्तेषां जड-त्वेन कारणत्वासम्भवाच्च । एकस्मिन्वेदवेद्ये मोक्षप्रदे सति सिद्धानुग्रहान्मोक्षोदुर्घटः, अस-म्भवात् । सिद्धानुग्रहः आराधनसापेक्षः ? न वा ? आद्ये, सिद्धानां समानस्वभावानामेकतम-स्याराधनेन मोक्षोन भवेत् । बहूनां सिद्धाना-मुपेक्षादोषात्सर्वेषामाराधने गौरवः स्यात् । अस्ति चेदेकोमहान् तर्हि सेश्वरपक्षे प्रविष्टोभवान् । द्वितीये सर्वमोक्षप्रसङ्गः । किञ्च सिद्धसत्त्वे प्रत्यक्षादिप्रमाणाभावात्सिद्धानुग्रहान्मोक्षो—दुर्घटः ॥ ३३ ॥

वेदान्तकौस्तुभप्रभा ।

एवं मुक्तकच्छबौद्धमतं निरस्याथेदानीं विवसनजैनमतं निर-स्यते —

नैकस्मिन्नसम्भवात् ।

सप्त चैषां निरीश्वरवादिनां पदार्थाः शास्त्रसंग्रहभूताः, जीवा१

5जीवा२5श्रव३ संवर४ निर्जर५ बन्ध६ मोक्ष७ इति, तत्र जीवाश्चेतनाज्ञानदर्शनसुखवीर्यगुणाः सावयवादेहपरिमाणास्ते त्रिविधा बद्धात्मानोमुक्तात्मानोनित्यसिद्धाश्चेति, ये मुक्तात्मानस्ते सर्वज्ञानिरतिशयसुखाश्चासते । जीवभोग्यवस्त्वन्तमजीवः, सच धर्माधर्मपुद्गलकालाकाशभेदभिन्नः । सम्यक् प्रवृत्त्यनुमेयोद्रव्यविशेषोधर्मः, अमुक्तानां स्थितिहेतुरधर्मः, वर्णगन्धरसस्पर्शवद्रूपं पुद्गलः । सद्विधा परमाणुतत्सङ्घातभेदात्, पृथिव्यादिहेतवः परमाणवस्ते च न तार्किकानामिव चतुर्विधाः, किन्त्वेकस्वभावाः । पृथिव्यादिभेदस्तु परिणामकृतः । पृथिव्यादिचतुष्टयं तनुभुवनादिकश्च तत्सङ्घातः, कालस्तु भूतादिव्यवहारहेतुरणुरूपोद्रव्यविशेषआवरणाभावआकाशोद्विधाऽलोकाकाशः, सांसारिकः, अलोकाकाशोमुक्ताश्रयः, आश्रावयति पुरुषं विषयेष्वितीन्द्रियप्रवृत्तिराश्रवः, कर्त्तारमभिव्याप्याश्रवत्यनुगच्छतीत्याश्रवं कर्मेति वा, इन्द्रियवृत्तीः संवृणोतीति संवरइन्द्रियनिरोधः समाधिरूपः । पूर्वसञ्चितं कल्मषं निर्जरयतीति निर्जरोनाम अस्नानमौनवीरासननि÷ष्ठ्यूतभोजनतप्तशिलारोहणकेशोपलुञ्चनादिलक्षणमर्हदुपदेशावगतं तपः । बन्धस्त्वष्टविधः कर्मलक्षणः । तत्र *ज्ञानावरणीयं ङ्दर्शनावरणीयं+मोहनीयमन्तरीय×

÷ थूत्कारभावः ।

* ज्ञानान्मोक्षोनास्तीति ।

ङ् अर्हन्तमते मोक्षोनास्तीतिदर्शनं शास्त्रम् ।

+ स्वस्य शास्त्रस्य परशास्त्रेण समत्वदर्शनम् ।

× परोक्षज्ञानादपि कृतकृत्यबुद्धिः ।

मिति चत्वारि ८घातिकर्माणि, वेदनीयं१नामिकं२गोत्रिकमा३युष्क-मिति४चत्वार्यघातिकर्माणि*। बन्धनिवृत्तौ नित्यसिद्धार्हदनुग्रहात्स्वाभाविकात्मस्वरूपाविर्भावोमोक्षोभवतीति। तेषामेवापरः प्रपञ्चः पञ्चास्तिकायोनाम जीवास्तिकायः, पुद्गलास्तिकायः, धर्मास्तिकायः, अधर्मास्तिकायः। आकाशास्तिकायश्चेति, अनेकदेशवर्त्तिसाङ्केतिकपदार्थवाची अस्तिकायशब्दः, जीवश्चासावास्तिकायश्चेत्येवं सर्वत्र कर्मधारयः, इमञ्च सप्तभङ्गीनयं सर्वत्रावतारयन्ति। स्यादस्ति स्यान्नास्ति स्यादवक्तव्यः स्यादस्तिच नास्ति च स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्तिच नास्ति चावक्तव्यश्चेति। अतः सर्वं वस्तुजातं द्रव्यपर्यायात्मकमनैकान्तिकं, द्रव्यस्वरूपस्य चैकत्वात् स्थिरत्वात्सद्बुद्धिबोध्यत्वात्तदात्मना सत्त्वैकत्वनित्यत्वाद्युपपद्येत। पर्यायाश्च द्रव्यस्यावस्थाविशेषाः घटत्वपटत्वादिरूपास्तेषां चानेकत्वादस्थिरत्वादसद्बुद्धिबोध्यत्वात्तदात्मनाऽसत्त्वानित्यत्वादिकमुपपद्येतेति, तत्रेदमुच्यते। नैकस्मिन्निति। एकस्य द्रव्यस्यास्तित्वनास्तित्वनित्यत्वानित्यत्वादिभिरनैकान्तिकत्वं न युक्तम्। कुतः ? एकस्मिन्धर्मणि सत्त्वाऽसत्त्वादेर्विरुद्धधर्मस्य छायातपवत् युगपदसम्भवात्। कथमेकोभावोऽस्ति नास्ति च स्यात् विरोधात्। ननु पटरूपेण घटोनास्ति स्वेन रूपेणास्तीति न विरोधइति चेन्न, स्वरूपेऽपि सप्तभङ्गीनयस्याविशेषात्स्वरूपमस्तीत्यपि स्यान्नास्तीत्यपि तत्रानध्यवसानमेव स्यात्। किञ्च ये सप्तपदार्थास्ते तथैव स्युरन्यथा वेत्यनिश्चितज्ञानम-

---

८ मोक्षघातित्वात्पापविशेषरूपाणि यैर्जीवस्य ज्ञानादि हन्यन्ते।

नोट— १ देहाकारपरिणामोवेदनीयम्। २ कठिनावस्थानामिकं। ३ तयोः कललावस्था गोत्रिकं। ४ शोणितसंयोगआयुष्कं। * आत्मप्राप्त्यविघातकत्वात्।

प्रमाणमेव स्यात् । ननु सर्वमनैकान्तिकमित्यवधारणज्ञानं निश्चितमेवेति चेन्न, अवधारणमप्यनैकान्तिकमेव स्यात् । अवधारणं स्यान्नास्ति चावधारणमिति न क्वचिन्निश्चयः स्यात् । मोक्षोऽस्ति नास्तीत्यवधारणादप्रवृत्तिरेव स्यात्तत्रैवं शास्त्रं प्रणयन्नुन्मत्ततुल्यस्तीर्थकरः स्यात् । यच्चोक्तं पुद्गलसञ्ज्ञकपरमाणुसङ्घाताः पृथिव्यादयस्तत्पूर्वोक्तेश्वरानधिष्ठितपरमाणुवादनिरासेनैव निरस्तमिति ज्ञेयम् । तथा पञ्चास्तिकायानामपि पञ्चत्वसङ्ख्याऽस्ति ? न वेति ? विकल्पे, आद्ये स्यात् । द्वितीये न स्यादिति न्यूनाधिकसङ्ख्यात्वमेव स्यादिति सङ्क्षेपः ॥ ३३ ॥

सू० एवं चात्माऽकात्स्न्यम् ।

२ । २ । ३४ ॥

वेदान्तपारिजातसौरभः ।

एवं शरीरपरिमाणत्वेनाङ्गीकृतस्यात्मनोबृहद्देहप्राप्तावपूर्णता स्यात् ॥ ३४ ॥

वेदान्तकौस्तुभः ।

एवं चाऽऽत्माऽकात्स्न्यम् ।

तन्मते यथैकस्मिन्धर्मिणि विरुद्धधर्मासम्भवरूपोदोषएवं तदभिमते देहपरिमाणे जीवेऽपि दोषोऽस्ति । कोदोषः ? शृणु ! देहपरिमाणः आत्मा कर्मवशात्पिपीलिकाशरीरं विहाय

गजशरीरं यदाऽऽप्नोति तदा तस्याऽकात्स्न्यं स्यात्। गजशरीरानुरूपं परिपूर्णत्वं न स्यात् । गजाकारादेहान्निर्गतस्य चात्मनः सूक्ष्मशरीरे प्रविष्टस्य तदनुरूपं सूक्ष्मत्वं च न स्यादित्यर्थः ॥ ३४ ॥

वेदान्तकौस्तुभप्रभा ।

एवं चात्माऽकात्स्न्यम् ।

एवमेकस्मिन्धर्मिणि विरुद्धधर्मसमावेशासम्भवदोषवदात्मनोऽपि यदिष्टं देहपरिमाणत्वं तदपि पक्षे स्यात्पक्षे नेत्यकात्स्न्यमपरिपूर्णत्वं च दोषः प्रसज्ज्येतेत्यर्थः । तत्र शरीरैकदेशे जीवइत्येकदेशोजीवशून्यः स्यात् । किञ्च मनुष्यदेहपरिमाणोजीवः केन चित्कर्मविपाकेन पिपीलिकादेहे प्रविशन्नसम्मीयेत ॥ ३४ ॥

सू० न च पर्य्यायादप्यविरोधो-विकारादिभ्यः ।२।२।३५॥

वेदान्तपारिजातसौरभः ।

उपचयापचयार्हाऽवयवा नात्माऽतोन विरोधः इति च न वक्तुं शक्यं, विकारित्वादिदोषप्रसक्तेः ॥ ३५ ॥

वेदान्तकौस्तुभः ।

न च पर्य्यायादप्यविरोधोविकारादिभ्यः ।

न च वाच्यं सावयवोहि खल्वस्माकमात्मा तस्यावयवानां गजशरीरेउपचयः सूक्ष्मशरीरेऽपचयश्चेत्येवं पर्य्यायादविरोधइति । कुतः ? " विकारादिभ्यः " विकारादिदोषप्रसङ्गात् । यदि भवन्मते आत्मा सावयवस्तर्हि देहादिवद्विकारी स्यादनित्यश्च स्यात् । एवमादयोदोषाः स्युः ॥ ३५ ॥

वेदान्तकौस्तुभप्रभा ।

नच पर्य्यायादप्यविरोधोविकारादिभ्यः ।

ननु मनुष्यदेहे परिमाणस्य जीवस्य हस्तिशरीरादावकात्स्न्यें परिहर्तुं शक्यं कथमनन्तावयवआत्मा महति शरीरे तदवयवानामुपचयोऽर्भकशरीरेऽपचयइत्येवं पर्यायादविरोधइति चेन्नेति। कुतः ? विकारमूर्त्तत्वादिदोषप्रसङ्गात् । अवयवोपगमापगमाभ्यामनिशमापूर्यमाणस्यापक्षीयमाणस्य च जीवस्य विकारित्वं स्यात्तथात्वे चर्मादिवदनित्यत्वप्रसङ्गस्तताश्च बन्धमोक्षौ कस्य स्याताम् । यदि सावयवोजीवः स्यादेहवद्विनाशी स्यान्मूर्त्तत्वाच्च, नचोपचयापचयौ कल्पयितुं शक्यौ प्रमाणाभावात् । येऽपगतास्तेऽपगताएव, न तेषां पुनरात्मसम्बन्धोनिरूपयितुं शक्यते इति ॥ ३५ ॥

सू० अन्त्यावस्थितेश्चोभय-नित्यत्वादविशेषः॥२।२।३६॥

वेदान्तपारिजातसौरभः।

अन्त्यस्य परिमाणस्य नियततामङ्गीकृत्यादि-मध्ययोरपि नित्यत्वमस्तीति चेत्तर्हि सर्वत्रा-विशेषः स्याद्विनष्टोदेहपरिमाणवादः ॥ ३६॥

वेदान्तकौस्तुभः ।

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ।

चरमदेहविनाशानन्तरं यन्मोक्षदशायां परिमाणं स्वरूपं च तद्धि नित्यं भवति । तदा सूक्ष्मस्थूलशरीरपरिग्रहाभावात्तस्य सङ्कोचविकाशा-भावोभवति । एवं भूतस्यान्त्यस्य परिमाणस्य स्वरूपस्य चावस्थितेरुभयोराद्यमध्ययोरवस्थ--योरापि नित्यत्वमीष्यते आर्हतैस्तस्माच्च सर्वत्रा-विशेषः स्यादित्यर्थः । स्थूलशरीरे सूक्ष्मशरीरे बद्धावस्थायां मोक्षावस्थायां च नित्यानियत-परिमाणआत्मा स्यात्, शरीरपरिमाणप्रतिज्ञा

बालभाषिता स्यादिति संक्षेपः । अतोभ्रान्ति-मूलेन दिगम्बरपक्षेनापि नास्मत्सिद्धान्तस्य विरोधइति सिद्धम् ॥ ३६ ॥

इत्येकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ।

अन्त्यस्य चरमदेहगतस्य परिमाणस्यावस्थितिरिष्यते वि*सिग्भिः । भिन्ने देहे मुक्तः सर्वगतोदेहान्तरावच्छेदाभावात्तन्नित्यं परिमाणं, ततश्चाद्यमध्ययोरप्यवस्थयोर्नित्यत्वं स्यादतोऽविशेषः । सर्वदाऽणुर्वा महान्वा जीवोन शरीरपरिमाण इति वक्तुं शक्यते । एवं चोपचयापचयप्रतिज्ञाहानिरतोदिगम्बरमतमपि सौगतमत-वदत्यन्तमनादरणीयमिति ॥ ३६ ॥

इत्येकस्मिन्नसम्भवाधिकरणम् ॥ ६ ॥

सू० पत्युरसामञ्जस्यात् ॥२।२।३७।

वेदान्तपारिजातसौरभः ।

पाशुपतं शास्त्रमुपेक्षणीयं जगदभिन्ननिमित्तो-पादानकारणप्रतिपादकवेदविरोधित्वादुपधर्म्मप्रवृ-त्तेकाच्च ॥ ३७ ॥

---

* सिग्वस्त्रं विगतं येभ्यस्तैर्दिगम्बरैः ।

वेदान्तकौस्तुभः।

इदानीं पशुपतिमतं निरस्यते —

पत्युरसामञ्जस्यात् ।

वेदविरुद्धवादिनः पूर्वत्र निराकृता माहेश्वरा-अपि तादृशाएव, ते चतुर्विधाः, कापालाः, कालामुखाः, पाशुपताः, शैवाश्चेति, तत्प्रवृत्तिकारणं पशुपतिप्रणीतं शास्त्रम् । महेश्वरेण पशुपतिना प्रणीता पञ्चाध्यायी प्रसिद्धा, तत्र पञ्च पदार्थाः सन्ति । कारणं कार्य्यं योगोविधिर्दुखान्तइति । कारणं प्रधानमीश्वरश्च, तत्र प्रधानमुपादानकारणमीश्वरं निमित्तकारणं मन्यन्ते । कार्यं महदादि योगः " ओंकारमभिध्यायात्सकृदिति कुर्याद्धारणमि"त्येवमुक्तः । विधिस्त्रिषवणस्नानादिगूढचर्य्यावसानः, मोक्षोदुःखान्तइति । तत्र पाशुपताः कापालाश्च मोक्षावस्थायामात्मा पाषाणकल्पोभवतीत्याहुः । शैवाश्चैतन्यमात्मानमुक्तमाचक्षते । तेषामन्येऽप्युपनिबन्धाः सन्ति तत्तद्विशेषबोधकाः । ते च माहेश्वराः भगवन्मायामोहितबुद्धयोवेदविरुद्धं श्रेयः साधनं शिष्टैरनाचरितं यथेच्छं वदन्ति कुर्वान्ति च । यथाहुः कापालाः ।

"मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः । भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति। कण्ठिकारुचकं चैव कुण्डलं च शिखामणिः । भस्मयज्ञोपवीतश्च मुद्राषट्कं प्रचक्षते । आभिर्मुद्रितदेहस्तु न भूयइहजायते" इत्यादि । तथा कालामुखाः। कपालपात्रशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवतापूजा—दिकमैहिकामुष्मिकसकलफलसाधनमि "त्याच॰॰क्षते । शैवागमेऽपि "रुद्राक्षं कङ्कणं हस्ते जटा चैका च मस्तके। कपालं भस्मना स्नानमि"त्यादि । किञ्च गर्दभीवाग्बाणपीडितमतङ्गाद्युपाख्याने महाभारते इतरजातीयस्य ब्राह्मण्यं सम्वत्सरसहस्रसंञ्चितैरपि तपोभिर्दुर्लभमिति निपुणं प्रपञ्चितम् । तदितरजातीयस्य "दीक्षाप्रवेशमात्रेण ब्राह्मणोभवती क्षणात्कापालं व्रतमास्थाय यतिर्भवति मानवः" इत्यादिना सुलभं वदन्ति । तत्रेदमुच्यते, पत्युरित्यादि, नेत्यनुवर्त्तते । पत्युः पशुपतेर्मतं नोपपद्यते । कुतः ? असामञ्जस्यात् । "तदैक्षत बहु स्यां सञ्च त्यच्चाभवदैतदात्म्यमिदमि "त्यादिश्रुतिविरुद्धकारणद्वय-

प्रतिपादनात्तन्मतस्यासामञ्जस्यात् । किञ्च प्रणव-पूर्वकध्यानशवभस्मस्नानादेः परस्परविरुद्धत्वाद-सामञ्जस्यमेव तन्मतस्य ॥ ३७ ॥

वेदान्तकौस्तुभप्रभा ।

अथ पशुपतिपक्षनिरासउपक्रम्यते —

पत्युरसामञ्जस्यात् ।

इयं तावत्पशुपतिमतानुगामिनां प्रक्रिया, पशुपतिनेश्वरेण प्रणीतं पञ्चाध्यायिशास्त्रं, पञ्च तत्र पदार्थानिर्णीयन्ते । कारणं, कार्यं, योगो, विधि,: दुःखान्तः, इति । कारणं प्रधानमीश्वरश्च, कार्यं महदादि, योगोऽ"प्योङ्कारमभिध्यायात्सकृदि"ति कुर्याद्धारणा-मित्येवमुक्तोविधिपदार्थः, विधिस्त्रिषवणास्नानादिगूढचर्यावसानः, मोक्षोदुःखान्तः, सच तार्किकादिवत्पाषाकल्पावस्थितिः । पाशुपतकापालिकयोः शैवानां तु साङ्ख्यवच्चैतन्यात्मानस्तिष्ठ-न्तीति विशेषः । ते चतुर्विधाः । कापालाः कालामुख्याः पाशु-पताः शैवाश्च । सर्वेऽपि वेदविरुद्धाचारान् निःश्रेयः साधनतया मन्यन्ते । निमित्तोपादानयोर्भेदं निमित्तकारणं पशुपतिं मन्यन्ते । तथैव साधनमपि मुद्रिकाषट्कधारणादि । तथा चाहुः कापालाः । मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः । भगासनस्थमात्मानं ध्यात्वा निर्बाणमृच्छति । कण्ठिकारुचकं चैव कुण्डलं च शिखामणिः । भस्मयज्ञोपवीतं च मुद्राषट्कं प्रचक्षते । आभिर्मुद्रितदेहस्तु न भूयइह जायते"इत्यादि । तथा कालामुखा अपि "कपालपात्र-शवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवता-पूजादिकमैहिकामुष्मिकसकलफलसाधनमि"ति मन्यन्ते "रुद्राक्षं

कङ्कणं हस्ते जटा चौक च मस्तके । कपालं भस्मना स्नानमि"-त्यादिकं शैवागमे प्रसिद्धम् " । तथा केन चित्क्रियाविशेषेणेतर-जातीयानामपि ब्राह्मणत्वप्राप्तिमुत्तमाश्रमप्राप्तिं च विदधति । "दीक्षाप्रवेशमात्रेण ब्राह्मणोभवति क्षणात् । कापालं व्रतमास्थाय यतिर्भवति मानवः" इति, तन्निराकरोति । पत्युरिति । नेत्यनुवर्त्तते । पशुपतेः पक्षः श्रेयोऽर्थिभिर्नादरणीयः । कुतः ? असामञ्जस्यात्, वेदबाह्यत्वात् । मुद्राषट्कधारणभगासनस्थात्मध्यानसुराकुम्भस्थापन-तत्स्थदेवतार्चनगूढाचारश्मसानभस्मस्नानप्रणवपूर्वाभिध्यानादे---रन्योऽन्यविरुद्धत्वाद्वेदबाह्यधर्मत्वाच्च । तदुक्तसाधनानां वेदोक्त-वेदान्तश्रवणादिभगवदुपासनादीनां च परस्परात्यन्तविरोधाच्च । पाषाणकल्पावस्थितिरूपमोक्षस्याप्यवैदिकत्वात्, तथा पशुपते-रपि जन्यत्वेन जगत्कारणत्वासम्भवाच्च । "एको ह वै नारायण-आसीन्न ब्रह्मा नेशानः, तस्य ध्यानान्तस्थस्य ललाटाद्यूक्तः शूल-पाणिः पुरुषोऽजायते"त्यन्वयव्यतिरेकश्रुतेस्तस्य जन्यत्वावगमात् । "तदैक्षत बहु स्यां प्रजायेय नारायणात्प्राणोजायते मनः सर्वे-न्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी नारायणाद्ब्रह्मा जायते नारायणाद्रुदः " इत्यादिश्रुतयः परब्रह्म-श्रीपुरुषोत्तमं जगदभिन्ननिमित्तोपादानं वदन्त्योऽन्यस्य वस्तु-जातस्य तदुपादेयत्वं निश्चिन्वन्ति । क्वचित् श्रूयमाणाः शिवा-दिशब्दाश्रपि आकाशशब्दवद्ब्रह्मपराएव । तच्च "सिद्धान्तजान्हव्यां" श्रीदेवाचार्यपादैर्विशदं निर्णीतम् ॥ ३७ ॥

सू० सम्बन्धानुपपत्तेश्च ॥

२ । २ । ३८ ॥

वेदान्तपारिजातसौरभः ।

पशुपतेरशरीरस्य प्रेरकस्य प्रेर्य्यप्रधानादिभिः सम्बन्धानुपपत्तेश्च न पशुपतिर्जगद्धेतुः ॥ ३८ ॥

वेदान्तकौस्तुभः ।

सम्बन्धानुपपत्तेश्च ।

इतोऽपि पशुपतेर्मतं नोपपद्यते । कुतः ? पशुपतेर्निमित्तकारणस्य प्रेरकस्य प्रेर्य्यप्रधानादिभिः सम्बन्धोवाच्यस्तदनुपपत्तेः । तथाहि, माहेश्वराः पृष्टव्याः ! किं भवन्तः श्रुत्यनुसारिणः ? दृष्टानुसारिणोवा ? आद्ये, उक्तसिद्धान्तपरित्यागप्रसङ्गस्तस्य श्रुतिविरुद्धत्वात् । द्वितीये सशरीरस्यैव कुलालादेर्मृदादिसम्बन्धोदृष्टस्ततोन भवद्भिर्दृष्टानुसारिभिरशरीरस्य पशुपतेः प्रधानादिसम्बन्धः प्रतिपादयितुं शक्यः । तस्मादशरीरस्य प्रधानादिसम्बन्धतत्प्रेरकत्वाद्यसम्भवान्न जगद्धेतुत्वम् ॥ ३८ ॥

वेदान्तकौस्तुभप्रभा ।

सम्बन्धानुपपत्तेश्च ।

पशुपतेरदेहस्य प्रधानादिसम्बन्धानुपपत्तरपि जगद्धेतुत्वं न

सम्भवति, लोके सशरीरस्यैव कुविन्दादेस्तन्त्वादिसम्बन्धदर्शनात् ॥ ३८ ॥

सू० अधिष्ठानानुपपतेश्च ॥

२ । २ । ३९ ॥

वेदान्तपारिजातसौरभः ॥

दृष्टविरुद्धत्वान्नित्यस्योत्तरभावित्वादनित्यस्य च शरीरस्यानुपपत्तेश्च न पशुपतिर्जगद्धेतुः ॥३९॥

वेदान्तकौस्तुभः ।

ननु सशरीरस्तर्हि स भवतु, नात्रोक्तदोष-इत्यत्राह —

अधिष्ठानानुपपत्तेश्च ।

सर्वव्यवहाराधिष्ठानं शरीरं तदनुपपत्तेस्तन्मतं नोपपद्यते । तथाहि पशुपतिशरीरस्य न तावन्नित्यत्वं सम्भवति, दृष्टविरोधात् । अन्यथा कुलालादिशरीराणामपि नित्यत्वापत्तिः स्यात् । न चानित्यत्वं तच्छरीरस्य सम्भवति, जगत्कारणस्यानित्यशरीरानर्हत्वात् । निखिलस्यानित्य-

पदार्थस्य कार्यत्वेनोत्तरभावित्वात्कारणस्य पशुपतेः पूर्ववर्त्तित्वाच्च ॥ ३९ ॥

वेदान्तकौस्तुभप्रभा ।

अधिष्ठानानुपपत्तेश्च ।

पशुपतेः कुलालादिवत्प्रधानाधिष्ठातृत्वं नोपपद्यते, अशरीरत्वात्सशरीरस्यैव कुलालादेर्मृदाद्यधिष्ठातृत्वदर्शनाच्च ॥ ३९ ॥

सू० करणवच्चेन्न भोगादिभ्यः । २।२।४०॥

वेदान्तपारिजातसौरभः ।

जीववत्करणकलेवरकल्पनापि न सम्भवति। भोगादिप्रसक्तेः ॥ ४० ॥

वेदान्तकौस्तुभः ।

करणवच्चेन्न भोगादिभ्यः ।

ननु यथाऽनादिसिद्धस्य जीवस्याशरीरस्य पूर्वपूर्वकरणकलेवरनिबन्धनः उत्तरोत्तरकरण-कलेवरसम्बन्धोऽस्ति, तद्वत्पशुभर्तुरपि भवतु, नेह कश्चिद्दोषइति चेन्न, भोगादिभ्योदोषेभ्यः। अयमर्थः,

यदिजीववदीश्वरस्य तादृशशरीरसम्बन्धस्तर्हि सुखदुःखभोक्तृत्वतन्निदानपुण्यापुण्यकर्मकर्तृत्वादयोदोषाः सर्वे तस्यापि भवेयुरिति ॥ ४० ॥

वेदान्तकौस्तुभप्रभा ।

करणावच्चेन्न भोगादिभ्यः ।

यथाऽशरीरस्यैव जीवस्य करणकलेवराद्यधिष्ठातृत्वं, तथा पशुपतेरपि प्रधानाद्यधिष्ठातृत्वं सम्भवतीति चेन्न, कुतः ? भोगादिभ्यः स्वार्जितपुण्यादिरूपकर्मफलभोगनिमित्तं पुण्यादिरूपादृष्टकारितं च जीवस्याधिष्ठातृत्वं, तथा पशुपतेरपि पुण्यादियोगादीश्वरत्वासम्भवस्तस्मान्नाधिष्ठातृत्वं सम्भवति ॥ ४० ॥

सू० अन्तवत्त्वमसर्वज्ञता वा ॥

२ । २ । ४१ ॥

वेदान्तपारिजातसौरभः ।

तस्य पुण्यादिरूपादृष्टयोगेऽन्तवत्त्वमज्ञत्वं च स्यात् ॥ ४१ ॥

वेदान्तकौस्तुभः ।

अन्तवत्त्वमसर्वज्ञता वा ।

नच वाच्यमीश्वरस्य भोगादिप्रसङ्गेऽपि कोदोषः

भास्करस्योपरि प्रपतितोहिमकणः किं करष्यतीति, अयुक्तत्वात् । अज्ञाननिबन्धनसंसारहेतुभूतपुण्यापुण्यकर्माचरणतद्विपाकभोगयोगादन्तवत्त्वं सृष्टयन्तःपातित्वमज्ञत्वं चेश्वरस्याप्यवश्यं स्यात् । इतरथा जीवानामप्यसंसारित्वं प्रसज्येतेति संक्षेपः । तस्मान्माहेश्वरैर्नोक्तसिद्धान्तस्य विरोधइति सिद्धम् ॥ ४१ ॥

इति पशुपत्यधिकरणम् ॥ ७ ॥

वेदान्तकौस्तुभप्रभा ।

अन्तवत्त्वमसर्वज्ञता वा ।

वाशब्दश्चार्थे । पशुपतेः पुण्यादिरूपादृष्टयोगे जीववदन्तवत्त्वं, सृष्टयाद्यन्तःपातित्वमसर्वज्ञता च स्यादिति सङ्क्षेपः ॥ ४१ ॥

इति पशुपत्यधिकरणम् ॥ ७ ॥

सू० उत्पत्त्यसम्भवात् ॥ २ । २ । ४२ ।

वेदान्तपारिजातसौरभः ।

पुरुषमन्तरेण शक्तेः सकाशाज्जगदुत्पत्त्यसम्भवान्न तत्कारणवादोऽपि साधुः ॥ ४२ ॥

वेदान्तकौस्तुभः ।

इदानीं प्रसङ्गाच्छक्तिरेव जगज्जनयित्रीति शाक्तानां भ्रान्तिं निराकरोति —

उत्पत्त्यसम्भवात् ।

नेत्यनुवर्त्तते । शक्तिर्न विश्वस्य कारणम् । कुतः ? पुरुषसंसर्गं विनाशक्तेः सकाशाद्विश्वोत्पत्तेरसम्भवात् । शक्तीनां सर्वत्रोपलब्धिप्रसङ्गः प्रसज्येत, तासां पुरुषतन्त्रत्वाभावात् । यद्वा जगतो नित्यत्वेनोत्पत्त्यसम्भवान्न शक्तेस्तद्धेतुत्वम्, जगतोऽजन्यत्वे प्रमाणाभावात् । वेदः प्रमाणं चेत्तर्हि तत्प्रमाणकं जगत्कारणं ब्रह्माप्यस्त्येव, निर्मूलः शक्तिकारणवादः उपेक्षणीयः ॥ ४२ ॥

वेदान्तकौस्तुभप्रभा ।

उत्पत्त्यसम्भवात् ।

श्रीभगवत्प्रणीतपरमश्रेयोबोधकस्यापि भगवच्छास्त्रस्य कपिलादिशास्त्रवदप्रामाण्यमाशङ्क्य, तत्परिहरति । तत्र शङ्कते, परमात्मनः परब्रह्मणोऽजगदभिन्ननिमित्तोपादानाच्छ्रीवासुदेवात् सङ्कर्षणोनाम जीवोजायते, सङ्कर्षणात्प्रद्युम्नसंज्ञं मनोजायते। ततोऽनिरुद्धाख्योऽहङ्कारोजायते"इति पाञ्चरात्राणां प्रक्रिया । तत्र जीवस्योत्पत्त्यसम्भवात् श्रुतिविरुद्धैव सेति प्रतिभाति "अजोह्येकोजुषमाणः, न जायते म्रियते वे"त्यादिश्रुतेः ॥ ४२ ॥

सू० नच कर्त्तुः करणम् ।२।२ ।४३ ॥ ।

वेदान्तपारिजातसौरभः ।

पुरुषसंसर्गोऽस्तीति, चेत्पुरुषस्य करणं नास्ति तदानीम् ॥ ४३ ।

वेदान्तकौस्तुभः ।

न च कर्त्तुः करणम् ।

शक्त्यनुग्राहकः कर्त्ताऽस्ति, जगतोजन्यत्वमपि दृष्टानुसारेणानुमीयतेऽतोनोक्तदोषस्तर्हि कर्त्तुः करणं न सम्भवति, सृष्टेः प्राक्करणाभावात् । तदभावे पुरुषस्यानुग्राहकत्वं न सम्भवति । आकाशादेर्घटादिसादृश्याभावेन जन्यत्वं च न सिध्यति । चकारात्सति पुरुषे कर्त्तरि, न शक्तेः कारणत्वम् ॥ ४३ ॥

वेदान्तकौस्तुभप्रभा ।

न च कर्त्तुः करणम् ।

नापि कर्तुः सङ्कर्षणाख्यजीवात्सकाशात्प्रद्युम्नाख्यस्य मनसः करणस्योत्पत्तिः सम्भवति, विरुद्धत्वात् । नहि कुलालादेर्दण्डा-

दीनामुत्पत्तिः कस्य चिद्दृष्टचरोपपन्ना वेति । "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे"त्यादिश्रुतिविरोधाच्चाप्रमाणमिदमपि तन्त्रमिति प्राप्ते ॥ ४३ ॥

सू० विज्ञानादिभावे वा तदप्रतिषेधः ॥२।२।४४॥

वेदान्तपारिजातसौरभः ।

स्वाभाविकविज्ञानादिभावे खलुजगत्कर्तृत्वेकः प्रतिषेधः, स्वतोविनष्टः शक्तिवादः, ब्रह्मस्वीकारात् ॥ ४४ ॥

वेदान्तकौस्तुभः ।

विज्ञानादिभावे वा तदप्रतिषेधः ।

वाशब्दस्त्वर्थे । स्वाभाविकज्ञानबलादिगुणगणनिकेतभूताऽन्यानिरपेक्षस्वभावास्वाश्रयाशक्तिरित्येवं भूते विज्ञानादिभावेऽङ्गीकृते तु तदप्रतिषेधः, विश्वहेतुत्वं न प्रतिषिध्यते, सर्वोपेता चेत्यत्र सर्ववेदान्तवेद्यादेवतोक्ता सा भवद्भिः स्वीकृता, न सा कस्य चिच्छक्तिः, सा परा देवता

ब्रह्मादिपदाभिधेयास्वत एव परास्तः शक्तिवाद-इति भावः ॥ ४४ ॥

वेदान्तकौस्तुभप्रभा ।

राद्धान्तः —

विज्ञानादिभावे वा तदप्रतिषेधः ।

वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः । सङ्कर्षणादीनां विज्ञानादिभावे विज्ञानं च तदादि चेति विज्ञानादिब्रह्म "विज्ञानमानन्दं ब्रह्मे"ति श्रुत्युक्तब्रह्मभावे सति तत्प्रतिपादनपरस्यास्य तन्त्रस्य प्रमाणत्वाप्रतिषेधः । तत्प्रामाण्यं न प्रतिषिध्यते इत्यर्थः । अयमत्राभिप्रायः । प्रमाणत्वाप्रमाणत्वयोः शास्त्रमेकं नियामकं, तदेकगम्यत्वात्तयोः तत्र श्रुतिमूलं च प्रामाण्यं शिष्टग्राह्यं, श्रुतिविरुद्धं चाप्रामाण्यं हेयं चेति सर्वप्रमाणविदां समानम् । एवं च पञ्चरात्रस्य श्रुतिमूलत्वं, तत्तुल्यत्वेन मोक्षधर्मे श्रीसूत्रकारेणैव निर्णीतम् । "अहस्थोब्रह्मचारी च वानप्रस्थोऽप्यभिक्षुकः । यइच्छेत्सिद्धिमास्थातुं देवतां कां यजेत स"इत्यादि युधिष्ठिरप्रश्नानां पञ्चरात्रोक्तप्रक्रियया ह्युत्तरं दत्त्वाह, "इदं शतसहस्राद्धि भारताख्यानविस्तरात् । आविध्यमतिमन्थानं दध्नोघृतमिवोद्धृतं । नवनीतं यथा दध्नोद्विपदां ब्राह्मणोयथा । आरण्यकं च वेदेभ्यः औषधिभ्योयथाऽमृतम् । इदं महोपनिषदं चतुर्वेदसमन्वितं । साङ्ख्ययोगकृतान्तेन पञ्चरात्रानुशब्दितं इदं श्रेयइदं ब्रह्म इदं हितमनुत्तमम् । ऋग्यजुःसामभिर्जुष्टमथर्वाङ्गिरसैस्तथा । भविष्यति प्रमाणं वा ह्येतदेवानुशासनमिति । तथा चास्याप्रामाण्यं प्रमाणाभावाद्वा, ? निषेधाद्वेति ? नाद्यः, उक्तप्रमाणस्य सत्त्वात् । न

द्वितीयः, भारतादौ काप्यदर्शनात् । नच "कापालं पञ्चरात्रञ्च यामलं वामनार्हतम् । एवं विधानि चान्यानि मोहनार्थानि तानि त्वि"त्यादिः । कचित् कूर्मपुराणादौ निषेधोदृश्यते, इति शङ्कनीयं, भारतादिविरुद्धस्मृतेरनङ्गीकारात् " यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदि "ति सूत्रकारप्रतिज्ञावचनात् । भारतस्य तु सर्वैरपि शिष्टैर्निःसंशयेन परिग्रहान्नतत्रा-प्रामाण्यशङ्कावकाशः । अन्यथा भगवद्गीतायाअपि तथात्वापत्तिर्दुर्वारेति तस्मान्मोहनादिशास्त्रसाङ्गचर्य्यपाठानुपपत्त्या पञ्चरात्रशब्देन पञ्चरात्रान्तरं किमपि तन्त्रं कल्पनीयम् । किञ्च नारायणीये पञ्चरात्रपतिपाद्यविषयस्य निर्णयौपयिकषड्लिङ्गोपेतवाक्यसिद्धत्वादप्यस्य प्रमाणतमत्वम् । तथाहि " गृहस्थो-ब्रह्मचारी चे " त्यादिना राज्ञः प्रश्नोपक्रमः, सर्वाश्रमिणां स्वानुरूपपुरुषार्थापत्तये कोदेवोयजनीयवैश्वदेवं पैत्र्यं च कर्म कथं कर्तव्यं ? विष्णुनिवेदिताग्नेनेतरेण वा ? किमात्मको-मोक्षः ? किं सर्ववेदसारः ? " इत्युपक्रमः " एष एकान्तधर्मस्ते कीर्तितोनृपसत्तम ! । मया गुरुप्रसादेन दुर्विज्ञेयो-ऽकृतात्मभिरि "ति । वैशम्पायनः । एवं हि स महाभागो-नारदोगुरवे मम । श्वेतानां यतीनां चाह ह्येकान्तगतिमव्ययाम् । व्यासश्चाकथयत्प्रीत्या धर्मं पुत्राय धीमते । पञ्चरात्रविदोये च यथाक्रमपरानृप !"इति । भीष्मश्च "मत्तोऽन्यानि च ते राजन्नुपाख्यानशतानि वै । यानि श्रुतानि सर्वाणि तेषां सारोऽयमुद्धृतः" इत्युपसंहारः । १ । ये च तद्भाविता लोके ह्येकान्तित्वं समाश्रिताः । नारायणः शाश्वतधर्मगोप्ता काम्यं नैमित्तिकं राजन् ! यज्ञीयाः परमक्रियाः । सर्वाः सात्वतमास्थाय विधिं चक्रे समाहितः । पञ्चरात्रविदोमुख्यातस्य गेहे महात्मनः । प्रापणं भग-

त्प्रोक्तं भुञ्जते चाग्रभोजनमि"ति शतशोऽभ्यासः। २। नारदेन तु सम्प्राप्तः सरहस्यः ससङ्ग्रहः। एषधर्मोजगन्नाथात्साक्षान्नारायणान्नृप ! सात्वतं विधिमास्थाय प्राक्सूर्यमुखनिःसृतमि" त्यादिनाऽपूर्वता। ३। एतदभ्यधिकं तेषां यत्तेजः प्रविशन्त्युत। अहोह्येकान्तिनः श्रेष्ठान्प्रीणाति भगवान्स्वयम्। विधिप्रयुक्तां पूजां च गृह्णाति भगवान्स्वयम् एकान्तिनस्तु पुरुषागच्छन्ति परमं पदम्। नूनमेकान्तधर्मोऽयं श्रेष्ठोनारायणप्रियः। सहोपनिषदान्वेदान् ये विप्राः सम्यगाश्रिताः। पठन्ति विधिमास्थाय, ये चापि यतिधर्मिणः। तेभ्योविशिष्यं जानामि गतिमेकान्तिनां नृणाम्। एकान्तिनोहि पुरुषादुर्लभाबहवोनृप !। यद्येकान्तिभिराकीर्णं जगत्स्यात्कुरुनन्दन ! अहिंसकैरात्मविद्भिः सर्वभूतहिते रतैः। भवेत्कृतयुगप्राप्तिराशीः कर्मविवर्जितैः। नारायणात्मके मोक्षे ततोयाति परां गतिमि"त्यादिशतशः फलोक्तिः। ४। इदं महोपनिषदं चतुर्वेदसमन्वितं साङ्ख्ययोगेन तुल्योहि धर्मएकान्तिसेवितः सर्वेषु च नृपश्रेष्ठ ! ज्ञानेष्वेतेषु दृश्यते। यथागमं यथान्यायं निष्ठानारायणः प्रभुः। न चैनमेवं जानन्ति तमोभूताविशांपते !। तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिणः। निष्ठां नारायणमृषिं नान्योस्तीति वचोमम। निःसंशयेषु सर्वेषु नित्यं वसति वै हरिरि" त्यादिनाऽर्थवादः। ५। किञ्च जन्मेजयेन पृष्टोवैशम्पायनः प्रतिकल्पं पञ्चरात्रं श्रीनारायणादाविर्भवति तिरोभवति च पाषण्डप्राचुर्यादिति सम्पूर्णाध्यायेनाह। "यदासीन्मानस जन्म नारायणमुखोद्गतं। ब्रह्मणः पृथिवीपाल ! तदानारायणः स्वयं। तेन धर्मेण कृतवान्दैवं पैत्र्यं च भारत !। फेनपाऋषयश्चैव तं धर्मं प्रतिपेदिरे। वैखानसाः फेनपेभ्योधर्ममेतं प्रपेदिरे। वैखानसेभ्यः सोमस्तु ततः। सोऽन्तरदधे पुनरि"त्यादिना कल्पेकल्पे सम्प्रदायपूर्वकप्रवृत्त्युक्तयो-

5त्रोपपत्तयः* ।६। अथ तन्निष्ठावतां ह्यन्यक्रियावद्भ्य स्वरूपवैलक्षणोक्तेरपि श्रेष्ठत्ववर्णनात् । "सहोपनिषदान्वेदानि" त्यादिजन्मेजयोक्ते । एकतश्च द्वितश्चैव त्रितश्चैव महर्षय । इदं मे समनुप्राप्तामम दर्शनलालसाः । नतु मां ते ददृशिरे नतु द्रक्ष्यति कश्चिन । ऋते ह्येकान्तिकं चैषां त्वं च ह्येकान्तिकोममे"ति नारदं प्रतिश्वेतद्वीपपतिवचनात् । किञ्च "पञ्चरात्रविदोये च यथाक्रमपरानृप ! एकान्तभावोपगतास्ते हरि प्रविशन्ति वै । यद्ब्रह्मा ऋषयश्चैव स्वयं पशुपतिश्च यत् । शेषाश्च विबुधश्रेष्ठादैत्यदानवराक्षसाः । नागा सुपर्णागन्धर्वाः सिद्धाराजर्षयस्तथा । हव्यं कव्यं च सततं विधियुक्तं प्रयुञ्जते । कृत्स्नं तु तस्य देवस्य चरणावुपतिष्ठते । याः क्रियाः सम्प्रयुक्ताश्च एकान्तगतिबुद्धिभिस्ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम । तत्रैवाशरीरिणी वागेकतादीन्ब्रह्मपुत्रान्प्रति दृष्टावः पुरुषाः श्वेताः पञ्चेन्द्रियविवर्जिता । दृष्टोभवति देवेश ! एभिर्दृष्टैर्द्विजोत्तमाः । गच्छध्वं मुनयः सर्वे यथा गतमितोऽचिरात् । न स शक्तस्त्वभक्तेन द्रष्टुं देवः कथञ्चन । कालं कालेन महता एकान्तत्वं समागतैः । शक्योद्रष्टुं स भगवान्प्रभामण्डलदुर्दृशे"इति श्रीनारायणोनारदं प्रति "तं देवाआश्रमाश्चैव नानातनुसमाश्रिताः । भक्त्या सम्पूजयन्त्येनं गतिं चैषां ददाति स । ये तु तद्भावितालोके ह्येकान्तित्वं समाश्रिताः । एतदभ्यधिकं तेषां तत्तेजः प्रविशन्त्युत । इति गुह्यसमुद्देशस्तव नारदकीर्तितः । भक्त्या प्रेम्णा च विप्रर्षे ! अस्मद्भक्त्या च ते श्रुतइति" किञ्च वेदोपबृंहणाय "भारतसंहितां" कुर्वता श्रीबादरायणेन बहुषु स्थलेषु पञ्चरात्र-

---

* उपक्रमोपसंहारअभ्यासोऽपूर्वताफले ।
अर्थवादोपपत्तिश्च लिङ्गं तात्पर्यनिर्णये ॥

प्रामाण्यं प्रतिष्ठापितवता तर्कपादे तत्प्रामाण्यं निराक्रियते, इत्य-स्यासङ्गतत्वमेव भ्रान्तत्वापत्तेः । ननु "परं तत्त्वमिदं कृत्स्नं साङ्ख्यानां विदितात्मनाम् । यदुक्तं यतिभिर्मुख्यैः कपिलादिभि-रीश्वरैः । यस्मिन्नविभ्रमाः केचिद्दृश्यन्ते मनुजर्षभ !। गुणाश्च यस्मिन्बहवोदोषहानिश्च केवले"ति कपिलमतस्यापि भारते भ्रमादिदोषाभावप्रतिपादनम् । "तथा सर्वेषु च नृपश्रेष्ठे"त्यनेन साङ्ख्यपाशुपतादीनामपि नारायणनिष्ठत्वप्रतिपादनं । "तथातमेव शास्त्रकर्त्तार"इति तच्छास्त्रकर्तृणामपि नारायणप्रतिपादकत्वप्रति-पादनम् "साङ्ख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । आत्म-प्रमाणान्येतानि न हन्तव्यानि हेतुभिरि"ति साङ्ख्यादीनामात्म-प्रमाणत्वप्रतिपादनं सर्वे प्रमाणं हि तथा "यथैतच्छास्त्रमुत्तम-मि"ति पञ्चरात्रदृष्टान्तेनेतरशास्त्राणामपि प्रामाण्यप्रतिपादनं च दृश्यते । तथात्वेऽपि शारीरके साङ्ख्यपाशुपताद्यागमानां निषेधदर्शनात्तन्न्यायेनास्यापि निषेधोयुक्तएव । नच साङ्ख्यादौ वेदविरुद्धभागस्यापि सत्त्वात्तन्मात्रनिषेधइष्टइति वाच्यं, श्रुति-विरुद्धभागस्य सङ्कर्षणाद्युत्पत्तिरूपस्यात्रापि सत्त्वात्तन्मात्र-निषेधोऽत्रापि युक्तइति चेन्न, भगवच्छास्त्रविचारशून्यानां पद-वाक्यप्रमाणत्वनिर्णयाशक्तानां स्वाङ्गणोऽश्वधावनमात्रत्वात्तथा हि साङ्ख्यादीनां पौरुषेयत्वेन वेदविरुद्धांशस्यापि सम्भवात्त-न्मात्रनिषेधः सूपपन्नः । प्रकृते तु "पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमि"ति श्रीमुखनिर्गतत्वेन श्रीभगवद्गीतावत्कृत्स्न-स्यापि वेदार्थरूपत्वेन प्रामाण्यतमत्वान्नोक्तन्यायस्यात्रावकाशः । नहि साङ्ख्यादीनां तत्पठनमात्रेण तत्तुल्यत्वं वक्तुं शक्यं, उक्त-रीत्या तेषां षड्लिङ्गोपेतवाक्यैर्निर्णयाभावेनोक्तन्यायस्य महद्वैष-म्यात् । किञ्च साङ्ख्योक्ततत्त्वानामब्रह्मात्मकतेव शारीरके निरा-कृता, न स्वरूपम् । योगपाशुपतादिषु चेश्वरस्य केवलं निमित्तकार-

णता परतत्त्वविपरीतकल्पना, वेदबाह्याचारश्च, निराकृतः। न योगस्वरूपं, पशुपतिस्वरूपं, चेत्यतः, "परं तत्त्वमि"त्यादिना "साङ्ख्यं योग" इत्यादिना च तत्तदभिहिततत्त्वस्वरूपमात्रंग्राह्यं, नतु बुद्धयाद्यभिहिततत्त्ववत्सर्वं त्याज्यमित्युच्यते। नापिसङ्कर्षणप्रद्युम्नानिरुद्धानां जीवमनोऽहङ्काररूपत्वं सम्भावनार्हमपि तु श्रीवासुदेवाख्यस्य परब्रह्मणोव्यूहात्मत्वमेव। तदुक्तं पौष्करसंहितायां "कर्त्तव्यत्वेन वै यत्र चातुरात्म्यमुपासते। क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तद्दि"ति। तच्च चातुरात्म्योपासनं परब्रह्मोपासनमेवेति। "ब्राह्मणानां हि सद्ब्रह्मवासुदेवाख्ययाजिनां। विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महदिति सात्वतसंहितोक्तेः। "यस्मात्सम्यक्परं ब्रह्म वासुदेवाख्यमव्ययं। अस्मादवाप्यते शास्त्राज्ज्ञानपूर्वेण कर्मणे"ति पौष्करोक्तैर्यस्तदेव वासुदेवाख्यं परं ब्रह्म यथाधिकारं भक्तैर्ज्ञानपूर्वेण कर्मणा समाराधितं सत्समवाप्यते। तस्मात्सङ्कर्षणादीनामपि श्रीवासुदेवस्यैव स्वेच्छाव्यूहरूपत्वम्। "अजायमानोबहुधा व्यजायत" इति श्रुतेः। "धर्मसंस्थापनार्थाय सम्भवामि युगे युगे" इतिगीतोक्तेः। "चतुर्विभक्तः पुरुषः स क्रीडति यथेच्छती"ति कूर्मोक्तेश्च। जीवमनोऽहङ्कारतत्त्वाधिष्ठातृत्वाच्च तेषां जीवादिशब्दैः कथनस्याविरोधः। "यथा ताम्रापपेक्षन्त तत्तेजपेक्षते "त्यत्राबाद्यचेतनेष्वीक्षणादिचेतनासाधारणधर्मादेरनुपपत्त्याऽबादिशब्दानां तदधिष्ठातृपरत्वं-तदन्तरात्मब्रह्मपरत्वं चाभ्युपगम्यते। तथा वा आकाशप्राणज्योतिरादिशब्दानां भूताकाशादौ तत्रोक्तलिङ्गानुपपत्त्या च ब्रह्मपरत्वं सूत्रितं तद्वत्प्रकृतेऽपि सूपपन्नम् ॥ ४४ ॥

सू०विप्रतिषेधाच्च ॥२।२।४५।

वेदान्तपारिजातसौरभः ।

श्रुतिस्मृतिविप्रतिषेधाच्च शाक्तिपक्षोऽप्रमाणिकः ॥ ४५ ॥

हरिरौं तत्सदिति श्रीमद्भगवन्निम्बार्कविरचिते शारीरकमीमांसावाक्यार्थे वेदान्तपारिजातसौरभे द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥

वेदान्तकौस्तुभः ।

विप्रतिषेधाच्च ।

"पुरुषएवेदं सर्वं परास्य शाक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, अहं सर्वस्य प्रभवो-मत्तः सर्वं प्रवर्त्तते " इत्यादिश्रुतिस्मृतिविरोधाच्च शक्तिकारणवादोन मुमुक्षुभिरादरणीयः । तस्मात्सर्वेश्वरे सर्वात्मनि ब्रह्मणि श्रीकृष्णे श्रुतिसमन्वयोनं कुतोऽपि विरुद्ध्यत इति सिद्धम् ॥ ४५ ॥

इत्युत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥

हरिरों तत्सदिति श्रीसनत्कुमारसन्तति-- प्रवर्त्तकाचार्यश्रीमन्निम्बार्कपादपद्मान्तेवासिना श्रीश्रीनिवासाचार्येण विरचिते शारीरकमीमांसाभाष्ये श्रीमति वेदान्तकौस्तुभे द्वितीयाऽध्यायस्य द्वितीयः पादः ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

नाप्युक्तप्रक्रिया श्रुतिविरुद्धेत्याह —

विप्रतिषेधाच्च ।

विप्रतिषिध्यते हि जीवोत्पत्तिरस्मिन्नपि शास्त्रे "अचेतना परार्था च नित्या सततविक्रिया । त्रिगुणं कर्मणां क्षेत्रं प्रकृतेरूपमुच्यते । व्याप्तिरूपेण सम्बन्धस्तस्याश्च पुरुषस्य च । सङ्घनादिरनन्तश्च । परमार्थेन निश्चितः" इति परमसंहितोक्तेः । ननु तर्हि पूर्वापरविरोधादुभयविधिवाक्यानामपि हेयत्वमिति चेन्नोक्तन्यायस्य वेदे व्यापनात्तत्रापि निषेधः सावकाशः । तथाहि "न जायते म्रियते वा विपश्चित्, यथाऽग्नेः क्षुद्राविस्फुलिङ्गा" इत्यारभ्य "सर्वे एवात्मानोऽव्युच्चरन्ती"तीतरेतरविरोधस्य साम्यात् । न चोत्पत्तिश्रुतेर्देहयोगमात्रविधानपरत्वे तात्पर्यादविरोधः । अन्यथा "नात्मा श्रुतेरि "त्यादिवक्ष्यमाणशास्त्रबाधादिति वाच्यं, उक्तन्यायस्यात्रापि साम्यात् । किञ्च सर्वसंहितासु जीवस्य नित्यत्वनिर्णयाज्जीव-

स्वरूपोत्पत्तिः पञ्चरात्रशास्त्रनिषिद्धैव । नापि सङ्कर्षणाख्यजीवात्प्रद्युम्नाख्यस्य मनसः करणस्योत्पत्तिर्विरुद्धेति पूर्वोक्तदोषावकाशः शङ्कनीयः । सङ्कर्षणादीनां ब्रह्मत्वे सिद्धे ततोमनआदीनामुत्पत्तेः सूपपन्नत्वात् "एतस्माज्जायते प्राणः"इति श्रुतिरपि स्वार्थपरत्वेन सूपपन्ना चेति । एतेन यदुच्यते कैश्चित्प्राप्तोत्येवायमुत्पत्त्यसम्भवोदोषः प्रकारान्तरेणेत्यभिप्रायः । कथं यदि तावदयमभिप्रायः परस्परभिन्नाएवैते वासुदेवादयश्चत्वारईश्वरास्तुल्यधर्माणोनैषामेकात्मत्वमस्तीति ततोऽनेकेश्वरकल्पनानर्थक्यमेकेनेश्वरेणेश्वरकार्यसिद्धेः, सिद्धान्तहानिश्च। "भगवानेकोवासुदेवः परमार्थतत्त्वमि"त्यभ्युपगमात् । अथायमभिप्रायः, एकस्यैव भगवतएते चत्वारोव्यूहास्तुल्यधर्माणइति, तथापि तदवस्थएवोत्पत्त्यसम्भवोदोषः । नहि वासुदेवात्सङ्कर्षणोत्पत्तिः सम्भवति, सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्यातिशयाभावात् । भवितव्यं च कार्यकारणयोरतिशयेन । यथा मृद्घटयोर्न ह्यसत्यतिशये कार्यं कारणमित्यवकल्पते । नच पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु एकैकस्मिन्सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः । कश्चिद्भेदोऽभ्युपगम्यते, वासुदेवाएव हि सर्वे व्यूहा निर्विशेषाइष्यन्ते । न चैते भगद्व्यूहाश्चतुःसङ्ख्यायामेवावतिष्ठेरन्, ब्रह्मादेः स्तम्बपर्यन्तस्य समस्तस्यैव जगतोभगवद्व्यूहत्वावगमादिति, तन्निरस्तम्। वासुदेवस्यैकत्वेऽपि व्यूहावतारादिनावस्थाने तत्तद्रूपेण प्रादुर्भावे च विरोधाभावात्स्वरूपेणैकत्वं मूर्त्यात्मनाऽनेकत्वं च शास्त्रसम्मतमेव "अजायमानोबहुधा विजायते" इति श्रुतेः । नापि सङ्कर्षणाद्युत्पत्तिप्रकारोविरुद्धः । अधिष्ठेयानामधिष्ठातृपरत्वस्य तेजआदिदृष्टान्तेन पूर्वमेवोक्तेस्तद्व्यक्तेऽपि सङ्कर्षणादिशब्दानां तदधिष्ठेयपरत्वव्याख्याने विरोधाभावात् । तथा चैवमभिप्रायः । श्रीवासुदेवात्सङ्कर्षणाधिष्ठेयसमष्टिर्जीव-

गतास्थूलदेहादियोगरूपोत्पत्तिः । "यथाऽग्नेः क्षुद्राविस्फुलिङ्गा" इत्यादिश्रुतेर्नतु स्वरूपेणैव जन्म, अनित्यत्वापत्तेः । कृतनाशादिप्रसङ्गादजत्वबोधकश्रुतिविरोधाच्च । तथैवसङ्कर्षणाख्याद्ब्रह्मण एव प्रद्युम्नाधिष्ठेयमनोवर्गोत्पत्तिः, प्रद्युम्नाख्याच्च ब्रह्मणएवानिरुद्धाधिष्ठितसमष्ट्यहंकारस्येति सर्वसामञ्जस्यात् । "नारायणाज्जायते प्राणोमनः सर्वेन्द्रियाणि चे" तिश्रुतेः । सङ्कर्षणादिरूपादपि नारायणात्तत्तत्कार्योत्पत्तेः सम्भवात् । नचैवं श्रुत्यागाश्रुतकल्पनाप्रसङ्गइति शङ्कनीयम् । "यथाऽग्नेः क्षुद्राः" इति श्रुतिव्याख्याने सर्वेषां तुल्यत्वेन तव मतेऽप्यविशेषात् । तस्माच्छास्त्रवाक्यानामितरेतरविरोधे तद्व्यवस्थायामुक्तदोषस्यायोगात् । नापि ब्रह्मादीनां व्यूहत्वोक्तिः सुवचा, प्रमाणशून्यत्वात् । ब्रह्मेशानादीनां तज्जन्यत्वतदुपदिष्टत्वतद्दत्तैश्वर्यादिभिर्जीवत्वाविशेषात् । यच्चोच्यते "प्रतिषेधश्चास्मिञ्छास्त्रे बहुविधउपलभ्यते । गुणगुणित्वकल्पनादिलक्षणोज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणाआत्मानएवैते भगवन्तोवासुदेवा."इत्यादिदर्शनादिति, तत्तुच्छं, गुणादीनां श्रुतिसिद्धत्वेन स्वाभाविकत्वात् । "परास्य शक्तिरि"ति श्रुतेः । यदप्युक्तं "चतुर्वेदेषु परंश्रेयोऽलब्ध्वा शारिडल्यइदं शास्त्रमधीतवान्"इत्यादिवेदनिन्दादर्शनादप्यस्याप्रामाण्यमिति । तत्प्रामादिकं, तस्य तत्प्रशंसामात्रपरत्वात् । यथा श्रीनारदेन "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमम्"इत्यादिना"सोऽहं भगवोमन्त्रविदेवास्मि नात्मविदि"त्यन्तेन वाक्यसमुदायेन सर्वविद्यास्थानमभिधाय, भूमविद्यातिरिक्तसर्वविद्यास्वात्मवेदनालाभोक्तिःप्रकृतभूमविद्याप्रशंसार्थकैव । सर्वविद्यास्वधीयमानासु सतीष्वपि तत्प्रतिपाद्यपरतत्त्वनिर्णयालाभनिमित्तका वा । यद्वा श्रीनारदस्य भगवतः सार्वज्ञ्ययोगेऽपि सर्वलोकोपकारार्थकावतारत्वादन्येषां गुर्वभिगमनप्रकारसंग्राहणार्थका वा, न तद्विरुद्धख्यापनार्था ।

अन्यथा सर्वविद्यास्थानानां वेदादीनां सर्वेषां बाधप्रसङ्गात् । भूमविद्यायाश्रपि साम्नएवैकदेशत्वेन तदन्तर्भूततया तन्निषेध्यत्वविरोधाच्च । यथा वा "प्रातः प्रातरनृतं ते वदन्ति । पुरोदयाज्जुह्वति येऽग्निहोत्रमि " त्यनुदितहोमनिन्दोदितहोमप्रशंसार्थेति । तथा प्रकृतेऽपि शाण्डिल्याख्यानवचनस्य तत्प्रशंसार्थत्वान्न वेदविरुद्धता स्फोटनार्थत्वमिति तात्पर्यार्थः । तथा च परमसंहितायां "अधीताभगवन् वेदाः साङ्गोपाङ्गाः सविस्तराः । श्रुतानि च मयाङ्गानि वाकोऽनुवाक्ययुतानि च । न चैतेषु समस्तेषु संशयेन विना क्वचित् । श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति । वेदान्तेषु यदा सारं सङ्गृह्य भगवान्हरिः । भक्तानुकम्पया विद्वान्सञ्चिक्षेप यथा सुखमि"ति । एषामर्थः हे भगवन्साङ्गोपाङ्गावेदामया श्रुतास्तदङ्गान्यपि श्रुतानि । तथापि संशयेन विना येन सिद्धिर्भविष्यति तच्छ्रेयोमार्गं न पश्यामि निर्णेतुं न शक्नोमि । तेषां दुरवगाहत्वेन दुर्बोधनार्थकत्वात् । अतोयथा श्रीभगवान्स्वभक्तानुकम्पया तान्संशयनिरासपूर्वकं सौकर्येण वेदोक्ततत्त्वं ग्राहयितुं यथा सुखं येन सिद्धिर्भविष्यतीति विद्वान् सर्वज्ञः वेदान्तेषु यत् आसमन्ततः सारं सर्ववेदार्थतत्त्वं सङ्गृह्य, स्वासाधारणानुग्रहवशात्सञ्चिक्षेप, तद्वदस्वेति शेषः । एवं च सर्ववेदान्तवेद्योजगज्जन्मादिहेतुर्ब्रह्मेशादिकिरीटकोटीडितपादपीठोहेयधर्मास्पृष्टमहिमदिक्तटः सार्वज्ञ्यवात्सल्यकारुण्याद्यपरिमितस्वाभाविकनित्यकल्याणगुणार्णवोमुमुक्षुध्येयोभगवान्परब्रह्माख्यः श्रीवासुदेवएव परमश्रेयोज्ञापकानां ऋग्यजुःसामाथर्वसंज्ञकानां विधिनिषेधादिपञ्चविधवाक्यकदम्बरूपाणां शब्दतोऽर्थतश्च मन्निःश्वासरूपत्वेन दुर्ज्ञेयत्वान्मया विना तद्याथात्म्यस्य वेत्तुमशक्यत्वात् सुरादिभिरपि तद्याथात्म्यज्ञानाभावे श्रेयसस्तत्साधनादीनां चासिद्धेरिति निश्चित्य

तदर्थयाथात्म्योपपत्तये तत्तदधिकारीणां पुसां स्वानुरूप-पुरुषार्थसिद्धये च स्वाश्रितानन्यजनजातमधिकृत्य, तेषां स्व-स्वरूपगुणादिविषयकतत्त्वज्ञानोपलब्धये स्वयं तान्वेदान्पञ्च-रात्राख्यशास्त्रार्थरूपेण विषदं व्याचकार । तथा चात्र सर्वस्यापि वेदार्थस्य स्वयमेव श्रीमुखेन निर्णीतत्वात्सर्वांशेनापि तस्य प्रमाणतमत्वं सिद्धमिति सङ्क्षेपः । वस्तुतस्तु शक्तिवादनिरा-करणपरमिदमधिकरणं, न पञ्चरात्राप्रामाण्यशङ्कागन्धोऽपि । तथा हि सर्वस्यापि कर्तृजातस्य तत्तच्छक्तिमत्तयैव तत्तत्कार्यकर्तृत्वं दृश्यते, न शक्तिं विना । यत्र यत्कर्तृत्वं, तत्र तच्छक्तिहेतुकं, यथा-ऽग्नेर्दाहकर्तृत्वं दाहकशक्तिहेतुकं मणिमन्त्रादिना शक्त्यवरोधे तददर्शनादतः शक्तिरेव जगज्जनयित्रीति शाक्ताआहुस्तत्राह । उत्पत्त्य-सम्भवात् । नेत्यनुवर्त्तते । नशक्तेर्विश्वहेतुत्वं सम्भवति । कुत ? उत्प-त्त्यसम्भवात् । पुरुषसंसर्गं विना तस्याः सकाशात् विश्वोत्पत्तेर-सम्भवात् । तस्याः पुरुषसंसर्गोऽस्तीति चेत्तत्राह । न च कर्तुः करण-म् । तस्यापि शरीरेन्द्रियादिकरणाभावेनानुग्राहकत्वानुपपत्तेः । करणाङ्गीकारे च पूर्वोक्तदोषप्रसङ्गः । ननु प्राकृतकरणाभावेऽपि तस्य स्वाभाविकज्ञानबलक्रियेच्छादिकरणमस्तीति चेत्तत्राह । विज्ञानादिभावे वा तदप्रतिषेधः । वाशब्दस्त्वर्थे । तस्य विज्ञाना-दिभावे तु तदप्रतिषेधः । ब्रह्मवादान्तर्गततया विश्वहेतुत्वं न प्रतिषिध्यते, ब्रह्मणोविश्वोत्पत्त्यङ्गीकारात् केवलशक्तिकारणा-वादस्तु तुच्छइत्युपसंहरति, विप्रतिषेधाच्च । श्रुतिस्मृतिविरोधाच्च शक्तिवादोन श्रेयोऽर्थिभिरादरणीयइति सङ्क्षेपः ॥ ४५ ॥

इत्युत्पत्त्यसम्भवाधिकरणम् ॥ ८ ॥

इति श्रीसनकसम्प्रदायवेदान्तकौस्तुभप्रभाख्यायां
द्वितीयध्यायस्य द्वितीयपादविवरणम् ॥ २ ॥

वेदान्तकौस्तुभः ।

तत्राह —

अस्ति तु ।

तुशब्दः सिद्धान्तपक्षपरिग्रहे । छान्दोग्ये आकाशोत्पत्तिश्रुत्यभावश्चैत्तैतिरीयके आकाशस्योत्पत्तिश्रुतिरस्ति "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इति ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

इति प्राप्ते-आह —

अस्ति तु ।

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । अस्ति तु वियदुत्पत्तिः "आत्मनः आकाशः सम्भूतः" इति तैत्तिरीयकश्रुतेः ॥ २ ॥

सू० गौण्यसम्भवात्छब्दाच्च ।

॥ २ । ३ । ३ ॥

वेदान्तपारिजातसौरभः ।

शङ्कते, निरवयस्याकाशस्योत्पत्त्यऽभावात् "वायुश्चान्तरिक्षश्चैतदमृतमि" ति शब्दाच्च "आकाशः सम्भूतः" इति श्रुतिर्गौणी ॥ ३ ॥

———

तथाहि छान्दोग्ये सृष्टिप्रकरणे आकाशवायू विना "तत्तेजोऽसृजते" त्यादिना तेजोऽबन्नानां त्रयाणामेव सृष्टिः श्रूयते इति ॥ १ ॥

वेदान्तकौस्तुभप्रभा ।

वियदादिकहेतुं च कारुण्यादिगुणार्णवम् ॥
स्वभावतोऽणुचिच्छक्तेर्भिन्नाभिन्नं हरिं भजे ॥ १ ॥

एवं सर्वस्य जगतः परब्रह्मैककारणत्वं प्रतिष्ठापयता श्रीबादरायणेन साङ्ख्यादिवेदबाह्यप्रधानादिवादानां युक्त्याभासमूलतया विप्रतिषेधाच्चासङ्गतत्वमभिधायाथेदानीं वैदिके स्वपक्षे विप्रतिषेधादिदोषगन्धस्पर्शाभावप्रदर्शनायायं परः प्रपञ्चआरभ्यते । तत्र तावदाकाशउत्पद्यते न वेति संशये पूर्वपक्षमाह —

न वियदश्रुतेः ।

न खल्वाकाशउत्पद्यते । कुतोऽश्रुतेः । छान्दोग्ये हि सृष्टिप्रकरणे "तत्तेजोऽसृजते"त्यादिना तेजोऽबन्नानां त्रयाणामेव सृष्टिरुक्ता, नाकाशस्य ॥ १ ॥

सू० अस्ति तु २।३।२॥

वेदान्तपारिजातसौरभः ।

तत्रोच्यते"आत्मनः आकाशः सम्भूतः" इति तैत्तिरीयके ऽस्ति वियदुत्पत्तिरिति ॥ २ ॥

वेदान्तकौस्तुभः ।

तत्राह —

अस्ति तु ।

तुशब्दः सिद्धान्तपक्षपरिग्रहे । छान्दोग्ये आकाशोत्पत्तिश्रुत्यभावश्चैत्तैतिरीयके आकाशस्योत्पत्तिश्रुतिरस्ति "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः" इति ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

इति प्राप्ते-आह —

अस्ति तु ।

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । अस्ति तु वियदुत्पत्तिः "आत्मनः आकाशः सम्भूतः" इति तैत्तिरीयकश्रुतेः ॥ २ ॥

सू० गौण्यसम्भवात्तच्छब्दाच्च ।

॥ २ । ३ । ३ ॥

वेदान्तपारिजातसौरभः ।

आकाशोत्पत्तिश्रुत्यभावश्चैत्तैतिरीयके "वायुश्चान्तरिक्षञ्चैतदमृतमि"ति शब्दाच्च "आकाशः सम्भूतः" इति श्रुतिर्गौणी ॥ ३ ॥

वेदान्तकौस्तुभः ।

एवं वियदुत्पत्त्यनुत्पत्तिश्रुत्योः प्राप्तं विरोधाभासं निराचिकीर्षुर्भगवान् ये केचिदाकाशोत्पत्तिं न मन्यन्ते तन्मतमाश्रित्य, शङ्क*ते —

गौण्यसम्भवाच्छब्दाच्च ।

ननु "तस्माद्वा जन्माभाव जन्माभाव सम्भूतः" इत्याकाशोत्पत्तिवादिनी श्रुतिर्गौणी भवितुमर्हति, यथा लोके "आकाशं करोती" त्यादिप्रयोगः गौणस्तद्वत् । तत्र हेतुः । उत्पत्त्यसम्भवादिति । निरवयवस्याकाशस्योत्पत्तेरसम्भवात् । समानजातीयैः परमाणुभिः सावयवस्य भूम्यादेरुत्पत्तेरेव सम्भवात् । द्वितीयोहेतुः । शब्दादिति । "वायुश्चान्तरिक्षं चैतदमृतमित्याकाशोऽमृतशब्दाच्च ॥ ३ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वेवं सत्याकाशस्योत्पत्त्यनुत्पत्तिश्रुत्योर्विरोधस्तत्र चावश्यमेकाश्रुतिर्गौणी कल्पनीयोभयोः प्रामाण्यतुल्यत्वादिति वैशेषिकमतमनुसृत्य पुनश्चोदयति —

---

* द्वाभ्यां सूत्राभ्यां ।

गौण्यसम्भवाच्छब्दाच्च ।

आकाशस्योत्पत्तिश्रुतिर्गौणी, यथा लोके "आकाशं कुरुजातमाकाशमि"त्युच्यते तद्वत्। कुतः? असम्भवात्। समानजातीयैरनेकैर्हि द्रव्यैः परमाणुसङ्घैरेकं भूम्यादिद्रव्यमारभ्यते, न च निरवयवस्य विभोराकाशस्यानेकद्रव्यमारम्भकमवयवभूतं सम्भवति, "वायुश्चान्तरिक्षं चैतदमृतमि"ति वियतोऽमृतत्वशब्दाच्चाप्यजत्वम्। किञ्चाकाशस्योत्पत्तिमत्त्वे 'आकाशशरीरं ब्रह्मआकाशात्मे"ति तस्य ब्रह्मविशेषणत्वं न स्यात् ॥ ३ ॥

सू० स्याच्चैकस्य ब्रह्म-शब्दवत् ॥ २।३।४॥

वेदान्तपारिजातसौरभः ।

एकस्य सम्भूतशब्दस्याकाशे गौणत्वमुत्तरत्र मुख्यत्वं तु "तपसा ब्रह्म विजिज्ञासस्व तपोब्रह्मे"ति वत्स्यात् ॥ ४

वेदान्तकौस्तुभः ।

नन्वेकस्य सम्भूतशब्दस्याकाशे गौणत्वमुत्तरत्र मुख्यत्वं च कथं सम्भवतीत्यत्राह —

स्याच्चैकस्य ब्रह्मशब्दवत् ।

यथा "तपसा ब्रह्म विजिज्ञासस्व तपोब्रह्मे"-

ति ब्रह्मशब्दस्य तपसि गौणत्वं, जिज्ञास्ये मुख्यत्वं, तथा सम्भूतशब्दस्याकाशे गौणत्वमुत्तरत्र मुख्यत्वमेकस्यैव स्यात् ॥ ४ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वेकस्मिन्नेव वाक्ये सम्भूतशब्दस्याकाशोत्पत्तौ गौणत्वमुत्तरत्र मुख्यत्वमिति कथं भावनार्हमर्द्धजरतीयन्यायप्रसङ्गादिति चेत्तत्राह —

स्याच्चैकस्यापि ब्रह्मशब्दवत् ।

चशब्दः सम्भावनायाम्। एकस्यापि सम्भूतशब्दस्याकाशे गौणत्वं वाय्वादिषु च मुख्यत्वं स्यात्, ब्रह्मशब्दवत् ॥ ४ ॥

सू० प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः । २।३।५॥

वेदान्तपारिजातसौरभः ।

शङ्का निराक्रियते, आकाशादिवस्तुजातस्य ब्रह्माऽव्यतिरेकाद्ब्रह्मविज्ञानात्सर्वविज्ञानप्रतिज्ञायाः अनुपरोधोभवति । आकाशस्यानुत्पन्नत्वे तु सविज्ञेयव्यतिरेकः स्यात्, तस्मात्सा

बाध्येत सर्वस्य ब्रह्मापृथक्त्वं च " ऐतदात्म्य-मिदमि"त्यादि शब्देभ्यः ॥ ५ ॥

वेदान्तकौस्तुभः ।

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ।

आकाशोत्पत्तिवादिनो तैत्तिरीयादिश्रुति-र्मुख्या भवति, नतु गौणी । यतः आकाशादेः प्रपञ्चस्योत्पत्त्यभ्युपगमे उपादानभूताद्विज्ञेया-द्ब्रह्मणः उपादेयभूतस्य कृत्स्नस्याकाशादेः प्रपञ्च-स्याव्यतिरेकाद्वृक्षात्पर्णादेरिवापृथक्त्वात् । "येना-श्रुतं श्रुतं भवत्यमतं मतमि" त्यादि, एकविज्ञाना-त्सर्वविज्ञानप्रतिज्ञायाः अहानिर्भवति । अन्यथा* प्रतिज्ञा हीयेत । अव्यतिरेकत्वे हेतुः । "शब्देभ्यः" इति । "सदेव सौम्येदमग्रआसीदेकमेवाद्वितीय-मैतदात्म्यमिदं सर्वमि"त्यादिशब्देभ्यः । यच्चोक्तं गौण्यसम्भवाच्छब्दाच्चेत्यत्र निरवयवस्योत्पत्त्य-सम्भवादाकाशोत्पत्तिवादिनो श्रुतिर्गौणीति तन्न, श्रुतिनिर्णीतेऽतीन्द्रियेऽर्थे तर्काप्रवृत्तेः । कथं तर्हि

---

* आकाशादेः प्रपञ्चस्योत्पत्त्यनभ्युपगमे ।

"वायुश्चान्तरिक्षं चैतदमृतमि"त्यमृतत्वं सङ्गच्छते ? "अमरादेवाः"*इत्यादिवत् आकाशस्य चिरकालस्थायित्वं प्रतिपाद्यतेऽतोऽमृतत्वं सङ्गच्छते । यदप्युक्तं स्याच्चैकस्यापि ब्रह्मशब्दवदिति तदपि न, ब्रह्मशब्दस्य द्विप्रयुक्तत्वेन दृष्टान्तस्य वैषम्यात् ॥ ५ ॥

वेदान्तकौस्तुभप्रभा।

यथा "तपसा ब्रह्म विजिज्ञासस्व तपोवै ब्रह्मे"त्यत्र ज्ञानसाधने तपसि ब्रह्मशब्दोगौणोजिज्ञास्ये ब्रह्मणि च मुख्यस्तद्वत् प्रकृतेऽपि सम्भाव्यमिति प्राप्तेऽभिधीयते ——

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः।

"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि"ति "आत्मनि खल्वरे ! दृष्टे श्रुते मते ज्ञाते" इति सर्वं विदितामिति प्रतिवेदान्तं प्रतिश्रुता या प्रतिज्ञा, तस्याश्च प्रतिज्ञायाआकाशादिसर्वप्रपञ्चस्य ब्रह्मोपादेयत्वेनोत्पत्त्यऽभ्युपगमेऽनुपरोधः स्यात्, उपादेयस्योपादानाऽव्यतिरेकात्, स्वतन्त्रसत्ताभावात्। व्यतिरेके प्रतिज्ञाहानिः। प्रतिज्ञानुपरोधान्वथानुपपत्त्याकाशाद्युत्पत्तिर्मुख्यैव। प्रतिज्ञाहानौ वेदस्याप्रामाण्यप्रसङ्गादिति भावः। नाप्युक्तदृष्टान्तः साधीयान् वैषम्यात्। दृष्टान्ते ब्रह्मशब्दस्य पाठभेदादेकस्य मुख्यत्वं द्वितीयस्य च गौणत्वं सूपपन्नम्। प्रकृते तु "सम्भूत"

---

* अमरानिर्जरादेवाः। इत्यमरः।

इति शब्दस्य सकृत्पाठादुभयार्थकत्वं महद्विरुद्धमिति सिद्धं दृष्टान्तस्य वैषम्यमित्यर्थः। किञ्च शब्देभ्यः "सदेव सौम्येदमग्र आसीदि"ति सृष्टेः प्रागेकत्वमवधार्य "ऐतदात्म्यमिदं सर्वमि"ति चेतनाचेतनवस्तुजातस्य तदात्मकतया तदपृथक् सिद्धताविधायकशब्देभ्यः सर्वस्यापि कार्यत्वेन मुख्योत्पत्तेः सम्भवात् ॥ ५ ॥

सू० यावद्विकारं तु विभागो-लोकवत् ॥ २। ३। ६॥

वेदान्तपारिजातसौरभः।

उपसंहराति, "ऐतदात्म्यमिदं सर्वमि"त्यादिवाक्यैराकाशादिप्रपञ्चस्य ब्रह्मात्मकत्वप्रतिपादनेन विकारत्वं निश्चीयते। तथा च यावद्विकारमुद्भवएव गम्यते। "तत्तेजोऽसृजते" त्याद्याकाशस्यानुक्तिस्तेजआदेः सृज्यत्वेनोक्तिश्च लोकवदुपपद्यते। लोके देवदत्तपुत्रपूगं निर्दिश्य, तत्र कतिपयानामुत्पत्तिकथनेन सर्वेषामुत्पत्तिरुक्ता भवति ॥ ६ ॥

वेदान्तकौस्तुभः।

ननु छान्दोग्ये "आकाशस्योत्पत्त्यभावादुत्पत्ति-

श्रुतिर्गौणी भवितुमर्हतीत्यत्राह —

यावद्विकारं तु विभागोलोकवत् ।

तुशब्दोनिवृत्तये । यावद्विकारं प्रपञ्चस्य विभाग एव गम्यते । " सदेव सौम्येदमग्रआसीदि"तीदम्पदवाच्यमाकाशादिकं सर्वं सृष्टेः प्राक्कारणात्मकं " येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि"ति कारणविज्ञानेन विज्ञेयञ्च छान्दोग्यश्रुतयोवदन्ति । तस्मादाकाशादिप्रपञ्चस्य छान्दोग्ये कारणाद्विभागउद्भवउक्तएव । कथं तर्हि आकाशं वायुञ्चानुक्त्वा तेजआद्युद्भवउक्तस्तत्रोच्यते । "लोकवत्" लोके यथा कस्य चित्पुत्राणां मध्ये केषां चिदुत्पत्त्युक्त्या सर्वेषामुत्पत्त्युक्तिः स्यात्तथा तेजआद्युत्पत्तिवचनेनाकाशाद्युत्पत्तिरुक्तैव । तस्माद्ब्रह्मोपादानकं वियदिति सिद्धम् ॥ ६ ॥ इति वियदधिकरणम् ॥ १ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वाकाशस्यामृतत्वश्रवणादुत्पत्त्यश्रवणाच्चोत्पत्तिरनुपपन्नेति चेत्तत्राह —

यावद्विकारं तु विभागोलोकवत् ।

तुशब्दउत्पत्त्यसम्भवशङ्कानिवृत्त्यर्थः । यावद्विकारं प्रपञ्चमात्रस्य "ऐतदात्म्यमिदं सर्वमि"ति श्रुत्या विभागउत्पत्तिरवगम्यते । लोकवदिति । यथा लोके "देवदत्तस्यैते पुत्रा" इति प्रतिज्ञाय तेषां मध्ये त्रयाणामुत्पत्तिकथने सर्वेषामुत्पत्तिलाभस्तद्वदाकाशोत्पत्तिरपि । यच्चोक्तं निरवयवस्येत्यादि तन्न, अतीन्द्रियार्थविषयया श्रुत्याऽभिहितेऽर्थे निरवयवत्वादिहेतुकस्यानुत्पत्त्यनुमानस्योदेतुमशक्यत्वात् । प्रत्युताकाशउत्पत्तिविनाशवान्, भूतत्वादनित्यगुणाश्रयत्वाच्चाग्निवत्, व्यतिरेके आत्मवच्चेत्यनुमातुं शक्यत्वात् । अमृतत्वश्रुतेरपि "अमरादेवाआयुर्घृतमि"ति वत् गौणतया बहुकालावस्थितिपरत्वमिति सङ्क्षेपः ॥ ६ ॥ इति वियदधिकरणम् ॥ १ ॥

सू० एतेन मातरिश्वा व्याख्यातः ॥ २।३।७॥

वेदान्तपारिजातसौरभः ।

अनेन वियदुत्पत्तिन्यायेन वायुरपि व्याख्यातः ॥ ७ ॥

वेदान्तकौस्तुभः ।

इदानीं " वायुश्चान्तरिक्षं चैतदमृतं सैषा

अनस्तमिता देवता यद्वायुरि"त्यादिवाक्यैर्वायौ नित्यत्वबुद्धिः कस्य चित्स्यात्तन्निवृत्त्यर्थमाह —

एतेन मातरिश्वा व्याख्यातः।

एतेन वियदुत्पत्तिप्रतिपादनेन मातरिश्वनो-वायोरप्युत्पुत्तिर्व्याख्याता वेदितव्या, पूर्वपक्ष-समाधानयोस्तुल्यत्वात्। अनस्तमितेतिलयप्रति-षेधस्त्वापेक्षिकः। अतोवायुरुत्पत्तिमानिति सिद्धम् ॥ ७ ॥ इतिमातरिश्वाधिकरणम् ॥ २ ॥

वेदान्तकौस्तुभप्रभा।

एतेन मातरिश्वा व्याख्यातः।

एतेनाकाशोत्पत्तिप्रतिपादनेन वायोरुत्पत्तिरपि प्रतिपादिता भवतीत्यर्थः। "आकाशाद्वायुरि"ति श्रुतेरिति सङ्क्षेपः ॥ ७ ॥

इति मातरिश्वाधिकरणम् ॥ २ ॥

सू० असम्भवस्तु सतोऽनुपपत्तेः

॥ २ । ३ । ८ ॥

वेदान्तपारिजातसौरभः।

सतोब्रह्मणोऽसम्भवोऽनुत्पत्तिरेव। जगत्कारणो-

त्पत्त्यनुपपत्तेः ॥ ८ ॥

वेदान्तकौस्तुभः।

ननु अमृतत्वेन श्रुत्युक्तयोर्विषयद्वायोरपि जनिर्यदस्ति तर्हि ब्रह्मणोऽप्युत्पत्तिरस्त्वतीमां शङ्कामिदानीं निराकरोति —

असम्भवस्तु सतोऽनुपपत्तेः ।

सतोब्रह्मणः श्रीपुरुषोत्तमस्य असम्भव- एव जन्माभाव एव । कुतः ? अनुपपत्तेः। इति सर्वकारणत्वश्रव जन्माभाव तस्यापि कारणा- न्तरं तस्यान्यत्कारणमित्यनवस्था स्यात् । "स- कारणं कारणाधिपाधिपः " इति सर्वकारणत्वश्रव- णात् "नचास्य कश्चिज्जनिता नचाधिपः" इति कारणान्तरस्य निषेधाच्च। इति सर्वकारणत्वश्रव- धाभ्यजायत" इति सर्वकारणत्वश्रव- परम- पुरुषस्य कार्यार्थं बहुधा प्रादुर्भावे श्रूयमाणेऽपि सम्भवाभावइति सिद्धम् ॥ ८ ॥

इत्यसम्भवाधिकरणम् ॥ ३ ॥

वेदान्तकौस्तुभप्रभा ।

अथाकाशवाय्वोरमृतत्वश्रवणेऽपि यद्युत्पत्तिरभ्युपगता, तर्हि

ब्रह्मणोऽप्युत्पत्तिः किं स्यादिति सम्भाव्याह —

असम्भवस्तु सतोऽनुपपत्तेः।

तुशब्दउत्पत्तिसम्भावनाव्यावृत्त्यर्थः। सतोब्रह्मणोऽसम्भवः। जन्माभावः। कुतः? अनुपपत्तेः उत्पत्त्यश्रवणात्। प्रत्युत "सकारणं कारणाधिपाधिपः, नचास्य कश्चिज्जनिता न चाधिपः" इति ब्रह्मणः सर्वकारणत्वमुक्त्वा तदन्यकारणस्य निषेधश्रवणादन्यथाऽनवस्थाप्रसङ्गात्सर्वश्रुतिव्याकोपाच्च॥ ८॥

इत्यसम्भवाधिकरणम्॥ ३॥

सू०तेजोऽतस्तथा ह्याह॥

॥ २। ३। ९॥

वेदान्तपारिजातसौरभः।

पूर्वपक्षयति "मातरिश्वनस्तेजोजायते वायोरग्निरि"ति श्रुतेः॥ ९॥

वेदान्तकौस्तुभः।

पूर्वत्र ब्रह्म व्यतिरिक्तस्य सर्वस्योत्पत्तिमत्त्वं, ब्रह्म च जन्यत्वादिदोषास्पृष्टमित्युक्तमिदानीं क्रमतः उत्पद्यमानस्य वस्तुनस्तत्पूर्ववर्त्तिवस्तुकारणमुत तदन्तरात्मभूतं ब्रह्मेति विचार्य्यते —

तेजोऽतस्तथा ह्याह ।

तेजः वायोरुत्पद्यते किं वा ? तदन्तरात्मभूताद्ब्रह्मणइति संशये ❀ पूर्वः पक्षः । तेजः कार्यम्, अतः सन्निहितात् कारणाद्वायोरुत्पद्यते । तत्र प्रमाणमाह पूर्वपक्षी । " वायोरग्निरि "ति तैत्तिरीयकश्रुतिस्तथैवाह ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

एवं ब्रह्मान्तरेण सर्वस्योत्पत्तिमत्त्वं श्रावितमिदानीं वियदादीनि वाय्वादिकार्यं स्वयमेव स्वतन्त्रत्वेन सृजन्ति ? उत परमेश्वरएव तत्तदन्तरात्मतया सर्वं कार्यं सृजतीति ? संशये स्वयमेव स्वतन्त्रत्वेन सृजन्तीति "आकाशाद्वायुरि "त्यादिश्रुतेः परमेश्वराधिष्ठितत्वाश्रवणाच्चेति पूर्वपक्षयति —

तेजोऽतस्तथा ह्याह ।

अतोवायोस्तेजउत्पद्यते । हि निश्चये । कुतः ? श्रुतिस्तथैवाह "वायोरग्निरि 'ति ॥ ६ ॥

सू० आपः ॥ २ । ३ । १० ॥

वेदान्तपारिजातसौरभः ।

तेजसआपोजायन्ते "अग्नेराप" इति श्रुतेः ॥१०॥

❀ चतुर्भ्यः सूत्रेभ्यः

वेदान्तकौस्तुभः ।

आपः ।

अतस्तथा ह्याहेत्यनुवर्त्ततेऽतः सन्निहिता-देव तेजसआपोजायन्ते " अग्नेरापः " इति श्रुतिस्थैवाह ॥ १० ॥

वेदान्तकौस्तुभप्रभा ।

आपः ।

अतइत्यनुवर्त्तते । अतस्तेजसआपउत्पद्यन्ते " अग्नेरापः "इति श्रुतेः ॥ १० ॥

सू० पृथिवी ॥ २ । ३ । ११ ॥

वेदान्तपारिजातसौरभः ।

"अद्भ्योभूर्भवति "ताअन्नमसृजन्ते"ति श्रुतेः ॥ ११॥

वेदान्तकौस्तुभः ।

पृथिवी ।

अद्भ्यः पृथिव्युत्पद्यते " ताआपऐक्षन्त बह्व्यः प्रजायेम हो"ति "ताअन्नमसृजन्त" इति श्रुतिस्तथाह । एवं सर्वत्राव्यवहितात्कारणात्कार्यो-त्पत्तिर्ज्ञेयेति ॥ ११ ॥

वेदान्तकौस्तुभप्रभा ।

पृथिवी ।

"अद्भ्यः पृथिव्युत्पद्यते "ताभ्यन्नमसृजन्त"इति श्रुतेः ॥ ११ ॥

सू० पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ २।३।१२ ॥

वेदान्तपारिजातसौरभः ।

अन्नपदेन भूरुच्यते, महाभूताधिकारात् । "यत्कृष्णं तदन्नस्ये"ति रूपश्रवणात् "अद्भ्यः पृथिवी"ति शब्दान्तराच्च ॥ १२ ॥

वेदान्तकौस्तुभः ।

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ।

" ताअन्नमसृजन्ते"ति श्रुतिगतस्यान्नशब्दस्य प्रसङ्गात्पूर्वपक्षिमुखेनैवार्थः प्रकाश्यते । "यत्र क्वचन वर्षति तदेव भूयिष्ठमन्नं भवती"ति वाक्यशेषाद्ब्रीहियवादिप्रकृतेनान्नशब्देन नोच्यते, किन्तु पृथिव्येवान्नशब्दवाच्या । कुतः ? " अधिकाररूपशब्दान्तरेभ्यः " तत्र " तत्तेजोऽसृजत

तदपोऽसृजते "ति महाभूतोत्पत्त्यधिकारात् । वाक्यशेषे " यदग्नेरोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्ये"ति पृथिव्या(दि)रूपाच्च । समानप्रकरणे "अग्नेरापः अद्भ्यः पृथिवीति च तद्यदपां शरः आसीत्तत्समहन्यत्सा पथिव्यभवदिति शब्दान्तराच्च ॥ १२ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वन्नशब्दस्यादनीये व्रीहियवादौशक्तत्वात्कथं पृथिवीवाचकत्वमित्याशङ्क्याह —

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ।

अधिकारश्च रूपं च शब्दान्तरं चेति तेभ्योहेतुभ्यः अन्नशब्दस्य पृथिवीपरत्वं निश्चीयते इत्यर्थः । तत्र "तत्तेजोऽसृजत तदपोऽसृजते"ति महाभूताधिकारदर्शनात् क्रमप्राप्तां पृथिवीमेव बोधयत्यन्नशब्दः । किञ्च "यत्कृष्णं तदन्नस्ये"ति रूपश्रवणात्, कृष्णं रूपं पृथिव्यामेव । यदग्नेरोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्ये"ति रूपविभागश्रुतेरित्यर्थः । शब्दान्तराच्च "अग्नेरापोऽद्भ्यः पृथिवी"ति तद्यदपां शरआसीत्तत्समहन्यत सा पृथिव्यभवदि"ति श्रुतेः ॥ १२ ॥

सू० तदभिध्यानात्तु तल्लिङ्गात्सः ॥ २ । ३ । १३ ॥

वेदान्तपारिजातसौरभः।

सिद्धान्तयति, "बहु स्यामि"ति "तदभिध्यानात्, तदात्मानं स्वयमकुरुते"त्यादि तज्ज्ञापकात् शास्त्राच्च परमपुरुषस्तदन्तरात्मा तत्कार्यस्रष्टेति ॥ १३ ॥

वेदान्तकौस्तुभः ।

सिद्धान्तमाह —

तदभिध्यानाच्तु तल्लिङ्गात्सः ।

तुशब्दात्पूर्वपक्षोव्यावृत्तः । सएवतेजआदिकार्य्याणां वाय्वाद्यन्तरात्मा परमकारणः सर्वेश्वरः श्रीवासुदेवः स्रष्टा । कुतः ? "तदभिध्यानात्" तस्य पुरुषोत्तमस्याभिध्यानात् "बहु स्यामि"ति सङ्कल्पात्। "तल्लिङ्गात्" तज्ज्ञापकाद्वाक्यकदम्बात् । "पृथिव्यां तिष्ठन्, योऽप्सु तिष्ठन्, यस्तेजसि तिष्ठन्योवायौ तिष्ठन्, यआकाशे तिष्ठन्, तदात्मानं स्वयमकुरुते"त्यादेः। एतेन "तत्तेजऐक्षत ताआपऐक्षन्ते"त्यादावपि परस्यैवेक्षणं ज्ञेयम् । तस्मान्नान्यस्य वस्तुनः स्वातन्त्र्येण कर्तृत्वं, सर्वत्र

मुख्योऽहेतुः परमात्मैवेति सिद्धम् ॥ १३ ॥

इति तेजोऽधिकरणम् ॥ ४ ॥

वेदान्तकौस्तुभप्रभा ।

किञ्च पृथिव्याद्यन्नोत्पत्तिश्रवणादपि कार्यकारणयोरभेदविवक्षया तद्व्यपदेशः सूपपन्नः । "पृथिव्याद्यौषधयद्यौषधिभ्योऽन्नमि"ति श्रुतेरिति प्राप्ते राद्धान्तः —

तदभिध्यानात्तु तल्लिङ्गात्सः ।

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । "तदैक्षत बहु स्यां प्रजायेये"ति तदीक्षणबहुभवनसङ्कल्पस्तदभिध्यानपदार्थः । तदेव तदसाधारणं लिङ्गं तस्मात्स परमेश्वरएव तत्तदन्तरात्मा तत्तत्कार्यस्य स्रष्टेति निश्चीयते "यस्याकाशे तिष्ठन्नि"त्यादिश्रुतेः । एतेन "तत्तेजऐक्षते" त्यादिश्रुतेरपि मुख्यार्थपरत्वं निरूपितम् । तत्रापि पूर्वोक्तरीत्या परस्यैवेक्षणविधानात् ॥ १३ ॥

इति तेजोऽधिकरणम् ।

सू०विपर्ययेण तु क्रमोतउप-पद्यते च ।२।३।१४॥

वेदान्तपारिजातसौरभः ।

अतउक्तसृष्टिक्रमात्प्रातिलोम्येन प्रलयक्रमोऽ-

स्ति " पृथिव्यप्सु प्रलीयते " इत्यादिश्रुतेः । जललवणन्यायेनोपपद्यते च ॥ १४ ॥

वेदान्तकौस्तुभ. ।

एवं भूतानामुत्पत्तिक्रमः संक्षेपतोनिरूपितः । अथेदानीं प्रसङ्गात्तेषां प्रलयक्रमोनिरूप्यते —

विपर्ययेण तु क्रमोऽतउपपद्यते च ।

किमुत्पतिक्रमेण लयक्रमः ? आहोस्विदुत्पत्तिक्रमाद्विपर्ययेण ? इति संदेहे पूर्वजस्य पदार्थस्य नाशेऽपि पाश्चात्यासम्भवादुत्पत्तिक्रमेणैवेति प्राप्ते, सिद्धान्तमाह । " विपर्ययेण तु क्रमोऽतः" इति "तस्माद्वा एतस्मादात्मनआकाशः सम्भूतआकाशाद्वायुर्वायोरग्निरग्नेरापः अद्भ्यः पृथिवी किं तदासीत्तस्मै सहोवाच न सन्नासन्न सदसदिति तस्मात्तमः सञ्जायते तमसोभूतादिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी तदण्डमभवदि"त्यादिश्रुतिप्रोक्तात् । " अनादिनिधनोदेवस्तथाऽभेद्योऽजरामरः । अव्यक्तइति विख्यातः शाश्वतोऽथाक्षयोऽ-

व्ययः । यतः सृष्टानि भूतानि जायन्ते च म्रियन्ति च । सोऽसृजत्प्रथमं देवोमहान्तं नाम नामतः । महान्ससर्जाहङ्कारं सचापि भगवानथ । आकाशमिति विख्यातं सर्वभूतधरः प्रभुः । आकाशादभवद्वारि सलिलादग्निमारुतौ । अग्निमारुतसंयोगात्ततः समभवन्मही"त्यादिस्मृतिसहस्रप्रतिपादिताच्च । अतस्तत्त्वानामुत्पत्तिक्रमात् विपर्ययेण प्रातिलोम्येन प्रलयक्रमोवोध्यः । "पृथिव्यप्सु प्रलीयते, आपस्तेजसि प्रलीयन्ते, तेजोवायौ प्रलीयते, वायुराकाशे प्रलीयते, आकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ, भूतादिर्महति, महानव्यक्ते"इत्यादिश्रुतेः "जगत्प्रतिष्ठा देवर्षे ! पथिव्यप्सु प्रलीयते, ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ विलीयते" इत्यादिस्मृतेश्च । लवणहिमादेर्जलभावदर्शनाच्चोपपद्यते च । प्रकृतिमहदहङ्काराकाशाद्युत्पत्तिक्रमे सृष्टिवाक्यैर्यदनुक्तं तत्प्रलयवाक्यादनुसन्धेयम् । आकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादावि"त्यस्येयं योजना । आकाश तन्मात्रेषु लीयते, तन्मात्राणि भूतादौ तामः

साहङ्कारे लीयन्ते, इन्द्रियाणीन्द्रियेषु राजसाहङ्कारे कार्यकारणयोरभेदविवक्षयेन्द्रियशब्देनाहङ्कारस्य ग्रहणात् । पृथिव्यादीनां गन्धादितन्मात्रद्वारा लयप्रदर्शनार्थं तन्मात्रेष्विति बहुबचनम् । अहङ्कारस्य त्रिविधत्वादिन्द्रियेष्विति बहुबचनमिति । इति व्युत्क्रमेण प्रलयोऽन्न कुतोऽपि विरुध्यते इति सिद्धम् ॥ १४ ॥

इति विपर्ययाधिकरणम् ॥ ५ ॥

वेदान्तकौस्तुभप्रभा ।

अथ लयप्रकारमाह —

विपर्ययेण तु क्रमोऽतउपपद्यते च ।

तुशब्दः कारणलयपूर्वककार्यलयवादितार्किकादिपक्षव्यावृत्त्यर्थः । उपादानलये उपादेयस्थित्यसम्भवात् सृष्टिक्रमाद्विपर्ययेण प्रातिलोम्येन लयक्रमोबोध्यः । तत्र हेतुमतउपपद्यते चेति । अतः आप्यस्य हिमकरकादेरब्भावापत्तेर्दर्शनात्, उपपद्यते च । यस्माद्यस्योत्पत्तिस्तत्रैव तस्य लयउपपद्यते, नान्यथेति । "अन्नेन सौम्य ! शुङ्गेनापोमूलमन्विच्छे"त्यादिश्रुते. "जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते । ज्योतीष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते, खे वायुः प्रलयं याति । मनस्याकाशमेव च । मनोहि परमं भूतं तदव्यक्ते प्रलीयते । अव्यक्तं पुरुषे ब्रह्मन्निष्क्रिये सम्प्रलीयते । नास्ति तस्मात्परतरः पुरुषाद्धि सनातनादि"त्यादिस्मृतेश्च । एतेन तदाहुः "किं तदासीत्तस्मै सहोवाच न सन्नासन्न सदसादि"ति "तस्मात्तमः सञ्जायते तमसोभूता-

दिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी तदण्डमभवदि"ति सुबालोपनिषच्छ्रुतिस्तत्र तमआकाशयोर्मध्येऽक्षराव्यक्तमहद्भूतादितन्मात्रेन्द्रियाणि क्रमतोज्ञेयानि । पृथिव्यप्सु प्रलीयते आपस्तेजसि प्रलीयन्ते, तेजोवायौ विलीयते, वायुराकाशे विलीयते, आकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु. तन्मात्राणि भूतादौ विलीयन्ते, भूतादिर्महति विलीयते, महानव्यक्ते विलीयते, अव्यक्तमक्षरे विलीयते, अक्षरं तमसि, तमः परे देवे एकीभवति,"परस्मान्न सन्नासन्न सदसदि"त्यग्रिमलयवाक्यानुरोधात् । "सहोवाच तं ह वै पूर्वं ह्येकमेवाद्वितीयं ब्रह्मासीत्तस्मादव्यक्तमव्यक्तमेवाक्षरं तस्मादक्षरान्महान्महतोवा अहङ्कारस्तस्मादहङ्कारात्पञ्चतन्मात्राणि तेभ्योभूतानि तैरावृतमक्षरं भवतीति गोपालोपनिषच्छ्रुतिश्च व्याख्याता । तथा हि सृष्टेः पूर्वमविनाशिवस्तु किमासीदिति शिष्यवर्गेण पृष्टोगुरुस्तस्मै ह स्फुटमुवाच । सृष्टेः प्राक् यद्वस्त्वासीत्तत्सत्स्थूलं तेजोऽबन्नरूपं नासीत्, असत्सूक्ष्मं प्रधानादिरूपं च नासीत्, सदसद्वायुरूपं च नासीत्, तर्हि किमासीदिति चेत् ? तत्तद्विलक्षणं सूक्ष्मशक्तिकं ब्रह्मैवासीदिति शेषः । तस्माद्ब्रह्मणस्तमः संजायते गुणसाम्यावस्थं प्रधानं समजायतेत्यर्थः । ततोऽक्षरं सञ्जायते, गुणसाम्यावस्थं प्रधानमेव गुणक्षोभावस्थमभवत्, ततोऽव्यक्तं सञ्जायते, गुणक्षोभावस्थं प्रधानमेव कार्योन्मुख्यावस्थमभवत्, गुणसाम्यगुणक्षोभकार्योन्मुख्यावस्थाभेदेन तमोऽक्षरमव्यक्तमिति प्रकृतेरेवावस्थात्रयं " प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययाविति स्मृतेः । " अव्यक्तान्त्रिविधोमहान्महतस्त्रिविधोऽहङ्कारः, सात्त्विकात्तस्मादिन्द्रियाधिष्ठात्र्योदेवता मनश्च राजसादिन्द्रियाणि तामसात्तत्तन्मात्रद्वाराखादीनि संहतैरेतैरण्डं, तत्र हिर-

णयगर्भपुरुषस्तत्र तदन्तर्यामिनारायणस्तन्नाभिपद्मे वैराजस्य भोग-विग्रहश्चतुर्मुखः, ततः क्षेत्रज्ञानां स्थूलदेहसंयोगेन यथावसरं जन्मेति सृष्टिक्रमस्तद्विपर्ययेण लयक्रमोज्ञेयः। तथाहि पृथिवी गन्धतन्मात्रद्वारा अप्सु प्रलीयते, आपोरसतन्मात्रद्वारा तेजसि, तेजोरूपतन्मात्रद्वारा वायौ, सच स्पर्श---- तन्मात्रद्वारा व्योम्नि, आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादावि"त्यत्र पाठक्रमादर्थक्रमस्य बलीयस्त्वेनाकाशस्तन्मात्रेषु, तन्मात्राणि भूतादौ तामसाहङ्कारे इत्यन्वयः। तन्मात्रेष्विति बहुवचनं पृथिव्यादीनां गन्धादितन्मात्रद्वारालयप्रदर्शनार्थं, इन्द्रियाणि इन्द्रियेषु कार्यकारणयोरभेदेनेन्द्रियेषु राजसाहङ्कारे दशेन्द्रियाणि लीयन्ते। इन्द्रियेष्विति बहुवचनात्सात्त्विकाहङ्कारे तदधिष्ठात्र्यो देवता मनश्च लीयते, भूतादिस्त्रिविधोऽहङ्कारोमहति, महानव्यक्ते प्रधाने, अव्यक्तमक्षरे, प्रधानमेव कार्योन्मुख्यावस्थां परित्यज्य गुणक्षोभावस्थं भवति। अक्षरं तमसि प्रधानमेव गुणक्षोभावस्थां परित्यज्य गुणसाम्यावस्थं भवति, तमः परे देवे एकीभवति, तमः प्रकृतिः पुरुषेण सह परे ब्रह्मणि श्रीपुरुषोत्तमे लीयतइत्यर्थः। "प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनी"ति वैष्णवात्। गोपालोपनिषच्छ्रुत्यर्थस्तु तस्माद्ब्रह्मणोऽव्यक्तं प्रधानमासीत्, अव्यक्तमेवेति एवकारोऽयोगव्यवच्छेदार्थं, यदव्यक्तं तदेवाक्षरशब्दवाच्यं, यद्वा यदव्यक्तं तदक्षरं ब्रह्मैव शक्तितद्वतोरभेदात्। तस्मादक्षराद्ब्रह्माधिष्ठितात् व्यक्तान्महानिति शेषं प्राग्वत्। तैः पञ्चीकृतैः भूतैरक्षरं जीवरूपमावृतं भवति तन्निमित्तस्थूलशरीरवान्भवतीति सृष्टिक्रमस्तद्वयुत्क्रमेण लयक्रमइति सङ्क्षेपः ॥ १४ ॥

इति विपर्ययाधिकरणम् ॥ ५ ॥

सू० अन्तराविज्ञानमनसी क्रमेण तल्लिङ्गागादिति चेन्ना-विशेषात् ।२।३।१५॥

वेदान्तपारिजातसौरभः ।

विज्ञानमनसी "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे"त्यादिलिङ्गात्परमात्मनः भूतानां चान्तराले स्यातामेवं प्राप्तेन क्रमेण पूर्वोक्तस्य क्रमस्य विरोधइति चेन्न, वाक्यस्य क्रमविशेष-परत्वाभावात् " एतस्माज्जायते प्राणः मनः सर्वेन्द्रियाणि चे "त्यनेन ब्रह्मणः सकाशादेव विज्ञानमनसोः खादीनां चोत्पत्तेरविशेषात् । प्रकृते भूतोत्पत्तिक्रमप्रतिपादके वाक्ये "तस्मा-द्वा एतस्मादात्मनः आकाशः सम्भूतः आका-काद्वायुरि" त्यादौ आत्मनआकाशस्य चान्तराले सृष्टिसंहारक्रमबोधकवाक्यान्तरप्रसिद्धानि विज्ञान मनसीत्यनेनोपलक्षितानि अव्यक्तमहदहङ्कारा-

दीनि तत्त्वानि ज्ञेयानीति संक्षेपः ॥ १५ ॥

वेदान्तकौस्तुभः ।

जगन्निर्गमप्रवेशस्थानभूते ब्रह्मणि श्रीवासुदेवे ध्यानश्रद्धोत्पादनाय जगद्विरागाय च जगत्सृष्टिसंहारक्रमौ निरूपितौ । इदानीं ध्यानप्रयोजकयोर्विज्ञानमनसोरुत्पत्तिक्रमोभूतक्रमाविरोधेन निरूप्यते —

अन्तराविज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ।

ननु पूर्वोक्तोभूतोत्पत्तिकमः विज्ञानमनसोरुत्पत्तिकमेण विरुध्यते । तथाहि विज्ञायते अनेनेति विज्ञानमिन्द्रियाणि विज्ञानमसी ब्रह्मणो भूतानां चान्तराले स्यातां, कुतः ? " तल्लिङ्गात् " लिङ्ग्यते ज्ञायते येनेति लिङ्गं तस्यास्तयोः सृष्टेर्लिङ्गं तल्लिङ्गं तस्मात् । " एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिःरापश्च पथिवी विश्वधारणी"ति तत्सृष्टिगमकाद्वाक्यात्, अतअनेन क्रमेणोक्तक्रमस्य विरोध इति चेन्न, कुतः ? "अविशेषा-

त्" ब्रह्मणः सकाशादेव विज्ञानमनसोः खादीनां चोत्पत्तेरविशेषात् । "एतस्माज्जायते प्राण" इत्यादिवाक्यं ब्रह्मणः सकाशात्सर्वेषामुत्पत्तिमात्रं ब्रूते, न पूर्वोक्तेन क्रमेण विरुध्यते । तथैव "स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियमनोन्नमि"त्यादयः श्रुतयोऽपि सर्वस्य ब्रह्मजन्यत्वं वदन्ति । नतु क्रमविशेषम् " एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे "ति वाक्यस्थप्राणशब्दार्थस्त्वग्रे स्फुटीभविष्यति । एवं चास्ति त्वित्यनेन सूत्रकारैरेकदेशग्रहणेन संग्रहीतेष्वात्मनआकाशः सम्भूतः इत्यादिषु भूतोत्पत्तिक्रमवादिवाक्येषु सृष्टिसंहारविषयकवाक्यान्तरसिद्धस्य "विज्ञानमनसी" त्यनेनोपलक्षितस्य प्रकृतिमहदादेरनुक्तांशस्यावश्यकत्वाद्योगोऽस्ति, नतु भूतोत्पत्तिक्रमवादिवाक्यानां वाक्यान्तरेण कोऽपि विरोधोऽस्तीति सिद्धम् ॥ १५ ॥

इत्यन्तराविज्ञानमनस्यधिकरणम् ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

एवं ब्रह्मणः सकाशाद्भूतानामनुलोमप्रतिलोमाभ्यां सृष्टिसंह्य-

यक्रमौ निरूपितावित्रानीमिन्द्रियमनोबुद्धीनां क्रमोभूतक्रमाविरोधेन प्रतिपाद्यते —

अन्तराविज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्।

विज्ञानशब्देन विज्ञानसाधनत्वादिन्द्रियं बुद्धिश्च गृह्यते, तदुभयं मनश्चेति विज्ञानमनसी। ब्रह्मणोभूतानां चान्तराले विज्ञानमनसी स्यातां, तयोरपि क्रमेण तत्रैवोत्पत्तिलयावुपसंग्राह्यौ, सर्वस्य ब्रह्मकार्यत्वाभ्युपगमात्, तल्लिङ्गात् "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे"त्यादिलिङ्गात्। ततोभूतानां पूर्वोक्तोत्पत्तिप्रलयक्रमभङ्गप्रसङ्गइतिचेत्तत्परिहरति । नाविशेषादिति । "एतस्माज्जायते प्राण"इत्यनेन ब्रह्मणः सकाशादेव विज्ञानमनसोः खादीनां चोत्पत्तेरविशेषात्। तथा च दर्शयति श्रुतिः "स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियमन्नोन्नमि"ति सादृश्यमात्रपरा हीयं श्रुतिः"एतस्माज्जायते" इति न श्रुत्यन्तरसिद्धक्रमपरा, भूतानुग्रहसापेक्षत्वाच्चेन्द्रियाणां क्रमोन विरुद्धचते, भूतानुग्रहं च दर्शयति "अन्नमयं हि सौम्य मनआपोमयः प्राणस्तेजोमयी वागि"ति सङ्क्षेपः ॥ १५ ॥

इत्यन्तराविज्ञानमनस्यधिकरणम् ॥ ६ ॥

सू० चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भाव-भावित्वात् ॥ २।३।१६॥

वेदान्तपारिजातसौरभः ।

जीवात्मा निर्णीयते "देवदत्तोजातोमृतः" इति व्यपदेशोगौणोऽस्ति । यतः, चराचरव्यपाश्रयः । शरीरभावे जन्ममरणयोर्भावित्वात् ॥ १६ ॥

वेदान्तकौस्तुभः ।

अजात् परस्माद्ब्रह्मणोवियदादेर्जनिरुक्ता, तद्वज्जीवस्य जन्यत्वमास्ति ? न वेति ? इदानीं चिन्त्यते —

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भाव-भावित्वात् ।

अग्रिमसूत्रादात्मेतिपदं लभ्यते । आत्मा जीवात्मोत्पद्यते न वेति संशये देवदत्तोजातो-मृतइति व्यपदेशादात्मा जायते विनश्यति चेति पूर्वः पक्षस्तुः शब्देनापनीयते । योऽयमात्मनउत्पत्तिविनाशयोर्व्यपदेशोलौकिकः स भाक्तः स्यात् । जीवविषये गौणोऽस्तीत्यर्थः । क तर्हि मुख्यइत्यत आह "चराचरव्यपाश्रयः" इति जङ्गमाजङ्गमशरीरविषयइत्यर्थः । कुतः ? "तद्भावभावित्वात्" तद्भावे शरीरभावे उत्प-

त्तिविनाशयोर्भावित्वात् । "अयं पुरुषोजायमानः शरीरमभिसम्पद्यमानः सउत्क्रामन् म्रियमाणः" इति श्रुतेः ॥ १६ ॥

वेदान्तकौस्तुभप्रभा ।

अथ जीवात्मनोजन्मादयः सन्ति ? न वा ? किं तावत्प्राप्तं, सन्तीति । कुत. ? देवदत्तोजातः अस्ति मृतइत्यादि प्रतीतेः । अत्र राद्धान्त' —

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भाव भावित्वात् ।

तस्य जीवस्योत्पत्त्यादिव्यपदेशोभाक्तः, वाच्यैकदेशे भज्यते इति तथा औपचारिकइत्यर्थः । तर्हि किं विषयकोऽयं मुख्योव्यपदेशइत्याशङ्क्याह । चराचरव्यपाश्रयइति । चराचरशरीरमाश्रित्य जन्मादिव्यपदेशस्य प्रवृत्तिर्नात्मस्वरूपमुपादिश्येत्यर्थ' । कुतः ? तद्भावे शरीरभावे जन्ममरणयोर्भावित्वात् । "स वा अयं पुरुषोजायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन्म्रियमाण"इति स्थूलशरीरसंयोगवियोगयोरेव जन्मादिपदार्थत्वश्रवणादित्यर्थः ॥ १६ ॥

सू० नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ २ । ३ । १७ ॥

वेदान्तपारिजातसौरभः।

जीवात्मा नोत्पद्यते। कुतः ? स्वरूपतस्तदुत्पत्ति-वचनाभावात् "नजायते म्रियते वा विपश्चित् नित्यो-नित्यानां अजोह्येकोजुषमाणोऽनुशेते" इत्यादि-श्रुतिभ्योजीवस्य नित्यत्वावगमाच्च ॥ १७ ॥

वेदान्तकौस्तुभः ।

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ।

ननु "स्वर्गकामोयजेते" त्यादिवाक्यात् लोकान्तरगतैश्वर्योपायादिलक्षणात् "देवदत्तोजातो-मृतः"इति व्यपदेशः शरीरजन्मनाशविषयोभवतु, किन्तु सृष्टिसंहारकालिकौकिलाकाशादेरिव जीवस्यापि जन्मनाशौ स्यातां, न तथा केनापि वाक्येन कश्चिद्विरोधइत्यत्र ब्रूमः। नाऽऽत्माश्रुतेरिति आत्मेत्येकवचनं जात्याभिप्रायम्। "नित्योनित्यानां चेतनश्चेतनानामि"ति जीवबहुत्वबोधकश्रुतेः । "असन्ततेश्चाव्यतिकर"इति वक्ष्यमाणाच्च आत्मा न जायते न च म्रियते । कुतः ? "अश्रुतेः" सृष्टिसंहारकालिकात्मजन्मनाशविषयकश्रुत्यभावा-त्। प्रत्युत ताभ्यः " अविनाशी वा अरे !

अयमात्मानुच्छित्तिधर्मा, न जायते वा विपश्चित्, नित्योनित्यानां चेतनश्चेतनानामेकोबहूनां योविदधाति कामान्, ज्ञाज्ञौ द्वावजावीशानीशौ, अजोह्येकोजुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इत्यादिभ्यः श्रुतिभ्य आत्मनः नित्यत्वावगमाच्च। नत्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । न चैव न भविष्यामः सर्वे वयमतः परम् । अजोनित्यः शाश्वतोऽयं पुराणोन हन्यते हन्यमाने शरीरे ॥ वेदाविनाशिनं नित्यं यएनमजमव्ययम् । कथं स पुरुषः पार्थ ! कं घातयति हन्ति कमि"त्यादिस्मृतिभ्यश्च । ननु "सर्वे एते आत्मानोव्युच्चरन्ति, यतः प्रसूता जगतः प्रसूतिस्तोयेन जीवान्विससर्ज भूम्यां, प्रजापतिः प्रजाअसृजत स मूलाः सौम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इत्याद्याः सचेतनजगदुत्पत्तिवादिन्यः श्रुतयः सन्ति, तस्माज्जीवस्य जन्मनाशनिषेधोन युक्तः । अतएवैकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धिरिति चन्न, उक्तश्रुतीनां

प्रलयकालिकस्वास्थ्यपरित्यागपूर्वकदेहादिसंयोग-हेतुकज्ञानविकाशलक्षणजीवोद्भवबोधकत्वादेवं-सति जीवस्यापि ब्रह्मकार्यत्वात्तादृशप्रतिज्ञासिद्धेश्च "सदेव साम्येदमग्रआसीदेकमेवाद्वितीयमि"त्य-विभक्तनामरूपशक्तिकं स्वसमानातिशयशून्यं कारणावस्थं ब्रह्म कार्यकालेऽभिव्यक्तनामरूप-शक्तिमत्तया स्वयमेव भोक्तृभोग्यनियन्तृरूपेण त्रिधावस्थितं भवतीति, नेह केन चिद्वाक्येन विरोधः इति सिद्धम् ॥ १७ ॥

इत्यात्माधिकरणम् ॥ ७ ॥

वेदान्तकौस्तुभप्रभा।

नन्वग्निविस्फुलिङ्गादिदृष्टान्तैरात्मजन्मादेः श्रूयमाणत्वात्कथं भाक्तत्वमित्याशङ्क्य समाधत्ते —

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ।

आत्मा जीवात्मा स्वरूपेण नोत्पद्यते। कुतः ? "अश्रुतेः" सृष्टिप्रकरणेषु तज्जन्मादेरश्रवणात् उक्तश्रुतेः पूर्वोक्तरीत्या भाक्तत्वमेव। किञ्च तस्य ताभ्यः श्रुतिभ्यएव नित्यत्वावगमात्। "न जायते म्रियते वा विपश्चित्, नित्योनित्यानां चेतनश्चेतनानां अजोह्येकोजुषमाणोऽनुशेते, जहात्येनां भुक्तभोगामजोऽन्यः, अजो-नित्यः शाश्वतोऽयं पुराणः" इत्यादिश्रुतिस्मृतिभ्यः । न चैवमेक-विज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्गइति वाच्यं, तस्य तदात्मकत्वा-

दिना तदपृथक्सिद्धत्वाभ्युपगमात्स्वतन्त्रसत्तानश्रयत्वाच्चेति सङ्क्षेप ॥ १७ ॥ इत्यात्माधिकरणम् ॥ ७ ॥

सू० ज्ञोऽतएव ॥ १ । ३ । १८ ॥

वदान्तपारिजातसौरभः ।

अहमर्थभूतआत्मा ज्ञाता भवति ॥ १८ ॥

वेदान्तकौस्तुभः ।

एवं वियदादिवज्जीवोनोत्पद्यते श्रुतिभ्यो-नित्यत्वादित्युक्तमिदानीं प्रसङ्गात्तत्स्वरूपादि-निर्णीयते —

ज्ञोऽतएव ।

पूर्वसूत्रादात्मेत्यनुवर्त्तते । अतइत्यनेन ताभ्यइति हेतुः परामृश्यते । किमात्मा ज्ञान-गुणकोजडस्वरूपः ? किम्वा चिन्मात्रमथवा-ज्ञानस्वरूपोज्ञातृत्ववानिति ? संशये वैशेषिकादय-श्चाहुः, ज्ञानगुणकोजडइति । साङ्ख्यादयश्चिन्मात्र-मात्मेति वदन्तीत्यत्रोच्यते, "ज्ञ" इति जीवा-त्मा ज्ञएव ज्ञानस्वरूपत्वे सति ज्ञातृत्वबा-नेव । कुतः ? "अत्रायं पुरुषः स्वयं ज्योतिः

भवति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः, नहि विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यतेऽविनाशित्वात्, विज्ञातारमरे ! केन विजानीयात्, जानात्येवायं पुरुषः, एषहि द्रष्टा श्रोता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मे"त्यादिश्रुतिभ्यः। जडात्मवादस्तु गुणभूतस्य ज्ञानस्यैव सर्वव्यवहारनिर्वाहकत्वेन प्राधान्यप्रसङ्गाज्जडस्य गुणिनो-

त्मवादस्तु गुणभूतस्य ज्ञानस्यैव सर्वव्यवहारप्रसङ्गात्, श्रुतिविरुद्धत्वाच्चोपेक्षणीयः । चैतन्यमात्रवादोऽपि चैतन्यमात्रस्य सर्वमत्वे सर्वशरीरगतसुखाद्यनुभवानुपलम्भात् । अणुपरिमाणत्वे

त्मवादस्तु गुणभूतस्य ज्ञानस्यैव सर्वव्यवहारपेक्षणीयः । तस्मादहंप्रत्ययगोचरोऽयमात्मा ज्ञानस्वरूपोज्ञातेति सिद्धम् ॥ १८ ॥

इति ज्ञाधिकरणम् ॥ ८ ॥

वेदान्तकौस्तुभप्रभा ।

अथ किं प्रत्यगात्मस्वरूपमित्यपेक्षायां तन्निर्णीयते, तथाहि सकिञ्चार्वाकाभिमतदेहरूप ? उत दिगम्बराभिमतदेहातिरिक्तपरिमाणकोवा ? लोकायतिकाभिमतभूतचतुष्टयसमुदायोवा ? भाषिकाभिमतक्षणिकबाह्यार्थोवा ? योगाचाराभिमतक्षणिक-

विज्ञानमेव वा ? माध्यमिकाभिमतशून्यमेववा ? इन्द्रियाण्येव वा ? मनोबुद्धिर्वा ? प्राणोवा ? तार्किकाभिमतदेहेन्द्रियाद्यभिन्नोज्ञानेच्छादिप्रयत्नाद्याश्रयोविभुः प्रतिदेहं भिन्नआगन्तुकचैतन्यगुणोवा ? सङ्घात्याद्यभिमतचिन्मात्रमेव वा ? देहादिभिन्नोज्ञानस्वरूपोज्ञातृत्वादिधर्म्माश्रयोवेति । तत्र नाद्यः देहे मृते चैतन्यानुपलब्धेः । देहोनात्मा भौतिकत्वात् घटादिवदित्यनुमानात् । न द्वितीयः अनित्यत्वापत्तेः, देहपरिमाणकोनात्मा, सावयवत्वात् घटादिवत् । न तृतीयः सङ्घातत्वात्, भूतचतुष्कसमूहोनात्मा सङ्घातत्वात्, व्रीह्यादिराशिवत् । न तुर्य्यः भौतिकत्वात्, क्षणिकबाह्यार्थोनात्मा जडत्वात् घटादिवत् । न पञ्चमः क्षणिकत्वात् क्षणिकविज्ञानं नात्मा क्षणिकत्वात् शब्दादिवत् । न षष्ठः शून्यं नात्मा जडत्वादाकाशवत् । न सप्तमः स्रापादौ तल्लयात्, इन्द्रियवर्गोनात्मा सर्वावस्थाऽननुगतत्वात् देहवत् करणत्वाद्वास्यादिवच्च । नाष्टमः मनोबुद्धिश्च नात्मान्तःकरणत्वाद्बाह्यकरणवत् । न नवमः जडत्वात् सुषुप्तौ चौरादिभिर्भूषणादौ मुषिते चैतन्याभावेनाऽननुभूयमानत्वात्, प्राणोनात्मा वायुत्वान्न व्यञ्जनजन्यवायुवदित्यनुमानेभ्यः देहादिबुद्धिपर्यन्तः पदार्थोयद्यनात्मा न स्यात्तर्हि घटादिवदध्वंसाभावप्रतियोग्यपि न स्यात्, प्रत्यक्षगृहीतध्वंसाभावप्रतियोगित्वान्यथानुपपत्त्यापि देहादेरनात्मत्वं, एवमग्रेऽप्यूह्यं, इन्द्रियमनोबुद्ध्यादयोयद्यनात्मभूता न स्युस्तर्हि वास्त्यादिवज्जाग्रदादिसर्वावस्थाननुगतानस्युः, प्राणोवदि बाह्यवायुवज्जन्यो न स्यात् तर्हि घटादिवदचेतनोऽपि न स्यादित्याद्यर्थापत्तिभ्यश्च । नापि दशमोऽसम्भवात् । तथाहि आत्मनोविभुत्वे चैत्रचरणप्रविष्टकण्टकादिजन्यदुःखानुभवकाले सर्वेषामप्यात्मनां तत्रसत्त्वेन वेदनानुभवप्रसक्तेस्तत्र विनिगमनाभावेनासम्भावितत्वाऽवगमात् । न च यस्य शरीरे कण्टकवेधादितस्यैव वेदनानुभवोनान्येषामिति

व्यवस्थाङ्गीकारान्नोक्तदोषप्रसङ्गइतिबाच्यम्, सर्वेषां सान्निध्याविशेषे एकस्यैवानुभवोनान्येषामिति नियन्तुमशक्यत्वात् । नच यददृष्टोत्पादितं शरीरं तत्तदीयमिति नियमइति वाच्यम्, अदृष्टस्याप्युक्तन्यायेन नियामकत्वासम्भवात् । यदा हि तादृशादृष्टोत्पादनायैकेन संयुज्यते मनस्तदान्यैरपि मनोयोगस्याविशेषात् । कथमिव कारणसाधारणे क्वचिदेवादृष्टोत्पत्तिर्नान्यत्रेति । ननु मनः संयोगासाधारण्येऽपि अहमिदं फलं प्राप्स्यामीत्यभिसन्धिरदृष्टोत्पादककर्मानुकूलकृतिरित्येवमादिव्यवस्थानमिति तत एवादृष्टनियमोभविष्यतीति चेन्न, अभिसन्ध्यादीनामपि साधारणमन संयोगनिष्पाद्यतया व्यवस्थित्यसिद्धेः । नन्वु स्वकीयमनस्संयोगोऽभिसन्ध्यादिकारणमिति मनस्संयोगएवासाधारणोभविष्यतीतिचेन्न, नित्यं सर्वात्मसंयुक्तं मनः क्व चिदेवेति नियन्तुमशक्यत्वात् । नचादृष्टविशेषादात्मविशेषेण मनसः स्वस्वामिभावसिद्धिरिति वाच्यम्, तस्याप्यदृष्टस्य पूर्ववद्व्यवस्थित्यसिद्धेः।नचात्मनां विभुत्वेऽपि तेषां प्रदेशविशेषा एव बन्धभाजइत्यात्मान्तराणां चैत्रशरीरे तत्प्रदेशविशेषाभावात् सुखदुःखादिव्यवस्था भविष्यतीति वाच्यम्, यस्मिन्प्रदेशे चैत्रः सुखाद्यनुभूयतस्मादेशादपक्रान्तस्तस्मिन्नेव मैत्रे समागते सति तस्यापि तत्र सुखादिदर्शनेन शरीरान्तरे आत्मान्तरप्रदेशविशेषस्याप्यन्तर्भावात् । तस्माद्विभुवद्वात्मवादितार्किकादीनां व्यवस्था सुदुर्घटेति सङ्क्षेपः । नाप्यागन्तुकचैतन्यगुणः एवं हि ते मन्यन्ते आत्मनश्चैतन्यमात्ममनःसंयोगजं अग्निघटसंयोगजरोहितादिगुणवत् नित्यचैतन्यत्वे हि सुप्तमूर्च्छितग्रहाविष्टानामपि चैतन्यं स्यादतः कादाचित्कचैतन्यस्वादागन्तुकचैतन्यमात्मेति तन्न, "अत्रायं पुरुषः स्वयं ज्योतिर्भवती"ति " नहि विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते ऽविनाशित्वादि" त्यादिश्रुतिविरोधात्, सुप्तिमूर्च्छादौ तु सदेव-

ज्ञानं कर्मणा सङ्कुचितमनभिव्यक्तमपि जागरादौ विकाशितमभिव्यज्यत इति न विरोधः । यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावाद्, तद्वत् प्रत्यगात्मा ज्ञानस्वरूपः चेतनत्वात् स्वप्रकाशत्वादचिद्भिन्नत्वाच्च ब्रह्मवत्, प्रत्यगात्मा यदि ज्ञानस्वरूपो न स्यात्तर्हि देहादिप्रकाशकोऽपि न स्यात् " योऽयं विज्ञानघनः" इति श्रुतेः, एतेन मीमांसकपक्षोऽपि निरस्तः दोषतुल्यत्वात्, इयांस्तु विशेषः तन्मते आत्मवन्मनसामपि विभुः परिमाणकत्वमिति तथा च तत्रापि सर्वैर्मनोभिः सर्वेषां जीवात्मनां संयोगादेः साम्यम् । किञ्चात्मवत् सर्वैरपि चक्षुरादिभिरिन्द्रियैः साकं मनस्संयोगस्य साम्यात्, श्रवणस्पर्शनादिज्ञानानां युगपदुत्पत्तिप्रसङ्गोदुर्वारइति दोषविशेषश्चिन्तनीयः, दुग्धादिभिर्द्रव्यैर्मनोयोगस्य युगपत्सद्भावात् । नच श्रावणादिज्ञाने श्रवणादिभिरिन्द्रियैः शब्दादियोगस्यासाधारणहेतुत्वात् मनोभिर्विषयसन्निकर्षेऽपि ज्ञानानुत्पत्तिः सुवचेति वाच्यम्, मनसामिन्द्रियैर्नित्यसंयोगस्य सत्वेनेन्द्रियसंयुक्तमनसां विषयसन्निकर्षाविशेषात् । किञ्च अस्तु वा कयाचित्कूटकल्पनया सुषुप्त्यादौ बाह्यश्रवणादिज्ञानानुत्पत्तिः मनोविषयसंयोस्य सत्त्वेऽपि तत्रेन्द्रियसंन्निकर्षाभावात् तथापि जाग्रदादौ इन्द्रियसंयुक्तमनसां शब्दादिभिर्नित्यसंयोगस्य दुर्वारत्वेन शब्दादित्वावच्छिन्नशब्दादिमात्रविषयकज्ञानस्योत्पत्तेरवश्यं भावात्, मनस्त्वावच्छिन्नैर्मनइन्द्रियसंयोगाभावेऽपि शब्दादित्वावच्छिन्नविषयस्मरणस्य सदासद्भावापत्तेश्चेत्यलं विस्तरेण । नापि चिन्मात्रवेति पक्षः सम्भवति " विज्ञातारमरे ! केन विजानीयात्, जानात्येवायं पुरुषः, एषएव हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" इत्यादिश्रुतिव्याकोपात् । तस्माच्चरमएव पक्षः सूत्रकाराभिमतइत्याह —

ज्ञोऽत एव ।

अयमात्मा ज्ञएव ज्ञानस्वरूपत्वे सति ज्ञातृस्वरूपएव, न पाषाणकल्पः नापिगानमात्रं कुतः ? अतएव श्रुतिभ्यएवेत्यर्थः । श्रुतयस्तु पूर्वमुदाहृताबोध्याः । प्रत्यगात्मा ज्ञाता आत्मत्वात्, ब्रह्मवत्, प्रत्यगात्मा यदि ज्ञानाश्रयो न स्यात्तर्हि तदुपदेशशास्त्रस्य सार्थक्यमपि न स्यात् "जानात्येवायमि"ति पूर्वोक्तश्रुतेः । ननु ज्ञानाख्यधर्मस्य स्वरूपज्ञानतोऽत्यन्तसाजात्यात् कथमिवाधाराधेयभावः ? जलेक्षिप्तस्य जलान्तरस्याधाराधेयभावादर्शनादिति चेन्न, विषमदृष्टान्तत्वात् । जलयोर्द्रव्यत्वाद्भेदानुपलब्धिरिष्टापन्नात्यन्तसाजात्यात् । परन्तु सावयव द्रव्यत्वेन भेदस्य तत्राप्यनुमेयत्वात् । अन्यथा वृद्धिह्रासानुपपत्तेः । प्रकृते तु धर्मत्वधर्मित्वयोरवच्छेदकत्वान्नोक्तदोषावकाशः । मणिद्युमण्यादिष्वाधाराधेयभेदस्य प्रत्यक्षोपलभ्यमानत्वात्, प्रकृष्टप्रभावान् सूर्यइत्यादिप्रतीतेश्च । नच मण्यादयवयवेष्वेव प्रभात्वव्यवहारः, सूर्यस्यावयवाएव विशीर्य्यमाणालोके व्याप्नुवन्तीति वाच्यम्, कालान्तरेद्रव्यनाशप्रसङ्गात् । नच तत्रावयवान्तरोत्पत्तिः कल्पनीयेति वाच्यम्,*(त्वदुराशेतर)प्रमाणाभावात् । प्रभातद्वतोर्भेदस्य च प्रमाणसिद्धत्वात् । "रामेणानुगता सीता भास्करेण प्रभा यथे"ति सर्वज्ञश्रीवाल्मीक्युक्तेः । अन्यथा रजतादिसम्पुटानिहितायाः कस्तूरिकायाअवयवनाशे कालान्तरे सर्वस्याअप्यनुपलब्धिप्रसङ्गः स्यात् । तस्माद्यथा सूर्यतत्प्रभयोस्तैजसत्वाविशेषेऽपि सूर्यत्वप्रभात्वावच्छिन्नतयाऽऽधाराधेयभावः प्रत्यक्षादिप्रमाणसिद्धः तथा प्रकृतेऽपि उभयोर्ज्ञानत्वसामान्येऽपि धर्मत्वधर्मित्वावच्छिन्नतया तत्त्वस्य सामञ्जस्यादिति उपलक्षणं चैतदहमर्थस्यापि

* (तदुत्पादे प्रवलतर) इति पाठो भाति । पुस्तक चतुष्टयेतु यथा मुद्रितमेव ।

ज्ञात्रभिन्नाहमर्थस्वरूपइत्यर्थः । अहं जानामि अहं करोमि अहं वै त्वमसि देवते? त्वं वा अहमस्मी"त्यादिभ्यः । यत्तु कैश्चिदुच्यते सत्यमनिदं चैतन्यम् अनृतं युष्मदर्थोचेतनस्तयोर्मिथुनी करणमध्यासः । तत्राहमित्याध्यात्मिककार्याध्यासेषु प्रथमोध्यासइति-सत्यानृतेमिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारइति श्रीभगवत्पादभाष्यकारोक्तेस्तस्मादहमर्थोनात्मा सुषुप्तौ स्वप्रकाशस्यात्मनः सत्वेऽप्येवंविधस्याहमर्थस्याभावात् "अथातोहङ्कारादेशः अथातआत्मादेशः " इत्यादिश्रुत्योभयोः पार्थक्योपदेशात्, "अहङ्कारइतीयं मे भिन्नाप्रकृतिरष्टधे"ति स्मृत्या च क्षेत्रान्तः पातित्वोपदेशादहमर्थोनात्मा,सुषुप्त्याद्यवस्थाननुगतत्वात्, स्थूलदेहादिवत् करणत्वाच्च, चक्षुरादिवदित्यनुमानाद्वेत्यादि तन्न सम्यक्, भ्रम्भवात् । तथाहि इदं रजतमिदं जलमयं सर्पइत्यादिवदध्यासमात्रस्याधिष्ठानारोप्यांशद्वयभानवत्त्वात् । अहमर्थेऽशद्वयभानाभावात् । नन्वयोदहतीति वदहमुपलभे इति दृक्-दृश्ययोरुपलम्भादस्त्यंशद्वयभानमिति चेन्न, उक्तवाक्यस्याग्निना सिञ्चेदिति वद्वाक्याभासत्वेन त्वदीयकल्पनामात्रत्वात् । किञ्चायोदहतीत्यस्य वाक्यत्वेन तत्राप्यंशद्वयस्य न भानम्, अन्यथाग्निना सिञ्चेदित्यत्राप्यध्यासोऽभ्युपगन्तव्यः पण्डितम्मन्यैः । किं चास्तु वा अयोदहतीत्यस्य प्रामाण्यं तत्रायःशब्दोऽजहल्लक्षणया दाहाश्रयाग्निविशिष्टायोऽर्थे वर्त्तमानतया लाक्षणिकएव । शोणोधावतीतिवत् अग्निर्माणवकइतिवद्वा तात्पर्यानुपपत्तेर्लक्षणाबीजत्वात् । अन्यथात्राप्यध्यासः कल्पनीयोमनीषिभिः । अननुभूयमाने हि द्वयंशताकल्पने मानाभावात् । अन्यथात्मेत्यत्रापि द्वयंशताकल्पनापत्तेः, नाप्यहमुपलभे इत्यत्र द्वयंशताभानसम्भवः ब्रह्म स्फुरति आत्मास्ति चैतन्यं भातीत्यादावपि द्वयंशतापत्तेः । तस्माद्वयंशताभानाभावादहमर्थ आत्मैवेति सिद्धम् द्वयंशतापि

न च भाति चेतनेऽहं प्रतीतिविषयेऽहमर्थके इति पूर्वाचार्यो-क्तेः । ननु यद्यात्मस्वरूपएवाहमर्थोऽभिप्रेतश्चेत्तर्हि सुषुप्त्यादौ किमिति न स्फुरतीति चेन्मैवं, अहमर्थस्तावदिच्छादिवि--शिष्ट एव स्फुरतीत्यावयोर्निर्विवादत्वात्समम् । सुषुप्तौचेच्छा-देरभावादहमर्थस्य विशेषाऽननुभवोऽविरुद्धइति ब्रूमः । एव-महं सुखीच्छामी"ति प्रतीतिभिन्नात्मविषयकप्रतीतेरसत्त्वेनात्म नोऽपीच्छादिविशिष्टतयैव ग्रहणम्, इच्छादिभ्रहं विनात्मग्रहाङ्गी कारश्चेदहमर्थस्याप्यङ्गीकारेत्तरेतरभावात्, सुखत्वेनात्मनोऽनुभव-इति चेत्तर्हि " सुखमहमस्वाप्समि "त्यहमर्थस्यैव सुखत्वे-नानुभवादात्मत्वमविरुद्धमिति "न किञ्चिदवेदिषमि"त्यज्ञाना--श्रयत्वेनानुभवाच्च । ननु सुषुप्तौ नाहमर्थानुभवः, नच परामर्शानुपपत्तिरिति वाच्यम्, परामृश्यमानआत्मा इदानीं जातेनान्तःकरणेनाहमर्थेनावच्छेदादहं त्वं गतस्तथात्वे नानुभूयते तथाच नोक्तपरामर्शानुपपत्तिरितिचेन्न, न किञ्चिद-हमवेदिषमित्यादावज्ञानाद्यंशेऽप्यपरामर्शत्वप्रसङ्गात् । नह्यज्ञाना-दिकं निराश्रयमन्याश्रयं वा परामृश्यते, किन्त्वहमर्थाश्रयं एता-वन्तं कालं स्वप्नं पश्यन्नासं जाग्रदासमित्यत्रेवाहमस्वाप्समित्ये-त्राप्यहमंशे परामर्शानुभवाच्च । अन्यथा यः पूर्वं दुःखी सोऽधुना सुखीजातइति यद्यः पूर्वं मदन्यः सुप्तः सोऽधुनाहं जातइति धीः स्यात् । ननु जागरे समुत्पन्नेऽनुभूयमानेऽहमर्थे परामृश्य-मानात्माऽभेदारोपात्परामर्शत्वोपपत्तिरिति चेन्न, इदं रूप्यमित्यादा-वारोप्याभिन्नतयेदमर्थस्येवाहमित्यत्राहमर्थाभिन्नतयात्मनोप्रतीतेः, अन्यथैतावन्तं कालं सुप्तोहमन्योवेति कदाचित्संशयः स्यान्न-त्वहमेवेति निश्चयः । नच सुषुप्तिकालानुभूतात्मैक्याध्यासाच्चिश्च-योपपत्तिरिति वाच्यम्, अहमर्थातिरिक्तात्मानुभवस्यालीकत्वात् । नच परामृश्यमानात्मैक्यारोपात्तदुपपत्तिरिति वाच्यम्, अपरा-

मर्शो परामर्शारोपस्य काप्यदर्शनात् सिद्धेऽहमर्थस्यात्मान्यत्वे प
मृश्यमानात्मैक्यारोपः, सिद्धे च तस्मिन्सुषुप्तावप्रकाशेनाहमर्थस्या
न्यत्वमित्यन्योन्याश्रयापत्तेश्च। एतेन सुषुप्तावहमर्थप्रकाशे स्मर्ये
ह्यस्तनइवाहमर्थइति निरस्तम्, अहंशब्दोल्लेखितपरामर्शापा
सुषुप्तौ तदुल्लेख्यनुभवाभावादेव तदभावोपपत्तेः। तावन्म
च ह्यस्तनवैषम्यात् अहमर्थविशेष्यकस्याहम्प्रकारस्य च परा
र्शापादने इष्टापत्तेः। "एतावन्तं कालं सुखमहमस्वाप्समि'
सुषुप्तिकालीनसुखावच्छिन्नोऽहमर्थइति स्मृतेश्च, अन्यथास्मर्ये
ह्यस्तनइवाहमर्थइति चोद्यं निरुत्तरं स्यात्। ननु तथाप्येताव
कालमहमित्यभिमन्यमानआसमिति परामर्शः स्यादिति चे
कर्णे स्पृष्टः कटिं चालयसि अहमर्थप्रकाशेन तदभिमानप
मर्शापादनस्य व्यधिकरणत्वात्। अन्यथा तवापि आत्मेत्यभि
न्यमानआसमिति परामर्शः स्यात्, तस्मात्सुषुप्तावहमर्थः प्र
शत एव, अपि च सुषुप्तावहमर्थाभावेऽहं निर्दुःखस्वामितीच्छ
सुषुप्त्यर्थप्रवृत्त्यनुपपत्तेः। योऽहं सुप्तः सएव जागर्मीति प्र
भिज्ञा न स्यात्। योऽहं पूर्वं दुरकार्षं सोहमद्य करोमीति प्र
भिज्ञानुपपत्तिश्च। ननु कृषोऽहं स्थूलः स्यामिति वत्प्रवृत्त्यु
त्तिरिति चेन्न, काश्यस्य परम्परासम्बन्धेनारोपितस्यानारोपित
वाहमर्थस्य विद्यमानत्वे प्रवृत्त्युपपत्तावपि सुषुप्तावहमर्श
नाशात्तदानींतनसुखादिसम्बन्धाभावेन प्रवृत्त्यनुपपत्तेः। विवेकि
मम देहः स्थूलः स्यादितीच्छयैव प्रवृत्तेश्च। नहि ममात्मा
र्दुःखः स्यादितीच्छया कस्यापि सुषुप्तौ प्रवृत्तिर्दृश्यते, तस्माद्
न्तानुपपत्तिरेव वैषम्यात्। अहंव्यक्तिभेदात् कृतनाशाकृताभ्
गमप्रसङ्गश्च। कर्तुर्भोक्तुश्चाहमर्थस्य भेदात्। अभिन्ने च चैत
कर्तृत्वाद्यभावात्, कर्तृत्वाद्यारोपस्य च देहादावपि सत्त्वा
अहं करोमीत्येव प्रतीत्याहमर्थोऽन्यात्मनि कर्तृत्वाद्यारोपस्या

भावाच्च । अन्यथाऽऽत्माकरोतीति प्रतीतिः स्यात् । नच सुषुप्तौ कारणात्मना स्थितस्यैवोत्पत्त्यङ्गीकारान्नानुपपत्तिरिति वाच्यम्, कर्त्तृभोक्तृकारणस्य कर्त्तृत्वादिशून्यस्य स्थितावपि कृतहान्यादेरनुद्धारात् । किञ्च त्वन्मतेऽहङ्कारएव क्रियाशक्त्याप्राणःविज्ञानशक्त्या मनइति, तथा च सुषुप्तौ लये प्राणकार्य निःश्वासादिनस्यात् । ननु प्राणस्याहङ्काराद्भेदपक्षेऽहङ्कारस्य लयोयुक्तः । अभेदपक्षेऽपि प्राणांशविहीनस्य लयाङ्गीकारान्नोक्तदोषइति चेन्न, प्राणस्याहमर्थत्वाभावे कर्त्तृत्वस्य प्राणोपाधिकत्वेनाहंकर्त्तेति बुद्ध्यभावात् । अहमर्थत्वे तु सुषुप्तावप्यहमुल्लेखापातात् । ननु पूर्वोक्तयोः श्रुतिस्मृत्योरनुमानस्य च विरोधस्तदवस्थएव शास्त्रबाधस्तु तवाप्यनिष्टइति चेन्न, श्रुत्यादेरन्यविषयत्वेन बाधाभावात्, तत्रा "थातोऽहङ्कारादेशः"इत्यादि श्रुतिस्मृत्योः "गर्वोऽभिमानोऽहङ्कार "इत्यभिधानात् । गर्वादिवाचकाहङ्कारोविषयः स्वरूपाद्भूतएव "अहङ्कारश्चाहं कर्त्तव्यश्चे"ति श्रुत्यन्तरात् । सच मान्तोऽव्ययरूपः कारप्रश्लेषान्तः, आत्मवाच्यहंशब्दस्तु दकारान्तोऽस्मच्छब्दस्तस्मादुभयोरर्थतः शब्दतश्च भेदान्नोक्तदोषावकाशः । ननोभयोरप्यहङ्कारे एव शक्तिरिति वाच्यम्, अहङ्कारस्यानेकप्रयोगदर्शनेनैकत्रशक्तेर्नियन्तुमशक्यत्वात् । अहंशब्दस्त्वहङ्कारशब्दवदात्मशिष्टे प्रयोगप्राचुर्याभावादात्मपरएवेति भावः । एवमहमर्थस्य सर्वावस्थानुगतत्वासिद्ध्या परोक्षानुमानवृत्तिहेतोः स्वरूपासिद्धत्वेनाप्रमाणत्वं सुप्रसिद्धम् । ननु ज्ञातुस्सद्भावे किमिति विशेषज्ञानं न स्यादिति चेन्न, तत्र विषयाभावात्, नहि ज्ञातुः सत्त्वमात्रं विषयानुभवे प्रयोजकम्, अपितु विषयसत्त्वसहकृतमेव तस्माज्ज्ञातुः सत्त्वेऽपि विषयाभावाद्विशेषज्ञानानुदयोविरुद्धइति भावः । नचैतावन्तं कालं मामप्यहन्नावेदिषमित्यस्मदर्थाभावविषयकप्रत्ययस्य "नजानात्यय महमस्मी"ति श्रुतेश्च सुषुप्तावहमर्थाभावेमानत्वात् । कथमस्म-

त्प्रयुक्तहेतोः स्वरूपासिद्धत्वं तस्मादननुगमस्य तादवस्थ्यमिति वाच्यम्, उक्तप्रत्ययेऽप्यहमर्थस्यानुवृत्तिदर्शनात् । तथाहि तत्र मामिति द्वितीयान्तस्य कर्म्मरूपाहमर्थस्य जाग्रदनुभूतानादिकर्म्म-संस्कारप्रयुक्तात्मत्वाभिमतदेहाद्यवच्छिन्नोविषयः, अहमिति प्रथमान्तस्य कर्त्तुरस्मदर्थस्य देहादिविलक्षणशुद्धब्रह्मात्मकप्रत्यगात्मा ज्ञाता विषयः, तथाच मामित्युक्तलक्षणस्य देहेन्द्रियादिसम्बन्धस्य तत्राभावान्निषेधविषयत्वं सूपपन्नम्, तथैवाहमिति देहादिवियुक्तस्य तद्विशिष्टाभावविषयकानुभूत्याश्रयाभिन्नस्य तत्रापि सत्त्वेन ज्ञातृतया भानमपि सूपपन्नतरम्, तथाचाहमर्थस्यानुभवितुस्सर्वावस्थानुगतत्वेन हेत्वसिद्धेः सूपपन्नतमत्वादप्रामाण्यमनुमानस्य, एतेनोक्तायाः श्रुतेरपि व्याख्यानमुक्तम्भवति । तस्याअप्युक्तलक्षणविशिष्टप्रतियोगिकाभावविषयकज्ञानविधानपरत्वेन तुल्यार्थकत्वात्,। नन्वहमर्थो नात्माऽहंप्रतीतिविषयत्वात् शरीरादिवदिति प्रयोगात्तस्यानात्मत्वावगमइति चेन्न, त्वन्मतेऽहमर्थान्तर्गताधिष्ठानभूतचितोऽपि तत्प्रत्ययविषयत्वेन तत्र व्यभिचारात् । नच येन रूपेणाहन्धीविषयत्वं तेन रूपेणानात्मत्वं, स्वरूपेणात्मत्वमिति न व्यभिचारइति वाच्यम्, "अहमात्मागुडाकेशे"त्यात्मत्वेनाप्यहंप्रतीतिविषयत्वात् स्वरूपेणात्मत्वे मानाभावाच्च । 'नचाहमर्थआत्मान्यः अहंशब्दाभिधेयत्वात् अहङ्कारशब्दाभिधेयवदित्यत्रमानमिति वाच्यम्,"अहमात्मा गुडाकेशे"त्यहंशब्दाभिधेये विश्वात्मनि श्रीवासुदेवे परब्रह्मणि व्यभिचारात् । अथ यत्त्वया आत्मनोगौरोऽहमित्यनात्मारोपाधिष्ठानत्वं मानभूवं भूयासमित्यादिना परमप्रेमास्पदत्वम्, अहमर्थस्य स्वसत्तायां प्रकाशव्यतिरेकवैधुर्येणात्मनः प्रकाशत्वं चोक्तं तत्सर्वमहमर्थस्यानात्मत्वेऽयुक्तं स्यात् उक्तस्य सर्वस्याहमर्थएव पर्यवसानात् । नच प्रेमास्पदात्मैक्यारोपादहमर्थे तथा प्रतीतिरिति वाच्यम्, अन्योन्याश्रयापत्तेः ।

अहमर्थप्रेम्णोऽन्यस्यात्मप्रेम्णोऽनुभवाभावाच्च । अहितेहितबुद्ध्या प्रेमोत्पत्तावपि अप्रेमास्पदे प्रेमास्पदत्वस्यारोपादर्शनाच्च । "समारोप्यस्य रूपेण विषयोरूपवान्भवेत् । विषयस्य तु रूपेण समारोप्यं न रूपवदि"ति वाचस्पत्युक्तेः । अध्यस्तान्तःकरणगताऽप्रेमास्पदत्वस्यैवात्मनि प्रतीत्यापत्तेश्च । अनिदमि रूप्ये शुक्तिनिष्ठेदन्तादिभानवदधिष्ठाननिष्ठसाधारणधर्म्मस्यारोप्ये भानेप्यसाधारणधर्मस्य प्रेमास्पदत्वादेर्भानासम्भवात् । आरोप्यासाधारणधर्म्माणां भीषणत्वादीनां रज्ज्वामिवारोप्यासाधारणानामप्रेमास्पदत्वादीनामेवात्मनि भानापत्तेरित्यर्थः । त्वद्रीत्या सुखानुभवरूपस्यात्मनः अहंसुखमनुभवामीति सुखानुभवाभ्देदेनैव प्रतीतेश्च । किञ्च मोक्षेऽहमर्थाभावे आत्मनाशोमोक्षइति बाह्यमतापत्तेः । प्रेमास्पदाहमर्थस्य त्वन्मतेऽपि नाशात् । तदतिरिक्तशून्यस्य नन्मतेप्यनाशात् । नह्यहमर्थाभिन्ने आत्मनि प्रेमधीः कदाचिदस्तीति भावः । किञ्च "माऽमृतं कृन्धि ज्योतिरहं विरजाविपाप्मा भूयासमि "ति श्रुत्याहमर्थस्यैवामृतत्वोक्तेः अहम्मुक्तः स्यामितीच्छा च न स्यात् तस्यास्तद्विषयत्वात्, नन्वात्मन एव मुक्तिरिष्यते अहङ्कारेतरारोपात् मुक्तः स्यामितीच्छापि सूपपन्ना, यथा शरीरस्यैव पुष्टीच्छायामप्यात्मनि तदैक्यारोपात् पुष्टः स्यामितीच्छा यथात्मनएव सुखेच्छायामपि तदैक्यारोपाच्छरीरं सुखि स्यादितीच्छा चेति चेन्न, अन्योऽन्याश्रयापत्तेः । तत्र शरीरं पुष्टंस्यादितीच्छावत् अहंसुखि स्यामितीच्छावच्चेहचिन्मात्रं मुक्तं स्यादितीच्छायाः कदाप्यदर्शनेन मुक्तेरनिष्टत्वप्रसङ्गाच्च । यः कश्चिदात्मा मुक्तः स्यादितीच्छाचेन्नकदापि मुमुक्षुप्रवृत्तिः स्यात् ममात्मा मुक्त स्यादितीच्छाया अदर्शनात् । ननु यथात्मनएव सुखेच्छायामपि तदैक्यारोपाच्छरीरं नास्तीति सत्यम्, तथापि विशिष्टगतमुक्तीच्छायाएव विशेष्यगत-

मुक्तिविषयत्वपर्यवसानाभ्युपगमइति चेन्न, अहमर्थाभिन्नतथात्मनोभानस्य क्वाप्यदर्शनेनैतत्कल्पनाया अप्रामाणिकत्वात्। अपि चाहमर्थोयद्यन्तःकरणगर्भितस्तर्हि मम मनइति प्रत्ययोनस्यात्तदवच्छिन्नस्य पुनस्तदनन्वयात्। किञ्चैवं मनः स्फुरति मनोऽस्तीति ज्ञानादहमिति ज्ञानस्य वैषम्यानुभवो न स्यात्, चिदचित्सम्बलनविषयत्वाविशेषात्। तस्मादहमर्थस्यानात्मत्वे किमपि मानं नास्तीति सिद्धम्। आत्मत्वे तु प्रत्यक्षानुमानश्रुत्यादीनां सत्त्वात्तस्यात्मत्वं सुतरां सिद्धम्, तथाहि ज्ञानाम्यनुभवामीच्छामीत्यादिप्रतीतिभ्यः अहमर्थोमोक्षान्वयी तत्साधनकृत्याश्रयत्वात्सम्मतवदिति। नच स्वर्गसाधनकृत्याश्रये ऋत्विजव्यभिचारइति वाच्यम्, उद्देश्यतासम्बन्धेनहि यत्र कृतिस्तत्रैव फलमिति नियमः। ऋत्विजां तु दक्षिणायाएवोद्देश्यत्वान्नोक्तव्यभिचारयोगः। अहमर्थोऽनर्थनिवृत्त्याश्रयः अनर्थाश्रयत्वात्सम्मतवत्। नचासिद्धः अहमज्ञोऽहमनुभवामीत्यबाधितानुभवात् देहस्यानर्थाश्रयत्वाभावान्न व्यभिचारः, अनात्मत्वं नाहमर्थवृत्तिअनात्ममात्रवृत्तित्वात् घटत्वादिवदित्याद्यनुमानेभ्यः "सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयम्, तदैक्षत बहुस्यां प्रजायेय नामरूपे व्याकरवाणि त्रिवृतं करवाणि, ब्रह्मैवेदमग्रआसीत्सचात्मानं वेदाहं ह्यन्ताहमिमास्तिस्रोदेवता"इत्यादिभ्यः। किञ्च प्राकृतप्रलये विश्वलयात्मकेऽवशिष्यमाणस्यैकाद्वितीयादिशब्दाभिधेयस्य परब्रह्मणः श्रीपुरुषोत्तमस्यापि प्राणमनोभूतादिसृष्टेः प्रागपि ज्ञात्रभिन्नाहमर्थस्वरूपत्वमेवेत्यवगम्यते तस्य नित्यमुक्तत्वं तावन्निर्विवादम्, एवं तत्साम्यापन्नानां "निरञ्जनः परमं साम्यमुपैती"त्यादिश्रूयमाणानामप्यहमर्थस्वरूपत्वमेवेति मुक्तावपि तथात्वसिद्धेः। "अभयं वै जनक! प्राप्तोऽसि यदात्मानमेवावेदाहं ब्रह्मास्मीती"त्यत्रावधारणेनाहमर्थाभिन्नब्रह्मतादात्म्योपदेशात्। तथाभूतवेदनस्यात्मभावप्राप्ति-

रूपमोक्षफलकत्वोपदेशाच्च, अनविद्यस्यापि ब्रह्मणोऽहमुल्लेखोक्तेश्च। "अहमित्येव योवेद्यः सजीवइति कीर्तितः। सदुःखी स सुखी चैव सपात्रं बन्धमोक्षयोरि"ति कण्ठरवेणाहमर्थस्य मोक्षान्वयित्व-श्रवणाच्च "अहं मनुरभवं सूर्यश्चे"ति मुक्तभावगम्यस्य वाम-देवस्यानुभवाच्च "अहमात्मा गुडाकेशे"ति सर्वात्मत्वम् "नत्वे-वाहं जातु नासमि"त्यादिना कालत्रयाबाध्यत्वम् "ददामि बुद्धि-योगं तमि"ति मोक्षोपयिकज्ञानदातृत्वम् "मामेव ये प्रपद्यन्ते मायामेतामि"ति मायातरणासाधारणोपायरूपशरणापत्तिविषय-त्वम् "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथे"ति जगत्कारणत्वं। "वेदैश्च सर्वैरहमेव वेद्य"इति शास्त्रविषयत्वम् "ततोमां तत्त्व-तोज्ञात्वा विशते तदनन्तरमि"ति मुक्तोपसृप्यत्वम्, मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते"इत्यपुनरावृत्तिलक्षणफलत्वम्, "मा-मेकं शरणं व्रजे"ति सर्वशरण्यत्वम्, "अहं त्वां सर्वपापेभ्यो-मोक्षयिष्यामी "ति सर्वपापनिवर्त्तकत्वम्, चाहमर्थस्यैव श्रीमुखेन निर्णीतं भगवता श्रीपुरुषोत्तमेन। किञ्चाहमर्थादन्यआत्मा यदि स्यात्तर्ह्युपलभ्येत, नतु तथोपलभ्यते इति योग्यानुपलब्धेरप्यत्रमान-त्वात् । अपिचास्मदर्थान्यात्मप्रतीत्यभावान्यथानुपपत्तेरप्यत्र प्रामाण्यम्। किञ्च परैरपि भाष्ये सर्वोह्यात्मास्तित्वं प्रत्येति न नाहस्मीति, यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्सर्वोलोको-नाहमस्मीति प्रतीयादिति न तावदयमेकान्तेनाविषयोऽस्मत्प्र-त्ययविषयत्वादिति चान्वयव्यतिरेकेणात्मनोहमर्थतयैव प्रतिपा-दनात्। अन्यथास्वोक्तिबाधइत्यर्थस्तस्मादहमर्थाभावाभावएवात्मे-त्यलं पल्लवनेन ॥ १८ ॥

इति ज्ञाधिकरणम् ॥ ८ ॥

सू० उत्क्रान्तिगत्यागतीनाम् ।

२ । ३ । १९ ॥

वेदान्तपारिजातसौरभः ।

जीवोऽणुः अनेनप्रद्योतनेन " एष आत्मा निष्क्रामति चक्षुषोवा मूर्द्धो वा अन्येभ्योवा शरीरदेशेभ्यः ये वै केचनास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति तस्माल्लोकात् पुनरेत्याऽस्मै लोकाय कर्म्मणे" इत्युत्क्रान्तिगत्या-गतीनां श्रवणात् ॥ १९ ॥

वेदान्तकौस्तुभः ।

एवं जीवात्मनोनित्यत्वं ज्ञातृत्वं च निरू-पितमिदानीं तत्परिमाणं निरूप्यते —

उत्क्रान्तिगत्याऽऽगतीनाम् ।

अयमात्मामध्यमपरिमाणकः ? उत विभु-परिमाणकः ? आहोस्विदणुपरिमाणकः ? इति संशये मध्यमपरिमाणको भवतु, शरीरे सर्वत्र सुखाद्युपलब्धेः । अथवाविभुपरिमाणकइति प्राप्ते ऽभिधीयते "जीवात्मोत्क्रान्तिगत्यागतीनां योग्यो-

ऽस्ति, एतत्त्रयं तस्य विभुत्वेनोपपद्यते। किञ्च विभुत्वे सर्वत्र सुखाद्युपलब्धिः प्रसज्येत, मध्यमपरिमाणकत्वे त्वनित्यतास्यात्तस्मादात्मनोऽणुत्वं परिशिष्यते "स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामतीत्युत्क्रान्तिः श्रूयते येकेचास्माल्लोकात्प्रयान्ति चन्द्रमसमेव तेगच्छन्तीति गतिः श्रूयते तस्माल्लोकात्पुनरेत्याऽस्मैलोकायकर्म्मणे इत्याऽगतिः श्रूयते ॥ १९ ॥

वेदान्तकौस्तुभप्रभा।

अथतत्परिमाणं निर्णीयते। तथाहि स किं मध्यमपरिमाणको ? विभुपरिमाणको ? ऽणुपरिमाणकोवे ? त्याकाङ्क्षायामाह —

उत्क्रान्तिगत्याऽऽगतीनाम्।

प्रत्यगात्माऽणुपरिमाणकएव ? कुतः "स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामतीति ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते गच्छन्तीति तस्माल्लोकात्पुनरेत्यास्मै लोकाय कर्म्मणे"इत्यादिना तस्योत्क्रान्तिगत्यागतीनां श्रवणादिति शेषः। न मध्यमपरिमाणकोविभुपरिमाणकोवा तत्र दोषाणामुक्तत्वात्। ननु स्यादेतत् मनसामात्मनां च विभुत्वबहुत्वयोगे उक्तदोषाणां योगो न तु एकत्वविभुत्वयोगे, तथाचैकएव विभुरात्माऽनेकोपाधिभिरवाच्छिन्नोघटावच्छिन्नाकाशवत् भिन्नतया भाति स्वस्वोपाधिप्रयुक्ताश्च स्वीयसुखदुःखानुभूतयउपाधीनामेवेतरेतरभिन्नानां

भेदनियामकत्वेन सुखाद्यनुभवसाङ्कर्याभावाद्व्यवस्थासामञ्जस्यम् । यद्वा विम्बस्थानीयमेकं ब्रह्मजलादिस्थानीयेऽन्तःकरणाद्युपाधौ प्रतिविम्बितं सज्जीवत्वमापद्यते, उपाधेश्चाऽविद्यकत्वात्तत्प्रयुक्तभेदोऽप्याविद्यकः । यथा सूर्यस्य जलपरिपूरितघटेषु तत्र तत्र प्रतिविम्बविशेषोघटोपाधिकृतोभेदश्च तत्रैकस्मिञ्चाल्यमाने घटजले घटे नष्टे च तद्गतस्यैकस्यैव प्रतिविम्बस्य चाञ्चल्यविम्बभावापत्तिर्नान्येषां तथैकस्मिन्नेवान्तःकरणे सुखादिवृत्तिरूपपरिणामे सति तद्गतैकस्यैव चेतनप्रतिविम्बस्य तत्तद्दुःखाद्यनुभवोनान्येषां, तथाचैकस्मिन्नेवोपाधौ तत्त्वमस्यादिवाक्यश्रवणजन्यजीवब्रह्मैक्यज्ञानाद्यष्टे सति तस्यैव ब्रह्मभावापत्तिर्नान्येषामिति सर्वस्याप्यसुखदुःखभोगसाङ्कर्याभावव्यवस्थायाबन्धमोक्षव्यवस्थायाश्च सुवचत्वमिति चेन्न, उभयपक्षेऽपि बन्धमोक्षव्यवस्थानुपपत्तेः सुखादिभोगसाङ्कर्यापत्तेश्च पूर्वमेव विस्तृतत्वात्, परमतप्रयोजननिराकरणप्रकरणे । यस्य ब्रह्मभावापत्तिलक्षणोमोक्षः प्रयोजनत्वेनाभ्युपगम्यते इत्यारभ्य, जीवब्रह्मैक्यं वक्तुमशक्यामित्यन्तेन ग्रन्थेन । किञ्च सर्वगताद्वितीयात्मवादे उपाधेर्विभुत्वाङ्गीकारश्चेत् सर्वस्यापि चेतनस्यावृतत्वेन जगदान्ध्यप्रसङ्गः प्रकाशकाभावात्, गत्याद्यनुपपत्तिर्मुक्तोपसृप्यब्रह्मोच्छेदप्रसङ्गश्च "ब्रह्मविदाप्नोति परम्, पूतास्तद्भावमागताः" इत्यादिमोक्षशास्त्रबाधश्च । उपाधिपरिच्छिन्नानेकात्मत्ववादे च पदे पदे बन्धमोक्षापत्त्यादिदोषाणां पूर्वमेव विस्तृतत्वात् । किञ्च मोक्षस्योक्तन्यायेनाकस्मात्पदे पदे सिद्धौ "तमेव विदित्वातिमृत्युमेति, यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवा" इत्याद्यन्वयव्यतिरेकावधारणयुक्तमोक्षसाधनबोधकश्रुतीनां बाधप्रसङ्गः । मोक्षोद्देशेन जिज्ञासाशास्त्रारम्भवैयर्थ्यञ्च । किञ्च उभयपक्षेऽप्यावरकोपाधेः सत्यत्वं ? मिथ्यात्वं वा ? नाद्यः द्वैतापत्तेः सत्यस्य

ज्ञाननाश्यत्वानङ्गीकारेणानिर्मोक्षप्रसङ्गाच्च, परमतप्रवेशाच्च । न द्वितीयः, अनुपपन्नत्वात् तथाहि यथाबिम्बस्यैं सावयवत्वरूपवत्त्वादिना सजातीयसमसत्ताकोपाधौ प्रतिबिम्बननियमस्तथावच्छेदकस्याप्युपाधेः समसत्ताकस्यैवावच्छेद्यकत्वनियमः, अन्यथा स्वप्नरज्ज्वाजाग्रदवस्थायां राजभटनिगृहीतचौरादीनां बन्धनापत्तेर्मृगमरीचिकाजले सूर्यादेः प्रतिबिम्बनापत्तेश्च, नतु तदस्ति दृष्टश्रुतागोचरत्वात् । किञ्च तत्त्वज्ञानाज्जीवोपाधिनाशे सति जीवोनश्यति न वा ? आद्ये स्वरूपनाशस्यैव मोक्षत्वापत्तिः । द्वितीयेऽविद्यानाशेऽप्यनिर्मोक्षप्रसङ्गः ब्रह्मातिरिक्तजीवस्वरूपावस्थानात्, नच दर्पणादिपूपलभ्यमानमुखमालिन्यादिवच्छुद्धादिव्यवस्थोपपत्तिरिति वाच्यम्, आपातेऽ', मालिन्यादयऔपाधिकादोषाः कदा नश्येयुः दर्पणाद्युपाध्यपगमइति चेत्, किन्तदा मालिन्याद्याश्रयः प्रतिबिम्बस्तिष्ठति ? न वा ? आद्ये तत्स्थानीयस्य जीवस्यापि स्थितत्वादनिर्मोक्षप्रसङ्गः । द्वितीये तद्वदेवं जीवनाशात्स्वरूपनाशएव मोक्षः स्यात्, किञ्च यस्यापुरुषार्थरूपदोषप्रतिभासस्तदुच्छेदः पुरुषार्थः । तत्र किमौपाधिकदोषप्रतिभासोबिम्बस्थानीयस्य ब्रह्मणउतप्रतिबिम्बस्थानीयस्य जीवस्य ? वाभिप्रेतस्तदितरस्य वा ? आद्ययोः कल्पयोर्दृष्टान्तासिद्धिः मुखस्य तत्प्रतिबिम्बस्य वा मालिन्यादिदोषशून्यत्वात् । नहि मुखं प्रतिबिम्बं वा चेतयते उभयोर्जडत्वात्, तदुभयेतरद्रष्टुरभावान्न तृतीयः । किञ्चाविद्याकल्प्यस्य जीवस्य कोवा कल्पकः, अविद्येति चेन्न, तस्या अचेतनत्वात् । नापि जीवः, आत्माश्रयापत्तेः, शुक्तिरजतवदविद्याकल्पितत्वाच्च, जीवस्य ब्रह्मैव कल्पकमितिचेन्न, ब्रह्मणि अज्ञानस्यैवापातात्, किञ्च ब्रह्मण्यज्ञानानङ्गीकारे किं ? ब्रह्मजीवान्पश्यति न वा ?, न पश्यति चेदीक्षादिपूर्विकाविचित्रसृष्टिर्नाम रूपस्य व्याकरणादि च ब्रह्मणोन स्यात् । अथ पश्यति चेदखण्डैकरसं

ब्रह्म नाविद्यामन्तरेण जीवान्पश्यतीति ब्रह्मण्यज्ञानप्रसङ्गः । अतएव मायाविद्याविभागवादोऽपि निरस्तः । अज्ञानमन्तरेण हि मायिनोब्रह्मणोजीवदर्शित्वाऽसम्भवात् । नहि मायावी परानदृष्ट्वा मोहयितुमलं, नापि मायाऽमायाविनोदर्शनसाधनं द्रष्टेषु परेषु तन्मोहनसाधनमात्रत्वात् तस्याः, अथ ब्रह्मणोमायाजीवदर्शित्वं कुर्वन्ती जीवमोहनस्य हेतुरितिचेन्न, तर्हि परिशुद्धस्याखण्डैकरसस्य स्वप्रकाशस्य ब्रह्मणः परदर्शित्वं कुर्वन्ती मायाऽपरपर्यायाऽविद्यैव स्यात् । ननु द्विपरीतदर्शनहेतुरविद्या मायातुमिथ्याभूतं ब्रह्मव्यतिरिक्तं मिथ्यात्वेन दर्शयन्ती न ब्रह्मणोविपरीतहेतुः अतस्तस्याअनादित्वमिति, मैवं एकत्वे ज्ञायमाने द्विचन्द्रदर्शनहेतोरप्यविद्यात्वात् । यदि च ब्रह्ममिथ्यात्वेनैव स्वव्यतिरिक्तं जानाति तर्हि कथं तान्मोहयति । नह्यनुन्मत्तोमिथ्यात्वेन ज्ञातान्मोहयितुमीहते, अथपुरुषार्थापरमार्थदर्शनहेतुरविद्या, माया तु ब्रह्मणोनापुरुषार्थदर्शनहेतुरतोऽस्या अनादित्वमिति मतम्, तत्र द्विचन्द्रदर्शनस्य दुःखहेतुत्वाभावेनापुरूषार्थत्वाभावेऽपि तद्धेतुरविद्यैव, तन्निरसने प्रयासदर्शनात् । यदि च नापुरुषार्थदर्शनकरी माया, तर्ह्यनुच्छेद्यतया ब्रह्मस्वरूपानुबन्धिनी स्यात् । अस्तु कोदोषइति चेत् ? द्वैतदर्शनमेव दोषः, "यत्र द्वैतमिवभवति तत्रेतर इतरम् पश्यति यत्रत्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदि"त्याद्यद्वैतश्रुतिव्याकोपात्, परमार्थविषया अद्वैतश्रुतयः मायायास्त्वपरमार्थत्वान्न विरोधइति चेत्, अपरिच्छिन्नानन्दैकरूपस्य ब्रह्मणोऽपरमार्थभूतमायादिदर्शनं तद्वत्त्वं चाविद्यामन्तरेण नोपपद्यते, तव मते ह्याविद्यकमेव ब्रह्म मायादिदर्शित्वादिति, ननु "अनेन जीवेनात्मनाऽनुप्रविश्ये"ति श्रुतेर्न जीवब्रह्मणोर्वास्तवोभेदः, किन्तु कल्पितभेदाश्रयणेनैवेयं व्यवस्थोच्यते, नच कस्य कल्पना ? न तावद्ब्रह्मणः, तस्य परिशुद्धज्ञानात्मनः कल्पना—

शून्यत्वात्, नापि जीवानाम्-अन्योन्याश्रयापत्तेः, कल्पनाधीनोहि जीवभावोजीवाश्रया च कल्पनेति वाच्यम्, अविद्याजीवत्वयोर्बीजाङ्कुरन्यायेनानादित्वात् जीवानां भ्रमस्यानादित्वान्नतद्धेतुरन्वेषणीयइति चेन्न, स्वकपोलकल्पनाविजृम्भितत्वात् । तथाहि जीवस्याकल्पितस्वरूपेणाविद्याश्रयत्वे ब्रह्मणएवाविद्याश्रयत्वमुक्तं स्यात् तदतिरिक्तेन तस्मिन् कल्पितेनाकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् । नहि मायावादे तदुभयातिरिक्ताकारस्याङ्गीकारः, नच कल्पिताकारविशिष्टेन स्वरूपेणैवाविद्याश्रयत्वमिति वाच्यम्, अखण्डैकरसस्य स्वरूपस्याविद्यामन्तरेणविशिष्टत्वासम्भवात् । किञ्च जीवाज्ञानाश्रयणे किं प्रयोजनमिति वक्तव्यं ? बन्धमोक्षव्यवस्थासिद्धिरेवेति चेन्न, सातु तत्पक्षेऽपि न सम्भवति, अविद्यायाविनाशोहिमोक्षस्तत्रैकस्मिन्मुक्तेऽविद्याविनाशात् सर्वे मुच्येरन् । अन्येषां ह्यमुक्तत्वादविद्यातिष्ठतीति चेत्तर्हि न कस्यापि मुक्तिः स्यात् अविद्याया अविनष्टत्वात्, प्रतिजीवमविद्याभेदः कल्प्यते चेत्, भेदः स्वाभाविकोवा ? उतकल्पितः ? नाद्यः, अनङ्गीकारात् भेदसिद्धेरऽविद्याकल्पनस्य वैयर्थ्यप्रसङ्गात् । न द्वितीयः अन्योऽन्याश्रयात् जीवभेदसिद्धौ तासां सिद्धिस्तासु च जीवभेदासिद्धिरिति । नच बीजाङ्कुरन्यायेन तस्यादोषत्वमुक्तमेवेति वाच्यम्, उक्तन्यायस्यात्रानवसरात् । तथाहिबीजाङ्कुरेषु तावदन्यदन्यद्बीजमन्यस्यान्यस्याङ्कुरस्योत्पादकं प्रत्यक्षादिप्रमाणासिद्धम्, इह तु याभिरविद्याभिर्ये जीवाः कल्प्यन्ते तानेवाश्रित्य तासां सिद्धिः, अथ बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवकल्पनां मन्यसे ? उतविज्ञानवादिवज्जीवोत्पत्तिं ?, आद्ये असम्भवः कल्पनायाः प्राक् कल्पकस्याभावात् । द्वितीये जीवानां भङ्गुरत्वं कृतनाशाकृताभ्यागमप्रसङ्गश्चेति । अतएव ब्रह्मणः पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्त-

रोत्तरजीवभावकल्पनमित्यपि निरस्तं, अविद्याप्रवाहेऽभ्युपगम्यमाने तत्कल्पितजीवभावस्यापि तद्धत्प्रवाहानादिता स्यान्न ध्रुवरूपता, तथात्वे चामोक्षाज्जीवभावस्य ध्रुवत्वमपि नवेष्टं न सिद्धयेत्। ननु प्राक्प्रादनिगरणादिवदनुपपन्नतैकवेद्यायामविद्यायामवस्तु भूतायांनितरेतरादिदोषा अनवकल्पितमावहन्तीति चेन्न, तथात्वे च सति मुक्तानपि परं ब्रह्म चाश्रयेदविद्येति मन्तव्यं पण्डितम्मन्यैः, तेषां शुद्धज्ञानरूपत्वादशुद्धाविद्या न तत्र सज्जतीति चेत्तर्ह्युक्तोपपत्तिभिर्जीवानपि नाश्रयेत्तेषामपि स्वरूपतोब्रह्माभिन्नत्वेन शुद्धत्वाऽविशेषात्। अन्यथा तव मते शुद्धस्य ब्रह्मणो विद्याश्रयत्वाङ्गीकारेण मुक्तानां शुद्धानां पुनरविद्याश्रयणेऽपि कियान्दोषः, तथोक्तं विवरणे " आश्रयत्व विषयत्वभागिनी निर्विशेषचितिरेव केवले " त्यादिना, अतः प्रतिबिम्बवादः श्रेयोऽर्थिभिः सर्वथोपेक्षणीयः। श्रुत्यादिमानशून्यत्वात्। न"न्वेक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवदि" ति श्रुतिसिद्धत्वात्कथमश्रौतत्वमिति चेन्न, उक्तश्रुतेरन्तर्यामिणोनिर्लेपत्वप्रतिपादनपरत्वेन प्रतिबिम्बविषयकत्वाभावात्तस्मिन्वाक्ये प्रतिबिम्बशब्दादर्शनात्, काल्पनिकार्थस्य बुद्धिकौशलमात्रत्वात्। श्रुत्यर्थस्तु भूतात्मा भगवान्वासुदेव एकएव भूते भूते चेतनाचेतनवर्गे, यद्वा-ऽभूतइति छेदः भूते कार्यवर्गे अभूते कारणवर्गे, यद्वा भूते सृष्टिं गते बद्धचेतनवर्गे, अभूते सृष्ट्यनन्तर्गते नित्यमुक्तचेतनवर्गे तदन्तर्यामितया व्यवस्थितः, विशेषेण सदैकरसानन्दरूपेणावस्थितोऽपि तद्गतदोषासंस्पृष्टमाहात्म्यएव दृश्यते महात्माभिस्तदनुग्रहभाजनैरुपनिषच्छ्रुष्कौरित्यन्वयः। ननु गुणदोषसम्पृक्ते वस्तुनि वर्त्तमानस्य कथमिव तन्निर्लेपत्वमित्याशङ्क्य दृष्टान्तेन निराकरोति। चन्द्रवदिति। यथा चन्द्रः श्रीगङ्गादिपुण्यजलेषु

शूकरादिविलोडितदुर्गन्धिगर्त्तादिजलेषु च स्वकरनिकरव्याप्त्यावर्त्तमानोऽपि तद्गतगुणदोषैर्न युज्यते, एवं ब्रह्मादिश्वपाकान्तेषु चेत नाचेतनेषु साम्येन स्वरूपव्याप्त्या तिष्ठन्नपि परमेश्वरोन तद्गतगुणदोषैर्युज्यते ऽस्पृष्टस्वभावत्वात् "सूर्योयथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः । एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्य" इत्यग्निमवाक्यात्, तत्रैकधासमदृश्यन्तर्यामितया बहुधा व्यदृश्यन्तरात्मतयेति सङ्क्षेपः । किञ्च तवाभिप्रेतं बिम्बभूतं ब्रह्मउपाध्यन्तःस्थं ? तदनन्तर्गतं वा ? नाद्यः जलान्तस्स्थस्य मत्स्यकूर्मादेः प्रतिबिम्बादर्शनात्, नान्त्यः तव पक्षे ब्रह्मणोऽविद्यावहिःस्थत्वासम्भवात् । अन्यथा सदेशत्वापत्तेः, परिच्छिन्नत्वप्रसङ्गाच्च, तथात्वे च मिथ्यात्वं दुर्वारम्, ब्रह्ममिथ्या सदेशत्वात् पृथिव्यादिवत्परिच्छिन्नत्वाद्घटादिवच्चेत्यनुमानादित्याद्युक्तं पूर्वमेव, एवमवच्छेदवादेऽप्युक्तदोषा ऊह्या अविशेषात् । नाप्येकजीववादस्य सम्यक्त्वम् पूर्वमेव निरस्तत्वात्प्रमाणशून्यत्वाच्च । नच "पुरत्रये क्रीडति देवएकः, एकोदेवः सर्वभूतेषु गूढः" इत्यादिश्रुतीनां तत्र मानत्वमिति वाच्यम्, तासामेकजीवपरत्वाभावात् श्रुत्यर्थस्तु पुरत्रये जाग्रदाद्यवस्थावच्छिन्नदेहत्रये एकएव जीवः देवः प्रकाशरूपत्वात् क्रीडनशीलत्वाद्वा, नत्ववस्थाभेदाज्जीवभेदः, अन्यथा कृतनाशादिप्रसङ्गादिति प्रथमवाक्यार्थः । एकोदेवइत्यादिवाक्यं तु ब्रह्मपरं, सर्वव्यापित्वसर्वभूतान्तरात्मत्वकर्म्माध्यक्षत्वसर्वसाक्षित्वादीनां ब्रह्मासाधारणलिङ्गानां जीवे कथमप्यसम्भवात्, तस्मादेकजीववादोऽश्रौतएवेति सिद्धम् । "नित्योनित्यानां चेतनश्चेतनानां, नत्वेवाहं जातु नाऽऽसं नत्वंनेमे जनाधिपाः, बहवोज्ञानतपसा पूता" इत्यादिश्रुतिस्मृतिविरोधात् । शास्त्रे क्वचिदेकवचनोक्तिर्जातिपरा "ब्राह्मणोन हन्तव्य" इत्यादिवत्, औपाधिकभेदवादे तु कायव्यूहस्थले योगिनः सर्वदेहेषु भोगइवैकजीवस्य

सर्वदेहगतसुखाद्यनुभवापत्तिः, ब्रह्मणएव जीवत्वेन नित्यमुक्तत्वादिश्रुतिव्याकोपश्च, एकस्यानेकदेहेषु प्रत्यक्त्वपराक्त्वासम्भवश्च, न चान्तःकरणभेदस्यात्र नियामकत्वमिति वाच्यम्, योगिनः कायव्यूहानामन्तः करणभेदेऽपि प्रत्यक्त्वपराक्त्वदर्शनात्प्रत्युताहमित्येव सर्वत्र प्रतीतिदर्शनाच्च । अवच्छेदवादोक्तदोषाणामत्र तुल्यत्वं किन्तूपाधिसत्त्वमिथ्यात्वयोरेव विशेषइत्यलं विस्तरेण । तस्मादणुपरिमाणकएवेति प्रकृतमनुसरामः ॥ १६ ॥

सू० स्वात्मना चोत्तरयोः ॥

२ । ३ । २० ॥

वेदान्तपारिजातसौरभः।

उत्क्रान्तिः कदाचित् स्थिरस्यापि ग्राम्यसाम्यनिवृत्तिवत्स्यादुत्तरयोःस्वात्मनैव सम्भवाज्जीवोऽणुः ॥ २० ॥

वेदान्तकौस्तुभः।

स्वात्मना चोत्तरयोः।

ग्राम्यस्वाम्यनिवृत्तिवदुत्क्रान्तिदेहस्वाम्यनिवृत्तिरूपा कदाचित् स्थितस्याप्यात्मनः स्यात् । उत्तरयोर्गत्याऽऽगत्योऽस्तु आत्मना स्वरूपेणैव साध्यत्वाज्जीवोऽणुरिति गम्यते ॥ २० ॥

———

वेदान्तकौस्तुभप्रभा ।

स्वात्मना चोत्तरयोः ।

चशब्दोऽवकल्प्यर्थः यद्यप्युत्क्रान्तेः शरीरवियोगरूपत्वेन सा कथञ्चित्तस्थितेनापि सम्पाद्या स्यात् उत्तरयोर्गत्याऽऽगत्योस्तु स्वात्मनैव सम्पाद्यत्वमिति विशेषः ॥ २० ॥

सू० नाणुरतच्छ्रुतेरिति चेन्ने-तराधिकारात् ॥ २ । ३ । २१ ॥

वेदान्तपारिजातसौरभः ।

जीवं प्रस्तुत्य, "सवा एषमहानि"त्य-तद्वचनात् । न जीवोऽणुरिति चेन्न, मध्येपरमा-त्मनोऽधिकारात् ॥२१॥

वेदान्तकौस्तुभः ।

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ।

ननु जीवोनाणुः कुतः ? अतच्छ्रुतेः तदणुत्व-मतदनणुत्वं तस्य श्रुतेः " योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरि"ति जीवप्रस्तावे"सवा-एषमहानजआत्मे"ति महत्त्वश्रुतेरिति चेन्न, कस्मात् इतराधिकारात् उपक्रमे प्रस्तुताज्जी-

वादितरस्य यस्यानुवित्तः प्रतिबुद्धआत्मे"ति मध्ये प्रतिपाद्यस्य परमात्मनोऽधिकारात् ॥ २१ ॥

वेदान्तकौस्तुभप्रभा।

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्।

ननु नायमणुः कुतः ? अतच्छ्रुतेः अणुभिन्नविभुत्वश्रुतेरित्यर्थः "योऽयं विज्ञानमय"इति जीवप्रस्तावे "सवाएषमहानजआत्मे"ति महत्त्वश्रुतेरिति चेत्तत्परिहरतिनेति । कुतः ? इतरस्य परमात्मनोऽधिकारात् "यस्यानुवित्तः प्रतिबुद्धआत्मे"ति मध्ये परमात्मप्रतिपादनात्तस्यैव परामर्श इत्यर्थः ॥ २१ ॥

सू० स्वशब्दोन्मानाभ्याञ्च ॥

२ । ३ । २२ ॥

वेदान्तपारिजातसौरभः ।

"एषोऽणुरात्मा, बालाग्रशतभागस्य शतधा कल्पितस्य च भागोजीव"इतिस्वशब्दोन्मानाभ्यां जीवोऽणुः ॥२२॥

वेदान्तकौस्तुभः।

स्वशब्दोन्मानाभ्याञ्च।

स्वस्याणुत्वस्यवाचकः शब्दः स्वशब्दः सर्वेभ्यः

स्थूलपरिमाणेभ्यः उद्धृत्यमानमुन्मानमत्यल्पं परिमाणम्, ताभ्यां च संविवेशे "एषोऽणुरात्मा चेतसा वेदितव्योयस्मिन्प्राणः पञ्चधा संविवेशे" ति स्वशब्दः "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागोजीवः स विज्ञेयः स चानन्त्याय कल्पते"इति "आराग्रमात्रोह्यवरोऽपि दृष्टः "इति चोन्मानम् ॥ २२ ॥

वेदान्तकौस्तुभप्रभा ।

स्वशब्दोन्मानाभ्याञ्च ।

इतश्चायमणुरात्मा "एषोऽणुरात्मा चेतसा वेदितव्योयस्मिन्प्राणः पञ्चधा सम्विवेशे"ति कण्ठरवेणाणुत्वश्रवणात् । अणुसदृशं वस्तूद्धृत्य यन्मानं तदुन्मानं "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागोजीवः स विज्ञेयः सचानन्त्याय कल्पते, आराग्रमात्रोह्यवरोऽपि दृष्टः " इतिचोन्मानश्रवणात् प्रत्यगात्माऽणुपरिमाणक उत्क्रान्त्यादिमत्त्वात् । यन्नैवं, तन्नैवं, परमात्मवत् । जीवोयद्यणुपरिमाणकोन स्यात्तदा गत्याद्युपदेशोऽपि न स्यादिति "ते धूममभिसम्भवन्ती"त्यादिश्रुतेरिति सङ्क्षेपः ॥ २२ ॥

सू० अविरोधश्चन्दनवत् ॥

२ । ३ २३ ॥

वेदान्तपारिजातसौरभः।

देहैकदेशस्थोऽपि कृत्स्नं देहं चन्दनबिन्दुर्यथाल्हादयति तथा जीवोऽपि प्रकाशयति, अतःकृत्स्नशरीरे सुखाद्यनुभवोन विरुध्यते ॥ २३

वेदान्तकौस्तुभः।

अविरोधश्चन्दनवत् ।

नन्वात्मनोऽणुपरिमाणकत्वे कृत्स्नदेहव्यापिसुखाद्यनुभवः कथमुपपद्यते? इत्यत्रोच्यते। नायं विरोधः, यथा हरिचन्दना[illegible]र्देहैकदेशस्थः स्वगुणेन सकलदेहाह्लादं [illegible]यति, तथा जीवोऽपि देहैकदेशस्थः स्वगु न कृत्स्नदेहव्यापिसुखादिकमनुभवति "अणुम[illegible]त्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति। यथा व्याप्य शरीराणि हरिचन्दनविप्लुषः"इति स्मृतेः। अतएव भगवताप्युक्तम् " यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः। क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ! इति ॥ २३ ॥

वेदान्तकौस्तुभप्रभा।

ननु तर्हि सर्वावयवगतसुखदुःखाद्यनुभवयौगपद्यव्यवस्थानु-

पपत्तिः, स्वरूपस्याणुमात्रदेशवृत्तित्वादित्यत आह —

अविरोधश्चन्दनवत् ।

यथा हरिचन्दनबिन्दुः शरीरैकदेशे निपतितः कृत्स्नं शरीरमाल्हादयति तथेति । धर्म्मिणोऽणुत्वेऽपि तद्धर्म्मभूतज्ञानस्य विभुत्वात् । " अणुनश्चक्षुषः प्रकाशोव्याप्तएवमेवास्य प्रकाशोव्याप्तोव्याप्तोवै पुरुष"इति श्रुतेः । " यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत! "अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति । यथा व्याप्य शरीराणि हरिचन्दनविप्रुषः"इत्यादिस्मृतेश्च " यथा च दीपः शरणे दीप्यमानः प्रकाशते । एवमेव शरीराणि प्रकाशयति चेतनः"इत्यश्वमेधपर्वणि ।नच प्रकाशादेर्धर्म्मस्य स्वाश्रयं विना व्याप्त्यसम्भवइति शङ्कनीयम् ? दीपं विना तत्प्रभायाः वन्हिं विना तदौष्ण्यादेः, पुष्पं विना तद्गन्धस्य व्याप्तिः प्रत्यक्षागमाभ्यां सिद्धतरा, धर्मिणं विना जातिसमवायादीनां व्याप्तिरन्यैरपि स्वीकृता च, एतेन क्वचिद्विभुपरं शास्त्रमपि व्याख्यातं, विभुधर्माश्रयाणां तथात्वस्य शक्त्यैवावगमान्मुख्यत्वमेवेति । नन्वात्मनोऽणुत्वाङ्गीकारेऽपि सुखादिव्यवस्थानुपपादा, आत्मवृत्तिविभुपरिमाणकधर्म्मभूतज्ञानेन स्वशिरःपाण्यादिगतसुखाद्यनुभूतिवत्परशरीरगतसुखाद्यनुभवोऽपि दुर्वारः, ज्ञानव्याप्तेस्तत्राऽपि सत्त्वात्, सर्वजीवनिकायवृत्तिसुखादिसर्वेषामप्यवश्यमनुभाव्यमेव, विभुवादे कल्पितदोषाणां भोगसाङ्कर्य्यस्य च तवापि दूर्वारत्वेन व्याप्तिसाम्यादिति चेन्न, आपातोक्तेः । तथाहि अस्मत्सिद्धान्ते "अज्ञानेनावृतं ज्ञान तेन मुह्यन्ति, आवृतं ज्ञानमेतेने "त्यादिमानादात्मज्ञानस्य विभुत्वेऽपि बद्धावस्थायां कर्म्मात्मकाज्ञानावृतत्वेनेन्द्रिय सन्निकर्षसापेक्षत्वात्, यत्रेन्द्रियसन्निकर्षस्तस्यैवानुभवोनान्यस्येति ।

एवं देवदत्तस्य स्वशरीरगतसुखादिभि' स्वान्तःकरणसन्निकृष्टत्वात्तेषामेवानुभवोन यज्ञदत्तशरीरगतसुखादीनां, स्वकरणसन्निकर्षाभावात्। मोक्षावस्थायान्तु तदावरकाज्ञानस्य ध्वंसात्सर्वविषयकानुभवस्येष्टापत्तिः। "सर्वं हि पश्य पश्यति, सर्वमाप्नोति सर्वशः" इत्यादिश्रुते। परमते तु स्वरूपस्यैकत्वादुक्तदोषोद्धारासम्भवः, सिद्धान्ते तु प्रतिदेहं स्वरुपभेदान्नोक्तदोषावकाशइति संक्षेप ॥ २३ ॥

सू० अवस्थितिवैशेष्यादिति चेन्नाऽभ्युपगमात् हृदि हि॥

२। ३। २४ ॥

वेदान्तपारिजातसौरभः।

अवस्थितिविशेषभावाद्दृष्टान्तवैषम्यमिति चेन्न,देहैकदेशे हरिचन्दनवत् हृदि ह्ययमात्मेति जीवावस्थित्यभ्युपगमात् ॥ २४ ॥

वेदान्तकौस्तुभः।

अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि।

ननु चन्दनदृष्टान्तोन युक्तः, अवस्थितिवैशेष्यात्, चन्दनबिन्दोरवस्थितिर्देहैकदेशे प्रत्यक्षतो-

दृश्यते, जीवस्यावस्थितिस्तु देहैकदेशे न ज्ञायते, सर्वत्र चैतन्योपलब्धेरित्येवमुभयोरवस्थितिवैलक्षण्यादिति चेन्न, कुतः ? अणुपरिमाणस्य जीवस्यावस्थितेर्देहैकदेशे हृदि " योऽयम्विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरि"त्यादिश्रुतिभिरभ्युपगमात्। सकलशरीरेऽवस्थितिस्तु धर्म्मभूतस्य ज्ञानस्येति हि शब्दार्थः ॥ २४ ॥

वेदान्तकौस्तुभप्रभा।

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि।

ननु दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यं, हरिचन्दनबिन्दोर्हि देहैकदेशविशेषेऽवस्थितेर्विशेषभावाच्छरीरैकदेशावस्थानस्य प्रत्यक्षत्वात्तथाभावः। आत्मनस्तु न तथेति चेन्न, आत्मनोऽप्यवस्थितेर्देशविशेषाभ्युपगमात्। तथाह्याह श्रुतिः "हृदि ह्येष आत्मासवा एष आत्मा हृदी" ति " योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिरि" त्यादि ॥ २४ ॥

सू० गुणाद्वा-लोकवत् । २।३।२५॥

वेदान्तपारिजातसौरभः।

देहे प्रकाशोजीवगुणादेव, कोष्ठे दीपालोकादिवत् ॥ २५ ॥

वेदान्तकौस्तुभः।

ननु धर्म्मधर्म्मिवादोन युक्तः स्वरूपमात्रेणै-वेष्टसिद्धेरत्राह —

गुणाद्वा-लोकवत्।

वाशब्दः शङ्कानिराकरणार्थः। देहैकदेशस्थ-स्याणुपरिमाणकस्यात्मनोव्यापकात् ज्ञानलक्षणा-द्गुणात्सकलशरीरगतसुखाद्युपलब्धिसिद्धिर्नान्यथे-त्यर्थः "लोकवत्" लोके मणिद्युमणिदीपादयः एकदेशस्था अपि गुणैरेव स्वस्वानुरूपान्वहन्दे-शान् प्रकाशयन्ति "आलोकवदिति" वा छेदः, मण्यादीनामालोकवत्, साङ्ख्याद्याभिमतोनिर्धर्म्म-कात्मवादः प्राग्निराकृतएव ॥ २५॥

वेदान्तकौस्तुभप्रभा।

आत्मनोदेशविशेषे स्थितिख्यापनाय चन्दनदृष्टान्तं प्रदर्श्य-एकदेशवर्त्तिनोऽपि सकलदेहं व्याप्यकार्यकरत्वे प्रकार-माह —

गुणाद्वा-लोकवत्।

वाशब्दोमतान्तरव्यावृत्त्यर्थः। आत्मा स्वगुणेन ज्ञानेन सकल-देहं व्याप्यावस्थितः। आलोकवत्, यथा मणिद्युमण्यादीनामेक-देशस्थितानामप्यालोकोऽनेकदेशव्यापी दृश्यते, तद्वदात्मज्ञान-मपि ॥ २५ ॥

सू० व्यतिरेकोगन्धवत्तथा हि दर्शयति । २।३।२६॥

वेदान्तपारिजातसौरभः ।

गुणभूतस्य ज्ञानस्य व्यतिरेकस्तु गन्धवदुपपद्यते एतादृशगुणाश्रयं जीवं "स एष प्रविष्ट आलोमभ्य आनखेभ्यः" इति श्रुतिर्दर्शयति ॥ २६ ॥

वेदान्तकौस्तुभः ।

व्यतिरेकोगन्धवत्तथा हि दर्शयति ।

हृद्गतजीवाद्गुणिनस्तद्गुणभूतस्य ज्ञानस्य व्यतिरेकः अधिकदेशवृत्तित्वं गन्धवत्, अल्पदेशस्थात्पुष्पाद्गन्धस्याधिकदेशवृत्तित्ववदित्यर्थः । अधिकदेशवृत्तिज्ञानगुणेन सकलशरीरवृत्तित्वमात्मनोदर्शयति श्रुतिः । "स एष प्रविष्ट-आलोमभ्यः आनखेभ्यः" इति ॥ २६ ॥

वेदान्तकौस्तुभप्रभा ।

ननु ज्ञानस्य व्यापकत्वेऽणुजीवव्यतिरेकेणावस्थानं वक्तव्यम्, तच्चायुक्तं, गुणिव्यतिरिक्तदेशे गुणस्यावस्थानादर्शनात् । नच

दीपप्रभान्यायेनेति वाच्यम्, प्रभाया दीपसंयुक्तद्रव्यान्तरत्वादित्यतआह —

व्यतिरेकोगन्धवत्तथा हि दर्शयति ।

यथा गुणस्यापि गन्धस्य गुणिव्यतिरेकेण वृत्तिः पुष्पपेटिकातोदूरस्थितस्य गन्धोपलम्भदर्शनात्तद्द्रुणिव्यतिरेकेण ज्ञानस्येत्यर्थः । अतएवात्मनश्चैतन्यगुणेनैव देहे व्याप्तिरित्यत्र श्रुतिमाह, तथा चेति, ज्ञानगुणेन सर्वदेहव्यापित्वमात्मनोदर्शयति श्रुतिः "स एष इह प्रविष्ट आलोमभ्य आनखेभ्य."इति ॥ २६ ॥

सू० पृथगुपदेशात् २।३।२७॥

वेदान्तपारिजातसौरभः ।

जीवतद्ज्ञानयोर्ज्ञानत्वाविशेषेऽपि धर्म्मधर्मिभावोयुक्तएव । कुतः ? "प्रज्ञया शरीरमारूह्ये"त्यादिपृथगुपदेशात् ॥ २७ ॥

वेदान्तकौस्तुभ. ।

ननु ज्ञानमात्मतत्त्वमस्तु तत्राणुर्धर्मी व्यापकोधर्मइति भेदोन युक्त इत्याशङ्क्याह —

पृथगुपदेशात् ।

धर्मिणोजीवाद्धर्म्मस्य प्रज्ञया शरीरं समारुह्येति तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति च

पृथगुपदेशात् ज्ञानत्वाविशेषऽपि श्रुत्युक्त-
त्वात् धर्मधर्मिणोर्भेदोयुक्तइत्यर्थः । नहि साजा-
त्यमभेदे नियामकम्, प्रभातद्वतोस्तेजस्त्वा-
विशेषेऽपि भेददर्शनात् ॥ २७ ॥

वेदान्तकौस्तुभप्रभा ।

पृथगुपदेशात् ।

इतश्च आत्मगुणोव्यतिरिक्तः । कुतः ? "प्रज्ञया शरीरं समा-
रुह्ये"ति "तदेषां प्राणानां विज्ञानेन विज्ञानमादाये"ति च जीवा-
द्विज्ञानस्य पृथगुपदेशात् । "अविनाशी वा अरे अयमात्माऽनु-
च्छित्तिधर्म्मे"त्यादिना तस्य नित्यत्वप्रतिपादनाच्च । तथा च स्मृतिः
"यथा न क्रियते ज्योत्स्नामलप्रक्षालनान्मणेः । दोषप्रहाणान्न
ज्ञानमात्मनः क्रियते तथा । यथोदपानखननात् क्रियते न
जलान्तरम् । सदेव नीयते व्यक्तिमसतः सम्भवः कुतः । तथा
हेयगुणध्वंसादवबोधादयोगुणाः । प्रकाशन्ते न जन्यन्ते नित्या-
एवात्मनोहि ते" इति ॥ २७ ॥

सू० तद्गुणसारत्वात्तु तद्व्यपदेशः।

प्राज्ञवत् ॥२।३।२८॥

वेदान्तपारिजातसौरभः ।

बृहन्तोगुणायस्मिन्निति ब्रह्मेति प्राज्ञवदात्मा

विभुगुणत्वान्नित्यं विभुमिति व्यपदिष्टः दृष्टान्ते बृहदेव प्राज्ञोगुणैरपि बृहद्भवति, दार्ष्टान्ते तु जीवोऽणुपरिमाणकोगुणेन विभुरिति विशेषः ॥ २८ ॥

वेदान्तकौस्तुभः ।

ननु जीवोयदि स्वरूपतोऽणुस्तर्हि "नित्यं विभुं सर्वगतं सुसूक्ष्मं नित्यः सर्वगतः स्थाणुरि" त्यादिविभुत्वप्रतिपादकवाक्यव्याकोपः स्यान्नेत्याह —

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ।

तुशब्दः शङ्कानिरासार्थः । विभुगुणसारत्वात् जीवस्य तद्व्यपदेशः "नित्यं विभुमि"त्यादिविभुत्वव्यपदेशउपपद्यते "प्राज्ञवत्" प्राज्ञस्य बृहन्तोगुणाअस्मिन्निति ब्रह्मेति श्रुत्या गुणयोगादपि बृहत्वमुच्यते प्राज्ञस्य स्वतोऽपि बृहत्वादेकदेशिदृष्टान्तः । एवं विभुगुणत्वाद्विभुत्वव्यपदेशोनतु स्वरूपेण ।अत्रेदं बोध्यम्, समानातिशयशून्योविभुः श्रीपुरुषोत्तमोवासुदेवः । "न तत्समश्चाभ्यधिकश्च दृश्यते" इति श्रुतेः । अन्येषां प्रकृतिकालजीवगुणादीनां विभुत्वं सापेक्षम् । एवं

भूतस्य जीवासाधारणधर्मस्य नित्यस्यापि शङ्कोच-विकाशौ भवतः "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाश-यति भारत!" इति श्रीमुखवचनात् ॥ २८ ॥

वेदान्तकौस्तुभप्रभा।

ननु "नित्यं विभुं सर्वगतं सुसूक्ष्मं नित्यः सर्वगतः स्थाणु-रि"त्यादिविभुत्वप्रतिपादकश्रुतिस्मृतिविरोधस्तदवस्थदेवेत्याशङ्का-यामाह —

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्।

तुशब्दः शङ्कानिरासार्थः। स विभुज्ञानगुणएव, सारोविभुत्व-व्यपदेशोमुख्योयस्य तस्य भावस्तस्मात्तद्व्यपदेशः विभुत्वव्यप-देशः। तत्रैकदेशिदृष्टान्तमाह। प्राज्ञवदिति। यथा प्राज्ञस्य ब्रह्मणः बृहन्तोगुणाअस्मिन्निति ब्रह्मेति श्रुत्युक्ता निरुक्तिः। एवं प्रत्यगा-त्मनोऽपि विभुगुणत्वाद्विभुत्वव्यपदेशोन स्वरूपेण, अन्यथा पूर्वोदाहृतानि श्रुतिस्मृतिसूत्राणि बाध्येरन् ॥ २८ ॥

सू० यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥२।३।२९॥

वेदान्तपारिजातसौरभः।

जीवस्य गुणनिबन्धनोविभुत्वव्यपदेशोन

विरुद्धः, गुणस्य यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् । "नहि विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते, अविनाशित्वादविनाशी वा अरे ! अयमात्मे" ति तद्दर्शनात् ॥ २६ ॥

वेदान्तकौस्तुभः।

ननु जीवगुणस्याग*मापायित्वे तन्निमित्तकविभुत्वापगमादणोर्विभुत्वव्यपदेशोदोषएवात्राह —

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्।

चकारः शङ्काव्यावृत्त्यर्थः। नित्यएव आत्मा, तद्गुणस्यापि यावदात्मभावित्वात् आत्मानुबन्धिनित्यधर्मत्वाद्विभुत्वव्यपदेशोन दोषः । "नहि विज्ञातुर्विज्ञातेर्विपरिलोपोविद्यते, अविनाशित्वात् । अविनाशी वा अरे ! अयमात्माऽनुच्छित्तिधर्मे" ति यावदात्मभावित्ववादिवाक्यदर्शनात् ॥ २६ ॥

वेदान्तकौस्तुभप्रभा।

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्।

यावदात्मवृत्तित्वान्नित्यत्वाच्च गुणस्य अतस्तेन प्रत्यगात्मनो-

---

* अभिव्यक्तानभिव्यक्तत्वे।

विभुत्वव्यपदेशोन विरुद्धइत्यर्थः। खण्डोगौरित्यादिषु तथा दर्शनात् ॥ २९ ॥

सू० पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ २।३।३०।

वेदान्तपारिजातसौरभः।

अस्य ज्ञानस्य सुषुप्त्यादौ सतएव जाग्रदादावभिव्यक्तिसंभवाद्यावदात्मभावित्वमेव । यथा पुंस्त्वादेर्बाल्ये सतएव यौवनेऽभिव्यक्तिः ॥ ३० ॥

वेदान्तकौस्तुभः।

ननु जीवगुणभूतस्य ज्ञानस्य नित्यत्वं चेत्तर्हि सुषुप्त्यादौ कुतस्तदप्रतीतिरित्यत्राह —

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्।

तुशब्दोऽवधारणे। जीवधर्मभूतस्य ज्ञानस्य यावदात्मभावित्वमेव। कुतः ? सतोऽभिव्यक्तियोगात्। अस्य धर्मभूतस्य ज्ञानस्य सुषुप्त्यादिषु सतएव, अनभिव्यक्तरूपेण विद्यमानस्यैव जागरादिषु अभिव्यक्तियोगात्। यथा बाल्ये सतएव पुंस्त्वादेर्यौवनेऽभिव्यक्तियोगः । औदार्यसौशील्या-

दयः सहजागुणाआदिशब्देन गृह्यन्ते ॥ ३० ॥

वेदान्तकौस्तुभप्रभा ।

ननु तस्य नित्यत्वे सुषुप्त्यादौ विषयानुभवापत्तिरिति चेत्तत्राह —

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ।

तुशब्दोऽवधारणे । सुषुप्त्यादौ सतएव, तस्यानभिव्यक्तस्य जाग्रदादावभिव्यक्तिसम्भवाद्यावदात्मभावित्वमेव, प्रत्यगात्मज्ञानस्य पुंस्त्वादिवत् । यथा बाल्ये विद्यमानस्यैव पुंस्त्वस्य सप्तमधातोर्वीवनेऽभिव्यक्तिः, अन्यथा पुंस्त्वादेरागन्तुकतापत्तेस्तथात्वे च पुंस्त्वक्लीबत्वविभागासिद्धिरित्यर्थः ॥ ३० ॥

सू० नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमोवाऽन्यथा । २।३।३१।

वेदान्तपारिजातसौरभः ।

सर्वगतात्मवादे आत्मोपलब्ध्यनुपलब्ध्योर्बन्धमोक्षयोर्नित्यं प्रसङ्गः स्यान्नित्यबद्धोवा नित्यमुक्तोवाऽऽत्मेत्यन्यतरनियमोवा स्यात् ॥ ३१ ॥

वेदान्तकौस्तुभः ।

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमोवाऽन्यथा ।

चेतनभूतात्मविभुत्ववादिमते दोषकथनार्थं सूत्रम् । अन्यथा ज्ञातृत्वाद्यात्मधर्मकोज्ञानस्वरूपोऽणुपरिमाणकआत्मेत्यस्मत्पक्षादन्यप्रकारके ज्ञानमात्रसर्वगतात्मवादे नित्यमुपलब्ध्यनुपलब्ध्योः प्रसङ्गः स्यात् । व्यापकस्यात्मनोऽनावृतत्वादुपलब्धिः, संसारसद्भावादनुपलब्धिरेवं युगपद्बन्धमोक्षौ प्रसज्येयाताम्, अन्यतरनियमोवा । अस्माकं तु जीवात्मनोऽणुपरिमाणत्वात् गत्यागत्योः आवृतत्वानावृतत्वयोर्गम्यगन्त्रोश्च सम्भवात् बन्धमोक्षव्यवस्थोपपद्यते । तव तूक्तलक्षणयोर्बन्धमोक्षयोरन्यतरएव प्रसज्येत । ज्ञानमात्रस्याचलस्यात्मनोनित्यं बन्धएव स्यात् । अथवाऽपवर्गएव स्यात्, इति नियमः प्राप्नोति । तस्मात् ज्ञातृत्ववान् ज्ञानस्वरूपोऽणुपरिमाणोजीवइति सिद्धम् ॥ ३१ ॥ इत्युत्क्रान्त्यधिकरणम् ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमोवाऽन्यथा ।

अन्यथा प्रत्यगात्मनोज्ञानमात्रत्वे सर्वगतत्वे च नित्यमेवो-

पलब्ध्यनुपलब्धी प्रसज्ज्येयातां, तयोरन्यतरनियमोवा उपलब्धिरेव वा नित्यं स्यादनुपलब्धिरेव वेति। अयम्भावः उपलब्धिरनुपलब्धिश्च तावल्लोकसिद्धा तयोरयं सर्वगतोज्ञानात्मा चेत्कारणं तर्हि सर्वलोकस्य सर्वदा सर्वत्र ते प्राप्नुयाताम्। यद्युपलब्धेरेव हेतुस्तदा सर्वदा सर्वत्र कस्याप्यनुपलब्धिर्न स्यात्। अनुपलब्धेरेव चेद्धेतुस्तर्हि कस्यापि कुत्राप्युपलब्धिर्न स्यादिति। नच करणायत्ता तयोर्व्यवस्था, सर्वात्मनां विभुत्वेन सर्वकरणैः सर्वदा संयोगस्याविशेषादित्यादि पूर्वमेव विस्तृतम्। सिद्धान्ते तु तस्य शरीरान्तरेऽवस्थितत्वात्तत्रैवोपलब्धिर्नान्यत्रेति व्यवस्था सिध्यति ॥ ३१ ॥ इत्युत्क्रान्त्यधिकरणम् ॥ ६ ॥

सू०कर्त्ता शास्त्रार्थवत्त्वात् ॥

२।३।३२ ॥

वेदान्तपारिजातसौरभः।

आत्मैव कर्त्ता "स्वर्गकामोयजेत मुमुक्षुर्ब्रह्मोपासीते" त्यादेर्भुक्तिमुक्त्युपायबोधकस्य शास्त्रस्यार्थवत्त्वात् ॥ ३२ ॥

वेदान्तकौस्तुभः।

इदानीं प्रसङ्गाज्जीवात्मनः कर्तृत्वं विचार्यते —

कर्त्ता शास्त्रार्थवत्त्वात् ।

जीवात्मा कर्त्ताऽस्ति ? न वेति ? सन्देहे, "हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्, उभौ तौ न विजानीतोनाऽयं हन्ति न हन्यते" इतिकठवल्लीषु जीवात्मकर्त्तृत्वप्रतिषेधात् । "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इति भगवद्वचनाच्च गुणानां कर्त्तृत्वमास्ति, आत्मा त्वकर्तैवेति पूर्वपक्षे, ब्रूमः, आत्मैव कर्त्ताऽस्ति । कस्मात् ? । शास्त्रार्थवत्त्वात् । " कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः यजेत्स्वर्गकामोमुमुक्षुर्वै शरणं व्रजेत्सोऽन्वेष्टव्यः सविजिज्ञासितव्यः, मुमुक्षुर्ब्रह्मोपासीत, शान्तउपासीते" त्यादेर्भुक्तिमुक्त्यर्हचेतनापेक्षितसाधनबोधकस्य शास्त्रस्यार्थवत्त्वादचेतनानां तेषां कर्त्तृत्वे उपायबोधकशास्त्रस्यानर्थक्यं स्यात् । श्रुतिस्तु आत्मनोनित्यत्वेनाहन्तव्यत्वं दर्शयति । नतु कर्त्तृत्वनिषेधविषया सा स्मृतिरपि प्राकृतगुणसम्मूढस्यात्मनः सांसारिकप्रवृत्तौ कर्त्तृत्वं प्राकृतगुणप्रयुक्तमिति दर्शयति, एतच्च श्रीमुखेनैवोक्तं " प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुण-

कर्मस्वि"ति गुणानां कर्तृत्वे आत्मनश्चाकर्तृत्वे "अथ चेत्त्वमिमं धर्म्यं सङ्ग्रामं न करिष्यसि कर्मणैव हि संसिद्धिमास्थिताजनकादयः । लोकसङ्ग्रहमेवापि संपश्यन्कर्त्तुमर्हसि । यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् । यत्तपस्यसि कौन्तेय ! तत्कुरुष्व मदर्पणम् । स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव"इत्यादिवाक्यानाञ्च बाधः स्यात् ॥ ३२ ॥

वेदान्तकौस्तुभप्रभा ।

कर्त्ता शास्त्रार्थवत्त्वात् ।

आत्मनोज्ञातृत्ववत्कर्तृत्वमप्यस्ति ? न वेति संशये, आत्मा कर्त्तैव । कुतः ? "यजेत्स्वर्गकामः मुमुक्षुर्वै शरणं व्रजेत् सोऽन्वेष्टव्यः स विजिज्ञासितव्यः"इत्यादिभोगमोक्षसाधनोपदेशशास्त्रस्यार्थवत्त्वात् । नन्वकर्तैवात्मा, तथाहि "न जायते म्रियते वे"ति तस्य जन्मादिविकारं प्रतिषिध्य, "हन्ता चेन्मन्यते हन्तुम्, उभौ तौ न विजानीतोनायं हन्ति न हन्यते" हननक्रियायाव्यापाराश्रयत्वं फलाश्रयत्वं वा मन्यमानोऽज्ञइति कठवल्ल्युक्तेः, "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते । नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति । कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते" इत्यादिस्मृतिभ्यश्च प्रकृतेरेव कर्तृत्वेन पुरुषस्य भोक्तृत्वमात्रमेव, यथा जपाकुसुमस्थं लो-

हित्यं स्फटिके भाति तद्वन्मनोवृत्तिकृत्यादिकमात्मन्यध्यस्तं भासते, ननु तात्त्विकं, तथात्वे ह्यात्मनोविकारित्वापत्तेः सुषुप्तौ मनसोऽभावे कृत्यादीनामदर्शनात्, अकर्त्रात्मबोधकश्रुतिव्याकोपाच्चेति चेन्न, असम्भवादिति ब्रूमः । तथाहि यथाप्रत्येकं स्फटिके जपाकुसुमे च लौहित्यं भेदेन भाति प्रत्यक्षप्रमाणेन, तथात्मनि मनसि च प्रत्येकं कर्तृत्वं भायात्, आत्मा कृत्याद्याश्रयत्वेनाध्यस्तत्वात्, कर्तेति मनः स्वतः कर्त्रिति कदापि साक्षात्काराभावात् दृष्टान्तवैषम्यं, अन्यथा मनः कर्त्रिति आत्माऽकर्तेति कदाचिद्भेदेनापि भान स्यादित्यर्थः, विकल्पासहत्वाच्च । तथाहि सोपाधिकोऽयमध्यासः ? निरुपाधिकोवा ? नान्त्यः, नेदं रजतमिति वत् सकृदेव नायं कर्तेति अकर्तृत्वयाथात्म्यज्ञानेन तन्निवृत्त्यापत्तेः, कुसुमस्येवोपाधेः प्रतिबन्धकस्याभावात् । नाप्याद्यः रक्तं पुष्पमिति प्रमावत् कदाचिन्मनः कर्त्रिति प्रमया लोहितः स्फटिकइति भ्रमवच्चैतन्यं कर्त्रिति भ्रमेण चावश्यं भाव्यमानत्वात् । ननु कुसुमस्य स्फटिकात्मनाऽनध्यस्तत्वात् मनसस्तु चिदात्मनाऽध्यस्तत्वादिति वैषम्येन तज्ज्ञानाऽभावोऽविरुद्धइति चेन्न, अधिष्ठानात्मनानध्यस्तं जपाकुसुमादिस्थानीयमुपाधिं विना भीषणत्वयुक्तसर्पस्य रज्ज्वात्मनेव कर्तृत्वादियुक्तमनसश्चिदात्मनाध्यासे रज्जौ भीषणत्वान्तरस्येवात्मनि कर्तृत्वान्तरस्याध्यासस्य सोपाधिकत्वायोगात् । न चात्मनि कर्तृत्वान्तरमेवाध्यस्तमिति वाच्यं, अध्यस्यमानधर्माश्रयस्याभेदारोपे औपाधिकत्वासम्भवात् । ननु रज्जुसर्पादावध्यस्यमानभीषणत्वादिविशिष्टसर्पापेक्षयाधिकसत्ताकसर्पान्तरस्य सम्भवेनास्य निरुपाधिकत्वं, अत्र त्वध्यस्यमानान्तःकरणापेक्षया कर्तृत्वादिधर्मविशिष्टेतरस्याधिकसत्ताकस्यात्यन्ताभावात् । अन्तःकरणमात्रस्योपाधित्वमिति चेन्न, स्फटिकेऽध्यस्यमानप्रातिभासिकलौहित्यापेक्षयाऽधिकसत्ताकलौहित्यान्त-

रस्य सत्त्वेन तस्यापि निरुपाधिकत्वापत्तेः । नच यत्र धर्मी तादात्म्येनारोपितस्ततोऽधिकसत्ताकोऽतिरिक्तश्चास्ति स निरुपाधिकोऽध्यासः रज्जुसर्पादिवत्, लोहितः स्फटिकइत्यत्र तु न धर्मिणस्तादात्म्येनारोपइति सोपाधिकलोहितोपपत्तिरिति वाच्यं, मम मनोमम बुद्धिर्ममान्तः करणमिति भेदधिया प्रतिबन्धाद्भेदारोपासम्भवेन धर्ममात्रस्यैव वक्तव्यतया लौहित्यादेरिव कर्तृत्वादेरुभयत्र प्रतीतेर्दुर्वारत्वात् । सोपाधिकस्थले धर्मारोपेणैवोपपत्त्या धर्म्यारोपस्याप्रामाणिकत्वाच्च । समीपे स्थितउपदधाति स्वीयं धर्ममन्यत्रेत्युपाधिलक्षणत्वात् । अभेदग्रहणदशायामप्ययं भीषणः सर्पो भीषणः अहं गौरः शरीरं गौरमिति वन्मनः कर्तृ चैतन्यं कर्त्रिति प्रतीत्यापत्तेः । अपि चास्मिन्नेवाधिकरणे भवद्भिरपि साङ्ख्यरीत्या बुद्धेः कर्तृत्वे प्राप्ते जीवस्यैवेति सिद्धान्तितत्वेन स्वोक्तविरोधाच्च । बुद्ध्यात्मनोरविवेकनिबन्धनस्य जीवनिष्ठकर्तृत्वस्य साङ्ख्यमतेऽपि सत्त्वेनाविशेषात् । किञ्च बन्धतन्निवृत्त्यौपयिककृत्योः स्वध्वंसाभावस्वफलभात्काभ्यां सामानाधिकरण्यनियमेन बुद्धेः कर्तृत्वायोगात् । कर्तृत्वभोक्तृत्वाद्यनर्थरूपोबन्धोबुद्धिगतश्चेत्ततोमोक्षोऽपि तद्गतः स्यात् । बन्धमोक्षयोः सामानाधिकरण्यनियमात् अज्ञानमपि दुःखादिभोगद्वारेणोवानर्थइति तव सिद्धान्तादित्यर्थः । नच बुद्धिगतं सद्रूपं भोक्तृत्वादिकं तद्धर्मत्वात् नानर्थरूपं, किन्तु तदुपाधिकं मिथ्याभोक्तृत्वादिकमिति वाच्यं, एतत्कल्पनायाः कर्तृत्वाध्याससिद्धयधीनत्वेनान्योऽन्याश्रयात् । मोक्षस्यापि सत्यस्यैव पुरुषार्थत्ववत्, भोक्तृत्वादिबन्धस्यापि सत्यस्यैवानर्थत्वाच्च । तदुक्तं वार्तिके बौद्धं प्रति "नहि स्वप्नसुखाद्यर्थं पुमान्कश्चित्प्रवर्त्तते । यादृच्छिकत्वात् स्वाप्नस्य तूष्णीमास्येत पण्डितैरि"ति स्थूलोभुञ्जे स्थूलः करोमीत्यादिना देहस्यानर्थान्वयापाताच्च । नापि बुद्ध्युपाधिकं ह्यात्मस्थभोक्तृत्वा-

दिकमनर्थः, ननु देहस्थमिति वाच्यं, अनर्थाश्रयस्यात्मनोऽनर्थकोटित्वायोगात्, भ्रमसमये ऽहम्भोक्तेति प्रमाकाले बुद्धिर्भोक्त्रीति प्रतीत्यापत्त्या शुद्धात्मनि कदापि तत्प्रतीत्यभावापत्तेश्च । अपि च मनसः श्रवणादिसाधनकर्तृत्वेन तत्फलमोक्षस्यापि तत्रैवापतेः शास्त्रफलं प्रयोक्तरीतिन्यायात् । यत्र साधनकृतिस्तस्यैव फलभाक्त्वात् । अन्यथा कृतनाशाकृताभ्यागमप्रसङ्गात् बन्धमोक्षयोर्वैयधिकरण्यापत्तेश्च, नच शुद्धोपहितयोः स्वाभाविकभेदाभावेन बन्धमोक्षयोः सामानाधिकरण्यं सूपपन्नमिति वाच्यं, उपहितगतानर्थस्य शुद्धगतत्ववत्तद्गतदृश्यत्वमिथ्यात्वादीनामपि शुद्धगतत्वापत्तेः । नच जातेष्टिपितृश्राद्धादौ व्यभिचारइति वाच्यं, कृतिफलयोः सामानाधिकरण्योपपादकोद्देश्यतासम्बन्धस्य फलाधिकरणे पुत्रपित्रादौ सत्त्वात् जातेष्टावपि पित्रर्थं पुत्रगतपूतत्वादि तदनुष्ठातुः पितुरेव फलमित्यर्थः । तथैव श्राद्धेऽपि बोध्यम् । आरोपितानारोपितसाधारणकर्तृत्वस्य फलं प्रति प्रयोजकत्वे बुद्धिदेहयोर्मोक्षान्वयापत्तिः । किञ्च "तन्मनोऽनुकुरुत"इत्यादिश्रुतौ मनसः कृतिकर्मत्वस्य श्रूयमाणत्वस्य "श्रोत्रेण विद्धांसोमनसे"ति करणत्वस्य "मनउत्क्रामन्मीलितइवाभून्निवन्नास्त"इत्यादौ मनउत्क्रमणेऽप्यात्मनः कर्तृत्वस्य, "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षन् क्रीडन्रममाण"इत्यादौ स्वरूपाविर्भावे परमुक्तावपि कर्तृत्वस्य, "विज्ञानं यज्ञं तनुते विज्ञानात्मा योऽयं वेदजिघ्राणी"ति "सआत्मा आनन्दभुक् चेतोमुखप्राज्ञ"इत्यादिश्रुतौ विज्ञानात्मनिष्ठकर्तृत्वस्य श्रवणात् । न चात्र विज्ञानशब्दोबुद्धिपरइति वाच्यं, "विज्ञानं ब्रह्म चेद्वेद तस्माच्च न प्रमाद्यति शरीरे पाप्मनोहित्वा सर्वान्कामान्समश्नुत"इति वाक्यशेषात् । किञ्चाहं करोमीत्यादिप्रत्यक्षेण आत्मा मोक्षसाधनकृतिमान् फलान्वयित्वात्सम्मतवत् । अज्ञानं ज्ञानस-

मानाधिकरणं बन्धरूपत्वात्सम्मतवदित्याद्यनुमानैश्च "कर्ता विज्ञानात्मा योऽयं वेदजिघ्राणी"त्यादिश्रुतिभिश्च, यद्यात्मा कर्त्ता न स्यात्तर्हि भोगमोक्षसाधनोपदेशोऽपि न स्यादित्यर्थापत्त्या च सिद्धस्यात्मकर्तृत्वस्य बाधकादर्शनात् । नच श्रुतिरनुवादपरा अहमर्थान्यात्मकर्तृत्वस्य "नामरूपे व्याकरोत्स हि सर्वस्य कर्ते"ति श्रुत्युक्तेश्वरकर्तृत्वस्य च प्रत्यक्षेणाप्राप्तत्वात् । नच निर्धर्मकत्वं बाधकं निर्धर्मकत्वरूपधर्मस्य भावाभावाभ्यां व्याघातात् । नापि निष्क्रियत्वं बाधकं क्रियायाधात्वर्थत्वे ह्यात्मन्यप्यस्त्यादिधात्वर्थसत्तादेः सत्त्वेन तत्त्वासिद्धत्वात् परिस्पन्दादिपरत्वे चेष्टापत्तेः । कृतिपरत्वे च "रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिमि"त्यादिश्रुत्या कर्तृत्वस्य चेतने विहितत्वेनासिद्धेः । नच निष्क्रियत्वश्रुतिविरोधः, तस्याब्रह्मणि परतन्त्रक्रियायाः प्रत्यगात्मनि स्वतन्त्रकर्तृत्वस्य निषेधकत्वात् । अन्यथा "स्वाभाविकी ज्ञानबलक्रिया चे"ति श्रुतेः "नहि द्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वात्, नहि श्रोतुः श्रुतेः, नहि मन्तुर्मतेरि"त्यादिश्रुतेश्च बाधस्य तवापि साम्यात् । नापि निर्विकारत्वं बाधकं, आकाशस्य संयोगाद्याश्रयत्वेऽपि निर्विकारित्ववदात्मनोऽज्ञानतद्ध्वंसाश्रयत्वेऽपि निर्विकारित्ववच्च ज्ञानादिगुणाश्रयत्वेऽपि विकारित्वायोगात् । "अविकार्योऽयमुच्यते" इत्यादि शास्त्राच्च । ननु सुषुप्तौ मनसोऽभावे कर्तृत्वादि दर्शनं बाधकमिति चेन्न, तत्रापि श्वासादिकर्तृत्वदर्शनात् । तदसिद्धेः, "सुप्तोभूर्भूरित्यादिश्वसिती"त्यादिश्रुतेः देहादिवन्मनसोनिमित्तरूपत्वेनापि तदुपपत्तेश्च "कामः सङ्कल्पः" इत्यादिश्रुतिरपि मनसः करणत्वबोधनविषयकैव-"मनसैवाग्रे सङ्कल्पयती"ति श्रुत्यन्तरात् । अत्र स्पष्टम् करणत्वेन करणपाठदर्शनाच्च । "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति श्रुतेस्तु ह्यात्मनोभोक्तृत्वे देहादिवन्मनसोऽपि

सहकारित्वमात्रमित्येतत्परत्वात् । किञ्च " ध्यायतीव लेलायतीवे" ति श्रुताविवशब्दः परतन्त्रप्रभौ प्रभुरिवेति वत् जीवकर्तृत्वस्येश्वरपारतन्त्र्यप्रदर्शनपरः । नापि " प्रकृतेः क्रियमाणानी"ति स्मृतिर्बाधिका, तस्या अपि स्वतन्त्रकर्तृत्वनिषेधपरत्वाविशेषात्. सांसारिकप्रवृत्तावस्य कर्तृत्वं प्राकृतगुणप्रयुक्तं न स्वरूपप्रयुक्तमिति विवेचनाय गुणेषु कर्तृत्वं, तथा च कारणं गुणसङ्गोयस्य सदसद्योनिजन्मसु " इति " तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिरि"ति केवलशब्दः स्वातन्त्र्यपरः, उक्तार्थे मानं सांसारिकप्रवृत्तावधिष्ठानादिपञ्चकस्य हेतुत्वात् केवलं स्वातन्त्र्येण स्वात्मानं कर्तारं मन्यमानोदुर्मतिरित्यर्थः । अन्यथा गुणानां कर्तृत्वे तेषामेव भोक्तृत्वापत्तिः, तयोः सामानाधिकरण्यनियमात् । नह्यन्यकर्तृककर्मणाऽन्येषां भोक्तृत्वं लोकवेदयोः प्रसिद्धम्, । किञ्च गुणकर्तृकप्रवाहस्य नित्यत्वेनानिर्मोक्षप्रसङ्गोमुक्तानामपि पुनर्भोक्तृत्वप्रसङ्गश्च दुर्वारः, इतरकर्तृकत्वप्रसङ्गात् । किञ्च भोक्तृत्वमात्रस्वीकारे भुजिक्रियायाव्यापाराश्रयत्वेनावश्यम्भावात् कथमकर्तृत्वमात्मनइति पण्डितं मन्यैर्विचारणीयम् । "दैवं चैवात्र पञ्चममि"त्यत्र दैवशब्दः परमात्मपरः । तथा च परमात्माधीनमेव प्रत्यगात्मनः कर्तृत्वमिति वक्ष्यते सूत्रकारः " स कारयेत्पुण्यमथापि पापं न तावता दोषवानीशितापी " त्यादिश्रुतेः "केनापि देवेन हृदि स्थेन यथा नियुक्तोऽस्मि तथा करोमि" इत्यादिस्मृतेश्च बद्धावस्थायामनादिप्रकृतिसम्बन्धरूपया कर्मरूपया वाऽविद्यया संकुचितज्ञानक्रियाशक्तिकानां ज्ञानक्रियादौ मनआदिपारतन्त्र्यात् तत्सहायापेक्षा, मुक्तावस्थायां तु स्वपरस्वरूपयोराविर्भावेन बुद्धीन्द्रियादिनिरपेक्षत्वमिति विवेकः । " सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वशः " इति श्रुतेः

"यः सर्वज्ञः सहि सर्वस्य कर्त्ता, तदैक्षत बहु स्यां प्रजायेये" त्यादिश्रुतिभ्यईश्वरस्य तावन्नित्यक्रियाश्रयत्वं निर्विवादमेव, तथैव मुक्तानामपि ज्ञानक्रियादियोगोऽविरुद्धः। "स तत्र पर्येति जक्षत् क्रीडन्रममाणः सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ती" त्यादिश्रुतेः। "विहारोपदेशात् सङ्कल्पादेव तु तच्छ्रुतेरि"ति वक्ष्यमाणसूत्राच्च। ननु ज्ञानेच्छाकृत्यादीनां नित्यत्वे सदा सृष्ट्याद्यापत्तिः। नच कालस्य तत्र निमित्तत्वात्तद्भावाभावयोस्तत्र नियामकत्वेन नोक्तदोषावकाशइति वाच्यं, प्रधानादाविच्छादिसम्बन्धापादककालादेरपि सदा सत्त्वादिति चेन्न, सृष्टिप्रलयकालाभ्यां सम्बद्धायाईश्वरेच्छायाएव सिसृक्षात्वजिहीर्षात्वसम्भवात्। यथा परेषां वृत्तिश्चेदुपरागार्थेति मते व्यापकस्यापि चैतन्यस्य वृतिद्वारकएव घटादिसम्बन्धः। यथा च तार्किकमते सर्वगतस्यापि गोत्वादेः सास्नादिमत्येव सम्बन्धोनान्यत्र, यथा चास्मत्पक्षे विश्वात्मनः श्रीपुरुषोत्तमस्य परब्रह्मणः सर्वदेशकालवस्तुपरिच्छिन्नपदार्थेतरतया व्यापकत्वेन सर्वत्र सत्त्वेऽपि कस्मिंश्चिच्चरमजन्मन्येवाधिकारिविशेषे साक्षात्कारोनान्यत्र, तद्वत्परमेश्वरीयेच्छादेरपि सृष्टिकालादिविशेषावच्छिन्नप्रधानादिसम्बन्धोनान्यदेति नोक्तदोषसम्बन्धावकाशइत्यनवद्यम्। नच कर्त्तृत्वस्य क्लेशावहत्वान्न तत्र श्रौतं तात्पर्यमिति वाच्यं, दर्शपौर्णमासादावपि श्रवणमननादावपि चातात्पर्यप्रसङ्गात्, श्वासादेरकरणएव क्लेशदर्शनाच्च। "यदा करोत्यथ निस्तिष्ठती"ति श्रुत्यैव कर्त्तृत्वस्य फलसम्बन्धविधानाच्च। एतदुक्तं भवति, कर्त्तृत्वं बुद्धिगतं वा? शुद्धगतं वा? अहमर्थगतं वा? नाद्यः, तस्याजडत्वेन तत्र कर्त्तृत्वाङ्गीकारे घटादावतिव्याप्तेः। नापि द्वितीयः, अहमर्थभिन्नात्मासिद्धेः पूर्वमेव विस्तृतत्वात् परिशेषादहमर्थाभिन्नात्मनिष्ठमेव सिद्धम्। ननु माऽभूत्केवलयोर्बुद्ध्यात्मनोरेकतरस्य

कर्तृत्वमुक्तदोषात् तथाप्युपाधिसम्पर्कादकर्तुरप्यात्मनएव कर्तृत्वमिति चेन्न, तथात्वे षण्डस्यापि स्त्रीसम्बन्धमात्रेण प्रजोत्पादकत्वप्रसङ्गात्। तस्मात्स्वाभाविककर्तृत्वाद्याश्रयस्यैवाहमर्थाभिन्नज्ञातुरात्मनोबद्धावस्थायां करणविषयसम्बन्धनिमित्तकमेव कर्तृत्वं स्वाभाविकदाहकत्वाश्रयाग्नेः काष्ठादिसम्बन्धनिमित्तकदाहकत्ववत्सूपपन्नं, सुषुप्तिमूर्छादौ करणविषयादेरभावेन विशेषकर्तृत्वाभानस्यापि सूपपन्नत्वात्सामान्यश्वासादिकर्तृत्वस्योक्तश्रुत्या तत्रापि सत्त्वाच्च सर्वावास्थानुगतत्वमपि पूर्वोक्तरीत्या सूपपन्नतरम्। ननु तर्हि कर्तृत्वपक्षे जाग्रदवस्थायां कदापि तदुपरमोन स्यात्करणकलापस्य तदा सत्त्वादिति चेन्न, कर्मक्रियाभावस्य तदुपरमे प्रयोजकत्वात्। किञ्च सर्वस्यापि सचेतनस्य कर्मकर्त्रादिकलापस्य सर्वान्तरात्मश्रीपुरुषोत्तमपरतन्त्रत्वात् तन्नियन्तृत्वस्य च बद्धजीवानाद्यदृष्टफलभोगानुरूपदेशकालसापेक्षत्वेन तत्प्रेरणासङ्कल्पस्य भावाभावौ तद्भानोपरत्योर्नियामकौ भवतः, तथात्वे च तत्प्रयोजकसत्त्वे तद्भानं, तदभावे चोपरतिरित्यर्थः। बद्धजीवेत्याद्युक्त्या ब्रह्मणि वैषम्यादिशङ्कापि दूरतोनिरस्ता, तस्य स्वस्वादृष्टवृत्तितया तत्प्रयोजके ब्रह्मणि तदस्पर्शात्। "बुद्धिर्ज्ञानमसम्मोहः" इत्यादिश्लोकद्वयेन श्रीमुखगानात्। "फलमतउपपत्तेरि"ति वक्ष्यमाणन्यायाच्च। न चैवं शास्त्राचार्योपदेशस्य निर्विषयत्वेन वैयर्थ्यापत्तिरिति वाच्यम्, उपदेशस्य श्रीहरिप्रयोजकताज्ञानप्राक्कालीनप्रवृत्तिविधायकत्वेन नैराकाङ्क्ष्यादिति भावः। एवं भोक्तृत्वादयोऽप्यूहनीयाः। तथाहि सुषुप्त्यादौ "सुखमहमस्वाप्समि"ति "योऽहं जागर्मि सएवाहं सुखी सुप्तः"-इति स्मरणप्रत्यभिज्ञानप्रमाणसिद्धम्, मोक्षे च "जक्षत् क्रीडन्नि"ति श्रुतिप्रमाणसिद्धं भोक्तृत्वमिति सङ्क्षेपः ॥ ३२ ॥

सू० विहारोपदेशात् ॥२।३।३३॥

वेदान्तपारिजातसौरभः ।

" स्वे शरीरे यथाकामं परिवर्त्तते " इति विहारोपदेशात्स कर्त्ता ॥ ३३ ॥

वेदान्तकौस्तुभः ।

विहारोपदेशात् ।

" सईयतेऽमृतोयत्र काममि " ति " स्वे शरीरे यथाकामं परिवर्त्तते " इति च जीव-कर्त्तृकविहारस्य सञ्चरणस्योपदेशाज्जीवः कर्त्ते-त्यर्थः ॥ ३३ ॥

वेदान्तकौस्तुभप्रभा ।

विहारोपदेशात् ।

इतश्चाप्यस्य कर्तृत्वं विहारः सञ्चरणं "सईयतेऽमृतोयत्र काममि"ति "स्वे शरीरे यथाकामं परिवर्तते " इति च विहार-मुपदिशति श्रुतिः ॥ ३३ ॥

सू० उपादानात् । २।३।३४।

वेदान्तपारिजातसौरभः ।

" एवमेवैष एतान्प्राणान् गृहीत्वे "ति

उपादानश्रवणात् ॥ ३४ ॥

वेदान्तकौस्तुभः।

उपादानात्।

"स यथा महाराजः" इति प्रकृत्य "एवमेवैष एतान्प्राणान्गृहीत्वे"ति "तदेषां प्राणानां विज्ञानेन विज्ञानमादाये"ति चोपादानात् श्रूयमाणा ज्जीवः कर्त्ता ॥ ३४ ॥

वेदान्तकौस्तुभप्रभा।

उपादानात्।

इतश्चास्य कर्त्तृत्वं "स यथा महाराजः" इति प्रकृत्य "एवमेवैष एतान्प्राणान्गृहीत्वे"ति "तदेषां प्राणानां विज्ञानेन विज्ञानमादाये"ति चोपादानं सङ्कीर्त्यते, प्राणानामिन्द्रियाणां विज्ञानेन बुद्ध्यादिना विज्ञानं ग्राहकसामर्थ्यमादायेत्यर्थः ॥ ३४ ॥

सू० व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्य्ययः ।२।३।३५॥

वेदान्तपारिजातसौरभः।

क्रियायां "विज्ञानं यज्ञं तनुते" इतिकर्तृत्वव्यपदेशाच्चात्मा कर्ताऽस्ति, यदि विज्ञानपदेन

बुद्धिर्गृह्यते नतु जीवस्तर्हि करणविभक्तिप्रसङ्गः स्यात् ॥ ३५ ॥

वेदान्तकौस्तुभः ।

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ।

लौकिकवैदिकक्रियायां "विज्ञानं यज्ञं तनुते, कर्माणि तनुतेऽपि चे"ति विज्ञानशब्दोदितस्य जीवात्मनः कर्तृत्वव्यपदेशाच्च जीवात्मा कर्त्ता । ननु विज्ञानशब्देन बुद्धिर्ग्राह्या, नतु जीवइत्यत आह । नचेदिति । विज्ञानपदेन जीवोन गृह्यते बुद्धेर्ग्रहणं चेत्तर्हि निर्देशविपर्ययः स्यात्, बुद्धेः करणत्वात् । विज्ञानेनेति करणव्यपदेशः स्यात्, सतु नास्ति, तस्माद्यथोक्तविभक्त्या कर्तृत्वव्यपदेशोऽयं विज्ञानमिति । तस्माज्जीवः कर्त्तेत्यर्थः ॥ ३५ ॥

वेदान्तकौस्तुभप्रभा ।

इतश्चाप्यस्य कर्तृत्वमित्याह —

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ।

यतोऽस्य लौकिकवैदिकक्रियासु "विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चे"ति श्रुत्या कर्तृत्वं व्यपदिश्यते । विज्ञानशब्देन जीवस्य न व्यपदेशः, अपि तु बुद्धेरिति चेत्तर्हि निर्देशविप-

र्थयः स्यात्, बुद्धेः करणत्वेन विज्ञानेनेति करणविभक्त्या निर्देशः स्यात् ॥ ३५ ॥

सू० उपलब्धिवदनियमः ।२।३।३६।

वेदान्तपारिजातसौरभः ।

फलोपलब्धिक्रियायां नियमोनास्ति ॥ ३६ ॥

वेदान्तकौस्तुभः ।

नन्वयं जीवः कर्त्ता चेत्तर्हि पुण्याऽपुण्यक्रियाफलभूतमिष्टमनिष्टं चालोच्यानिष्टान्निर्विण्णोभूत्वेष्टसिद्धये तत्प्रदां क्रियामेव कुर्यादिति चेन्नेत्याह —

उपलब्धिवदनियमः ।

उपलब्धिवत् (यथा* च) प्रागनुष्ठितपुण्यापुण्यक्रियाफलभूतयोरिष्टाऽनिष्टयोर्नियमेनोपलब्धिस्तद्वत्क्रियायां नियमोनास्ति, दैवयोगाच्छुभायां क्वचिदशुभायां च प्रवृत्तिदर्शनात् ॥ ३६ ॥

वेदान्तकौस्तुभप्रभा ।

ननु जीवस्य कर्तृत्वे सदा स्वात्मनोहितमेव कुर्यान्नत्वहित-

---

* यथाऽस्य इति पाठो भाति क्वचित्पुस्तके ।

मित्यत्राह —

उपलब्धिवदनियमः।

तस्य परतन्त्रत्वाद्यथेष्टानिष्टयोरुपलब्धिस्तथा क्रियायाम— नियमः ॥ ३६ ॥

सू० शक्तिविपर्ययात् ॥ २।३।३७॥

वेदान्तपारिजातसौरभः।

बुद्धेः कर्तृत्वे करणशक्तिर्हीयेत, कर्तृशक्तिः स्यादतोजीवएव कर्त्ता ॥ ३७ ॥

वेदान्तकौस्तुभः।

ननु "विज्ञानं यज्ञं तनुते" इत्यत्र विज्ञान-शब्देन बुद्धेरेव ग्रहणं, सा च कर्त्री ततोन करण-विभक्तिप्रसङ्गोऽत्राह —

शक्तिविपर्ययात्।

जीवएव कर्त्ता। बुद्धेः कर्तृत्वाङ्गीकारे शक्ति-विपर्ययात् करणशक्तिर्हीयेत कर्तृशक्तिः स्यात्। किञ्च बुद्धेः कर्तृत्वे भोक्तृशक्तिरपि बुद्धेरेव स्यात्। एवं सति बन्धमोक्षौ बुद्धेरेव प्रसज्येया-ताम् ॥ ३७ ॥

———

वेदान्तकौस्तुभप्रभा।

शक्तिविपर्ययात्।

यदि विज्ञानशब्दो बुद्धिपरः स्यात्तर्हि बुद्धेः करणशक्तिर्हीयेत, कर्तृत्वादिशक्तिश्च स्यादतश्चापि जीवस्य कर्तृत्वम् ॥ ३७ ॥

सू० **समाध्यभावाच्च** ॥ २।३।३८ ।

वेदान्तपारिजातसौरभः।

आत्मनोऽकर्तृत्वेऽचेतनमात्राव्यातिरिक्तकर्तृकसमाध्यभावप्रसङ्गादात्मा कर्त्ता ॥ ३८ ॥

वेदान्तकौस्तुभः।

समाध्यभावाच्च।

चित्तवृत्तिनिरोधपूर्वकदेहेन्द्रियमनोबुद्ध्यादिविलक्षणस्वरूपचिन्तनानन्तरं ब्रह्मात्मकत्वेनावस्थानं समाधिरेवं लक्षणस्य मोक्षोपायभूतस्य समाधेर्जीवस्याकर्तृत्वेऽभावप्रसङ्गाच्च जीवएव कर्त्तेति गम्यते ॥ ३८ ॥

वेदान्तकौस्तुभप्रभा।

इतश्च प्रत्यगात्मनः कर्तृत्वमित्याह —

समाध्यभावाच्च।

जीवस्य कर्तृत्वाभावे मोक्षसाधनभूतसमाध्यभावश्च स्यात्,

बुद्ध्यादेरन्योऽस्मीति समाधौ बुद्धेः कर्तृत्वायोगात् ॥ ३८ ॥

सू० यथा च तक्षोभयथा ॥

॥ २ । ३ । ३९ ॥

वेदान्तपारिजातसौरभः ।

आत्मेच्छया यथा तक्षा तथा करोति न करोतीत्युभयथा व्यवस्था सिध्यति, बुद्धेः कर्तृत्वे इच्छाभावाद्व्यवस्थाऽभावः ॥ ३९ ॥

वेदान्तकौस्तुभः ।

यथा च तक्षोभयथा ।

प्रवृत्तिनिवृत्तिस्वभावोयावदात्मवृत्तिकर्तृत्वादि-गुणोवागादिकरणकलापसंयुतोऽपि इच्छया कार्यं करोति न करोति चेत्यात्मनः कर्तृत्वे उभयथाऽपि व्यवस्था सङ्गच्छते । यथा तक्षा वास्यादिकरणसंयुतोऽपि रथादिकमिच्छया करोति न करोति वा, बुद्धेस्तु वास्यादिवत करणभूतायाः जडत्वात्प्रवृत्तिर्निवृत्तिर्वा नोपपद्यते । चेतनसान्निध्येश्च नित्यत्वेन प्रवृत्तिनिवृत्तिहेतुभूतेच्छाद्यभावेन च सर्वदा प्रवृत्तिर्वा निवृत्तिर्वा स्यात्तस्मादा-

त्मैव कर्तेति सिद्धम् ॥ ३६ ॥

इति कर्त्राधिकरणम् ॥ १० ॥

वेदान्तकौस्तुभप्रभा ।

यथा च तक्षोभयथा ।

आत्मनः कर्तृत्वे हि स्वस्य भोगवाञ्छायां करोति तदभावे न करोतीत्युभयाथापि व्यवस्था सिध्यति । बुद्धेः कर्तृत्वे तस्या-इच्छायाश्रभावाद्व्यवस्था न सिध्येत् । यथा तक्षा स्वकार्ये इच्छया-व्यवस्थितः ॥ ३६ ॥ इति कर्त्राधिकरणम् ॥ १० ॥

सू० परात्तु तच्छ्रुतेः ॥२।३।४०।

वेदान्तपारिजातसौरभः ।

तज्जीवस्य कर्तृत्वं पराद्धेतोऽस्ति । "अन्तः प्रविष्टः शास्ता जनानामि"त्यादिश्रुतेः ॥ ४० ॥

वेदान्तकौस्तुभः ।

इदानीमुक्तं जीवस्य कर्तृत्वं परमात्माऽऽयत्तमुत स्वायत्तमिति ? विचार्यते —

परात्तु तच्छ्रुतेः ।

उक्तं यजीवस्य कर्तृत्वं तत्स्वायत्तमुत परायत्तमिति संशये स्वायत्तमेवेति, लोके कृष्यादिषु रागादिना स्वतएव जनः प्रवर्त्तते, नहि

परमपेक्षते इति × पूर्वपक्षे, उच्यते×। पराद्धेतुभूताज्जीवस्य कर्तृत्वमास्ति । तुशब्दः पूर्वानिषेधार्थः । न स्वातन्त्र्येणेत्यर्थः । कुतः ? " एष ह्येव साधु कर्म कारयति तं यमेभ्योलोकेभ्यः उन्निनीषते, एष एवाऽसाधु कर्म कारयति तं यमेभ्योलोकेभ्योऽधोनिनीषते, अन्तः प्रविष्टः शास्ता जनानां यआत्मानमन्तरोयमयती "त्यादिश्रुतेः । " सर्वस्य चाहं हृदि सन्निविष्टः । मत्तः स्मृतिर्ज्ञानमपोहनं चे "ति स्मृतेश्च ॥ ४० ॥

वेदान्तकौस्तुभप्रभा ।

परात्तु तच्छ्रुतेः ।

तत्पुनर्जीवस्य कर्तृत्वं किं स्वायत्तं ? परमात्मायत्तं वा ? इति विषये स्वायत्तमेवेति विधिनिषेधशास्त्रस्य सार्थक्यात् । यः स्वातन्त्र्येण प्रवृत्तिनिवृत्तिशक्तः सएव विधिनिषेधविषयोनिग्रहानुग्रहास्पदं च भवतीति प्राप्ते ब्रूमः । परादिति । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । जीवस्य कर्तृत्वं परमेश्वराधीनमेव । कुतः ? तच्छ्रुतेः । कर्तृत्वादेरीश्वराधीनत्वश्रुतेः । "एषह्येव साधु कर्म कारयति तं यमेभ्योलोकेभ्यउन्निनीषते एषएवासाधु कर्म कारयति

× पूर्वपक्षे सिद्धान्त उच्यते-इत्यपि पाठः ।

तं यमेभ्योलोकेभ्योऽधोनिनीषते, अन्तःप्रविष्टः शास्ता जनानां यआत्मानमन्तरोयमयती"त्यादिश्रुतेः पूर्वमेव विस्तृतमेतत् ॥ ४० ॥

सू० कृतप्रयत्नापेक्षस्तु विहित-प्रतिषिद्धावैयर्थ्यादिभ्यः।२।३।४१॥

वेदान्तपारिजातसौरभः।

वैषम्न्यादिदोषनिरासार्थस्तु शब्दः। जीवकृत-कर्मापेक्षः परोऽन्यस्मिन्नपि जन्मनि धर्मादिकं कारयति विहितप्रतिषिद्धाऽवैयर्थ्यादिभ्यः॥ ४१ ॥

वेदान्तकौस्तुभः।

ननु परमात्मनः कारयितृत्वे वैषम्न्यादि-स्यादित्यतआह —

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धाऽवैयर्थ्यादिभ्यः।

तुशब्दउक्तशङ्कानिरासार्थः। जीवेन कृतोयः प्रयत्नः धर्माधर्मलक्षणस्तदपेक्षः परमात्माऽन्य-स्मिन्नपि जन्मनि धर्मादिकं कारयति, तदनुरूपं सुखादिकं च ददाति। अतोन वैषम्न्यादिप्रसङ्गः। ननु परस्य कुतएतत् कृतप्रयत्नापेक्षत्वमि--त्यतआह । "विहितप्रतिषिद्धाऽवैयर्थ्यादिभ्यः"

इति । श्रीपुरुषोत्तमस्य कृतप्रयत्नसापेक्षत्वे "ज्योतिष्टोमेन स्वर्गकामोयजेत, ब्राह्मणोन हन्तव्यः" इत्यादिविहितप्रतिषिद्धयोरवैयर्थ्यं भवति । धर्मकृतोदुःखमधर्मकृतश्च सुखं सम्पादयेदित्यादिदोषआदिशब्दार्थः । परमात्मनः कर्मसापेक्षत्वाद्विधिप्रतिषिद्धकारयितृत्वेन निग्रहानुग्रहकर्तृत्वेन खलु वैषम्यादि नास्ति । "वैषम्यनैर्घृण्येन सापेक्षत्वादि"त्यत्र तु विचित्रजगज्जननेन परस्य वैषम्यादि नास्तीत्युक्तमिति विवेकः । तस्माद्धि सर्वशक्तिः सर्वेश्वरः श्रीपुरुषोत्तमः पूर्वकृतधर्माधर्माद्यनुसारेण धर्मादिकारयिता तदनुरूपफलदाताऽतोजीवस्य कर्तृत्वं परायत्तमिति सिद्धम् ॥ ४१ ॥ इति परायत्ताधिकरणम् ॥ ११ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वीश्वरस्य कारयेतत्वे धर्ममेव कारयेन्नाधर्ममन्यथा केन चित्पुरुषेण धर्मं, केन चिदधर्मं, कारयतोवैषम्यादिप्रसक्तिरित्यतआह —

कृतयप्रत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ।

तुरुक्तशङ्कानिरासार्थः । जीवेन कृतोयोधर्माधर्मलक्षणः प्रयत्नस्तमपेक्ष्यैवान्यस्मिन्नपि जन्मनि परमेश्वरोधर्मादिकं कारयति,

तदपेक्ष्य सुखादिफलं च ददातीति। कुतएवमिति चेदतआह। विहितेति। ईश्वरस्य कर्मसापेक्षत्वे हि "ज्योतिष्टोमेन स्वर्गकामो यजेत ब्राह्मणोन हन्तव्यः" इत्याद्योर्विहितप्रतिषिद्धयोरवैयर्थ्यं भवति। अन्यथा तच्छास्त्रमनर्थकमेव स्यात्। धर्मकृतोदुःखमधर्मकृतश्च सुखं सम्यादयेदित्यादिदोषआदिशब्दार्थः ॥ ४१ ॥

इति परावत्ताधिकरणम् ॥ ११ ॥

सू० अंशोनानाव्यपदेशाद-न्यथा चापि दाशकितवादि-त्वमधीयत एके ।२।३।४२॥

वेदान्तपारिजातसौरभः ।

अंशांशिभावाज्जीवपरमात्मनोर्भेदाभेदौ दर्शयति, परमात्मनोजीवोंऽशः "ज्ञाज्ञौ द्वावजावीशानीशावि"त्यादिभेदव्यपदेशात् "तत्त्वमसी"त्याद्यभेदव्यपदेशाच्च। अपि च आथर्वणिकाः "ब्रह्मदाशा-ब्रह्मदासा ब्रह्मकितवा" इति ब्रह्मणोहि कितवादित्वमधीयते ॥ ४२ ॥

वेदान्तकौस्तुभः ।

जीवस्य कर्तृत्वं ब्रह्माधीनमित्युक्तमिदानीं भेदाभेदश्रुत्यविरोधेन तयोः सम्बन्धमाह —

अंशोनानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयते एके ।

किमयं जीवोब्रह्मणोभिन्नः ? उताभिन्नः ? आहोस्वित् ब्रह्मणोंऽशोऽतोभिन्नाभिन्नः ? इति संशये राज्ञः सकाशात्पुरुषइव परमात्मनः सकाशाज्जीवोभिन्नोऽस्तु । अभेदवाक्यानां गौणत्वादज्ञसर्वज्ञयोरभेदासम्भवाच्च । अथवाऽभिन्न-एवास्तु, भेदश्रुतीनां गौणत्वात् । भेदाभेदयोरन्योऽन्यविरुद्धत्वादभेदश्रुतीनां भेदश्रुतीनां वावश्यं गौणत्वमङ्गीकर्त्तव्यमिति प्राप्तेऽभिधीयते । नायं जीवः श्रीपुरुषोत्तमादत्यन्तभिन्नः, नाप्यत्यन्ताभिन्नः, किन्तु परमात्मनोंऽशः । " अंशोह्येषपरस्ये"ति श्रुतेः । अंशोहि शक्तिरूपोग्राह्यः "एषपरस्य शक्तिः जीवोऽल्पशक्तिरस्वतन्त्रः " इति श्रुतेः । खण्डरूपोधनादिवद्भांशोनेह गृह्यते, जीवस्य ब्रह्मखण्डत्वे "निष्कलमि"त्यादिवाक्यविरोधाद्धनवदंशत्वे केवलभेदापत्तेः, " तत्त्वमसी "त्यादि-

वाक्यव्याकोपप्रसङ्गाच्च । अंशित्वावच्छिन्नात्परम-पुरुषस्वरूपात्सार्वज्ञ्यादिगुणगणनिधेरंशत्वावच्छिन्ने-न बन्धमोक्षार्हेण स्वरूपेण भिन्नोऽप्यंश्यधीन-स्थितिप्रवृत्त्यादिमत्त्वात्तदभिन्नः । कुतः ? "नाना-व्यपदेशात् । भेदव्यपदेशात् । अन्यथा च । अभेदव्यपदेशाच्च" । उभयविधवाक्यानां तुल्य-बलत्वात् जीवपरमात्मनोः स्वाभाविकौ भेदा-भेदौ भवतइत्यर्थः । " यआत्मानमन्तरोयमयति, अन्तः प्रविष्टः शास्ता जनानाम्, आत्माहि परमः स्वतन्त्रोऽधिगुणः, जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः, ज्ञाज्ञौ द्वावजावीशानीशौ " इत्यादिभेदव्यपदेशः । " तत्त्वमस्ययमात्मा ब्रह्म अहं ब्रह्मास्मी "त्याद्य-भेदव्यपदेशः । आपि चैके शाखिनः आथर्वणिकाः ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा"इत्येवं ब्रह्म-णोदाशकितवादित्वमधीयते ॥ ४२ ॥

वेदान्तकौस्तुभप्रभा ।

अंशोनानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयते एके ।

जीवस्य कर्तृत्वमीश्वराधीनमिति निरूपितमिदानीं तस्य "अंशोह्येष परस्ये"ति श्रुत्या ब्रह्मांशत्वाभिधानात् "निष्कलं

निष्क्रियमि"ति श्रुत्या च ब्रह्मणोनिरवयवत्वाभिधानादित्युभय-श्रुतिविरोधसन्देहे तदविरोधप्रकारोऽत्र मीमांस्यते। तथाच किम-त्यन्तभिन्नांशोऽयं ? किंस्वित्सदुपाध्यवच्छिन्नोब्रह्मप्रदेशः ? ब्रह्मैवा-ऽविद्यया कल्पितांशइति वा ? उतशक्तिमतः शक्तिरिव स्वाभाविक-भिन्नाभिन्नः ? इति संशये किन्तावत्प्राप्तं, स्वामिभृत्यपुत्रभ्रातृसखि-वदत्यन्तभिन्नएवांशोऽयमिति। कुतः ? नानाव्यपदेशात् "द्वासु-पर्णा सयुजा सखायाज्ञाज्ञौ द्वावजावीशानीशौ पृथगात्मानं प्रेरितारं च मत्वा अनीशश्चात्मा बध्यते भोक्तृभावात् अनीशया शोचति मुह्यमानः" इत्यादिश्रुतिभ्यः। अभेदश्रुतयस्तु नरपतिरेव सर्व-लोकइति वदौपचारिक्यइति, नैतद्युक्तं ब्रह्मणोनिरवयवत्वेना-त्यन्तभिन्नांशत्वासम्भवात्, अभेदश्रुतीनामपि प्राबल्येनौपचारि-कत्वायोगात् भेदनिन्दाश्रवणाच्च। अथोपाध्यवच्छिन्नस्यानन्यभू-तस्य वाचकोऽयमंशशब्दः प्रयुक्तोयथाऽग्नेर्विस्फुलिङ्गस्य, कथं तर्हि निरवयवस्य परमात्मनोंऽशः सम्भवति, आगमादित्यवगम्यते। "यथाऽग्नेः क्षुद्राविस्फुलिङ्गाव्युच्चरन्तीति दृष्टान्तप्रणयनात्। यथा चाकाशस्य पार्थिवाधिष्ठानावच्छिन्नकरणछिद्रं, यथा च वायोः पञ्चवृत्तिः प्राणः, यथा च मनसः कामादयोवृत्तयः। सचभिन्नाभिन्न-रूपोऽभिन्नरूपं स्वाभाविकमौपाधिकं तु भिन्नरूपमुपाधीनां च बलवत्त्वात्। "तत्सम्मूर्छितस्तन्मयः संसरती"त्यभेदोऽभ्युपगम्यते। "सएव किं नेष्यते नानाव्यपदेशात्, सोऽन्वेष्टव्यः स विजिज्ञा-सितव्यः" इति तत्र तत्र जीवपरयोर्भेदव्यपदेशादस्तु तर्हि भेद-एवात्माह। "तत्त्वमसि नान्योऽतोस्ति द्रष्टे"त्याद्यभेदव्यपदेशाश्चे-त्यपि न सङ्गतं, विकल्पासहत्वात्। तथा हि नतावदुपाधिना छिन्नोब्रह्मखण्डोजीवः, ब्रह्मणोऽछेद्यत्वात्, जीवस्य सादित्वाप-त्तेश्च। नाप्यच्छिन्नएवाणुरूपोपाध्यवच्छिन्नोब्रह्मप्रदेशविशेषोजीवोऽ-शः, ब्रह्मैकप्रदेशे उपाधिसम्बन्धापत्त्या सर्वे दोषास्तस्यैव स्युः।

किञ्चोपाधौ गच्छति सति ब्रह्मप्रदेशाकर्षणानर्हत्वेनानुच्छिन्नमुपहितब्रह्मप्रदेशभेदेन क्षणे क्षणे बन्धमोक्षौ स्याताम् । आकर्षणाभ्युपगमे चाच्छिन्नत्वात्कृत्स्नस्याप्याकर्षणं स्यात् । तदसम्भवाभ्युपगमे पूर्वोक्तदोषस्य तादवस्थ्यम् । अविच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गेण सर्वजीवानां ब्रह्मणएव प्रदेशत्वेनैकत्वप्रतिसन्धानं स्यात्प्रदेशभेदादप्रतिसन्धानाङ्गीकारे चैकस्यापि स्वोपाधौ गच्छति सति सएवाहमिति प्रतिसन्धानं न स्यात् । किञ्चोपाधिना ब्रह्मणोजीवभावे सार्वज्ञ्यादिधर्माआच्छादिताः? स्वरूपं वा ? नाद्यः, असम्भवात् । तथाहि सार्वज्ञ्यादयः स्वाभाविकाधर्माऔपाधिकावा? नान्त्यः, औपाधिकत्वे उपाधेः सत्त्वमसत्त्वं वा ? सत्त्वेऽपि ब्रह्मभिन्नत्वमभिन्नत्वं वा ? भिन्नत्वेऽपि स्वप्रयुक्तमन्यप्रयुक्तत्वं ब्रह्मप्रयुक्तत्वं वा ? नाद्यः, आत्माश्रयात् । न द्वितीयः, अनवस्थानात् । न तृतीयः, अन्योऽन्याश्रयात्, प्रयोजकस्य नित्यत्वेनानिवृत्तिप्रसङ्गाच्च । अभिन्नत्वे चौपाधिकभेदासिद्धिः, उपाधिर्ब्रह्मेति समानाधिकरणघटितप्रतीत्यापत्तिश्च । नाप्यसत्यः, परमतप्रवेशापत्तेरनङ्गीकाराच्च । अथ स्वाभाविकत्वपक्षे तेषांxस्वरूपं भिन्नमभिन्नxवा ? भिन्नाभिन्नत्वं वा ? अत्यन्तभेदे शास्त्रविरोधः।"एवं गुणान्पृथक्पश्यन्नि "त्यादिनिषेधश्रवणात् । अभिन्नत्वे ब्रह्मणा तेषां सामानाधिकरण्यापत्तिस्तथात्वे " आनन्दं ब्रह्मणोविद्वान्पराऽस्य शक्तिरि"ति व्यधिकरणश्रुतिव्याकोपः । अन्त्ये स्वाभाविकभिन्नाभिन्नानां ह्यावरणासम्भवोऽस्मत्पक्षप्रवेशश्च । अन्यथा स्वरूपस्यावरणापत्तिस्तदङ्गीकारे सार्वज्ञ्यादिहानिः । किञ्चोपाधिः सहेतुकोनिर्हेतुकोवा ? नाद्यः, अनवस्थानात् । नान्त्यः, मुक्तस्यापि पुनर्बन्धप्रसङ्गात् । किञ्च ब्रह्मणः सार्वज्ञ्यादयोव्याप्यवृत्तय' ? उतै-

xस्वरूपभिन्नमभिन्नत्वं इत्यपि पाठः ।

कदेशवृत्तयः ? आद्ये सर्वज्ञस्य सर्वस्यापि बन्धयोगेऽनिर्मोक्षप्रसङ्गो-जगदान्ध्यापत्तिश्च । द्वितीये तद्गुणानां परिच्छिन्नत्वेनाकिञ्चित्करत्वा-पत्तिः, मायावादपक्षप्रवेशापत्तिश्च । किञ्च मुक्तावस्थायां जीवः स्वरू-पेण तिष्ठति ? नवा ? आद्ये, उपाधिविगमेऽपि जीवस्वरूपस्य विद्य-मानताङ्गीकारे औपाधिकभेदवादोद्ततिलाञ्जलिः स्यात्स्वरूपेणैव भेदाङ्गीकारात् । द्वितीये, स्वरूपनाशएव मुक्तस्वरूपः स्यात् । तथात्वे च प्रच्छन्नबाह्यान्मायावादिनः कोवा विशेषइति त्वयैव चिन्तनीयः । नाप्युदाहृतदृष्टान्तानामग्निविस्फुलिङ्गप्राणमनो-बृत्तीनामत्र प्रामाण्यं वैषम्यात् । अग्निवाय्वोः सावयवद्रव्यत्वेन तत्रांशानां स्वाभाविकानामेव सत्त्वेनोपाधिकल्पनायाअप्रयोज़-कत्वात् । कामादिवृत्तीनां च मनःपरिणामत्वादेवं जीवस्य ब्रह्मपरिणामत्वापत्तेस्तथात्वे चोभयोरनित्यत्वं स्यात् । तस्मान्न जीवस्योपाधिकृतांशत्वम् । नचोक्तश्रुतेर्निर्विषयत्वेन व्याकोपप्रसङ्ग-इति वाच्यं, तस्याः प्रत्यगात्मनोऽजत्वेऽपि जन्मप्रतिपादक-श्रुतिसार्थक्याय देहसम्बन्धाज्जन्मप्रतिपादनपरत्वेन नैराकाङ्क्ष्यात् । वस्तुतोऽत्यन्ताभेदएव पर्यवसानाद्भेदाभेदाङ्गीकारस्य वैयर्थ्यमेव । किञ्च परैरपि विवरणे न तावद्ब्रह्मणोजातिव्यक्तिभावोगुणगुणि-भावः कार्यकारणभावोविशिष्टस्वरूपत्वमंशांशिभावोवा विद्यते, मानाभावात् । नच तदभावे भेदाभेदौ दृश्येते, नच " ममैवांशो-जीवलोके"इतिस्मृतेरंशांशितेति वाच्यं, " निष्कलं निष्क्रियमि "ति निरंशत्वप्रतिपादकश्रुतिविरोधात् । "पादोऽस्य विश्वाभूतानी"ति श्रुतिर्नांशांशिभावं ब्रूते । किन्तु ब्रह्मानन्त्यप्रतिपादनाय जीवस्याल्प-मात्रत्वमाह, अन्यथा सांशस्य ब्रह्मणोघटादिवदवयवारभ्यत्व-प्रसङ्गात् । ननु स्वाभाविकी निरवयवता बुद्ध्याद्युपाधिनि-मित्तं सांशत्वमिति नोक्तदोषइति चेन्न, एवमपि वास्तवाभेदो-न सिध्येत् । नहि निरवयवमाकाशं खड्गधारादिभिर्वस्तुतो-

भेत्तुं शक्यम् । अथान्तःकरणोपाधीनां वस्तुब्रह्मदारुणसामर्थ्यमस्ति तर्हि ब्रह्म स्वस्यानर्थाय कथमुपाधीन् सृजेत् ? नच जीवार्था तत्सृष्टिः, तत्सृष्टेः प्राग्जीवविभागासिद्धेः । नच कर्माविद्यासंस्कारान्तःकरणोत्पत्तेः प्राग्विद्यमानाजीवं विभजन्ते, अन्तःकरणद्रव्यस्यैव जीवोपाधित्वाङ्गीकारादित्यादिना बहुशोनिरस्तत्वाच्च । तस्मादुरुपपादोऽयमौपाधिकभेदाभेदवादइति संक्षेपः । ननु स्यादेतदौपाधिकभेदवादे उक्तदोषाणां सम्भवात् तदनङ्गीकारः । अपितु निरंशत्वश्रुतिविरोधात्स्वाभाविकांशत्वाभावेऽपि सूर्यप्रतिबिम्बयोरिव जीवपरयोः कल्पितोऽशांशिभावः भेदस्याविद्यकत्वात्स्वरूपैक्यमेव परमार्थइति चेन्न, तुच्छत्वादुक्तसिद्धान्तस्य सूर्यप्रतिबिम्बदृष्टान्तेन जीवस्य ब्रह्मांशत्वकल्पनायादृष्टान्तवैषम्येनासम्भवात् । तथाहि यथा सूर्य्यजलयोर्बिम्बोपाध्योः सावयवत्वरूपादिमत्त्वात्तत्र प्रतिबिम्बसम्भवः, न तथा दार्ष्टान्ते ब्रह्मरूपबिम्बस्याविद्यारूपोपाधेश्च निरवयवत्वनीरूपत्वाभ्यां तत्सम्भवइति पूर्वमेवोक्तम् । ननु यज्जन्यं तत्सावयवं कार्यत्वाद्घटादिवदित्यनुमानादन्तःकरणस्य सावयवत्वाङ्गीकारान्नोक्तदोषयोगइति चेन्न, " तदुणसारत्वादि " त्यस्य भाष्ये भवद्भिरेव जीवस्य स्वरूपेण विभुत्वं निरूप्य अणुत्वोत्क्रान्त्यादिप्रतिपादकसूत्रश्रुतयश्च बुद्ध्यणुत्वपरिमाणपरत्वेन व्याख्यातास्तद्बाधापत्तेः । उपाधेर्निरवयवत्वे प्रतिबिम्बानुपपत्तिः । सावयवत्वे चाणुत्वप्रतिपादकश्रुतिसूत्रभाष्याणां बाधइत्युभयथा पाशारज्जुरित्यलं विस्तरेण । एवं च नैतेषु पक्षेषूभयश्रुत्यविरोधः सम्भवति, अतः परिशिष्टपक्षएव सूत्रकृतामभिप्रेतइति निश्चीयते । तथा च परमात्मनोऽशोऽयं जीवः । कुतः ? नानाव्यपदेशात् । कथं तर्ह्युक्तविरोधपरिहार इति चेत्तत्राह । अन्यथा चापीति । अनानात्वेनापि अभेदेनापि व्यप-

देशादित्यर्थः । तथा च भेदाभेदव्यपदेशएव सर्वविरोधपरिहार-हेतुरिति भावः । न चौपाधिकपक्षेऽपि तेनैव सर्वाविरोधसम्भव-इति वाच्यम्, उक्तदोषयोगात् । अत्र तूभयोः स्वाभाविकत्वा-ङ्गीकारात् । नानाव्यपदेशस्तावत् नियन्तृत्वनियम्यत्वस्वतन्त्रत्व-परतन्त्रत्वसर्वज्ञत्वाल्पज्ञत्वाधारत्वाधेयत्वोपास्यत्वोपासकत्वानु-ग्राहकत्वानुग्राह्यत्वप्राप्यत्वप्राप्तृत्वोपकारकत्वोपकार्यत्वैकत्वाने-कत्वविभुत्वाणुत्वादिभिः श्रूयते । " यआत्मानमन्तरोयमयति अन्तः प्रविष्टः शास्ता जनानाम्, आत्माहि परमः स्वतन्त्रोऽधि-गुणः जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः ज्ञाज्ञौ द्वावजावीशनीशौ तस्मिल्लोकाः श्रिताः सर्वे आत्मावा अरे ! द्रष्टव्यः श्रोतव्यो-मन्तव्योनिदिध्यासितव्यः यमेवैष वृणुते तेन लभ्यः ब्रह्मविदाप्नोति परं नित्योनित्यानां चेतनश्चेतनानामेकोबहूनां योविदधाति कामान् सत्यं ज्ञानमनन्तं ब्रह्म अणुर्ह्येष आत्मा चेतसा वेदि-तव्यः"इत्यादिश्रुतिषु । अभेदव्यपदेशश्च " तत्त्वमस्ययमात्मा ब्रह्म अहं ब्रह्मास्मी"त्यादिश्रुतिषु । अपि चैके शाखिनआथर्वणिकाः ब्रह्मणोदाशकितवादित्वमधीयते ब्रह्मसूक्ते "ब्रह्म दाशा ब्रह्मदासा-ब्रह्मेमे कितवाः" इत्यादिना । दाशाः कैवर्ताः प्रसिद्धाः ये चामी दासाः स्वामिष्वात्मानमुपन्यिपन्ति, ये चान्ये कितवाः द्यूत--कृतस्ते सर्वे ब्रह्मैवेत्यर्थः । तथा चोभयोः स्वरूपस्वभावया-थात्म्यप्रतिपादनेन भेदव्यवहारोमुख्यः "एषसर्वभूतान्तरात्मा ऐत-दात्म्यमिदं सर्वमि "त्यादिश्रुत्या । ब्रह्मणः सर्वात्मत्वेन सर्वस्य तदपृथक्सिद्धत्वादभेदव्यवहारश्च मुख्यः । एवं च शक्तिमतः शक्तेरिवांशत्वेन भिन्नत्वेऽपि तदपृथक्सिद्धत्वादभिन्नत्वमिति-वत् प्रकृतेऽपि जीवस्य ब्रह्मशक्तित्वाद्ब्रह्मांशत्वेन भिन्नत्वं, तद् पृथक्सिद्धत्वेन चाभिन्नत्वं मुख्यमेवेति राद्धान्तः, उभयविध-वाक्यानां तुल्यबलत्वात् । तथाहि वेदान्तशास्त्रे विविधानि

वाक्यानि दृश्यन्ते, तत्र "नित्योनित्यानां जहात्येनां भुक्तभोगामजोऽन्यः, पृथगात्मानं प्रेरितारं च मत्वा भोक्ता भोग्यं प्रेरितारं च मत्वा प्रधानक्षेत्रज्ञपति. अक्षरात्परतः परः" इत्यादीनि भेदपराणि। "आत्मावा इदमेकएवाग्रआसीत्, एकोह वै नारायणआसीत् सदेव सौम्येदमग्रआसीत् तत्त्वमस्ययमात्मा ब्रह्म आत्मैवेदं सर्वं सर्वं खल्विदं ब्रह्म अहं ब्रह्मास्मी "त्यादीन्यभेदपराणि। "सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदे "त्यादीनि भेदनिषेधपराणि। "अस्थूलमणिव" त्यादीनि च स्थौल्यादिसामान्यनिषेधपराणि, तत्र भेदवाक्यानां परतन्त्रसत्त्वविषयकत्वेन स्वार्थाभिधायित्वं तस्य बहुत्वात्। स्वतन्त्रसत्त्वविषयका चाभेदवाक्यप्रवृत्तिः तस्यैकत्वात्, तयैव तेषां नैराकाङ्क्ष्यम्। सत्ताहि द्विधा, स्वतन्त्रपरतन्त्रभेदात्। आत्माश्रितत्वे सति स्वायत्तस्थितिप्रवृत्तिकता प्रथमा, नियन्तृत्वादिवत्तत्समानाधिकरणासाधारणधर्मविशेषस्तस्य च भगवद्ब्रह्मादिशब्दवाच्ये श्रीकृष्णे एवान्वयः, तस्यैव सर्वनियन्तृत्वात्, नियन्तृत्वस्वतन्त्रसत्त्वयोः सामानाधिकरण्यनियमात्। "आत्माहि परमः स्वतन्त्रोऽधिगुणः, सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे "इत्यादिश्रुतिस्मृतिभ्यः। परायत्तस्थितिप्रवृत्तिकता द्वितीया, सा च चिदचिदात्मकनियम्यवर्गवृत्तिस्तदसाधारणधर्मत्वात्। "यदासीत् तदधीनमासीत् जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि भारते"त्यादिश्रुतिस्मृतिभ्यः। परतन्त्रसत्त्वं द्विविधं, कूटस्थं विकारशीलं च, तत्र कौटस्थ्यं नाम जन्मादिविकारशून्यत्वे सति नित्यत्वं, तच्च जीववर्गाश्रितं, तदाश्रयोजीवप्रत्यगक्षरपुरुषक्षेत्रज्ञादिशब्दाभिधेयः। विक्रियायुक्तत्वे सत्यनाद्यनन्तत्वं द्वितीयं, तच्च प्रकृतिवर्गाश्रितं, तदाश्रयश्च कार्यकारणात्मकप्रधानप्रकृत्यादिशब्दवाच्योचिद्वर्गः। तयैव भेदनिषेधपराणां चिदचिद्वस्तुवृत्ति-

स्वतन्त्रसत्त्वनिषेधपरत्वेन स्वार्थे प्रामाण्यम् । भिन्नत्वं नाम स्वतन्त्रसत्ताबत्त्वेन स्थितिप्रवृत्त्यर्हत्वं, तच्च नियम्यवर्गे नास्त्येव । तस्य ब्रह्मापृथक्सिद्धत्वादिति भेदनिषेधस्य तात्पर्यार्थः । सामान्य--निषेधपराणाञ्च ब्रह्मणः सर्ववैलक्षण्यज्ञापनेन स्वार्थे प्रामाण्यमिति सर्वेषामपि तुल्यबलत्वान्न परस्परं बाध्यबाधकभावः । ननु कथं तुल्यबलत्वं, श्रौतत्वादिति चेत्तर्ह्यर्थवादानामपि स्वार्थे प्रामाण्यापत्तिस्तेषामपि तदविशेषादतोभेदवाक्यानां प्रत्यक्षसिद्धभेदविषयकत्वेनानुवादपरत्वादग्निर्हिमस्य भेषजमित्यादिवाक्यवत् स्वार्थहीनत्वेन श्रुतिनिन्दितभेदविषयकत्वाच्च दुर्बलत्वमभेदवाक्यानां तु प्रमाणान्तराप्राप्ताभेदविषयकत्वादुपक्रमादिषड्लिङ्गोपेतत्वाच्च प्राबल्यमिति चेन्न, जीवेशयोः प्रतियोग्यनुयोगिनोः प्रत्यक्षागोचरतया तद्भेदस्यापि प्रत्यक्षाविषयत्वात्, निन्दायाश्च पृथक् स्थितिप्रवृत्तियोग्यभेदविषयकत्वेन नैराकाङ्क्ष्यात् । तव सिद्धान्ते प्रत्यक्षप्रमाणस्य सन्मात्रानुभूतिग्राहित्वेनाभिन्ननिर्विशेषसन्मात्रानुभूतेः प्रत्यक्षप्राप्तत्वादभेदवाक्यानामेव तदनुवादपरत्वस्य वक्तुं सुशक्यत्वात् । भेदवाक्यानामपि षड्लिङ्गोपेतत्वाच्च पूर्वोक्तहेतूनामाभासत्वमेव । ननु कोऽयं भेदः स्वरूपं वा ? धर्मोवा ? नाद्यः, स्वरूपवद्भेदस्यापि प्रतियोगिनिरपेक्षव्यवहारापत्तेः हस्तः करइत्यादिवत् भेदोघटइत्यादीनां पर्यायत्वापत्तेश्च । नापि धर्मस्तथात्वे स्वरूपाद्भेदोऽप्यवश्यं भावी । अन्यथा स्वपरूमेव स्यात् । भेदे च तस्यापि भेदस्तद्धर्मस्तस्यापीत्यनवस्था । धर्मिग्रहे भेदग्रहोभेदग्रहे च धर्मिग्रहइत्यन्योऽन्याश्रयश्च । तस्माद्भेदस्यैवासिद्धेः कुतस्तद्विषयकवाक्यानां प्राबल्यमिति चेन्न, तव पक्षेऽपि साम्यात् । तथाहि अभेदः स्वरूपं वा ? धर्मोवा ? नाद्यः, स्वरूपवदभेदस्यापि ग्रहापत्त्या अयं घटः अयं पटइत्यादिप्रतीतिविषयाणां घटादीनामलीकत्वापत्तेः । सर्वप्रत्यक्षाणां सन्मात्रनिर्विशेषानुभूतिग्राहकत्वा-

विशेषे घटाद्यनुभवेनैव सत्तानुभवापत्त्या वेदान्तविचारोदत्तांतिलाञ्जलिः स्यात् । नापि धर्मः, त्वदुत्प्रेक्षितदोषाणामत्रापि तौल्यात् । द्वैतापत्तेर्निर्विशेषत्वप्रतिज्ञाहानेरपसिद्धान्ताच्च । वस्तुतस्तु भेदोजातिवद्धर्मविशेषएव गोत्वादिवत्प्रतीत्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वान्नोक्तदोषावकाशइति संक्षेपः । तत्सिद्धं सर्वेषामपि वाक्यानां तुल्यबलत्वं, तेषां सर्वेषां स्वार्थसिद्धये विश्वभिन्नाभिन्नं ब्रह्म सूत्रकृतामभिप्रेतम् । ततश्चैवं तेषां समन्वयः, अभेदवाक्यैर्जगद्ब्रह्मणोः सामानाधिकरण्यं निरूप्यते, तद्द्विविधं, यथार्थायथार्थभेदात् । अयथार्थमपि द्विविधमध्यासोबाधश्च । तत्राध्यासोनाम प्रमाणबलादन्यत्रान्यस्योपासनाद्यर्थं तत्ताविधानं, यथा "नाम ब्रह्मेत्युपासीते "त्यादिश्रुत्या नामादिप्रतीकेष्वतद्वस्तुषु ब्रह्मत्वेनोपासनविधानम् । बाधितत्वं चोत्तरविरोधिज्ञानविषयत्वं, यथा स्थाणुरेव चौरः स्थाणुज्ञानाच्चौरस्य बाधितत्वात् । उभयोरप्यनयोः सामानाधिकरण्यलक्षणहीनत्वेन गौणत्वादयथार्थत्वम् । यथार्थं च विविधं, कार्यकारणव्याप्यव्यापकाधाराधेयविशेष्यविशेषणात्मात्मीयादिभेदात् । तत्र न तावदध्यासः, विरुद्धत्वात्प्रयोजनाभावेन प्रतीकादिवदत्र प्रमाणाभावाच्च । नापि बाधः, ज्ञानाबाध्यत्वादन्यथा शुक्तिरूप्यवदाकाशादेरपि बाधापत्तिः, सा चादृष्टचराऽनुपपन्नाच । नापि विशेषणविशेष्यता, तदनुपपत्तेर्दर्श्यमाणत्वात् । परिशेषात्कार्यकारणभावादिरूपमेव ग्राह्यं, तथा च सर्वात्मा भगवान् श्रीकृष्णः स्वाश्रितात्मसत्तया स्वनियम्यव्याप्यात्मीयादिरूपात् विश्वस्मादभिन्नः, तथैव चिदचिन्नियम्यवर्गवृत्तिपरतन्त्रसत्त्वाभावरूपेणास्थूलादिवाक्यप्रतिपाद्येन विश्व--विलक्षणत्वापरपर्यायेण सार्वज्ञ्यादिवद्भावरूपेण स्वासाधारणधर्मेण विश्वस्माद्भिन्नइति स्वभावतोविश्वभिन्नाभिन्नः श्रीपुरुषोत्तमः सर्ववेदान्तार्थः । एतदभिप्रायं पुरस्कृत्य तत्त्वमस्यादिवाक्या-

र्थोऽनुसन्धेयः । तथाहि सर्वज्ञः सर्वशक्तिः स्वतन्त्रसत्ताश्रयः श्रीपुरुषोत्तमस्तत्पदार्थः, तदात्मकपरतन्त्रसत्ताश्रयचेतनस्त्वं पदार्थः । असिशब्दश्च तयोस्तादात्म्यसम्बन्धाभिधायकः । एवं च विश्वात्मपरब्रह्मसर्वज्ञसर्वशक्तिस्वतन्त्रसत्त्वावच्छिन्नतत्पदार्थाभिन्नतदात्मकपरतन्त्रसत्ताश्रयचेतनस्त्वमसीति वाक्यार्थः । पूर्वाचार्यैस्तु सर्वज्ञसर्वशक्तिस्वतन्त्रसत्ताश्रयश्रीपुरुषोत्तमस्तत्पदार्थः । तदात्मकपरतन्त्रसत्ताश्रयजीवान्तरात्मभूतः सएव च त्वंपदार्थः, ब्रह्मणः सर्वात्मत्वस्वतन्त्रसत्त्वाश्रयत्वाभ्यां सर्वशब्दवाच्यत्वात् तयोस्तादात्म्योपदेशार्थोऽसिशब्दः । इत्थं च विश्वात्मपरब्रह्मसर्वज्ञसर्वशक्तिस्वतन्त्रसत्ताश्रयतत्पदार्थाभिन्नतदात्मकपरतन्त्रसत्ताश्रयत्वं पदार्थजीवावच्छिन्नसर्वान्तरात्मा वासुदेवस्त्वं पदार्थोऽसीति वाक्यार्थउक्तः । तत्र ननु त्वंपदस्य जीवपरतया प्रसिद्धस्य कथं जीवान्तरात्मपरत्वमित्याशङ्क्य ब्रह्मणः सर्वात्मत्वेन सर्वशब्दवाच्यत्वादेवेति समाधानं "सर्वाणि नामानि यमाविशन्ति सर्वे वेदायत्पदमामनन्ति नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती वेदैश्च सर्वैरहमेव वेद्यः"इत्यादिशास्त्रात् । विस्तृतश्चैषोऽर्थोऽन्यादिदृष्टान्तेन श्रीपुरुषोत्तमाचार्यपादैरिति संक्षेपः । नन्वेवं त्वंशब्दस्य जीवान्तर्यामिपरत्वे त्वमसीति मध्यमपुरुषेण घटेत । नहि त्वदन्तर्यामिपरमात्माऽसीत्यन्वयोयुज्यतइति चेदुच्यते, त्वदन्तर्यामीत्यादिशब्दान्तरेणोपस्थापिते जीवान्तर्यामिणि मध्यमपुरुषान्वयासम्भवेऽपि त्वमिति युष्मत्पदोपस्थापिते तस्मिन् तदन्वयोयुज्यते एव । तथाच पाणिनिसूत्रं "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः"इति प्रत्ययार्थबोधकयुष्मच्छब्दोपपदे मध्यमपुरुषोभवतीत्यर्थः । न पुनर्युष्मच्छब्दस्य प्रत्ययार्थद्वारा परमात्मपर्यन्तत्वे मध्यमनिवृत्तिरिति । "अधिकं तु प्रविष्टं न तद्धानिरि"ति न्यायात् । एवं "सोऽहमस्मि त्वं वा अहमस्मी"त्या-

दिष्वस्मीत्युत्तमपुरुषोऽपि अहंपदेनाभिमुखचेतनद्वारा तदन्तर्यामिणोऽभिधानाभ्युपगमात्तत्रापि " अस्म्युत्तमः " इति हि स्मर्यते । नत्वस्मच्छब्दस्य स्वाभिमुखचेतनद्वारा तदन्तर्यामिपर्यन्तत्वे उत्तमनिवृत्तिरिति । येतु "तत्त्वमसि, सोऽहमस्मी"त्यादिषु अहंत्वमादिशब्दैर्युष्मदस्मदर्थत्यागेन निर्विशेषचिन्मात्रस्वरूपैक्यमेव वाक्यवेद्यमाहुस्तान् "तत्त्वमसी"त्यादिवाक्यस्थोऽसि शब्दः "सोऽहमस्मी"त्यादिवाक्यस्थोऽस्मिशब्दश्च खण्डयति । श्रोतरि अनुसंधातरि च युष्मदस्मदी, ते हि तैः परित्यक्ते । नहि तेषामसिना कश्चित्प्रबोधनीयः । न चास्मिना कश्चिद्विशिष्यानुसन्धेयोऽस्ति । ननु "त्वं वा अहमस्मि, अहं वै त्वमसी"त्यादौ त्वमहंपदयोरुभयोरपि श्रवणात्कथं पुरुषव्यवस्थेति चेत् ? उद्देशविषयकमेव युष्मदादिपदमुपपदत्वेन पाणिनिसूत्राभिप्रेतं, तथा चोद्देश्यसमर्पकोपपदवशादेवात्र मध्यमोत्तमयोर्व्यवस्था सिध्यति । एवं "तत्त्वमसी"त्यत्रापि त्वंपदार्थ उद्देश्य एव, ततश्चोद्देश्यविषयकं त्वंपदमेव पुरुषनिमित्तं, नतु तत्पदमपीति न प्रथमपुरुषप्रसङ्ग इति ॥ ४२ ॥

सू० मन्त्रवर्णात् ॥ २ । ३ । ४३ ॥

वेदान्तपारिजातसौरभः ।

"पादोऽस्य विश्वाभूतानी"ति मन्त्रवर्णाज्जीवो-ब्रह्मांशः ॥ ४३ ॥

वेदान्तकौस्तुभः।

मन्त्रवर्णात् ।

परमात्मनोंऽशएव जीवः। कुतः ?"पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवी"ति मन्त्रवर्णाच्च पादोंऽशः ॥ ४३ ॥

वेदान्तकौस्तुभप्रभा।

मन्त्रवर्णात् ।

मन्त्रवर्णादप्युक्तार्थस्य निश्चयः। "एतावानस्य महिमाऽतोज्यायांश्च पूरुषः, पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवी"ति भूतशब्देन जीवप्रधानानि स्थावरजङ्गमानि दर्शयति। पादशब्दोंऽशवाची चिच्छक्तेरेवांशत्वाभिधानं चात्र ॥ ४३ ॥

सू०अपि च स्मर्यते ॥२ । ३ । ४४॥

वेदान्तपारिजातसौरभः।

"ममैवांशोजीवलोके जीवभूतः सनातनः" इति जीवस्य ब्रह्मांशत्वं स्मर्यते ॥ ४४ ॥

वेदान्तकौस्तुभः।

अपि च स्मर्यते ।

"ममैवांशोजीवलोके जीवभूतः सनातनः" इति जीवस्य स्वांशत्वं श्रीपुरुषोत्तमेनैव

स्मर्यते ॥ ४४ ॥

वेदान्तकौस्तुभप्रभा ।

कुतश्चायमर्थोऽवगम्यतेऽतआह —

। अपि च स्मर्यते ।

भगवद्गीतासु श्रीमुखेनेति शेषः । "ममैवांशोजीवलोके जीवभूतः सनातनः" इति । चकाराच्छक्तित्वपरामर्शः । तथा च "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूतामि" त्यनेन जीवस्य शक्तित्वोक्तस्तस्यैवांशत्वगानादिति भावः । "एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी । यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् । विष्णुशक्तिः परा प्रोक्ता चेतनाख्या तथापरा" इति वैष्णवे जनकवाक्याच्चास्य शक्तित्वनिश्चयः । तस्माच्चिच्छक्तेरेव स्वाभाविकभिन्नाभिन्नांशत्वमिति सिद्धम् ॥ ४४ ॥

सू० प्रकाशादिवत्तु नैवं परः ॥

॥ २ । ३ । ४५ ॥

वेदान्तपारिजातसौरभः ।

जीवस्य परमपुरुषांशत्वे अंशी सुखदुःखं नानुभवति । यथा प्रकाशादिः स्वांशगतगुणदोषवर्जितोभवति ॥ ४५ ॥

वेदान्तकौस्तुभः।

मन्त्रवर्णात् ।

परमात्मनोंऽशएव जीवः। कुतः ?"पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवी"ति मन्त्रवर्णाच्च पादोंऽशः ॥ ४३ ॥

वेदान्तकौस्तुभप्रभा।

मन्त्रवर्णात् ।

मन्त्रवर्णादप्युक्तार्थस्य निश्चयः। "एतावानस्य महिमाऽतोज्यायांश्च पूरुषः, पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतं दिवी"ति भूतशब्देन जीवप्रधानानि स्थावरजङ्गमानि दर्शयति। पादशब्दोंऽशवाची चिच्छक्तेरेवांशत्वाभिधानं चात्र ॥ ४३ ॥

सू०अपि च स्मर्यते ॥२ । ३ । ४४॥

वेदान्तपारिजातसौरभः।

"ममैवांशोजीवलोके जीवभूतः सनातनः" इति जीवस्य ब्रह्मांशत्वं स्मर्यते ॥ ४४ ॥

वेदान्तकौस्तुभः।

अपि च स्मर्यते ।

"ममैवांशोजीवलोके जीवभूतः सनातनः" इति जीवस्य स्वांशत्वं श्रीपुरुषोत्तमेनैव

प्रकाशादिवत्तु नैवं परः।

यथा जीवः कर्मबशात्सुखदुःखमनुभवति, नैवं परः परमात्मा, तस्य तद्धेतोरभावात्। दृष्टान्तमाह । प्रकाशादिवदिति। यथा प्रकाशस्य सूर्यादेरंशः प्रभा रूपा शक्तिरेवाभ्रादिभिरुपरुध्यते, न सूर्यादिः । यथा वाऽग्नेर्दाहकत्वशक्त्यंशएव मणिमन्त्रादिना निरुध्यते, यथा वा देहिनोमनुष्यादेर्देहरूपांशएव शस्त्रव्याध्यादिभिः छिद्यते विक्रियते च, न देही चेतनः। "न हन्यते हन्यमाने शरीरे"इति गानात् । तथा ब्रह्मांशस्यापि जीवस्यानादिकर्मात्मिकाविद्यापरियुक्तत्वात्तत्कृतसुखदुःखानुभवितृत्वं, न परस्य तद्योगोदोषास्पृष्टस्वभावत्वात्॥ ४५ ॥

सू०स्मरन्ति च ॥ २।३। ४६ ॥

वेदान्तपारिजातसौरभः।

"तत्र यः परमात्माऽसौ स नित्योनिर्गुणः स्मृतः। न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा। कर्मात्मा त्वपरोयोऽसौ मोक्षबन्धैः स युज्यते" इत्यादिना स्मरन्ति च ॥ ४६ ॥

वेदान्तकौस्तुभः।

स्मरन्ति च।

"तत्र यः परमाऽसौ स नित्योनिर्गुणः

स्मृतः । न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा । कर्मात्मा त्वपरोयोऽसौ मोक्षबन्धैः स युज्यते ॥ स सप्तदशकेनापि राशिना युज्यते पुनरि"त्यादिना मुनयोंऽशकृतकर्मफलैरंशएव युज्यते, अंशी तु नेति स्मरन्ति । "तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशी "ति श्रूयते च ॥ ४६ ॥

वेदान्तकौस्तुभप्रभा ।

स्मरन्ति च ।

यथा जीवदुःखेनेश्वरस्यादुःखित्वं तथा ऋषयः स्मरन्ति । "तत्र यः परमात्माऽसौ स नित्योनिर्गुणः स्मृतः । न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ॥ कर्मात्मा त्वपरोयोऽसौ मोक्षबन्धैः स युज्यते । स सप्तदशकेनापि राशिना युज्यते पुनरि"ति । चकारात्समामनन्ति चेति ज्ञेयम् । "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशी"ति । येषां तु जीवोवास्तवोनास्ति, ब्रह्मैवाविद्यया जीवभावं प्राप्तं तेषां कदापि कथंचिदपि नोक्तदोषोद्धारः सम्भवति । कर्मवश्यस्य वस्तुतोऽभावात् ब्रह्मणएव सर्वदोषप्रसङ्गः । अतएवोदाहृतश्रुतिस्मृत्योरपि न तत्र प्रामाण्यमस्ति । यदि तस्य स्वप्रकाशत्वेन निर्लेपत्वाङ्गीकारस्तर्हि सुखदुःखात्मककर्मसम्बन्धस्य तत्फलभोक्तृत्वाभावात्सर्वं शास्त्रं दत्ततिलाञ्जलिः स्यात् । केचित्तु यथा शुक्लकृष्णादीनां गोत्वादिविशिष्टानां गवादिवस्तूनां गोत्वादीनि विशेषणान्यंशाः यथा वा

देहिनोदेवमनुष्यादेर्देहोऽशस्तद्वत् एकवस्त्वेकदेशत्वं ह्यंशत्वं विशिष्टस्यैकस्य वस्तुनोविशेषणमंशएव । तथा च विवेचकाः विशिष्टे वस्तुनि विशेषणांशोऽयं विशेष्यांशोऽयमिति व्यपदिशन्ति । विशेषणविशेष्ययोरंशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते, एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चोपपद्यते इति सिद्धान्तयन्ति । तदसमीचीनं, दृष्टान्तदार्ष्टान्तवैषम्यात् । तथाहि यदुक्तं "गोत्वादिविशिष्टानां शुक्लकृष्णादीनां गवादिवस्तूनां गोत्वादीनि विशेषणान्यंशाइत्यारभ्यांशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते"इत्यन्तं तत्सत्यं, नात्र विवादः, गोत्वादेर्देवमनुष्यादेर्देहस्य च विशेषणत्वसम्भवात्, व्यावर्त्यानां सत्त्वेन व्यावर्त्तकत्वात् । परन्तु यत्पुनरुक्तमेवं "जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चे"ति तदयुक्तं, जीवपरयोर्विशेषणविशेष्यत्वासम्भवात् । चिदचितोर्ब्रह्मविशेषणत्वे ब्रह्मणश्च विशेष्यत्वे चिदचिद्ब्रह्मेतरतत्त्वानङ्गीकारात् । व्यावर्त्याभावेन व्यावर्तकत्वं विशेषणत्वमिति विशेषणलक्षणसमन्वयाभावात् । नापि विशेष्यरञ्जकविशेषज्ञानहेतुत्वं विशेषणत्वं, "यथा स्वरूपसत्त्वमात्रेण नहि किञ्चिद्विशेषणम् । स्वबुद्ध्या रज्यते येन विशेष्यं तद्विशेषणमि"ति वचनात् । " अतसीपुष्पसङ्काशोगोविन्दः"इत्यत्रातसीपुष्पसादृश्यविशेषणजन्यज्ञानेन गोविन्दपदार्थोरज्यते ध्यातृबुद्धावुपस्थाप्यते, तथा चेतनाचेतनयोरेकतरज्ञाने तदुभयज्ञाने वा विशेष्यभूतस्य ब्रह्मणोरञ्जकत्वाभावात् उपस्थापकत्वासम्भवएव । अन्यथाऽहमर्थतया ज्ञातजीवस्य देहादिरूपेण ज्ञाता ऽचेतनस्य च पुंसो ब्रह्मज्ञानोपस्थितिप्रसङ्गात् । ननु स्वाभाविकभेदाभेदपक्षोऽपि दोषबाहुल्यादसम्भवएव । तथा हीश्वरः स्वरूपेणैव देवासुरनरतिर्यगादिभेदेनावस्थितइति तदात्मकत्ववर्णनात् । तथा च सत्येकमृत्पिण्डारब्धघटशरावादिगतान्युदका-

हरणादिसर्वकार्याणि यथा तस्यैव भवन्ति, एवं सर्वजीवगतसुखदुःखादिकं सर्वमीश्वरगतमेव स्यात् । घटशरावादिसंस्थानानुपयुक्तं मृद्द्रव्यं यथा कार्यान्तरान्वितमेवं सुरासुरपशुमनुजादिजीवत्वानुपयुक्तेश्वरांशः सार्वज्ञ्यादिगुणाकरः । नच सर्वेश्वरएकांशेन कल्याणगुणाकरः, सएवान्यांशेन हेयगुणाकरः इति युक्तं, द्वयोरंशयोरीश्वत्वाविशेषात्कस्तेन लाभः ? एकस्यैवैकांशेन नित्यदुःखित्वमंशान्तरेण सुखित्वम् । किञ्चांशान्तरेण सुखित्वमपि नेश्वरत्वाय कल्पते । यथा देवदत्तस्यैकस्मिन्हस्ते चन्दनागुरुलेपके पूराद्यलङ्कारएकस्मिन्हस्ते मुद्गरादिपातोज्ज्वालाप्रवेशश्च तद्वदीश्वरस्यैव स्यादिति ब्रह्माज्ञानवादादपि महत्पापीपानयं पक्षः । अपरिमितदुःखस्य पारमार्थिकत्वाभ्युपगमात्संसारिणामनन्तत्वेन दुस्तरत्वादिति चेन्न, उक्तशंकायाः महद्भ्रान्तिकल्पितत्वात् अस्माभिः स्वरूपभेदस्य स्वाभाविकत्वाभ्युपगमात् नोक्तदोषसंपृक्तवातलेशस्पर्शावकाशः, श्रुत्यादिषु स्वाभाविकभेदाभेदपक्षस्यैव राद्धान्तत्वात् । यदि जीवपरयोः स्वरूपेणाभेदोऽङ्गीकृतः स्यात्तर्हि भवदुक्तदोषकल्पनावकाशः, सतु नास्त्येवेत्यर्थः । न चैवं परपक्षप्रवेशः, उत्तरभाविनामेव पूर्वसिद्धसिद्धान्तोपजीवित्वनियमात् । युष्मत्पक्षस्यैवास्मत्पक्षानुगामित्वसिद्धिरित्यर्थः । किञ्चाहोमनीषा पूर्वपक्षारोपकाणां स्वप्रयुक्तवज्रस्य स्वसिद्धान्तपर्वते पातोनालोचितः श्रीमद्भिः, सार्वज्ञ्यादिगुणाढ्ये भगवति परब्रह्मणि श्रीपुरुषोत्तमे चेतनाचेतनयोः पापादिजाड्यादिसंपृक्तयोर्वैशिष्ट्याङ्गीकारात् । तथाहि सार्वज्ञ्यादिविशिष्टस्य ब्रह्मणश्चेतनाचेतनविशेषणे अभिप्रेते ? केवलस्य ? वा नान्त्यः, निर्विशेषत्वानभ्युपगमात्, इतरथा सार्वज्ञ्यादीनामव्याप्यवृत्तित्वप्रसङ्गात्, मायावादप्रवेशाच्च । किञ्च सार्वज्ञ्यादिविशिष्टस्य चेतनाचेतनविशिष्टस्य चेतरेतराभिन्नत्वे विशिष्टद्वय-

सिद्धया विशिष्टाद्वैतभङ्गात्, चेतनादिविशिष्टप्रदेशस्य सार्वज्ञ्यादिहीनत्वापत्त्या नियन्तृत्वभङ्गाच्च । तथात्वे च त्वत्सिद्धान्तएव त्वदुक्तिवज्रनिपातः । तथाहि यथा कस्य चिन्मानवस्य देहैकदेशे चंदनागुरुलेपादिदेशान्तरे क्षारकर्दमादिलेपनं परिहासार्थं बालैर्लीलया क्रियते, तथा प्रकृतेऽपि परमेश्वरस्यैकदेशे मङ्गलगुणगणादिविविधभूषणयोगः, देशान्तरे सर्वदोषसंपन्नजीवादियोगस्तस्मान्महाबीभत्सितोऽयं भवतां सिद्धान्तः । नाप्याद्यः, विशिष्टवैशिष्ट्यापत्त्या विशिष्टाद्वैतसिद्धान्तभङ्गात् । किञ्च सार्वज्ञ्यादिसमस्तकल्याणगुणाढ्यस्यैव यदि चेतनादिवैशिष्ट्याभ्युपगमोऽभिप्रेतस्तर्हि सर्ववस्त्रभूषणायुधादिदिव्यालङ्कारसंपन्नस्य पुंसोऽतिजीर्णबीभत्सितनीलवस्त्रायोभूषणादिवेष्टनवत्सर्वदिव्यगुणगणाद्यलङ्कृतस्यभ गवतः परब्रह्मणऽपर्यपरिमितदुःखाद्यवच्छिन्नजीववैशिष्ट्यमभ्युपगतं स्यात् । तस्मान्मायावादादपि महद्दुष्टोऽयं पक्षः, तत्पक्षे सार्वज्ञ्यादिविशिष्टस्य भिन्नत्वाङ्गीकारात् । भवन्मते तूत्तमगुणभूषणस्यैव पापावच्छिन्नजीववैशिष्ट्याङ्गीकारात् । किञ्च तन्मते कल्पितत्वाङ्गीकारेण कदा चिन्निवृत्तिसम्भावनाऽपि भवति । भवन्मते तु कदाचिदपि कथमपि निवृत्तिमनोरथस्याप्यसभवः, यावदात्मवृत्तित्वाङ्गीकारात् । तस्मान्महत्पापीयानयं पक्षः, श्रेयोऽर्थिभिरुपेक्षणीयः । अपि च ब्रह्मणोविशिष्टाद्वैतत्वाङ्गीकारेऽपि तस्य चेतनाचेतनाभ्यां स्वभावतोभेदस्तयोश्च परस्परं भेदः स्वाभाविक एवाभ्युपगम्यते भवद्भिः, अन्यथा स्वभावसाङ्कर्यप्रसङ्गात् । एवं च भेदस्याभेदस्य च स्वाभाविकत्वमङ्गीकृत्य पुनर्विशिष्टाङ्गीकारे गौरवमात्रत्वाद्धरीयस्त्वं स्वाभाविकभेदाभेदपक्षस्यैव लाघवादिति संक्षेपः ॥ ४६ ॥

सू० अनुज्ञापरिहारौ देह-सम्बन्धाज्ज्योतिरादिवत् ॥

२ । ३ । ४७ ॥

वेदान्तपारिजातसौरभः ।

"स्वर्गकामोयजेत शूद्रोयज्ञे नावक्लृप्तः" इत्याद्यनुज्ञापरिहारावुपपद्येते जीवानां ब्रह्मांशत्वेन समत्वेऽपि विसमशरीरसम्बन्धात्। यथा श्रोत्रियागारादग्निराह्रियते, श्मशानादेस्तु नैव। यथा वा शुचिपुरुषपात्रादिसंस्पृष्टं जलादिकं गृह्यते, नेतरं तद्वत् ॥ ४७ ॥

वेदान्तकौस्तुभः ।

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ।

ब्रह्मांशत्वादिना जीवानां समत्वे प्राप्ते तत्र किमाश्रित्यानुज्ञापरिहारौ स्याताम् ? शृणु ! " स्वर्गकामोयजेत, तस्माच्छूद्रोयज्ञे नावक्लृप्त " इत्याद्यनुज्ञापरिहारौ तेषां समत्वेऽपि विसमदेहसम्बन्धात्सङ्गच्छेते, ज्योतिरादिवत्। यथाऽग्निकणानां

समत्वेऽपि श्रोत्रियागारादग्निकण आह्रियते, श्मशानादेस्तु परिह्रियते । यथा वा मूत्रपुरीषादि गवां पवित्रतयाऽनुज्ञायते, तदेव जात्यन्तरात्परिवर्ज्यते, तद्वत् ॥ ४७ ॥

वेदान्तकौस्तुभप्रभा ।

ननु ब्रह्मात्मकत्वेन ब्रह्मांशत्वेन ज्ञानस्वरूपत्वेन च सर्वेषां समानत्वे केषां चिद्वेदाध्ययनतदर्थानुष्ठानाद्यनुज्ञा, केषाञ्चित्तत्परिहारः, केषां चिद्दर्शनस्पर्शनाद्यनुज्ञा, केषां चित्तत्परिहारश्च, शास्त्रेषु कथमुपपद्यत इत्याशङ्क्याह —

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ।

सर्वेषां ब्रह्मांशत्वज्ञानस्वरूपत्वादिनैकरूपत्वे सत्यपि ब्राह्मणक्षत्रियवैश्यशुद्रादिरूपशुच्यशुचिदेहसम्बन्धनिबन्धनावनुज्ञापरिहारावुपपद्येते, ज्योतिरादिवत् । यथाऽग्नेरग्नित्वेनैकरूपत्वेऽपि श्रोत्रियागारादग्निराह्रियते, श्मशानादेस्तु परिह्रियते। यथाऽन्नादिश्रोत्रियादेरनुज्ञायते, अन्त्यजादेस्तु परिह्रियते। यथा वा मूत्रपुरीषादि गवां पवित्रतयाऽनुज्ञायते, तदेव जात्यन्तरात्परिवर्ज्यते, तद्वत् ॥ ४७ ॥

सू० असन्ततेश्चाव्यतिकरः ॥

२ । ३ । ४८ ॥

वेदान्तपारिजातसौरभः।

विभोरंशत्वेऽपि गुणेन विभुत्वेऽपि चात्मनां स्वरूपतोऽणुत्वेन सर्वगतत्वाभावात्कर्मादिव्यतिकरोनास्ति ॥ ४८ ॥

वेदान्तकौस्तुभः।

ननु विभोरंशत्वाद्विभुगुणत्वाच्च तव मतेऽपि सर्वेषां जीवानां सर्वेषु शरीरेषु सुखादिभोक्तृत्वापत्त्या कर्मव्यतिकरस्तत्फलभोगव्यतिकरश्च प्राप्नोति तस्माद्विभोर्ब्रह्मणोंऽशः, स्वतोऽणुः गुणतोविभुरिति पक्षस्य गौरवात् आत्मा विभुरिति कपिलाद्यात्मवादोवरीयानित्यतआह —

असन्ततेश्चाव्यतिकरः।

अणुत्वेनान्योऽन्यभिन्नानां अंशत्वावच्छिन्नेन रूपेणांशिस्वरूपाद्विलक्षणानामात्मनामसन्ततेः सर्वत्राव्याप्तत्वादव्यतिकरः। चशब्दोबद्धास्थायां ज्ञानसङ्कोचं सूचयति ॥ ४८ ॥

वेदान्तकौस्तुभप्रभा।

ननु सर्वेषामेकरूपत्वे देहसम्बन्धादनुज्ञापरिहारौ चेदेकेनाश्वमेधे कृते सर्वैः कृतं स्यादेकेन सुरापाने कृते सर्वैः कृतमिति कथं

नोच्यते, आत्मनोवास्तवैकत्वादित्याशङ्क्याह —

असन्ततेश्चाव्यतिकरः ।

ब्रह्मांशत्वेनैकरूपत्वे सत्यपि न व्यतिकरः । कुतः ? असन्ततेः, अव्याप्तेः । सर्वजीवात्मनामणुपरिमाणकत्वात्प्रतिशरीरं स्वरूपेणैव भिन्नत्वाच्च न कर्मसङ्करः, फलभोगसाङ्कर्यं वा । कर्तुर्भोक्तुः स्वेस्वे शरीरे स्वरूपेणैव वैलक्षण्यादित्यर्थः । अविद्याकल्पित-जीववादे सत्योपाध्यवच्छिन्नब्रह्मजीववादे वा जीवब्रह्मणोः परस्परं जीवानां च कर्मतत्फलभोगव्यतिकरादयः सर्वे दोषाः सन्ति, नास्मन्मते इति यावत् ॥ ४८ ॥

सू० आभासा एव च ।२।३।४२॥

वेदान्तपारिजातसौरभः ।

परेषां कपिलादीनां व्यतिकरप्रसङ्गात्सर्व-गतात्मवादाश्चाभासाएव ॥ ४९ ॥

वेदान्तकौस्तुभः ।

आभासा एव च ।

कपिलकणादादीनां सर्वगतात्मवादास्तु आभासा एव, निर्मूलत्वात् । तत्र सर्वव्यवहार-व्यतिकरप्रसङ्गाच्च । च शब्देन तेषां जगद्व्या-मोहकत्वं सूचितम् ॥ ४९ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वविद्याकृतजीवपक्षेऽपि उपाधितन्त्रोहि जीव उपाध्यसन्तानाच्च, नास्ति जीवसन्तानस्ततश्च कर्मतत्फलभोगस्य व्यतिकरादयोदोषा न सन्तीत्यत आह —

आभास एव च ।

अखण्डस्वप्रकाशचिन्मात्रशुद्धस्य स्वरूपतिरोधानपूर्वकोपाधिभेदोपपादनरूपोहेतुराभास एव प्रकाशैकस्वरूपस्य प्रकाशातिरोधानं प्रकाशनाश एवेति धर्मान्तरानङ्गीकारात् । आभासाइति पाठे हेतवइति बहुवचनं ज्ञेयम् । चकारः श्रुत्यादिप्रमाणाभावं समुच्चिनोति । सजातीयविजातीयस्वगतभेदशून्यतत्त्ववादिनां मते ब्रह्मणयुपाधिकल्पने युक्तयआभासाएव, शास्त्रप्रमाणाभावश्चेति यावत् । चकारात् "पृथगात्मानं प्रेरितारं च मत्वा ज्ञाज्ञौ तयोरन्यः पिप्पलं स्वाद्वत्ती"त्यादिश्रुतिविरोधश्चेति । अविद्यापरिकल्पितोपाधिभेदेऽपि सर्वोपाधिभिरुपहितस्वरूपस्यैक्याभ्युपगमाद्भोगव्यतिकरस्तदवस्थएव । किञ्चापरे त्वाभासएवेत्येकवचनान्तं सूत्रं पठित्वाऽन्यमर्थं वर्णयन्ति, परमात्माभासोजीवः प्रतिबिम्बात्मा संसार्यविद्याकल्पितः । तस्य परिमितत्वादसन्ततेरव्यतिकरइति, तदयुक्तमाभासस्यावस्तुत्वाभ्युपगमात् । अवस्तुनः शशविषाणकल्पस्याचेतनस्य कुतोबन्धोमोक्षोवा कर्माधिकारोवा । न च परमात्मनः संसारित्वमस्तीत्यादिनाऽन्यैरपि निरस्तत्वात् ॥ ४६ ॥

सू० अदृष्टानियमात् ॥ २ । ३ । ५० ॥

वेदान्तपारिजातसौरभः ।

सर्वगतात्मवादेऽदृष्टमाश्रित्यापि व्यतिकरोदुर्वारो-

ऽदृष्टाऽनियमात् ॥ ५० ॥

वेदान्तकौस्तुभः ।

ननु नास्त्यस्माकमपि सर्वव्यवहारव्यतिकरोऽदृष्टस्य नियामकत्वादित्यत आह —

अदृष्टानियमात् ।

परमते व्यतिकरः प्राप्नोत्येव । सर्वगतानां सर्वेषामात्मनां सन्निधौ उत्पद्यमानमदृष्टं कस्य स्यात्कस्य तु न स्यादित्यदृष्टानियमात् ॥ ५० ॥

वेदान्तकौस्तुभप्रभा ।

ननु पारमार्थिकोपाध्यवच्छिन्नब्रह्मजीववादेऽनाद्यदृष्टप्रवाहेणोपाधिप्रवाहस्यानादित्वात्तत्सम्बन्धिनि जीवे ये दोषाः, न ते ब्रह्मणि प्रसज्यन्त इत्यतआह —

अदृष्टानियमात् ।

अदृष्टैरपि नियमोन सम्भवति । अदृष्टैस्तत्कृतोपाधिभिश्च ब्रह्मणश्छेदनासम्भवात्तत्कृता दोषा ब्रह्मण्येव स्युः ॥ ५० ॥

सू० अभिसन्ध्यादिष्वपि चैवम् ।

॥ २ । ३ । ५१ ॥

वेदान्तपारिजातसौरभः ।

अहमिदं करिष्ये, इदं नेति संकल्पादि-

ष्वप्येवमनियमः ॥ ५१ ॥

वेदान्तकौस्तुभः ।

ननु अहमिदं करिष्ये, इदं नेति यस्याभिसन्धिस्तस्याऽदृष्टामिति नियमोभविष्यतीत्यतआह —

अभिसन्ध्यादिष्वपि चैवम् ।

अभिसन्धिः सङ्कल्प आदिशब्देन श्रद्धादेः परिग्रहः । सङ्कल्पश्रद्धादिष्वप्यदृष्टाऽनियमवदनियमएव ॥ ५१ ॥

वेदान्तकौस्तुभप्रभा ।

अभिसन्ध्यादिष्वपि चैवम् ।

अदृष्टहेतुभूताऽभिसन्ध्यादिषु सङ्कल्पादिष्वपि चैवं नियमासम्भव उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात् पूर्वपूर्वोपाधिसंयुक्तं ब्रह्मैव संकल्पादयस्तद्गताएवेति न कश्चिद्विशेषः । आदिना श्रद्धादिपरिग्रहः ॥ ५१ ॥

सू० प्रदेशादिति चेन्नान्तर्भावात् ॥ २ । ३ । ५२ ॥

वेदान्तपारिजातसौरभः ।

स्वशरीरस्थात्मप्रदेशात्सर्वं समञ्जसमिति

चेन्न, तत्र सर्वेषामात्मप्रदेशानामन्तर्भावात् ॥ ५२ ॥

हरिरों तत्सदिति श्रीमद्भगवन्निम्बार्कविरचिते
शारीरकमीमांसावाक्यार्थे वेदान्तपारिजात-
सौरभे द्वितीयाध्यायस्य तृतीयः
पादः ॥ ३ ॥

वेदान्तकौस्तुभः ।

प्रदेशादिति चेन्नान्तर्भावात् ।

नन्वभिसन्ध्यादिषु नियम उपपद्यते प्रदेशात् स्वशरीरस्थे एव खल्वात्मप्रदेशे सङ्कल्पश्रद्धादि-हेतुभूतमनःसंयोगोभवति । तथाभूतादात्मप्रदेशा-दिति चेन्न, तत्रान्येषामप्यात्मप्रदेशानामन्त-र्भावात् । अयमर्थः एकस्मिन्मनसि सर्वात्मनां समवेतत्वान्मनःसंयोगनिमित्ताः सङ्कल्पादयःसाधा-रणा भवितुमर्हन्ति, तन्निमित्तमदृष्टं साधारणमेव । तथासति सर्वव्यवहारव्यतिकरस्तदवस्थः । तस्मा-द्ब्रह्मणः श्रीवासुदेवस्यांशोऽणुपरिमाणोज्ञानस्वरूपो-ज्ञातृत्वकर्तृत्वादिधर्म्मवान् प्रतिशरीरं भिन्नो-

जीव इति सिद्धम् ॥ ५२ ॥

इति अंशाधिकरणम् ॥ १२ ॥

हरिरों तत्सदिति श्रीसनत्कुमारसन्ततिप्रवर्त्तकाचार्यश्रीमन्निम्बार्कपादपद्मान्तेवासिना श्रीश्रीनिवासाचार्येण विरचिते शारीरकमीमांसाभाष्ये श्रीमति वेदान्तकौस्तुभे द्वितीयाऽध्यायस्य तृतीयपादः ॥३॥

वेदान्तकौस्तुभप्रभा।

प्रदेशादिति चेन्नान्तर्भावात्।

ननूपाधिसम्बन्धिब्रह्मप्रदेशादनुपहितब्रह्मप्रदेशोभिद्यते ऽतोव्यवस्थोपपद्यते इति चेन्न, उपाधीनां तत्र तत्र गमनात्सर्वप्रदेशानां सर्वोपाध्यन्तर्भावाद्रोगादिव्यतिकरस्तदवस्थ एव। प्रदेशभेदेन सम्बन्धेऽपि सर्वस्य ब्रह्मप्रदेशत्वात्प्रदेशसम्बन्धिदुःखं ब्रह्मण्येवस्यात् ॥ ५२ ॥ इति अंशाधिकरणम् ॥ १२ ॥

इति श्रीसनकसम्प्रदायवेदान्तकौस्तुभप्रभाख्यायां द्वितीयाध्यायतृतीयपादविवरणम् ॥ ३ ॥

श्रीमते निम्बार्काय नमः।

अथ द्वितीयाध्याये चतुर्थपादारम्भः।

सू०तथा प्राणाः। २।४।१॥।

वेदान्तपारिजातसौरभः।

करणोत्पत्तिश्चिन्त्यते खादिवदिन्द्रियाणि जायन्ते ॥ १ ॥

वेदान्तकौस्तुभः।

पूर्वस्मिन्पादे वियदादिश्रुतीनां जीवश्रुतीनां च विरोधाभावोदर्शितः। इदानीं जीवकरणश्रुत्यविरोधप्रकारं दर्शयति —

तथा प्राणाः।

प्रा*णाउत्पद्यन्ते न वा? इति संशये "एतस्मादात्मनः आकाशः सम्भूतः "इत्याद्युत्पत्तिप्रकरणेषु प्राणानामुत्पत्त्यश्रवणात्। "असद्वा इदमग्रआसीत्" तदाहुः "किं तदसदासीदि"ति "ऋषयोवावते अग्रेऽसदासीत् तदाहुः केते ऋषयः"

---

* इन्द्रियाणि।

इति "प्राणावावऋषयः" इत्यत्रोत्पत्तेः प्राक् प्राणानां सत्त्वश्रवणाच्च नोत्पद्यन्ते इति पूर्वः पक्षः । तत्र ब्रूमः, यथा "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि च, एतस्माज्जायते प्राणोमनः सर्वेन्द्रियादीनि भूतानि जायन्ते, तथा प्राणाः इन्द्रियाणि च जायन्ते ॥ १ ॥

वेदान्तकौस्तुभप्रभा ।

अथेन्द्रियाणां सृष्टिविप्रतिपत्तिं परिहरति । तत्र " एतस्मादात्मन आकाशः सम्भूतः, तत्तेजोऽसृजत "इत्यादिसृष्टिप्रकरणे प्राणोत्पत्त्यश्रवणात् " असद्वाइदमग्रआसीत्तदाहुः किं तदसदासीदिति, ऋषयोवावते ऽग्रेऽसदासीत्तदाहुः केते ऋषयइति प्राणावावऋषयः"इत्यत्र प्रागुत्पत्तेः प्राणानां सत्त्वश्रवणाच्च, " यथाऽग्नेः क्षुद्राविस्फुलिङ्गाव्युच्चरन्ति एवमेवास्मादात्मनः सर्वेप्राणा " इति "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे"ति "सप्त प्राणाः प्रभवन्ति तस्मादि "ति स प्राणमसृजत प्राणात् श्रद्धामि "त्यादिपूत्पत्तिश्रवणाच्च किं प्राणाजायन्ते ? न वा ? इति संशये किन्तावत्प्राङ्न जायन्ते इति। कुतः ? " असद्वाइदमि"ति सर्वाभावकथनपूर्वकतत्सद्भावश्रवणादत्र सिद्धान्तः ।

तथा प्राणाः ।

यथा आकाशादिभूतानामुत्पत्तिस्तथा प्राणपदाभिधेयेन्द्रियाणामुत्पत्तिर्बोध्या उक्तश्रुतिभिः । " स प्राणमसृजत प्राणाच्छ्रद्धां खं

वायुर्ज्योतिरापः, पृथिवीन्द्रियं मनोऽन्नमि"त्युत्पत्तिश्रुतीनां बाहुल्यात् ॥"१ ॥

सू०गौण्यसम्भवात् ॥ २।४।२॥

वेदान्तपारिजातसौरभः ।

न च "एतस्मादात्मनआकाशः सम्भूतःइत्यादिसृष्टिप्रकरणे करणोत्पत्त्यऽश्रवणात्करणोत्पत्तिश्रुतिर्गौणीति वाच्यम्, उत्पत्तिश्रुतिभूयस्त्वादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधाच्च गौण्यसम्भवात् ॥ २ ॥

वेदान्तकौस्तुभः ।

ननु "असद्वा इदमग्रआसीदि"त्यादिश्रुतिविरोधादिन्द्रियोत्पत्तिवादिनी श्रुतिर्गौणीति शङ्कां निराकुर्वन् "प्राणाजायन्ते" इत्यत्र हेतुमाह —

गौण्यसम्भवात् ।

गौण्याः असम्भवोगौण्यसम्भवइन्द्रियोत्पत्तिश्रुतिर्गौणी न भवति । तस्मात्प्राणाजायन्त एवेत्यर्थः । कुतोऽसम्भवइति चेत् उत्पत्तिश्रुतेर्मुख्यार्थसम्भवात् । उत्पत्तिश्रुतिबाहुल्यात्, प्रतिज्ञावि-

रोधाच्च । " एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि च यथाऽग्नेः क्षुद्राविस्फुल्लिङ्गाव्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सप्तप्राणा प्रभवन्ति " तस्मादित्याद्युत्पत्तिश्रुतिबाहुल्यात् । "कस्मिन्नु भगवोविज्ञाते सर्वमिदं विज्ञातं भवती"ति एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायतत्सिद्धये "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चेत्याद्याभिधीयते । सा च प्रतिज्ञा प्राणादेः सर्वविकारजातस्य तदुपादेयत्वाङ्गीकारे एव सिध्यति । "असद्वाइदमग्र आसीदि"ति श्रुतिस्तु कारणपरत्वेन व्याख्येयाऽतोन विरोधः ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

ननु सद्भावश्रवणविरोधादुत्पत्तिर्गौणीति चेदत्राह —

गौण्यसम्भवात् ।

गौण्याम्रसम्भवोगौण्यसम्भवस्तस्मात् । प्राणोत्पत्तिश्रुतेर्गौणत्वं न सम्भवति, प्रतिज्ञाविरोधात् । " कस्मिन्नु भगवोविज्ञाते सर्वमिदं विज्ञातं भवती"ति एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्सिद्धये इदमुच्यते " एतस्माज्जायते प्राणः "इत्यादि । सा च प्रतिज्ञा प्राणादेः सर्वविकारजातस्य तदुपादेयत्वाङ्गीकारे एव सिध्यति, नान्यथा, उपादानापृथक्सिद्धत्वादुपादेयस्येत्यर्थः ।

तथा "आत्मनोवा अरे ! दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमि "त्याद्यन्यत्रापि श्रवणात् ॥ २ ॥

सू० तत्प्राक् श्रुतेश्च । २।४।३॥

वेदान्तपारिजातसौरभः।

तस्मिन्वाक्ये खादिषु मुख्यस्य क्रियापदस्येन्द्रियेष्वपि श्रुतेरिन्द्रियोद्भवोमुख्यः ॥ ३ ॥

वेदान्तकौस्तुभः ।

इतोऽपीन्द्रियाणां मुख्यं जन्मेत्याह —

तत्प्राक् श्रुतेश्च ।

तत्तास्मिन्वाक्ये "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि च खं वायुरि"त्यादौ जायते इति पदस्य खादिषु मुख्यस्य खाद्यपेक्षया प्रागेव निर्दिष्टेष्विन्द्रियेषु श्रुतेरिन्द्रियाणामुत्पत्तिवादिनी श्रुतिर्मुख्यैव । जायते इति पदस्येन्द्रियेषु गौणत्वं खादिषु मुख्यत्वं च न सम्भवत्यपि तूभयत्र मुख्यत्वमेव ॥ ३ ॥

वेदान्तकौस्तुभप्रभा ।

तत्प्राक् श्रुतेश्च ।

तस्य जायतइति पदस्याकाशादिषु मुख्यस्य प्रागपि प्राणादिषु

श्रवणादाकाशादिवत्प्राणानां मुख्यैव जन्मश्रुतिः । "एतस्माज्जायते प्राणः"इति सकृदुच्चरितोबहुभिः सम्बध्यमानोजायते इति शब्दः क्वचिन्मुख्यः क्वचिद्गौणइति निर्णेतुमशक्यत्वात् वैरूप्यप्रसङ्गात् । तथा "स प्राणमसृजत प्राणाच्छ्रद्धां"त्यादावपि प्राणे श्रुतः सृजतिः परेष्वपि श्रद्धादिष्वनुषज्यते । तथा "आत्मनोव्युच्चरन्ति" इत्यादावप्येष न्यायोबोध्यः ॥ ३ ॥

सू० तत्पूर्वकत्वाद्वाचः ॥२।३।४॥

वेदान्तपारिजातसौरभः ।

प्राणाः खादिवदुत्पद्यन्ते वाक्प्राणमनसाम् "अन्नमयं हि सौम्य ! मनः आपोमयः प्राणस्तेजोमयी वागि"त्यनेन तेजोऽबन्नपूर्वकत्वाभिधानात् ॥ ४ ॥

वेदान्तकौस्तुभः ।

यदुक्तं सृष्टिप्रकरणे इन्द्रियोत्पत्तिर्न श्रूयते इति तत्राह —

तत्पूर्वकत्वाद्वाचः ।

छान्दोग्ये वाक्प्राणमनसाम् । "अन्नमयं हि सौम्य ! मनः आपोमयः प्राणस्तेजोमयी वागि"त्यनेन ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानात्

अस्त्युत्पत्तिरित्यर्थः ।तस्मात्सृष्टिप्रकरणेऽप्युत्पत्तिसद्भा-
वादिन्द्रियोत्पत्तिश्रुतिभूयस्त्वात्सृष्टेः प्राक्सद्भावश्रुते-
रन्यविषयत्वादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धे-
श्चेन्द्रियाण्युपपद्यन्ते इति सिद्धम् ॥ ४ ॥

इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

वेदान्तकौस्तुभप्रभा ।

तत्पूर्वकत्वाद्वाचः ।

यद्यपि सृष्टिप्रकरणे तेजोऽबन्नानां त्रयाणामेवोत्पत्तिः श्रूयते, तथापि वाक्प्राणमनसां ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानात् "अन्नमयं हि सौम्य ! मनः आपोमयः प्राणस्तेजोमयी वाग्नि" त्यत्र भूताप्यायकत्वादपि मुख्यमेव जन्मेति निश्चीयते । नहि स्वतः सिद्धं वस्तु परानुग्राहकत्वमपेक्षतइति भावः । तस्माद्वागादीनां भूतानुग्राह्यत्वं वदन्ती श्रुतिः । तत्सद्भावमनुवदतीति तात्पर्यार्थः ॥ ४ ॥ इति प्राणोत्पत्त्यधिकरणम् ॥ १ ॥

सू०सप्तगतेर्विशेषितत्वाच्च ॥ २ । ४ । ५ ॥

वेदान्तपारिजातसौरभः ।

तानि सप्तैकादश वे?ति संशये"प्राणमनूत्क्राम-
न्तं सर्वे प्राणा अनूत्क्रामन्ती"ति गतेस्तत्र सप्ताना-

मेव "न पश्यति न जिघ्रति न रसयते न वदति न शृणोति न मनुते न स्पृशते" इति विशेषितत्वाच्च सप्तैवेन्द्रियाणीति पूर्वपक्षः ॥ ५ ॥

वेदान्तकौस्तुभः।

इदानीमिन्द्रियाणां सङ्ख्यानिर्णेतुकामस्तद्विषयकवाक्यविरोधपरिहाराय पूर्वपक्षयति —

सप्तगतेर्विशेषितत्वाच्च।

तानीन्द्रियाणि सप्त भवन्ति ? आहोस्विदेकादशे?ति संशये "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती" ति सप्तानामेवगतेः सप्तैव भवन्ति। सप्तैवानूत्क्रामन्तीति कथमवगम्यते, विशेषितत्वाच्च। "सयत्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्ततेऽथाऽरूपज्ञोभवत्येकीभवति न पश्यति न जिघ्रति न रसयते न वदति न शृणोति न मनुते न स्पृशते" इति चक्षुरादीनां सप्तानामेव विशेषितत्वाच्च ॥ ५ ॥

वेदान्तकौस्तुभप्रभा।

अथ प्राणविषयकसङ्ख्याविप्रतिपत्तिपरिहारायेदमारभ्यते —

सप्तगतेर्विशेषितत्वाच्च।

कतीतरे प्राणा इति विषयः "अत्र सप्त प्राणाः प्रभवन्ति

तस्मादि"ति अष्टौ ग्रहा" इति "सप्त वै शीर्षण्याः द्वाववाञ्चावि"ति "नव वै पुरुषे प्राणा नाभिर्दशमी"ति "दशेमे पुरुषे प्राणा आत्मैकादशे"त्यादिश्रुतिषु सप्तादिचतुर्दशपर्यन्ताप्राणसङ्ख्या दृश्यते, अतः संशयः कतीतरे प्राणा इति, किं तावत्प्राप्तम् ? सप्तैव । कुत ? गतेरिति । "सप्त प्राणाः प्रभवन्ति तस्मादि"ति श्रुत्यावगमात् । नच "गुहाशया निहिताः सप्त सप्ते"ति वीप्साश्रुतिविरोधइति वाच्यं, विप्सायाः पुरुषभेदाभिप्रायकत्वात् । तथा च प्रतिपुरुषं सप्तेत्यर्थः । नन्वेवमष्टत्वाद्यधिकसङ्ख्याश्रुतेर्व्याकोपइति चेत्तत्राह । विशेषितत्वाच्चेति । "सप्त वै शीर्षण्याः प्राण"इति तावन्मात्रेण श्रुत्या विशेषितत्वात्, अधिकस्य चात्रैवान्तर्भावादित्यर्थः ॥ ५ ॥

सू० हस्तादयस्तु स्थिते ऽतो-नैवम् ॥ २।४।६॥

वेदान्तपारिजातसौरभः।

सप्तभ्योऽतिरिक्ते "हस्तो वै ग्रह" इत्यादिना निश्चिते सप्तैवेन्द्रियाणीति नैवं मन्तव्यम् । "दशेमे पुरुषे प्राणा आत्मैकादशे"ति श्रुतेः एकादशेन्द्रियाणीति सिद्धान्तः ॥ ६ ॥

वेदान्तकौस्तुभः ।

सिद्धान्तयति —

हस्तादयस्तु स्थिते ऽतो नैवम्।

तुशब्दः पूर्वपक्षिणोऽन्धत्वं बोधयति। "हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्यां कर्म करोती"ति सप्तभ्योऽतिरिक्ता हस्तादयोऽपि श्रूयन्ते, अतोहस्तादिकेऽतिरिक्ते स्थिते सर्वे प्राणा अनूत्कामन्तीति सर्वेन्द्रियाणामुत्क्रान्त्यविशेषाच्च सप्तैवेति, नैवं मन्तव्यम्। किन्तु "दशेमे पुरुषे प्राणाः आत्मैकादश "इन्द्रियाणि दशैकं चे" त्यादिश्रुतिस्मृतिभ्यामेकादशेन्द्रियाणि भवन्ति। तत्र श्रोत्रत्वक्चक्षुरसनघ्राणानि पञ्चज्ञानेन्द्रियाणि, तेषां शब्दादयः पञ्चविषयाः। वाक्पाणिपादपायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, तेषां वचनादयः पञ्चविषयाः। सङ्कल्पादिहेतुः अन्तरिन्द्रियं मनः, इत्थमेकादशैवेन्द्रियाणीति सिद्धम्॥ ६॥

इति सप्तगत्यधिकरणम्॥ २॥

वेदान्तकौस्तुभप्रभा।

अत्र सिद्धान्तः —

हस्तादयस्तु स्थिते ऽतो नैवं हि।

हस्तादयस्त्वन्ये प्राणाः सप्तभ्यो भिन्नाः श्रुत्या पठ्यन्ते। "हस्तौ वै ग्रहः स कर्मणातिग्रहेण गृहीतोहस्ताभ्यां हि कर्म

करोती"त्यादिश्रुतिषु स्थिते सप्तत्वातिविवक्षणे सप्तानां तदधिकसङ्ख्यायामन्तर्भावोयुक्तः, न त्वधिकसङ्ख्याया हीनसङ्ख्यायां, अन्याय्यत्वात् । अतः हस्तादीनां सप्तातिरिक्तत्वादेव नैवं, सप्तैवेति न मन्तव्यम् । तथा चैवं व्यवस्था, प्राणास्तावदेकादशसङ्ख्याकाएव । कार्यस्यापि तावन्मात्रत्वात्, फलाभावे साधनापेक्षाभावात् । "दशेमे पुरुषे प्राणा आत्मैकादशे"ति । अत्रात्मशब्दोऽन्तःकरणरूपमनोवाचकः, करणस्यैवाधिकारात् । तत्र शब्दस्पर्शरूपरसगन्धविषयकानि पञ्चज्ञानानि तत्करणानि पञ्चज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि । वचनादानविहरणोत्सर्गानन्दरूपाश्च पञ्चकर्मविशेषास्तत्करणानि च पञ्च कर्मेन्द्रियाणि, वाक्हस्तपादपायूपस्थाख्यानि । सङ्कल्पादिकं चान्तरं कर्म, तत्करणं च मनइति । "इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचरा"-इति श्रीमुखोक्तेः । तत्र सप्तसङ्ख्याया अन्तर्भावे दोषलेशावकाशोऽपि नास्ति । अधिकसङ्ख्याश्रुतेस्तु मनोवृत्तिभेदमादाय सामञ्जस्यं बोध्यम् । तथाहि मनसएव वृतिभेदेन चातुर्विध्यात् तस्यैव द्वित्वविवक्षया द्वादशत्वं, त्रित्वविवक्षया त्रयोदशत्वं, चतुष्कविवक्षया च चतुर्दशत्वं, श्रुतिभिरुच्यते । तथात्वे च सर्वश्रुतीनां स्वार्थपरत्वेन नैराकांक्ष्यात्सामञ्जस्यमेव । अधिकसङ्ख्याकल्पनस्य वैयर्थ्यादेकादशैव प्राणा इति सिद्धम् ॥ ६ ॥

इति सप्तगत्यधिकरणम् ॥ २ ॥

सू० अणवश्च ॥२।४।७॥

वेदान्तपारिजातसौरभः ।

"सर्वे प्राणा उत्क्रामन्ती"त्युक्रान्तिश्रुतेः

प्राणा अणवः ॥ ७ ॥

वेदान्तकौस्तुभः।

इदानीमिन्द्रियाणां परिमाणं दर्शयति —

अणवश्च।

प्राणा अणवः ? उत विभवः ? इति संशये अपरिच्छिन्नाहङ्कारकार्य्यत्वाद्विभव इति साङ्ख्या आहुः। "ते एते सर्वे समा अनन्ता" इति श्रुतेश्च विभव एवेति पूर्वः पक्षः "प्राणमनूत्क्रामन्तमि"त्याद्युत्क्रान्तिश्रुतेः अणव इति सिद्धान्तः। अपरिच्छिन्नादपरिच्छिन्नं कार्यं जायते इति नियमो नास्ति, बृहतो वृक्षादेरल्पस्य पुष्पादेरुत्पत्तिदर्शनात्। श्रुतिस्त्वसङ्ख्येयत्वविषया "अथ यो हैताननन्तानुपास्ते" इति श्रुत्युक्तोपासनार्थावा। तस्मादिन्द्रियाण्यणूनीति सिद्धम् ॥ ७ ॥

इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

वेदान्तकौस्तुभप्रभा।

अथेन्द्रियाणां परिमाणविवादं परिहरति —

अणवश्च।

प्रकृताः प्राणा इन्द्रियाणि विभवः ? अणवोवा ? किन्तावत् प्राप्तं, विभव इति। कुतः ? "ते एते सर्वे समा अनन्ता" इति अनन्तत्वश्रुतेः।

अत्र सिद्धान्तः । अणवश्च, चोनियोगे। प्रकृताप्राणाअणवएव । कुतः? प्राणमनूत्क्रामन्तं सर्वे प्राणाअनूत्क्रामन्ती "ति उत्क्रान्त्यादि-श्रवणात् । तेषामुत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्यमानत्वाच्च न स्थौल्यमपीति भावः । नचानन्तविधायकवाक्यविरोधः शङ्कनीयः, तस्यासङ्कुचातत्वविधानपरत्वात् । यद्वा " अथ यो हैताननन्ता-नुपास्ते " इति श्रुत्युक्तोपासनार्थत्वात् । नच मनसोऽणुत्वे सर्व-देहगतसुखदुःखाद्यनुभवाभावप्रसङ्गइति वाच्यं, तस्य सङ्कोच-विकाशशीलत्वात् । अन्यथा ध्रुवादिविषयपर्यन्तानुभवानुपपत्तेः । अन्येषां चक्षुरादीनां तेन विनाऽकिञ्चित्करत्वादिति भावः ॥ ७ ॥

इति प्राणाणुत्वाधिकरणम् ॥ ३ ॥

सू० श्रेष्ठश्च ॥ २।४।८॥

वेदान्तपारिजातसौरभः ।

"श्रेष्ठोमुख्यः प्राणो वाव ज्येष्ठः श्रेष्ठश्चे"ति श्रुतिप्रोक्तः प्राणोमहाभूतादिवदुत्पद्यते । कुतः ? "एतस्माज्जायते प्राणः" इति समानश्रुतेः ॥ ८ ॥

वेदान्तकौस्तुभः ।

इदानीं प्रसङ्गान्मुख्यस्य प्राणस्योत्पत्त्यादिविचा-र्यते —

श्रेष्ठश्च ।

"प्राणो वाव ज्येष्ठः श्रेष्ठश्चे "ति श्रुतिप्रोक्तः

भवति, किन्तु वायुरेवावस्थान्तरमापन्नः प्राणः इत्युच्यते । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुरि"ति पृथगुपदेशात् ॥ ६ ॥

वेदान्तकौस्तुभः ।

इदानीं तत्स्वरूपमाह —

न वायुक्रिये पृथगुपदेशात् ।

स च ज्येष्ठः प्राणो महाभूतविशेषोवायुः ? उतेन्द्रियाणां सामान्यावृत्तिः ? किम्वा महाभूतविशेषोवायुरेव कञ्चन विशेषमापन्नः प्राणः ? इत्युच्यते इति संशये "यः प्राणः स वायुः सएष वायुः पञ्चविधः प्राणोऽपानोव्यान उदानः समान" इति वचनात् वायुरेव, यद्वा साङ्ख्याभिमतइन्द्रियाणां सामान्यावृत्तिः पञ्चप्रकारः प्राण इति प्राप्तेऽभिधीयते । न वायुमात्रं प्राणः, न चेन्द्रियव्यापारलक्षणासामान्यावृत्तिः प्राणपदार्थः । कुतः ? पृथगुपदेशात् । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुरि"त्यत्र महाभूतद्वितीयाद्वयोरिन्द्रियेभ्यश्च प्राणस्य पृथगुपदेशात् ।

प्राणस्य वायुमात्रत्वे पृथग्व्यपदेशबाधप्रसङ्गः। करणसामान्यवृत्तित्वे च वृत्तिमद्भ्यः पृथग्व्यपदेशो व्यर्थः स्यात्। पृथगुत्पन्नस्य सुतरां द्रव्यत्वे सिद्धे द्रव्यान्तररूपकरणव्यापारत्वासम्भवात्। परिशेषान्महाभूतविशेषोवायुरेवावस्थान्तरमापन्नः प्राणः। एतेन "यः प्राणः स वायुरि"त्यादिवाक्यविरोधोऽपि परिहृतः ॥ ९ ॥

वेदान्तकौस्तुभप्रभा।

न वायुक्रिये पृथगुपदेशात्।

स पुनः किं मुख्यः प्राणः किं वायुरुतकरणव्यापार अथ वायुरेवकञ्चन विशेषमापन्नइति संशये सिद्धान्तमाह। प्राणः वायुतत्त्वान्तर्गतइन्द्रियव्यापाररूपातत्क्रिया च न भवति। कुतः? पृथगुपदेशात्। न चैवं "यः प्राणः स वायुः सएष वायुः पञ्चविधः प्राणोऽपानोव्यानउदानः समानः" इति श्रवणविरोधइति वाच्यं, "प्राणएव ब्रह्मणश्चतुर्थपादः स वायुना ज्योतिषा भाति च तपति चे"ति श्रुतेः। नहि वायुरेव सन्वायोः पृथगुपदिश्येत इत्यर्थः। तथा क्रियाख्यः करणव्यापारोऽपि पृथक्त्वेनोपदिश्यते, "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे"त्यत्र प्राणस्य करणेभ्यः पृथगुपदेशात्। नहि सर्वेषां कारकाणामेकव्यापारत्वसम्भवः, प्रत्येकं तेषां भिन्नव्यापारत्वनियमात्। अन्यथा सर्वेषामपि सर्वव्यापारकत्वापत्तेः। नच "यः प्राणः स वायुरि"त्यादिश्रुतिविरोधस्तादवस्थ्यमिति वाच्यं, वायुरेवायमध्यात्म-

भावात्मकावस्थापन्नः पञ्चरूपात्मना वर्त्तमानः प्राणाख्ययोच्यते न द्रव्यान्तरं, "न वा वायुमात्रमित्यविरोधउभयश्रुतेः । एतेन "सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्चे"ति करणानां सामान्या वृत्तिः प्राणइति साङ्ख्यपक्षो निरस्तः ॥ ९ ॥

सू० चक्षुरादिवत्तु तत्सह-शिष्ट्यादिभ्यः ॥२।४।१०॥

वेदान्तपारिजातसौरभः ।

श्रेष्ठोऽपि प्राणश्चक्षुरादिवज्जीवोपकरणविशेषः । कुतः ? प्राणसम्वादादिषु चक्षुरादिभिः सह प्राणस्य शिष्ट्यादिभ्यः शासनादिभ्यः ॥ १० ॥

वेदान्तकौस्तुभः ।

प्राणस्य जीवं प्रति चक्षुरादिवदुपकारकत्वं जीवाधीनतया दर्शयति —

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ।

प्राणस्येन्द्रियापेक्षया श्रेष्ठत्वेऽपि जीववत् स्वातन्त्र्यं नास्तीति तु शब्दार्थः । प्राणश्चक्षुरादि-

বর্দ্ধতে, যথা চক্ষুরাদীনি জীবোপকরণানি, তথা জীবোপকরণবিশেষঃ প্রাণ ইত্যর্থঃ। কুতঃ? অস্য জীবং প্রত্যুপকরণত্বং গম্যতে। তত্রাহ। তৎসহ-শিষ্ট্যাদিভ্য ইতি। তৈশ্চক্ষুরাদিভিঃ সহ প্রাণস্য প্রাণসম্বাদাদিষু শিষ্ট্যাদিভ্যঃ শাসনাদি--ভ্যঃ। আদিনা ১চেতনত্বস্বাতন্ত্র্যানর্হত্বাদিহেতু-সঙ্গ্রহঃ॥ ১০॥

বেদান্তকৌস্তুভপ্রভা।

ননু "সুপ্তেষু বাগাদিষু প্রাণ একোজাগর্তি প্রাণএকো-মৃত্যুনা ১নাপ্তঃ প্রাণঃ সম্বর্গো বাগাদীন্সম্বৃঙ্ক্তে প্রাণ ইতরান্ প্রাণাত্রত্ত্বতি মাতেব পুত্রানি"তি প্রাণস্য শরীরেন্দ্রিয়াদীন্ প্রতি স্বাতন্ত্র্যশ্রবণাত্ স্বতন্ত্রঃ প্রাণ ইত্যভ্যুপগন্তব্যমিত্যাশ-ঙ্ক্য সমাধত্তে —

চক্ষুরাদিবত্তু তৎসহশিষ্ট্যাদিভ্যঃ।

তুশব্দঃ পক্ষব্যাবৃত্ত্যর্থঃ। যথা চক্ষুরাদীনি জীবকর্তৃত্বাদি-ব্যাপারং প্রতি করণানি তথা মুখ্যপ্রাণোঽপি রাজমন্ত্রিবদুপ-করণভূতএব, ন স্বতন্ত্রঃ। কুতঃ? তৎসহশিষ্ট্যাদিভ্যঃ। শিষ্টিঃ শাসনং চক্ষুরাদিভিঃ সহ তস্যাপি শাসনশ্রবণাত্প্রাণসম্বাদে। তৎসজাতীয়ত্বে হি তৈঃ সহ শাসনং যুজ্যতে, প্রাণশব্দপরিগৃহীত-করণেষ্বস্য বিশিষ্যাভিধানমাদিশব্দেন গ্রাহ্যম্। অথ "য এবা-য়ং মুখ্যঃ প্রাণঃ যোঽয়ং মধ্যমঃ প্রাণঃ"ইত্যাদিষু বিশিষ্যা-ভিধানাজ্জীবং প্রতি চক্ষুরাদিবদুপকারকত্বমিতি সিদ্ধম্॥ ১০॥

सू०अकरणत्वाच्च न दोष-स्तथाहि दर्शयति॥ २।४।११॥

वेदान्तपारिजातसौरभः ।

ननु प्राणस्य जीवोपकरणत्वे तदनुरूप-कार्य्याभावेनाकरणत्वाद्दोष इति न, यतो देहे-न्द्रियविधारणं प्राणासाधारणं कार्य्यम्। "अहमेवै-तत्पञ्चधात्मानं विभज्यैतद्वाणमवष्टभ्य विधारया-मी"ति श्रुतिर्दर्शयति ॥ ११ ॥

वेदान्तकौस्तुभः ।

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ।

ननु यथा दृश्यसद्भावे द्रष्टृत्वं सङ्गच्छते, तथा करणसाध्यकार्य्यसद्भावे करणत्वं स्यात्तच्च न दृश्यते ऽतः प्राणस्याकरणत्वमस्तु । तस्माद-करणत्वात् प्राणस्य जीवोपकरणत्वे नैष्फल्य-रूपोदोषो ऽस्तीत्यत्राह । नेति । उक्तलक्षणोदोषो-नास्ति । हि यतः यथा प्राणस्य जीवोपकर-णत्वे साफल्यं स्यात्तथा भगवती श्रुतिः

प्राणस्यापीन्द्रियान्तरेष्वसम्भावितं देहेन्द्रिय-धारणलक्षणं प्रयोजनं दर्शयति प्राणसम्वादे । "तान्वरिष्ठः प्राणउवाच मा मोहमापद्येथा ऽहमेवैतत्पञ्चधात्मानं विभज्यैतद्वाणꣳमवष्टभ्य विधारयामीति ॥ ११ ॥

वेदान्तकौस्तुभप्रभा ।

ननु यदि चक्षुरादिवदस्य जीवं प्रत्युपकरणत्वं तर्ह्यस्य विषयरूपकार्यमपि द्वादशमङ्गीकार्यं, तथा चैकादशसङ्ख्याकार्याभ्युपगमसिद्धान्तभङ्ग इत्याशङ्क्याह समाधानमाह —

अकरणत्वाच्च न दोषस्तथाहि दर्शयति ।

चः शङ्कोच्छेदार्थः । नोक्तदोषप्रसङ्गावकाशः । चक्षुरादिवत् मुख्यप्राणस्य अकरणत्वात् जीवव्यापारं प्रति तस्य करणत्वाभावात् । तर्हि किमर्थोऽस्याङ्गीकारस्तत्राह । तथाहि दर्शयति । हीति निश्चयार्थः । श्रुतिस्तस्य भिन्नमसाधारणं कार्यान्तरं दर्शयतीत्यर्थः । तथाहि प्राणसम्वादे "अथ ह प्राणा अहं श्रेयसे व्यूदिरे" इत्युपक्रम्य, "यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठः" इत्युक्ते वागादीनां प्रत्येकमुत्क्रान्तौ प्रवचनादिवृत्तिमात्रहीनं यथापूर्वं जीवनं दर्शयित्वा, प्राणस्योत्क्रमिष्यायां वागादिशैथिल्यापत्तिं शरीरपातप्रसक्तिं च निरूप्य, प्राणाधीनां देहादिस्थितिं प्राणासाधारणकार्य्यभूतां दर्शयति ।

---

*शरीरम् ।

"तान्वारिष्ठः प्राण उवाच मा मोहमापद्येथा ऽहमेवैतत्पञ्चधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामी "ति। किञ्च "प्राणेन रक्षन्नवरं कुलायमि "ति चक्षुरादीनां लये प्राणकृतदेहादिरक्षां दर्शयति। किञ्च "कस्मिन्वहमुत्क्रान्ते उत्क्रान्तोभविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामी "ति " स प्राणमसृजते "त्यादिना प्राणादीनां जीवस्य स्थितिमुत्क्रान्तिं च दर्शयतीति ॥ ११ ॥

सू० पञ्चवृत्तिर्मनोवद्व्यपदिश्यते

२ । ४ । १२ ॥

वेदान्तपारिजातसौरभः।

यथा बहुवृत्तिर्मनः स्ववृत्तिभिः कामादिभिः जीवस्योपकरोति, तथा अपानादिवृत्तिभिः पञ्चवृत्तिः प्राणोऽपि जीवोपकारकत्वेन व्यपदिश्यते ॥ १२ ॥

वेदान्तकौस्तुभः।

एकएव प्राणः वृत्तिभेदाद्बहुधा व्यपदिश्यते, न तत्र तत्त्वान्तराणि सन्ति, सच न केवलं देहेन्द्रियधारणमात्रेण जीवस्योपकरोति, किन्त्वन्यैरपि कर्मभिरित्याह —

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ।

"कामः सङ्कल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनएवे"ति वचनात् । यथा मनएव कामादिवृत्तिमत्स्ववृत्तिभिर्जीवस्योपकरोति, न कामसङ्कल्पादयस्तत्त्वविशेषाः । तथा प्राणापानव्यानोदानसमानाइत्येतत्सर्वं प्राणएवेत्यनेन वचनेन प्राणएव पञ्चवृत्तिर्व्यपदिश्यते, अपानादयः प्राणस्यैव वृत्तयः, न तत्त्वान्तराणि स्ववृत्तिभिः स एव जीवस्योपकरोतीत्यर्थः । एवं सति वायुरेवास्थान्तरापन्नः जीवोपकरणभूतोबहुवृत्तिमान् श्रेष्ठः प्राणइति सिद्धम् ॥ १२ ॥

इति वायुक्रियाधिकरणम् ॥ ५ ॥

वेदान्तकौस्तुभप्रभा ।

ननु तथापि नैकत्वं प्राणस्यानेकत्वश्रवणात् । तथाहि प्राणोऽपानोव्यान उदानः समानश्चेति तत्र प्राग्वृत्तिरुच्छ्वासादिकर्मा नासादिसञ्चारी प्राणः । अपानो ऽर्वाग्वृत्तिः । निःश्वासादिकर्मा व्यानस्तयोः सन्धौ वर्तमानोवीर्यवत् कर्महेतुरुदानः । ऊर्द्ववृत्तिरुत्क्रान्त्यादिहेतुः समानः । "समं सर्वेष्वङ्गेषु रसान्नयती"ति । एवं संज्ञासङ्ख्याकार्यभेदात्तत्त्वान्तरत्वमेव तेषामिति चेदत्राह —

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ।

प्राणादिसंज्ञकाः पञ्चपञ्चवृत्तिः प्राण एव, न तत्त्वान्तरम्, "एतत्सर्वं प्राणएवे"ति वचनात् । तत्र दृष्टान्तः । मनोवदिति । "कामः सङ्कल्पोविचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मनएवे"ति वत् । यथा सङ्कल्पादयोमनोवृत्तिविशेषास्तथा प्राणापानादयोऽपि प्राणवृत्तय इत्यर्थः ॥ १२ ॥

इति वायुक्रियाधिकरणम् ॥ ५ ॥

सू० अणुश्च ।२।४।१३॥

वेदान्तपारिजातसौरभः।

उत्क्रान्तिश्रुतेः प्राणो ऽणुश्च ॥ १३ ॥

वेदान्तकौस्तुभः ।

इदानीं मुख्यप्राणस्य परिमाणश्चिन्त्यते —

अणुश्च ।

श्रेष्ठः प्राणोमहापरिमाणः ? उताणुपरिमाणः ? इति संशये " प्राणो सर्वं प्रतिष्ठितं सर्वं हीदं प्राणेनावृतमि"ति श्रुतेर्महापरिमाण इति प्राप्तेऽभिधीयते । श्रेष्ठः प्राणो ऽणुश्च ज्ञेयः " तमुत्क्रामन्तं प्राणोऽनूत्क्रामती " त्युत्क्रान्तिश्रुतेः ।

सूर्याचन्द्रमसौ विधृतौ तिष्ठतः"इत्यादिना देवतानां परनियोज्यत्वश्रवणात् । "सर्वस्य चाहं हृदि सन्निविष्टः "इत्यादिस्मृते--श्च ॥ १५ ॥

सू० तस्य नित्यत्वात् ॥ २।४।१६ ॥

वेदान्तपारिजातसौरभः ।

उक्तलक्षणस्य सम्बन्धस्य जीवेनैव नित्यत्वान्न त्वधिष्ठातृदेवताभिः ॥ १६ ॥

वेदान्तकौस्तुभः ।

तस्य नित्यत्वात् ।

इतोऽपि करणसाध्यफलभोक्ता तत्स्वामी प्राणवानेव । नतु तदधिष्ठातृदेवतानां तादृशफलभोक्तृत्वम्, तस्येन्द्रियसम्बन्धस्य प्राणवतैव नित्यत्वात् । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणाअनूत्क्रामन्ती"-ति शब्दात् । देवतास्तु श्रेष्ठे ऐश्वर्ये स्थिताः, नतु हीने " न ह वै देवानऽघं गच्छती "ति श्रुतेः ॥ १६ ॥

वेदान्तकौस्तुभः ।

इदानीमिन्द्रियाणां प्रवृत्तिर्विचार्य्यते —

ज्योतिराद्यधिष्ठानं तु तदामननात् ।

चक्षुरादीनींद्रियाणि स्वस्वविषये स्वमहिम्नैव प्रवर्त्तन्ते ? उत स्वस्वाधिष्ठातृदेवताप्रेरितानीति ? संशये स्वमहिम्नैव । "चक्षुषा हि रूपाणि पश्यती "ति श्रुतेरिति प्राप्ते उच्यते । ज्योतिरित्यादीति । तुशब्दः पूर्वपक्षनिरासार्थः । ज्योतिरादिभिः अग्न्यादिभिर्देवताभिरधिष्ठितमेव वागादिकं चेष्टते । अधिष्ठीयते प्रेर्यते इत्याधेष्ठानं प्रवर्त्त्यमित्यर्थः । यथा रथादिकं सारथ्यादिभिरधिष्ठितं प्रवर्त्तते, तद्वत् । कुतः ? तदामननात् । तस्याग्न्याद्यधिष्ठितत्वस्य आमननात् । आम्नायोक्तत्वात् । " अग्निर्वाग्भूत्वा मुखं प्राविशत्, वायुः प्राणोभुत्वा नासिके प्राविशत्, आदित्यश्चक्षुर्भूत्वा ऽक्षिणी प्राविशदि"त्यादिना प्रेर्य्यप्रेरकभावं विनाऽग्न्यादिप्रवेशस्य वैयर्थ्यप्रसङ्गः स्यात् । चक्षुषा हीत्यादिश्रुतेस्तु

चक्षुरादेः करणत्वप्रतिपादनमात्रेण चरितार्थत्वं बोध्यम् ॥ १४ ॥

वेदन्तकौस्तुभप्रभा ।

अथेन्द्रियाणि स्वतन्त्रतया स्वयमेव स्वकार्ये प्रवर्तन्ते ? स्वस्वाधिष्ठातृदेवताप्रेरितानि वा ? किन्तावत्प्राप्तं, स्वयमेव प्रवर्तन्त इति। कुतः ? तेषां तादृक्शक्तिमत्त्वात् । अत्र ब्रूते —

ज्योतिराद्यधिष्ठानं तु तदामननात् ।

ज्योतिरादिभिरग्न्यादिभिरधिष्ठानमधिष्ठितं वागादिककरणजातं देवताप्रवर्तितं सत् स्वकार्यार्थं प्रवर्तते, न स्वातन्त्र्येण । कुतः ? तदामननात् । "अग्निर्वाग्भूत्वा मुखं प्राविशत्, वायुः प्राणोभूत्वा नासिके प्राविशत्, आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदि "त्यादिश्रवणात् । अध्यात्माधिभूताधिदैवैः सर्वज्ञानक्रियाव्यवहारसिद्धिरिति तात्पर्यार्थः । तत्राध्यात्मशब्दः करणपरः । अधिभूतशब्दोविषयपरः, अधिदैवशब्दश्च करणाधिष्ठातृदेवतावर्गवाचकः । "चक्षुरध्यात्मं द्रष्टव्यमधिभूतमादित्यस्तत्राधिदैवतं श्रोत्रमध्यात्मं श्रोतव्यमधिभूतं दिशस्तत्राधिदैवतं नासाऽध्यात्मं घ्रातव्यमाधिभूतं पृथिवी तत्राधिदैवतं जिह्वाऽध्यात्मं रसयितव्यमधिभूतं वरुणस्तत्राधिदैवतं त्वगध्यात्मं स्पर्शयितव्यमधिभूतं वायुस्तत्राधिदैवतमि "त्यादिश्रुतिभ्यः । अत्र पृथिवीशब्देनाश्विनौ लक्ष्येते, शास्त्रान्तरविरोधपरिहारार्थं जडायाः प्रेरकत्वासम्भवात् । "वागध्यात्ममिति प्राहुर्ब्राह्मणाः तत्त्वदर्शिनः । वक्तव्यमधिभूतं च वन्हिस्तत्राधिदैवतमि"त्यादिस्मृतेश्च । उक्तहेतोराभासत्वानिर्णीतं भवति, रथादीनां शक्तिमत्त्वेऽपि अनुड्वहादिकं विना प्रवृत्त्यदर्शनात् ।

अप्रयोजकत्वं जडत्वेन सत्प्रतिपक्षत्वं च। इन्द्रियाणि न स्वातन्त्र्ययोग्यानि, जडत्वात्, करणत्वाद्वा रथादिवत्, वास्यादिवच्चेति। तस्माच्छास्त्रादिप्रमाणबलेन पराधिष्ठितत्वस्यापेक्षत्वमेवेति सिद्धम् ॥ १४ ॥

सू० प्राणवता शब्दात् २।४।१५ ॥

वेदान्तपारिजातसौरभः।

जीवेनैवेन्द्रियाणां स्वस्वामिभावः सम्बन्धः स भोक्ता "अथ यत्रैतदाकाशमनुविषणं चक्षुषः पुरुषोदर्शनाय चक्षुरि"त्यादिशब्दात् ॥ १५ ॥

वेदान्तकौस्तुभः।

यद्येवं तर्हि भोक्तृत्वमपि देवानामेव स्यादित्यत आह —

प्राणवता शब्दात्।

देहेन्द्रियधारणहेतुः प्राणोऽस्यास्तीति प्राणवान् तेन प्राणवता जीवेनेन्द्रियाणां स्वस्वामिभावः सम्बन्धोऽस्ति। एवं सति प्राणवानेव करणसाध्यभोगभागीत्यर्थः। कुतः? शब्दात्। "अथ यत्रैतदाकाशमनुविषणं चक्षुः स चाक्षुषः

पुरुषो दर्शनाय चक्षुः अथ यो वेदेऽदं जिघ्राणीति स आत्मा गन्धाय घ्राणमि "त्यादि-श्रुतेः ॥ १५ ॥

वेदान्तकौस्तुभप्रभा ।

ननु यदि देवताधिष्ठितत्वमेव तेषामङ्गीक्रियते तर्हि तदधिष्ठातृदेवतानामेव भोक्तृत्वमपि स्वीकार्यं चेतनत्वात्तथात्वे च शरीरिभोक्तृत्वस्याप्रयोजकत्वापत्तिरित्याशङ्क्य तत्परिहारमाह —

प्राणवता शब्दात् ।

प्राणोऽस्यास्तीति प्राणवांस्तेन प्राणवता प्राणोपलक्षितदेहेन्द्रियादिसमुदायस्वामिना शारीरेणैव प्राणानां सम्बन्धो, न देवताभिः । कुतः? शब्दात् । श्रुतिमुखेन तथैवावगमात् । "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषोदर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमि "त्यादिश्रुतिः शारीरेणैव प्राणानां सम्बन्धं दर्शयति । परमपुरुषेणेन्द्रियाधिष्ठातृदेवानां द्वारि द्वारपालानामिव करणप्रवर्तकत्वे निरूपितत्वात् न भोक्तृत्वादिषु, नहि स्वामिभोगे द्वारपालानामधिकारः सम्भवति । तासां तद्भिन्नदिव्यभोगदानाच्च । तस्माद्भगवदाज्ञया शारीरकरणानि स्वस्वकार्ये प्रेरयन्त्योदिव्यभोगान् भुञ्जन्ति, श्रीभगवदाज्ञाभङ्गभिया नान्यत्र भोगे तासां प्रवृत्तिरिति भावः "भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः, एतस्यैवाक्षरस्य प्रशासने गार्गि !

सूर्याचन्द्रमसौ विधृतौ तिष्ठतः"इत्यादिना देवतानां परनियोज्यत्वश्रवणात् । "सर्वस्य चाहं हृदि सन्निविष्टः "इत्यादिस्मृतेश्च ॥ १५ ॥

सू०तस्य नित्यत्वात् ॥ २।४।१६ ॥

वेदान्तपारिजातसौरभः ।

उक्तलक्षणस्य सम्बन्धस्य जीवेनैव नित्यत्वान्न त्वधिष्ठातृदेवताभिः ॥ १६ ॥

वेदान्तकौस्तुभः ।

तस्य नित्यत्वात् ।

इतोऽपि करणसाध्यफलभोक्ता तत्स्वामी प्राणवानेव । नतु तदधिष्ठातृदेवतानां तादृशफलभोक्तृत्वम्, तस्येन्द्रियसम्बन्धस्य प्राणवतैव नित्यत्वात् । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणाअनूत्क्रामन्ती"ति शब्दात् । देवतास्तु श्रेष्ठे ऐश्वर्ये स्थिताः, नतु हीने " न ह वै देवानऽघं गच्छती "ति श्रुतेः ॥ १६ ॥

———

वेदान्तकौस्तुभप्रभा ।

तस्य च नित्यत्वात् ।

तस्य करणसम्बन्धस्य शारीरेणैव नित्यत्वान्न देवताभिरिति सूत्रार्थः । उत्क्रान्त्यादौ तदनुवृत्तिदर्शनात् " तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती"तिश्रुतेः । तस्मात्करणाधिष्ठातृदेवतानां सत्त्वेऽपि शारीरस्यैव भोक्तृत्वं, न देवतानामिति सिद्धम् । अत्र कैश्चित् तादिदं जीवस्याग्न्यादिदेवतानां च प्राणविषयमधिष्ठानं किं स्वायत्तं ? परायत्तं ? वेति विषये स्वायत्तमिति प्राप्ते उच्यते । ज्योतिराद्यधिष्ठानमिति । प्राणवता जीवेन सह ज्योतिरादीनामग्न्यादिदेवतानां प्राणविषयमधिष्ठानं तदामननात् तस्य परमात्मनः सङ्कल्पादेव भवतीत्यर्थः । कुतः ? शब्दात् । इन्द्रियाणां साभिमानिदेवतानां जीवात्मनश्च परमपुरुषामननाय तत्त्वं शास्त्रात् इति सिद्धान्ततं, तच्चिन्त्यम् । यद्यपि चेतनाचेतनस्वरूपस्थित्यादिकं परमेश्वरायत्तमिति सर्वसम्मतम्, अस्माकं तु अभीष्टतममेव श्रुतिप्रमाणसिद्धत्वात् । तथापि उक्तार्थस्य " परात्तु तच्छ्रुतेरि "त्याद्युक्तशास्त्रेणैव सिद्धतया पौनरुक्त्यदोषस्यावश्यं भावादिति मनीषिभिरनुसन्धेयम् । ननु यथा प्राणापानादयोमुख्यप्राणस्य वृत्तिविशेषाःश्रूयन्ते रे प्राणाश्चक्षुरादयोऽपि तद्वृत्तयएव । न तत्त्वान्तराणि । कुतः ? तथैव श्रूयमाणत्वात् " हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवन्नि "त्यादिना ॥ १६ ॥

सू०त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ २।४।१७॥

वेदान्तपारिजातसौरभः ।

श्रेष्ठप्राणभिन्नत्वेन तेषां प्राणानाम् "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे"ति व्यपदेशात्ते प्राणा इन्द्रियसंज्ञकानि तत्त्वान्तराणि, नतु श्रेष्ठवृत्तिविशेषाः ॥ १७ ॥

वेदान्तकौस्तुभः ।

"हन्तास्यैव सर्वे रूपमसामे"ति एतस्यैव सर्वे रूपमभवन्ति"ति श्रुतेः । श्रेष्ठप्राणस्यैवेतरे प्राणाश्चक्षुरादयोवृत्तिभेदाः, न तेषां तत्त्वान्तरत्वं, येन प्राणवत्ता तेषां सम्बन्धान्तरत्वं स्यात्प्राणसम्बन्धेनैव नैराकाङ्क्ष्यादित्याशङ्क्याह —

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ।

श्रेष्ठात्प्राणादन्यत्र तत्तेषाम् " एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे "ति व्यपदेशात्ते श्रेष्ठतरे प्राणा इन्द्रियाणी"ति शब्देन

तत्त्वान्तराणि व्यपदिश्यन्ते । अन्यथा " एतस्माज्जायते प्राणः "इत्यनेनैवाऽपानादिग्रहणवच्चक्षुरादीनामपि ग्रहणे सिद्धे सर्वेन्द्रियाणि चेति पृथग्व्यपदेशोव्यर्थः स्यात् । तस्मादिन्द्रियाणां तत्त्वान्तरत्वात्प्राणसम्बन्धात्तेषां सम्बन्धोहि प्राणवता पृथगेव वक्तव्यः । नच वाच्यं पृथग्व्यपदिष्टं मनोऽपीन्द्रियं न स्यादिति, "मनः षष्ठानीन्द्रियाणी "ति " इन्द्रियाणि दशैकं चे "ति स्मृतेः । " दशेमे पुरुषे प्राणाआत्मैकादश "इति श्रुतेश्च मनसोऽपीन्द्रियत्वाभ्युपगमात् । नापि पृथग्व्यपदेशोमनसो व्यर्थः, " इन्द्रियाणां मनश्चास्मी "ति वचनान्मनसो हीन्द्रियनायकत्वेन पृथग्व्यपदेशस्याप्यर्थवत्त्वात् । " हन्तास्यैवे "त्यादिश्रुत्या तु प्राणाधीनप्रवृत्तिमत्त्वमिन्द्रियाणामुच्यते । प्राणाधीनत्वादपीन्द्रियाणि प्राणाइत्युच्यन्ते । यथा " सर्वं खल्विदं ब्रह्मे "ति जगति ब्रह्मशब्दप्रयोगस्तदधीनत्वादपि ॥ १७ ॥

वेदान्तकौस्तुभप्रभा ।

किञ्च प्राणैकशब्दश्रवणादपि तत्त्वाभेदोनिश्चीयते इत्याशङ्क्योत्तरमाह —

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ।

ते प्रकृताः प्राणावागादयइन्द्रियाण्युच्यन्ते, तानि तत्त्वान्तराण्येव, न मुख्यप्राणस्य वृत्तयः । कुतः ? तद्व्यपदेशादन्यत्र श्रेष्ठात् । श्रेष्ठादन्यत्र मुख्यप्राणं विना तद्भिन्नतयेति यावत् । तेषां वागादीनां श्रुतौ व्यपदेशात् "एतस्माज्जायते प्राणोमनः सर्वेन्द्रियाणि चे"त्यादिना । ननु तर्हि मनसोऽपीन्द्रियत्वं न स्यात्, पृथगुपदेशाविशेषादिति चेन्न, तस्य मनसः श्रुतिव्याख्यारूपस्मृतौ हीन्द्रियत्वाभ्युपगमात् । "इन्द्रियाणि दशैकं चे"ति श्रीमुखोक्तेः । "दशेमे पुरुषे प्राणाआत्मैकादशे"तिश्रुतेश्च । समानजातीयत्वमेकां जातिं क्रियां गुणं चाश्रित्य सङ्ज्ञाप्रयोगाः प्रवर्तन्ते, यथाष्टौ ग्रहारूपादिज्ञानोत्पत्तिहेतुत्वाच्चेन्द्रियत्वं मनसइति भावः । ननु कथं तर्हि चक्षुरादौ प्राणशब्दप्रयोगइति चेन्न, प्राणाधीनप्रवृत्तिकत्वेनेन्द्रियाणां तत्तानिर्देशस्य गौणत्वेनाविरोधात् "तस्मादेत एतेनाख्यायन्त" इतिश्रुतेः मुख्यप्राणविषयस्यैव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वावगमादित्यर्थः ॥ १७ ॥

सू० भेदश्रुतेर्वैलक्षण्याच्च ॥

२ । ४ । १८ ॥

वेदान्तपारिजातसौरभः ।

वागादिप्रकरणमुपसंहृत्य "अथ हेममासन्यं प्राणमूचुरि"ति तेभ्योवागादिभ्यः श्रेष्ठस्य प्राणस्य भेदश्रवणात् देहेन्द्रियादिस्थितिहेतोः श्रेष्ठात्

प्राणादिन्द्रियाणां विषयग्राहकत्वेन वैलक्षण्याच्च तानि तत्त्वान्तराणि ॥ १८ ॥

वेदान्तकौस्तुभः ।

भेदश्रुतेर्वैलक्षण्याच्च ।

" ते ह वाचमूचुरि "त्युपक्रम्यासुरविध्वस्त-वागादीन्द्रियप्रकरणमुपसंहृत्य "अथ हेममासन्यं प्राणमूचुरि"ति भिन्नप्रकरणेऽसुरविध्वंसिनोमुख्य-स्य प्राणस्य वागादीन्द्रियेभ्योभेदेन श्रवणात् देहेन्द्रियधारणहेतुः श्रेष्ठः प्राणः "वचनादि-विषयाणि वागादीनीन्द्रियाणी "त्यादिबहुवै-लक्षण्याच्च मुख्यप्राणादितरे प्राणास्तत्त्वान्तरा-णीत्यर्थः । तस्मादेवताऽधिष्ठिता जीवसम्बन्धिनः इन्द्रियशब्दवाच्याः श्रेष्ठात् प्राणादितरे प्राणास्त त्त्वान्तराणीति सिद्धम् ॥ १८ ॥

इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ७ ॥

वेदान्तकौस्तुभप्रभा ।

भेदश्रुतेर्वैलक्षण्याच्च

मुख्यप्राणस्येन्द्रियाणां च भेदश्रवणादपि मुख्यप्राणादि-न्द्रियाणां तत्त्वान्तरत्वमित्यर्थः । " ते ह वाचमूचुरि "त्युपक्रम्य

वागादीनामसुरविध्वस्तानामुपन्यासं कृत्वा तत्प्रकरणोपसंहारे "अथ हममासन्यं प्राणमूचुरि"त्यसुरविध्वंसिनोमुख्यस्य प्राणस्य पृथक्त्वेनोपक्रमणात्। अत्रैव हेत्वन्तरमाह। वैलक्षण्याच्चेति। मुख्यप्राणादितरेषां वैलक्षण्यादपि तत्त्वान्तरत्वमिति सूत्रार्थः। तथाहि प्राणस्य वागादिषु सुप्तेषु जागरणम्, इन्द्रियाणां मृत्युव्याप्तत्वेन प्राणस्य मृत्युना ऽनाप्तत्वं, तेषां विषयग्रहणहेतुत्वं, प्राणस्य तु देहादिधारणपातनहेतुत्वं, च श्रुतिषु दर्शनाद्वैलक्षण्येन तत्त्वान्तरत्वमित्यर्थः। इन्द्रियेषु श्रवणालोचनाद्यसाधारणवृत्तयः, प्राणस्य तु सर्वेन्द्रियेषु परिस्पन्दरूपासाधारणवृत्तिरिति विवेकः। अत्र प्रमाणभूताः श्रुतयस्तु पूर्वमेव पठिता अनुसन्धेया इति संक्षेपः। ननु "तत्तेजोऽसृजत तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः एतस्माज्जायते प्राण"इत्यादिजगत्सृष्टिविषयश्रुतीनां परस्परविरुद्धसृष्टिक्रमपरत्वदर्शनात् इतरेतरबाध्यबाधकभावापत्त्या ह्येकतमस्यापि क्रमस्य प्रामाणिकत्वं न स्यात्, सर्वेषामपि श्रौतत्वाविशेषादिति चेन्न, गुणोपसंहारन्यायेन न्यूनाधिकसङ्ख्योपक्रमस्य पौर्वापर्य्यक्रमस्याविरोधेन सर्वस्यापि सामञ्जस्यात्। तथा चोक्तः विवरणकारैः श्रीपुरुषोत्तमाचार्यचरणैः "गुणोपसंहारन्यायेन सर्वस्य वाक्यजातस्य सामञ्जस्यमेवे"त्यादिना। एतदुक्तं भवति सृष्टिक्रमश्रुतीनां परस्परविरोधे क्वचिद्व्यवस्थयैव भाव्यम्। अन्यथैकतमस्या अपि श्रुतेर्बाधायामर्द्धनास्तिकत्वापत्तिः। तत्र प्रलयश्रुतेः प्रबलत्वात् तदनुसारेण सर्वास्वपि सृष्टिविषयकासु श्रुतिषु गुणोपसंहारन्यायेन सृष्टिक्रमोपन्यासः कर्त्तव्यः। तथात्वे तु न कश्चिद्विरोधावकाशः। तथैवाम्नायते सुबालोपनिषदि लयक्रमः "पृथिव्यप्सु प्रलीयते, आपस्तेजसि प्रलीयन्ते, तेजोवायौ प्रलीयते, वायुराकाशे प्रलीयते, आकाशइन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ प्रलीयन्ते, भूतादिर्महति

प्रलीयते, महानव्यक्ते प्रलीयते, अव्यक्तमक्षरे, अक्षरं तमसि, तमः परे देवे एकीभवती "त्यादिना। व्याख्याता चेयं श्रुतिर्वैष्णवे श्रीपराशरेण। "जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजोवायौ प्रलीयते। वायुश्चलीयते व्योम्नि तच्चाव्यक्ते प्रलीयते" इत्युक्त्वा "प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि। परमात्मा च सर्वेषामाधारः परमेश्वरः। विष्णुनामा स वेदेषु वेदान्तेषु च गीयते" इत्यादिनेति संक्षेपः ॥ १८ ॥

इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ७ ॥

सू० संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। २।४।१९॥

वेदान्तपारिजातसौरभः ।

"सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मना ऽनुप्रविश्य नामरूपे व्याकरवाणी"ति तासां त्रिवृतं त्रिवृतमेकैकां करवाणी"ति नामरूपव्याकरणमपि त्रिवृत्कुर्वतः परस्यैव कर्म। य एकैकां देवतां त्रिरूपामकरोत्स एव हि अग्न्यादित्यादीनां नामरूपकर्त्ता। कुतः? "सेयं देवते"त्युपक्रम्य "अनेन जीवेनात्मनाऽनुप्र-

विश्य नामरूपे व्याकरवाणी"ति व्याकरणस्य परदेवताकर्तृकत्वोपदेशात् ॥ १९ ॥

वेदान्तकौस्तुभः ।

एवं तावज्जिज्ञास्यलक्षणाकांक्षावशाज्जगत्कारणं तदिति पूर्वाऽध्याये निरूपितमिह तु तद्दार्ढ्याय परोक्तकारणपरीक्षापूर्वक×स्वाभिमतजगत्कारणप्रतितये×ब्रह्मकर्तृकं वियदादिकं सुदृढं निरूपितमथेदानीं नामरूपयोर्व्याकरणे परब्रह्मकर्तृके वक्ष्यमाणश्रुतिस्थजीवपदेन जातां शंकां निराकरोति —

संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्

छान्दोग्ये सत्प्रकरणे "सेयं देवतैक्षत,हंताहमिमास्तिस्रोदेवता, अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति"तासां त्रिवृतं त्रिवृतमेकैकां करवाणी"ति नामरूपव्याकरणं श्रूयते, तद्धि जीवकर्तृकमुत परमात्मकर्तृकम् ? जीवकर्तृकमेव । कुतः ? "अनेन जीवेनात्मनाऽनु-

× एतस्मिन्नन्तरे स्थितोऽधिकः पाठोदृश्यते क्वचित्पुस्तके ।

प्रविश्ये " ति निर्देशात् । इति प्राप्ते उच्यते । तुशब्दः पूर्वपक्षनिरासार्थः । सञ्ज्ञामूर्त्तिक्लृप्तिर्नाम-रूपव्याकरणां त्रिवृत्कुर्वतो योहि सर्वज्ञः समर्थ-एकैकां देवतां त्रिरूपामकरोत्तस्य परमात्मनः कर्म भवितुमर्हति । कुतः ? सैयं देवतैक्षते" त्युपक्रम्य नामरूपे व्याकरवाणीति उत्तमपुरुष-प्रयोगेण त्रिवृतं त्रिवृतमेकैकां करवाणी" ति नामरूपव्याकरणं सङ्कल्पः, तत्सिद्धये एकैकां देवतां त्रिरूपामण्डोत्पत्तेः प्राक् संविधाय ततोऽ-ण्डमुत्पाद्य तत्र प्रविश्य नामरूपे कृतवान् । त्रिवृतकरणश्रुतिः पञ्चीकरणोपलक्षणार्था । एवं त्रिवृत्कुर्वतः परस्य ब्रह्मण एव नामरूपव्याक-र्तृत्वोपदेशात्, नामरूपव्याकर्णानर्हत्वाच्च जीवस्ये-त्यर्थः । जीवप्रयोगाभिप्रायस्तु " अरूपवदेव ही " त्यत्र स्फुटीभविष्यति ॥ १६ ॥

वेदान्तकौस्तुभप्रभा ।

सञ्ज्ञामूर्त्तिक्लाप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ।

छान्दोग्ये सत्प्रकरणे "सेयं देवतैक्षत हन्ताहमिमास्तिस्रोदे-वता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति

तासां त्रिवृतं त्रिवृतमेकैकां करवाणी"ति नामरूपव्याकरणमाम्नातं, तत्र संशयः, एतन्नामरूपव्याकरणव्यापाराश्रयोजीवः परमात्मा वेति ? किन्तावत्प्राप्तं, जीव एवेति । कुतः ? अनेन जीवेनात्मने"ति विशेषोक्तेः । यथा चारेणाहं परसैन्यमनुप्रविश्य सङ्कुलयानीति प्रयोगे चारकर्तृकमेव परसैन्यप्रवेशकलनं हेतुकर्तृत्वेन राज्ञि उपचर्यते उत्तमपुरुषप्रयोगेणैव । तथा जीवकर्तृकमेव सन्नामरूपव्याकरणं हेतुकर्तृत्वेन परमात्मन्युपचर्यते उत्तमपुरुषप्रयोगेणेति । अत्र राद्धान्तः । सञ्ज्ञामूर्तिक्लृप्तिरिति । संज्ञा च मूर्त्तिश्च संज्ञामूर्ती, तयोः क्लृप्तिः समर्थनं व्याकरणं, सा च त्रिवृत्कुर्वतः त्रिवृतिकर्तुः परमेश्वरस्यैव कर्म, न जीवस्य । कुतः ? उपदेशात् "सेयं देवतैक्षते"त्यादिना व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव व्याकर्तृत्वोपदेशात् व्याकरणप्रवेशयोः समानकर्तृत्वोपपत्तेश्चेति सूत्रार्थः । ननु "अनेन जीवेनाऽत्मने"ति विशेषश्रवणाज्जीवस्यैव कर्तृत्वं युक्तमिति चेन्न, नामरूपव्याकरणात्प्राक्कर्तृत्वे जीवस्य सामर्थ्याभावात् । अन्यथा प्रलयेऽपि तस्य कर्तृत्वसामर्थ्ययोगे प्रलयाभावप्रसङ्गात् । एतेन समष्टिजीवाभिमानिचतुर्मुखस्यैव नामरूपव्याकरणं कर्मेति पक्षोनिरस्तः । तस्यापि त्रिवृत्कृतभूतनिर्मितब्रह्माण्डजन्मानन्तरोत्पत्तिकत्वात् । "तस्मिन्नेवाभवद्ब्रह्मा सर्वलोकपितामह" इति स्मरणात् । किञ्च त्रिवृत्करणपूर्वकमेवेदं नामरूपव्याकरणमित्यवगम्यते । प्रत्येकं नामरूपव्याकरणस्य तेजोऽबन्नोत्पत्तिवचनेनैव निर्णयात् । नामरूपव्याकरणं विना तेजोऽवन्नमित्यादिनाम्ना निर्देष्टुमशक्यत्वात् तेजइत्यादिनामाद्यभावे केन निर्दिशेत् । यथा नामरूपव्याकरणात् प्राक् देवदत्तस्य पुत्राइति सामान्यनिर्देशे सत्यपि देवदत्तस्य त्रयः पुत्रा यज्ञदत्तोऽग्निदत्तो ब्रह्मदत्तश्चेति निर्देशासम्भवः नामादिव्याकरणोत्तरं तु सम्भवत्येव । तथा नाम·

रूपव्याकरणात्प्राक् परमेश्वरसृज्यमिदं जगदिति सामान्येन निर्देष्टुं शक्येऽपि तेजोऽबन्नमिति नामादिविशेषविभागेन वक्तुमशक्यत्वात् । व्याकरणे तु सम्भवतीति भावः । तच्च त्रिवृत्करणमग्न्यादित्यचन्द्रविद्युत्सु श्रुत्या दर्शितम्, "यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये"त्यादिना । तत्राग्निरिति रूपव्याकरणं रूपप्रागभावे नामकरणासम्भवात् रूपाभावे तदनुपलब्धिप्रसङ्गात् रूपव्याकरणमेव विषयोपलब्धेरसाधारणहेतुरित्यर्थः । तथैवाग्निरिति वर्णसमुदायरूपं नामव्याकरणमेवमादित्यादिष्वपि विवेचनीयम् । एतेनैव पार्थिवाप्यतैजसेष्वपि पदार्थेषु त्रिवृत्करणं सूपपन्नम् । उपक्रमोपसंहारसाधारण्यात्तत्र "इमास्तिस्रो देवता त्रिवृत्त्रिवृदेकैका भवती"ति उपक्रमसामान्यात् । यद्रोहितमिवाभूदिति तैजसरूपमित्युपसंहारसाम्याच्चेति संक्षेपः । यच्चोक्तं चारेणापरसैन्यं प्रविश्येत्यादि तन्नुच्छं, दृष्टान्तवैषम्यात् । राजचारयोरत्यन्तभेदेन पृथक् सिद्धत्वात् । प्रकृते जीवस्य ब्रह्मात्मकात्मकत्वेन तदपृथक् सिद्धत्वात् । ब्रह्माण्डान्तर्वर्त्तिनो जीवस्य तद्बहिर्भूतवर्त्तिपदार्थानां नामरूपव्याकरणासम्भवात् । चतुर्मुखादेः स्वसृज्यानां नामादिव्याकरणे शक्तिमत्त्वेऽपि स्वप्राक् वस्तूनां नामादिव्याकर्तृत्वे न शक्तिरिति ध्वन्यर्थः । किञ्च जीवबुद्ध्यगोचररचनस्य जगतोनामादिव्याकृतौ परमेश्वरस्यैव समर्थत्वान्नान्यस्य । "आकाशोह वै नामरूपयोर्निर्वहिते"त्यादिनोपनिषत्सु तस्यैव तथात्वश्रवणात् । श्रुत्यर्थस्तु इमाः साकल्येनकरनिहितफलवत् परमेश्वरस्य श्रुत्यर्थाभिमानिदेवविशेषस्य प्रत्यक्षगोचरास्तेजोऽबन्नसंज्ञकास्तिस्त्रोदेवता अनेन जीवेन स्वात्मकसमष्टिजीवावच्छिन्नेन जीवनहेतुनाऽन्तरात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति । देवतिर्यग्मनुष्यादिविचित्रासङ्ख्येयस्वेतरागोचरव्यक्त्यात्मना विभज्य तत्त-

न्नामादिना संयोजयामीति । एतत्सङ्कल्पविषयसंसिद्धये तासामन्योऽन्यसंसृष्टानां तत्कार्यासमर्थानां संसर्गलक्षणासामर्थ्यं विधाय एकैकां त्रिवृतमकरोदिति यावत् । ननु एवं " अनेन जीवेनात्मने "ति सामानाधिकरण्यस्य मुख्यताभङ्गइति चेन्न, ब्रह्मणः सर्वात्मत्वेन सर्वशब्दवाच्यत्वात्सामानाधिकरण्यं मुख्यमेवेति । अत्र ये जीवब्रह्मणोरत्यन्ताभेदमभ्युपगच्छन्ति ते प्रष्टव्याः ? सृष्टेः प्राक्प्रलयसमयेऽनभिव्यक्तनामरूपकस्य जीवस्य जीवात्मना सद्भावो न वेति ? नाद्यः, अद्वैतभङ्गात्, ब्रह्मणएवजीवभावापत्त्या प्रवेशइति सिद्धान्तभङ्गात् । सजातीयविजातीयस्वगतभेदशून्यं निर्विशेषं ब्रह्म आसीदिति सदेव सौम्येति श्रुत्यर्थः, इतिउपक्रमवाक्यार्थसिद्धान्तभङ्गाच्च । न द्वितीयः, जीवस्याजत्वानादित्वभङ्गात् । तद्बोधकशास्त्रव्याकोपाच्च । कृतनाशाकृताभ्यागमप्रसङ्गाच्च । किञ्च सदेवेति वाक्यस्योक्तलक्षणनिर्विशेषपरत्वाङ्गीकारे "तदैक्षत बहु स्यां प्रजायेये "त्यादिश्रुतिप्रतिपादितेक्षणबहुभवनसङ्कल्पाश्रयस्य तत्पूर्वकसृष्टिकर्तुरभावेन सृष्ट्यभावप्रसङ्गः, वाक्यस्य निर्विषयत्वापत्त्या बाधप्रसङ्गश्च नालोच्यते वैदिकाभिमानिभिर्देवानांप्रियैः । यच्च कैश्चित् अनेन जीवेनेत्येतदनुप्रविश्येत्यनेन सम्बध्यते आनन्तर्य्यान्न व्याकरवाणीत्यनेनेति श्रुत्यक्षराणि योजितानि, तदप्यपेशलं, तदानीं तन्मते जीवस्याभावात् । अन्यथाऽद्वैतसिद्धान्तभङ्गात् । किञ्च क्त्वाप्रत्ययेन समानकर्तृकत्वप्रतीतिबाधप्रसङ्गाच्च । यत्तु चारेणपरसैन्यं प्रविश्येत्यादिव्याख्यानं तन्महत्क्षुद्रं, दृष्टान्तवैषम्योक्त्या पूर्वमेव निरस्तत्वात् । अत्यन्तभेदपरत्वे ब्रह्मणोजगदुपादानत्वाभावप्रसङ्गात् । तथात्वे च अवैदिकतार्किकादिपक्षे प्रवेशात् । अन्यैस्तु अनेनजीवेनेत्यस्य जीवविशिष्टेनेति व्याख्यानमुक्तं तदप्यपेशलं, विशिष्टवादस्य पूर्वमेव निरस्तत्वादित्यलं विस्तरेण ॥ १९ ॥

सू० मांसादिभौमं यथाशब्द-मितरयोश्च ॥ २। ४। २० ॥

वेदान्तपारिजातसौरभः।

तेषां त्रिवृत्कृतानां तेजोऽवन्नानां कार्य्याणि शरीरे शब्दादेवावगन्तव्यानि "भूमेः पुरीषं मांसं मनश्चेति अपां मूत्रं लोहितं प्राणश्चे"ति तेजसोऽस्थिमज्जावाक्के"ति ॥ २० ॥

वेदान्तकौस्तुभः।

त्रिवृत्कृतानां तेजोऽबन्नानां प्रत्येकं कार्य्यत्रयं-शरीरगतं शरीरस्यासारत्वप्रदर्शनार्थं यथाश्रुतं दर्शयति —

मांसादिभौमं यथाशब्दमितरयोश्च।

भूमेस्त्रिवृत्कृतायाः व्रीहियवादिरूपायाः शारीरेणाशिताया इदं भौमं मांसादि यथाशब्दं बोध्यम्। आदिशब्देन पुरीषमनसी गृह्येते। शब्दः श्रुतिः

" अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो-धातुस्तत्पुरीषं भवति योमध्यमस्तन्मांसं योऽणि-ष्टस्तन्मन एवे"ति । एवमितरयोः अप्तेजसो-श्च कार्यत्रयं प्रत्येकं बोध्यम्। " मूत्रं लोहितं प्राणश्चेत्यपां कार्य्यम्, अस्थिमज्जावाक्चेति तेजसः कार्यम्" । अत्र प्राणस्य जलाधीनस्थिति-कत्वमात्रेण तत्कार्यत्वं बोध्यम्। वस्तुतः प्राणस्य वायोरवस्थाविशेषत्वात्। तथा मनसो भौमत्वम-न्नभक्षणजन्यस्वास्थ्यमात्राभिप्रायम् ।एवं तेजः-कार्येष्वपि यथासम्भवं बोध्यम् ॥ २० ॥

वेदान्तकौस्तुभप्रभा।

अथ त्रिवृत्कृतानां तेजोऽबन्नानां कार्यविभागमाह —

मांसादिभौमं यथाशब्दमितरयोश्च।

भूमेस्त्रिवृत्कृतायाः पुरुषेण भुज्यमानाया इदं भौमं मांसादि कार्यं यथाशब्दं श्रुतिरूपशब्दनिरूप्यमवगन्तव्यम्। " अन्नमशितं त्रेधा विधीयते तस्य यः स्थिविष्ठोधातुस्तत्पुरीषं भवति मध्यमं मांसमणिष्ठं तु मन एवे"ति श्रुतेः। एवमितरयोः अप्तेजसोश्च कार्य-मपि बोध्यम्। मूत्रं लोहितं प्राणश्चेत्यपां कार्यम्, अस्थिमज्जावाक्च तेजसः कार्यमित्यर्थः ॥ २० ॥

सू०वैशेष्यात्तु तद्वादस्त-द्वादः ॥ २।४।२१ ॥

वेदान्तपारिजातसौरभः ।

तेषां भेदेन ग्रहणं तु भागभूय-स्त्वात् ॥ २१ ॥

हरिरों तत्सदिति श्रीमद्भगवन्निम्बार्कविरचिते शारीरकमीमांसावाक्यार्थे वेदान्तपारिजात-सौरभे द्वितीयाध्यायस्य चतुर्थः पादः ॥४॥

वेदान्तकौस्तुभः ।

ननु त्रिवृत्कृतानां तेषामिदमस्येदमस्ये-ति भेदे किं मूलमित्यत आह —

वैशेष्यात्तु तद्वादस्तद्वादः ।

तुशब्दः शङ्कानिवृत्त्यर्थः । विशेषस्या-धिकभागस्य भावो वैशेष्यं तस्मादिदमस्येदमस्ये-ति वादो युक्त एव । अभ्यासोऽध्यायपरिसमाप्तिं

द्योतयति । तदित्थं ब्रह्मणि श्रीवासुदेवे समन्वितानां श्रुतिवाक्यानां न कुतोऽपि विरोध इति सिद्धम् ॥ २१ ॥

इति सञ्ज्ञामूर्त्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

हरिरों तत्सदिति श्रीसनत्कुमारसन्तति-प्रवर्त्तकाचार्यश्रीमन्निम्बार्कपादपद्मान्तेवासिना श्रीश्रीनिवासाचार्येण विरचिते शारीरक-मीमांसाभाष्ये श्रीमति वेदान्तकौस्तुभे द्वितीयाऽध्यायस्य चतुर्थः पादः ॥४॥

समाप्तोऽयं द्वितीयोऽविरोधाख्योऽध्यायः ॥

वेदान्तकौस्तुभप्रभा ।

ननु सर्वं भूतभौतिकवस्तुमात्रं त्रिवृत्कृतमेव, तर्हि इदं भूमेः कार्यमिदमपामिदं तेजसइति भेदनिर्देशासम्भवप्रसङ्गो-दुर्वारः, सर्वेषां सर्वत्र सत्त्वादित्याशङ्क्यं परिहरन्नाह —

वैशेष्यात्तु तद्वादस्तद्वादः

तुशब्दः शङ्कानिरासार्थकः । विशेषस्य भावोवैशेष्यं भाग-भूयस्त्वमिति यावत् । तस्य पृथिव्यादौ दर्शनात्तद्वादः स तेजोऽ-बन्नविशेषवादोभौतिकवस्तुविशेषवादश्च सूपपन्नइत्यर्थः । द्विरुक्ति-

रध्यायपरिसमाप्त्यर्था ॥ २१ ॥

इति सञ्ज्ञामूर्त्तिक्लृप्त्यधिकरणम् ॥ ८ ॥

अप्रतर्क्याय हरये रमाकान्ताय विष्णवे ॥
श्रीकृष्णाय नमस्ते तु निर्दोषगुणशालिने ॥ १ ॥

इति श्रीसनकसम्प्रदायप्रवर्त्तकाचार्य श्रीश्रीनिम्बार्कमतानुयायि-
श्रीमन्मुकुन्दचरणारुणपद्ममकरन्दभृङ्गेण जगद्विजयि श्रीदश्री-
केशबकाश्मीरिभट्टेन सङ्गृहीतायां श्रीवेदान्तकौस्तुभ-
प्रभाख्यायां ब्रह्मसूत्रवृत्तौ द्वितीयाध्याय-
चतुर्थपादविवरणम् ॥ ४ ॥

समाप्तश्चायमविरोधाख्यो द्वितीयो ऽध्यायः ।

अस्याविरोधाऽध्यायस्य प्रथमे पादे सूत्राणि ३५ पञ्चत्रिंशत् ।
अधिकरणानि च १० दश ।
द्वितीये पादे सूत्राणि ४५ पञ्चचत्वारिंशत् ।
अधिकरणानि ८ अष्टौ ।
तृतीये पादे सूत्राणि ५२ द्वापञ्चाशत् ।
अधिकरणानि १२ द्वादश ।
चतुर्थे पादे सूत्राणि २१ एकविंशतिः ।
अधिकरणानि ८ अष्टौ ।
सर्वाणि चैतदध्यायसूत्राणि १३५ पञ्चत्रिंशदुत्तरं शतम् ।
सर्वाण्यधिकरणानि च ३८ अष्टत्रिंशत् ।

॥ *इति* ॥

॥*ॐ श्रीमद्राधागोपालाभ्यां नमः*॥

ॐ मङ्गलमूर्त्तये श्रीमन्नियमानन्दाय नमः

भाष्यत्रयोपेते ।

श्रीब्रह्मसूत्रे ॥



तृतीयाऽध्यायारम्भः ।

सू० तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् । ३ । १ । १ ॥

श्री६श्रीभगवन्निम्बार्कविरचित—वेदान्तपारिजात-सौरभाख्य—ब्रह्मसूत्र—वाक्यार्थः ।

समन्वयाविरोधाभ्यां साध्ये निश्चिते । अथ साधनानि निरूप्यन्ते । तत्रादौ वैराग्यार्थं स्वर्गादि-गमनागमनादिदोषान् दर्शयति । उक्तलक्षणः प्राणादिमान् जीवो हि सूक्ष्मभूतसम्परिष्वक्त एव

देहं विहाय देहान्तरं गच्छतीति "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती" त्यादिप्रश्ननिरूपणाभ्यां गम्यते ॥ १ ॥

श्रीश्रीनिवासाचार्य-विरचित-श्रीवेदान्त-कौस्तुभभाष्यम्।

इत्थमतिक्रान्तेनाध्यायद्वयेनोपेये समस्त-कल्याणगुणगणार्णवे स्वभावतोऽपास्तसमस्तदोषे जिज्ञास्ये ब्रह्मणि श्रीवासुदेवे निर्णीतेऽथ तत्प्राप्त्युपायाकाङ्क्षायां साधनान्यभिधीयन्ते । कति-पयवेदान्तवाक्यार्थप्रकाशकस्य नानासंशयघ्न-स्यास्य तृतीयाध्यायस्य प्रथमे पादे संसारस्य दोषनिरूपणेन ततो विरक्तिः । द्वितीये पादे ब्रह्म-णो गुणनिरूपणेन तत्रानुरक्तिश्च निरूप्यते । तृतीये पादे च ब्रह्मोपासनाभेदाभेदविचारस्तासु गुणोपसंहाराऽनुपसंहारनिर्णयश्च क्रियते। चतुर्थे पादे तु विद्यातः पुरुषार्थः? उत कर्मणः? इत्याशंक्य विद्यातः पुरुषार्थः, कर्म तु फलाभिसन्धिरहितं विद्या-ङ्गमिति प्रतिपाद्यते। तत्र तावत् "अथैनमेते प्राणा-

अभिसमायन्ति, अन्यन्नवतरं रूपं कुरुत" इति वचनाज्जीवः प्राणेन्द्रियादिसहितः स्वकृतकर्मफलभोगार्थं प्राक् शरीरं विहाय शरीरान्तरं प्रतिपद्यते । तत्र किं स देहान्तरबीजरूपैः सूक्ष्मभूतैः संपरिष्वक्तो यात्युतासम्परिष्वक्तः ? इति संशयः । "स्वर्गे नरके वा यत्र कर्मफलमनुभूयते, तत्रैव कर्मफलभोगायतनशरीरारम्भकभूतमात्रा लभ्यन्त " इति साङ्ख्यादिपक्षादसम्परिष्वक्त एव यातीति पूर्वपक्षे सिद्धान्तमाह —

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ।

प्राणाद्याधारभूतैरुत्तरदेहबीजरूपैः सूक्ष्मैर्भूतैः सम्परिष्वक्तः परिवेष्टित एव तदन्तरप्रतिपत्तौ देहान्तरप्रवेशे जीवो रंहति गच्छति । कुतः ? प्रश्ननिरूपणाभ्याम् । प्रश्नस्तावत्पञ्चाऽग्निविद्यायां "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती" ति निरूपणं प्रतिवचनं "तच्च तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमोराजा सम्भवती"त्यादिना आपएव द्युलोकादौ प्रक्षिप्तास्तत्तत्पदवाच्या भवन्तीति प्रति-

पाद्य इति "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति । अयमर्थः, तत्र देवाः जीवसचिवभूताः प्राणाः अग्नित्वेन निरूपिते द्युलोके श्रद्धां जुह्वति प्रक्षिपन्ति, सा च सोमराजाख्यामृतमयदेहात्मना परिणमते, तं च देहं ते एव देवाः पर्जन्ये ऽग्नौ जुह्वति, स च देहस्तत्र हुतो वर्षं भवति, तच्च वर्षन्ते एव देवाः पृथिव्यामग्नौ जुह्वति, तच्च तस्यां हुतं सदन्नभावमाप्नोति, तदप्यन्नं ते एव देवाः पुरुषे ऽग्नौ जुह्वति, तत्र हुतं तदन्नं रेतोभावं प्राप्नोति, तद्रेतस्ते एव देवाः योषिदग्नौ जुह्वति, तच्च रेतस्तत्र गर्भात्मना स्थितं सत्पुरुषसञ्ज्ञां लभते । इत्थमापः पुरुषसञ्ज्ञां लभन्ते । तदेतत्सर्वं जानन्नपि राजा प्रवाहनः श्वेतकेतुं प्रति कर्मिणां गन्तव्यदेशादिप्रश्नान्कृत्वेदमपि पृष्टवान् । "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति। एवं पृष्टः श्वेतकेतुः पितरं गौतममागत्योवाच एवमहं राज्ञा पृष्टो ऽस्मि तस्योत्तरं न जानामीति । सच गौतमः स्वयमजानन् राजसमीपं गत्वा तां विद्यां ब्रूहीत्युवाच । ततो गौतमं प्रति

राज्ञा प्रत्युत्तरं दत्तमेवं भूताभ्यां प्रश्ननिरूपणाभ्याम् अनुपलक्षितैः सूक्ष्मैर्भूतैः सम्परिष्वक्त एव देहान्तरं गच्छतीति निश्चीयते ॥ १ ॥

श्रीश्रीकेशवकाश्मीरिभट्टाचार्यविरचितवेदान्तकौस्तुभप्रभा ।

साधनोपाययुक्तानां भक्तानां पुरुषोत्तमः ।
ददाति वाञ्छितं सर्वं वर्ण्यन्ते तान्यतस्त्विह ॥

इत्थं द्वितीये ऽध्याये श्रुतिविरुद्धस्मृतीनां तर्काणां च भ्रममूलत्वं प्रदर्शयित्वा श्रुतीनामितरेतरविरोधाभासं निराकृत्य समन्वयाविरोधोनिर्णीतस्तेन च श्रीपुरुषोत्तमस्यैव परब्रह्मणो-मुमुक्षुध्येयस्य निखिलजगदेककारणत्वं वेदान्ताः प्रतिपादयन्तीति स्थापितमथेदानीमस्मिंस्तृतीयाऽध्याये तत्प्राप्त्युपायभूतसाधनानि निरूप्यन्ते । तानि च कर्मज्ञानभक्तिप्रपत्त्यादिरूपाणि श्रीपुरुषोत्तमाचार्यपादैर्विस्तरेण भाषितानीत्यत्रोपरम्यते। इयं तावच्छ्रेयः साधनप्रक्रिया, आदौ जन्मसमये पुंसि भगवतः श्रीमुकुन्दस्य कृपाकटाक्षोमुमुक्षोत्पादनासाधारणहेतुभूतः, ततः सात्विकं मुमुक्षार्हं जन्म, मुमुक्षायां सत्यां तत्साधने स्वाधिकारानुरूपं यतते । तत्रादौ यथाधिकारभगवदर्पितनिष्कामकर्मयोगस्तेन भगवदीयानुग्रहसहकृतेन संस्कृतमनस्कस्य मुमुक्षोर्वैराग्यादिपूर्वकाजिज्ञासया श्रवणादिलक्षणया तत्स्वरूपादिविषयकपरोक्षज्ञानं, ततो ध्यानपरिपाकजन्या पराभक्तिपर्यायरूपा ध्रुवास्मृतिस्तया च तदनुग्रहेण तत्साक्षात्कारस्ततो मोक्ष इति । तत्र मुमुक्षोपायश्च प्राप्यवस्त्वति-

रिक्तवैतृष्ण्यं प्राप्यतृष्णा चेति, तत्सिद्धये प्रथमद्वितीयपादयोरारम्भः । तत्र प्रथमे पादे पञ्चाऽग्निविद्यामाश्रित्य संसारिजीवस्य लोकगत्यागतिरूपदोषाः प्रदर्श्यन्ते । "वैराग्यार्थं तस्माज्जुगुप्सेते"ति श्रुतेः । तत्रायं जीवोदेहादेहान्तरं गच्छन् देहबीजभूतैर्भूतसूक्ष्मैः सम्परिष्वक्तो गच्छति ? उतापरिवृतः ? इति संशये, असम्परिष्वक्त इति पूर्वः पक्षः, " स्वर्गे नरके वा यत्र फलमनुभूयते तत्रैव भूतानि लभ्यन्ते "इति साङ्ख्यसिद्धान्तादिति प्राप्ते सिद्धान्तमाह —

तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम् ।

तदन्तरप्रतिपत्तौ देहादेहान्तरप्रवेशे देहबीजैर्भूतसूक्ष्मैः सम्परिष्वक्तः परिवेष्टितो जीवो रंहति गच्छति । कुतः ? प्रश्नेति । प्रश्नस्तावत् छान्दोग्ये पञ्चाऽग्निविद्यायां श्वेतकेतुं प्रति पाञ्चालः प्रवाहणः कर्मिणां गन्तव्यदेशादिप्रश्नान् कृत्वेदमपि पृष्टवान् । "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति निरूपणं नाम प्रतिवचनं "तद् द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपेषु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चा*ऽऽहुतीर्दर्शयित्वेति तु "पञ्चम्या-

---

* देवा जीवस्य प्राणा द्युलोकरूपेऽग्नौ श्रद्धारूपं वस्तु प्रक्षिपन्ति । सा च श्रद्धा सोमराजाख्यामृतमयदेहरूपेण परिणमति । तं चामृतमयदेहं ते एव प्राणा पर्जन्यरूपेऽग्नौ प्रक्षिपन्ति । सच देहस्तत्र प्रक्षिप्तो वर्षं भवति, तच्च वर्षान्तएव प्राणाः पृथिवीरूपाऽग्नौ प्रक्षिपन्ति। तच्चान्नं भवति । तच्च ते एव प्राणाः पुरुषरूपाऽग्नौ प्रक्षिपन्ति । तच्च तत्र रेतो भवति । तत् तएव प्राणा योषिद्रूपाऽग्नौ प्रक्षिपन्ति । एवं पूर्वाहुतिषु हुतानामेवापां गर्भरूपेण पुरुषसंज्ञा जायते ।

माहुतावापः पुरुषवचसोभवन्ती"ति । अतः प्रश्नप्रतिवचनाभ्यां देहबीजभूतभूतसूक्ष्मैः सहैव तत्र तत्र गच्छतीत्यवगम्यते ॥ १ ॥

सू० त्र्यात्मकत्वात्तु भूयस्त्वात्

३ । १ । २ ॥

वेदान्तपारिजातसौरभः ।

त्रिवृत्करणश्रुत्या ऽपां त्र्यात्मकत्वादितरयोरपि ग्रहणं, केवलाऽऽपग्रहणं तु तद्भूयस्त्वादुपपद्यते ॥ २ ॥

वेदान्तकौस्तुभः ।

ननु " वेत्थ यथा पञ्चम्यामाहुतावाप" इति प्रश्ने तथेति पञ्चम्यामाहुतावाप इति निरूपणे चाऽऽप् शब्दश्रवणादद्भिः परिवेष्टितो यातीति गम्यते, एवं सति सर्वैर्भूतसूक्ष्मैर्वेष्टितो यातीति वक्तुं न शक्यत इत्याशङ्क्याह —

त्र्यात्मकत्वात्तु भूयस्त्वात् ।

तुः शङ्कानिरासार्थः । " त्रिवृतं त्रिवृतमेकैकां करवाणी"ति त्रिवृत्करणश्रुत्या ऽपां त्र्यात्मकत्वादितरयोरपि अन्नतेजसोः परिग्रहः, अन्यथा

केवलाभिरद्भिर्देहान्तरोद्भवासम्भवात् । कथं तर्हि प्रश्ने प्रतिवचने चाऽऽप्मात्रग्रहणमत्राह—भूयस्त्वादिति । अपां भूयस्त्वात्तासामेव ग्रहणमित्यर्थः । यद्यपि शरीरे भूमेर्भूयस्त्वं प्रतीयते काठिन्यदर्शनात्तथापि शुक्रशोणिते ऽपां बाहुल्याद्युक्तमुक्तं भूयस्त्वादिति ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

ननु "आपः पुरुषवचस" इत्युक्ते केवलाभिरद्भिर्वेष्टनं श्रुतं तत्कथं सर्वैर्भूतसूक्ष्मैर्वेष्टनमित्यत्राह —

त्र्यात्मकत्वात्तु भूयस्त्वात् ।

चोद्यनिवृत्त्यर्थस्तु शब्दः । त्रिवृत्करणेनापां त्र्यात्मकत्वादन्नतेजसोरपि परिग्रहः । भूयस्त्वाद्बाहुल्यौत्पञ्चम्यामाहुतावाप इत्युक्तं शुक्रशोणिते ऽपां बाहुल्यदर्शनात् ॥ २ ॥

सू० प्राणगतेश्च ॥३।१।३॥

वेदान्तपारिजातसौरभः।

"तमुत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती"ति प्राणगतिश्रवणाच्च भूतसूक्ष्मपरिवृत एव गच्छति ॥ ३ ॥

वेदान्तकौस्तुभः

प्राणगतेश्च ।

"तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती"ति श्रुतेः । "मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति । शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानि वाशयादि"ति स्मृतेश्च स मुख्यानां प्राणानां वागीन्द्रियाणां गतेश्च भूतसूक्ष्मसम्परिष्वक्त एव रंहतीति प्रतीयते, निराश्रयाणां प्राणानां गमनासम्भवादिति भावः ॥ ३ ॥

वेदान्तकौस्तुभप्रभा ।

प्राणगतेश्च ।

इतश्च भूतसूक्ष्माणां गमनमित्यवगम्यते, प्राणानामिन्द्रियाणां जीवेन सह गमनश्रुतेः "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती "ति "मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति । शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः । गृहीत्वैतानि संयाति वायुर्गन्धानि वाशयादि "ति स्मरणाच्च निराश्रयाणां च तेषां गतिरनुपपन्ना ऽतस्तदाश्रयभूतभूतसूक्ष्माणामपि गतिरभ्युपगन्तव्या ॥ ३ ॥

सू० अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् । ३ । १ । ४ ।

वेदान्तपारिजातसौरभः ।

"यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमि"त्यादिना वागादीनामग्न्यादिषु गतेर्लयस्य श्रवणान्न तेषां जीवेन सह गमनमिति चेन्न, अग्न्यादिगतिश्रुतेः "औषधीर्लोमानि वनस्पतीन् केशा"इति सह पाठेन भाक्तत्वात् ॥ ४ ॥

वेदान्तकौस्तुभः ।

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ।

ननु प्राणानां जीवेन सह गमनं नोपपद्यते । "यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमि"त्यादिना वागादिप्राणानां देहमरणसमये ऽग्न्यादिषु देवेषु गतेर्लयस्य श्रवणादिति चेन्न, कुतः ? भाक्तत्वात्। भज्यते मुख्यावृत्तिर्यया गोण्या वृत्त्या सा

भाक्तिस्तत्र भवं भाक्तं, वागादीनामग्न्यादिष्वप्ययश्रवणमौपचारिकमधिष्ठातृदेवताप्रक्रमणपरमित्यर्थः । " प्राणमनूत्क्रामन्तमि "त्यादिश्रुतेर्मुख्यार्थपरत्वसम्भवात् । यत्रास्येत्यादिश्रुतेश्चौषधीर्लोमानि वनस्पतीन्केशा"इति सहपाठेन भाक्तत्वमवगम्यते । नच मृतस्य लोमादीनामौषध्यादिषु लयो दृश्यते ॥ ४ ॥

वेदान्तकौस्तुभप्रभा ।

अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ।

" यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमि"त्येवं वाक्प्राणादीनामग्न्यादिगतिश्रुतेर्न जीवेन सह प्राणानां गमनमिति चेन्न, भाक्तत्वात् । भज्यते मुख्यावृत्तिर्यया गौण्या वृत्त्या सा भक्तिः, तत्र भवं भाक्तं, वागादीनामग्न्यादिगमनश्रवणमौपचारिकम्, अग्न्यादीनामधिष्ठातृत्वनिवृत्त्यर्थं, लोमकेशयोर्गत्य*दर्शनात् । "औषधीर्लोमानि वनस्पतीन्केशा" इति ॥४॥

सू० प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ३ । १ । ५ ॥

---

* नहि लोमानिव केशाश्चोत्प्लुत्य औषधीर्वनस्पतींश्च गच्छन्तीति सम्भवति । नच जीवप्राणैर्विना देहान्तर उपभोगउपपद्यते, अतो वागाद्यधिष्ठाअग्नादिदेवतानां मरणकाले उपकारनिवृत्तिमात्रमपेक्ष्य वागादयोऽग्न्यादीन् गच्छन्तीत्युपचर्य्यते ।

वेदान्तपारिजातसौरभः ।

प्रथमे ऽश्रावपामश्रवणात् कथं पञ्चम्या-माहुतौ तासां पुरुषभाव इति चेन्न, यतः श्रद्धाशब्देन ता एवोच्यन्ते, उपक्रमाद्यनुपपत्तेः ॥ ५ ॥

वेदान्तकौस्तुभः ।

प्रथमे ऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ।

ननु "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती"ति प्रथमे ऽग्नौ होम्यत्वेन श्रद्धायाः श्रुतत्वात्, अपामश्रवणात्कथं पञ्चम्याहुतावपां पुरुषभावः, कुतश्च प्रथमतस्तदश्रवणे सति तत् त्र्यात्मकत्वमाश्रित्य भूतसूक्ष्मपरिष्वक्तस्य गमनं स्वीक्रियते ? इति चेन्न, हिशब्दो हेतौ । यतः याः प्रश्ने उपन्यस्तास्ता एवापः श्रद्धाशब्देनोच्यन्ते । कस्मात् ? उपपत्तेः । उपक्रमोपसंहारयोरेवमुपपत्तेः । इतरथा प्रश्नप्रतिवचनयोरेकवाक्यता न स्यात् । तथाहि "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति प्रश्नस्य प्रतिवचनोपक्रमे " तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती"त्यत्र

श्रद्धाशब्देन यदि मनोवृत्तिविशेषरूपाश्रद्धा गृह्यते, तर्हि तथा भूताया मनोवृत्तिरूपायाः श्रद्धायाः इति तु "पञ्चम्यामाहुतावापः पुरुषवचसो-भवन्ती"त्यत्रान्वयो न स्यात् । तथा चाऽन्यथा प्रश्नः, अन्यथा प्रतिवचनोपक्रमः, अन्यथा च प्रतिवचनं स्यात् । किञ्च मनोवृत्तिरूपायाः श्रद्धायाः होम्यत्वासम्भवः सोमवर्षादीनां च मनोवृत्त्युपादानकत्वासम्भवश्च ज्ञेयः । प्रकृते तु "आपो हास्मै श्रद्धां सन्नमन्ते पुण्याय कर्मणे" इत्यपां श्रद्धाजनकत्वं श्रद्धायास्तज्जन्यत्वं च श्रूयते । इत्यनेन सम्बन्धेनाप्सु श्रद्धाशब्दस्य लक्षणा बोध्या । श्रद्धाशब्दस्याप्सु प्रयोगः श्रूयते । "श्रद्धा वा आपः श्रद्धामेवारभ्य यज्ञेन यजते" इति सोमस्य श्रद्धोपादानकत्वं च श्रूयते "श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा भवती"ति ॥ ५ ॥

वेदान्तकौस्तुभप्रभा ।

प्रथमे ऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ।

प्रथमे ऽग्नौ द्युलोकाख्ये "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती"ति प्रत्ययविशेषरूपायाः श्रद्धायाः श्रवणादपामश्रवणा-

त्कथं पञ्चाम्यामाहुतावपां पुरुषभाव इति चेन्नैष दोषः। हि यतस्ता एवापः श्रद्धाशब्देनोच्यन्ते याः प्रश्ने उपन्यस्ताः। कुतः ? उपपत्तेरुपक्रमोपसंहारयोरेवमुपपत्तेरन्यथा प्रश्नप्रतिवचनयोरेकवाक्यता न स्यात्, सादृश्यप्रयोगोपपत्तेश्च "श्रद्धा वा आपः श्रद्धामेवारभ्य यज्ञेन यजत" इति प्रयोगदर्शनात् ॥ ५ ॥

सू० अश्रुतत्वादिति चेन्नेष्टादिकारिणांप्रतीतेः।३।१।६॥

वेदान्तपारिजातसौरभः।

भूतसम्परिष्वक्तो जीवो रंहतीति न वक्तुं शक्यमबादिवज्जीवस्याश्रवणादिति चेन्न, "इष्टापूर्त्ते दत्तमित्युपासते ते धूमभिसम्भवन्ती"त्यादिनेष्टादिकारिणां धूममार्गेण चन्द्रलोकप्राप्तिर्निरूप्यते एव सोमशब्देन श्रुत्या निरूप्यन्ते "एष सोमो राजा सम्भवन्ती"ति अत्रापि सोमो राजा सम्भवतीत्यनेन प्रतीतेः ॥ ६ ॥

वेदान्तकौस्तुभः।

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः।

ननु पञ्चम्यामाहुतौ श्रद्धासोमवर्षादिक्रमेणापः पुरुषपदवाच्या भवन्तु, अपां त्र्यात्मकत्वा-

त्तादितरभूतपरिग्रहो ऽपि भवतु, अवादिभूतसम्परिष्वक्तो जीवो रंहतीति तु नैव शक्यते वक्तुं, कुतः ? अवादिवदस्मिन्वाक्ये जीवस्याश्रवणादिति चेन्न, कुतः ? इष्टादिकारिणां प्रतीतेः । "इष्टापूर्तं दत्तमित्युपासते ते धूममभिसम्भवन्ती"त्यादिनेष्टादिकर्मकारिणां धूमादिमार्गेण चन्द्रलोकप्राप्तिं प्रतिपाद्य त एव सोमराजशब्देनाभिधीयन्ते "एष सोमो राजे"ति एवं सति "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवती"ति, प्रकृतवाक्ये ऽपि सोमराजशब्दवाच्यत्वेन तेषामिष्टादिकारिणां प्रतीतेरित्यर्थः । तस्माज्जीवस्य श्रवणमस्त्येव । स अवादिभूतसम्परिष्वक्तो रंहति, नात्र कश्चिद्दोष इति भावः ॥ ६ ॥

वेदान्तकौस्तुभप्रभा ।

अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ।

ननु प्रश्नप्रतिवचनाभ्यामापः श्रद्धादिक्रमेण पञ्चम्यामाहुतौ पुरुषभावं प्रतिपद्यन्ते इति श्रूयते, ननु तत्सम्परिष्वक्तो जीवः श्रूयते। अतस्तत्परिष्वक्तो जीवो गच्छतीति वक्तुमशक्यमिति चेन्न, कुतः ? इष्टादिकारिणां प्रतीतेः । तस्मिन्नेव वाक्ये " ह्युत्तरत्राथ-

य इमे ग्रामइष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसम्भवन्ती"-त्युपक्रम्य धूमादिना पितृयानेन यथा चन्द्रप्राप्तिं कथयति। "आकाशाच्चन्द्रमसमेष सोमो राजेति त इह प्रतीयन्ते तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवती"ति भूतसूक्ष्मपरिवेष्टितं जीवं द्युलोके फलभोगाय देवाः प्राणाः प्रक्षिपन्ति। सो ऽयं प्रक्षेपो होम इहाभिप्रेतः ॥ ६ ॥

सू० भाक्तं वा ऽनात्मवित्त्वात्तथा हि दर्शयति ।३।१।७॥

वेदान्तपारिजातसौरभः ।

केवलकर्मिणामनात्मवित्त्वादेवान्प्रति गुणभावे सति "तदेवानामन्नं तं देवा भक्षयन्ती"ति इष्टादिकारिणामन्नत्वेन भक्षत्वं भाक्तम् । "पशुरेव स देवानामि"ति श्रुतेः ॥ ७ ॥

वेदान्तकौस्तुभः ।

ननु चेष्टादिकारिणां जीवानां कर्मफलभोगाय चन्द्रलोकं प्रति रंहणमसमञ्जसं भाति, "तदेवानामन्नं तं देवा भक्षयन्ती"ति देवान्नत्वेन भक्षत्वश्रवणात्। अतः सोमो राजा सम्भवतीत्य-

নেনেষ্টাদিকারিণাং জীবানাং প্রতীতির্ন শক্যতে বক্তুং, জীবস্যান্নত্বাসম্ভবাদত আহ —

ভাক্তং বা ঽনাত্মবিত্ত্বাত্তথাহি দর্শয়তি ।

বেতি শঙ্কানিরাসার্থঃ । ইষ্টাদিকারিণাং দেবান্প্রতিপুত্রভৃত্যাদিবদ্ভোগোপকরণমাত্রত্বাত্ অন্নত্বং ভাক্তম্, ঔপচারিকং, ন তু মুখ্যম্ । " ন হ বৈ দেবা অশ্নন্তি ন পিবন্তি এতদেবামৃতং দৃষ্ট্বা তৃপ্যন্তী"তি চর্বণনিষেধাত্। ননু পুত্রভৃত্যাদিবদপ্যস্য দেবভাবং গতস্য পরভোগোপকরণত্বমযুক্তমিতি চেন্ন, অনাত্মবিত্ত্বাত্ । তত্রাপি কেবলকর্মিণামনাত্মজ্ঞত্বাদ্বিদ্যাবদ্ভোগোপকরণত্বং যুক্তমেব । স্বনির্ণীতস্যার্থস্য দৃষ্টানুসারিত্বমাত্রপ্রতিষেধায়াহ—তথা হি দর্শয়তীতি । অনাত্মজ্ঞত্বেন দেবভোগোপকরণত্বং " পশুরেব স দেবানামি"তি শ্রুতির্দর্শয়তি । তস্মাদবাদিভূতসম্পরিষ্বক্তো জীবো রংহতীতি সিদ্ধম্ ॥ ৭ ॥

ইতি তদন্তরপ্রতিপত্ত্যধিকরণম্ ॥ ১ ॥

বেদান্তকৌস্তুভপ্রভা ।

ননু "নহদেবানামন্নং তৎ দেবা ভক্ষয়ন্তী"তি চন্দ্রকিরণার-

ऽधदेहानां कथमन्नभाव इत्याशङ्क्याह —

भाक्तं वा ऽनात्मवित्त्वात्तथाहि दर्शयति ।

वेति चोद्यव्यावृत्त्यर्थः । भाक्तमेषामन्नत्वं, न मुख्यम् । "न ह वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ती"ति चर्वणनिषेधात् । "यथा राज्ञां विशो ऽन्नं विशामन्नं पशव" इति अनात्मवित्त्वाच्च ह्येषां केवलकर्मिणां गुणभावो देवान्प्रति । तथाहि दर्शयति श्रुतिस्तेषां देवोपभोग्यत्वम, "अथ योऽन्यां देवतामुपास्ते ऽन्योसावन्योऽहमस्मी"ति "न स वेद यथा पशुः पशुरेव स देवानामि"ति स्मृतिरप्यनात्मविदां देवोपभोग्यत्वमात्मविदां च ब्रह्मप्राप्तिं दर्शयति । "देवान् देवयजो यान्ति मद्भक्ताः यान्ति मामपी"ति तस्माद्भूतसूक्ष्मैः सम्परिष्वक्त एव जीवो गच्छतीति युक्तमुक्तम् ॥ ७ ॥

इति तदन्तरप्रतिपत्त्यधिकरणम् ॥ १ ॥

सू० कृता ऽत्यये ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥

३ । १ । ८ ॥

वेदान्तपारिजातसौरभः ।

आमुष्मिकफलप्रदकर्मक्षये सति ऐहिकफल-

प्रदकर्मवान् यथा गतमनेवं च प्रत्यवरोहति "तद्य इह रमणीयचरणा अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन्नि"त्यादिश्रुतेः । "वर्णाः आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टजातिकुलरूपायुः श्रुत-वृत्तावित्तसुखमेधसो जन्म प्रतिपद्यन्ते" इति स्मृतेश्च ॥ ८ ॥

वेदान्तकौस्तुभः ।

एवं कर्मिणामारोहणे ऽवादिसम्परिष्वक्तत्वं निरूपितम् । तत्र भोगेन सर्वकर्मक्षये सति पुन-र्विचित्रदेहप्राप्तिर्न सङ्गच्छत इत्याशङ्क्य तेषामि-दानीमवरोहणे ऽनुशयवत्त्वं निरूप्यते —

कृताऽत्यये ऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ।

"तस्मिन् यावत्सम्पातमुषित्वा ऽथैतमेवाध्वानं पुनर्निवर्तन्त" इत्यादिना स्वर्गिणामवरोहण-माम्नातम् । तत्र स्वर्गी जीवो निरनुशयः प्रत्य-वरोहति ? किम्वा ऽनुशयवान् ? इति संशयः । तत्र सम्पतत्यनेनेति सम्पातं कर्म, यावत्सम्पा-तमुषित्वेति वाक्यात्सर्वकर्मभोगः प्राप्नोति ।

एवं सति सर्वकर्मभोगानन्तरं निरनुशयः प्रत्यवरोहतीति पूर्वः पक्षः, तत्र ब्रूमः। कृतस्य कर्मणः स्वर्गमुद्दिश्यानुष्ठितं यद्यागादि तन्मात्रस्यात्यये भोगेन क्षये ऽनुशयवान् जीवः यथेतं यथागतमारोहणप्रकारेणानेवं प्रकारान्तरेण च प्रत्यवरोहति। स्वर्गप्राप्तिहेतुभूतं कर्मजातं यावत्सम्पातमित्यादिश्रुत्योच्यते। तद्भिन्नमैहिकशरीरादिप्राप्तिहेतुभूतकर्मानुशयशब्देन गृह्यते। तद्वानारोहणमार्गेण धूमरात्र्यपरपक्षदक्षिणायनपितृलोकाकाशचन्द्रक्रमेण चन्द्राकाशवायुधूमाभ्रमेघवर्षक्रमेण च प्रत्यवरोहतीत्यर्थः। कुतः ? दृष्टस्मृतिभ्याम्। दृष्टा प्रत्यक्षा श्रुतिः,सा च तावत्सानुशयानामवरोहं दर्शयति। "तद्य इह रमणीयचरणा अभ्यासो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा, अथ य इह कपूयचरणा अभ्यासोह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चण्डालयोनिं वे"ति। ये रमणीयचरणाः पुण्यकर्म्माणस्ते हि स्वर्गात्प्रत्यवरूढाः इह ब्राह्मणादियोनिमापद्येरन्, ये तु

कपूयचरणाः कुत्सितकर्माणस्ते संयमनात्प्रत्यागता इह श्वशूकरादियोनिमापद्येरन् । स्मृतिरपि सानुशयानामवरोहणं दर्शयति । वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुः श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते इति ॥ ८ ॥

वेदन्तकौस्तुभप्रभा ।

एवमविदुषामारोहणप्रकारो निरूपितः । अथेदानीमवरोहणं तत् प्रकारं चाह —

कृतात्यये ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ।

इष्टादिकारिणां धूमादिवर्त्मना चन्द्रमण्डलमारुह्य तत्र भुक्तभोगानां "तस्मिन्यावत्सम्पातमुषित्वा ऽथैतमेवाध्वानं पुनर्निवर्तन्त "इत्यादिना ऽवरोहः श्रूयते । स किं निरनुशयानां तेषां भवत्युत सानुशयानामिति ? विषये निरनुशयानामिति पूर्वः पक्षः, यावत्सम्पातमित्युक्तेः । सम्पतन्त्यनेनेति सम्पातं कर्म यावत्तदस्ति तद्भुक्त्येत्यर्थः । " प्राप्याऽन्तं कर्मणास्तस्य यत्किञ्चेह करोत्ययम् । तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मणे "इति श्रवणादित्येवं प्राप्तेऽभिधीयते । कृतस्य यागादेरत्यये भोगेन क्षये सति अनुशयवान् कर्तारमनुशेते फलोपभोगाय यः सोऽनुशयो भुक्तशिष्टं कर्म, तद्वानवरोहति । कुतः ? दृष्टस्मृतिभ्यां श्रुतिस्मृतिभ्यां, श्रुति-

स्तावत् "तद्य इह रमणीयचरणा अ*भ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा, अथ यइह कपूयचरणा अभ्याशोह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वे"ति चरणशब्द आचरणीयकर्मपरः, कपूयचरणाः कुत्सितकर्माणः । स्मृतिरपि वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुः श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते । इति सानुशयानामवरोहं दर्शयति । स्वर्गप्राप्तिहेतुभूतज्योतिष्टोमादिकर्मभ्यः कर्मान्तरमनुशयपदवाच्यं, शेषशब्दश्चोपयुक्तात्कर्मणः कर्मान्तराभिप्रायो, नहि स्वर्गार्थस्य कर्मणः काश्चित् शेषः शक्यते कल्पयितुं, श्रुतिप्रमाणत्वादस्यार्थस्य नानुमानमत्र क्रमते । तस्माद्यावत्सम्पातमिति यत्किञ्चेह करोत्ययमिति चैवं द्रष्टव्यं यावदामुष्मिकफलं कर्म तत्सर्वं तत्रैव क्षपयित्वा ऽवशिष्टेनैहिकफलेन जपहोमादिना ऽवरोहतीति । यथा काश्चित्सेवकः सकलैः सेवोपकरणैः राजकुलं प्रविष्टश्चिरावस्थानादुपक्षीणबहूपकरणः छत्रपादुकादिमात्रपरिच्छदः स्थातुमशक्नुवन्निवर्तत इत्येवमनुशयमात्रपरिग्रहो न चन्द्रमण्डले स्थातुं शक्नोतीति । यथेतमनेवं च आरोहणप्रकारेण प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः । पितृयाने धूमाकाशयोर्निर्देशेनावरोहश्रवणादारोहणानुसारो ऽवरोहः, तद्विरुद्धवाद्यादिश्रवणाच्चान्यथापीति ॥ ८ ॥

---

* अभ्याशो ऽभिगन्तारः, अभ्याङ्पूर्वादशेः क्विप् । हेति स्फुटार्थं यद्यदा ।

सू० चरणादिति चेन्न तदुपलक्षणार्थेति काष्णाजिनिः ॥

३ । १ । ९ ॥

वेदान्तपारिजातसौरभः ।

ननु रमणीयचरणा इत्यत्र चरणमाचारस्तस्मादेवेष्टसिद्धौ न सानुशयस्यावरोहः सम्भवतीति चेन्न, यतश्चरणश्रुतिः कर्मोपलक्षणार्था, इति काष्णाजिनिर्मन्यते ॥ ९ ॥

वेदान्तकौस्तुभः ।

चरणादिति चेन्न तदुपलक्षणार्थेति काष्णाजिनिः ।

ननु "रमणीयचरणा रमणीयां योनिमापद्येरन्, कपूयचरणाः कपूयां योनिमापद्येरानि"त्यत्र यदि चरणशब्दः पुण्यापुण्यकर्मपरः स्यात्तर्हि पुण्यापुण्ययोनिलाभायाऽनुशयवतो ऽवरोहणं भवतु, नतु तथाऽस्ति । कुतः ? चरणात् आचारात्, पुण्यापुण्ययोन्यापत्तिश्रवणात् । चरण-

शब्दः कर्मपरो नास्ति । किन्तु चरणमाचारः स च वेदे कर्मपदार्थात् पृथगेव सुचरितशब्देनाभिधीयते, यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणी"ति तस्मादनुशयवान् प्रत्यवरोहतीत्यसङ्गतमिति चेन्न, यस्मादियं चरणाख्याचारश्रुतिः कर्मोपलक्षणार्थेति काष्णाजिनिराचार्यो मन्यते, पुण्यापुण्यलक्षणकर्माभावे केवलादाचारात् शुभाशुभयोनिप्राप्त्यसम्भवात् ॥ ९ ॥

वेदान्तकौस्तुभप्रभा ।

चरणादिति चेन्न, तदुपलक्षणार्थेति काष्णाजिनिः ।

ननु "रमणीयचरणाः कपूयचरणा" इत्यत्र चरणमाचारः शीलं वृत्तमिति नार्थान्तरम् । "अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा । अनुग्रहश्च दानं च शीलमेतद्विदुर्बुधाः" इति स्मृतेः । ततश्च न चरणशब्देन पुण्यापुण्यरूपं कर्मोच्यते, वेदेऽपि चरणकर्मणी भेदेन व्यपदिश्येते । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणीति । अतश्च न कर्मणा ऽवरोहो वर्ण्यते, किन्तु चरणाच्छीलाद्योनिविशेषप्राप्तिरिति चेत् । तन्न, चरणश्रुतिः कर्मोपलक्षणार्थेति काष्णा-

জিনিরাচার্য্যো মন্যতে স্ম। সুখদুঃখে হি পুণ্যাপুণ্যরূপকর্ম্মফলে, ন হি কেবলাদাচারাত্তয়োঃ প্রাপ্তিঃ সম্ভবতি ॥ ৯ ॥

সূ০ আনর্থক্যমিতি চেন্ন তদপেক্ষত্বাৎ ॥ ৩।১।১০।

বেদান্তপারিজাতসৌরভঃ।

ননু তথাত্বে চরণস্যানর্থক্যং স্যাদিতি চেন্ন, কর্ম্মণাং চরণাপেক্ষত্বাৎ ॥ ১০ ॥

বেদান্তকৌস্তুভঃ।

আনর্থক্যমিতি চেন্ন তদপেক্ষত্বাৎ।

ননু চরণাখ্যাচারস্যানর্থক্যং, চরণশ্রুতেঃ কর্ম্মোপলক্ষণার্থত্বাঙ্গীকারে স্যাদিতি চেন্ন, পুণ্যাপুণ্যকর্ম্মণাং সদসদাচারনির্ব্বর্ত্যত্বেন সদসদাচারাপেক্ষত্বাৎ। "আচারহীনং ন পুনন্তি বেদা" ইতি স্মৃতেঃ ॥ ১০ ॥

বেদান্তকৌস্তুভপ্রভা।

আনর্থক্যমিতি চেন্ন তদপেক্ষত্বাৎ।

আচারস্যানর্থক্যমেবং সতি স্যাদিতি চেন্ন, তদপেক্ষত্বাৎসুখসাধনপুণ্যকর্ম্মাধিকারস্যাচারপূর্ব্বকত্বাৎ। "আচারহীনং

न पुनन्ति वेदाः । सन्ध्याहीनो ऽशुचिर्नित्यमनर्हः सर्वकर्मसु "-इत्यादिस्मृतेः ॥ १० ॥

सू० सुकृतदुष्कृते एवेति तु बादरिः ॥३।१।११॥

वेदान्तपारिजातसौरभः ।

सुकृतदुष्कृते कर्मणी चरणशब्देनोच्येते इति बादरिः ॥ ११ ॥

वेदान्तकौस्तुभः ।

सुकृतदुष्कृते एवेति तु बादरिः ।

" रमणीयचरणा " इत्यत्र चरणशब्दार्थः सुकृतं कर्म, "कपूयचरणा" इत्यत्र चरणशब्दार्थः दुष्कृतं कर्म, तादित्थं चरणशब्देन सुकृतदुष्कृते उच्यते । ब्राह्मणपरिव्राजकन्यायेन पृथग्व्यपदेशो-ऽर्थवान् इति तु बादरिराचार्यो मन्यते । तस्माद-नुशयवान् प्रत्यवरोहतीति सिद्धम् ॥ ११ ॥

इति कृतात्ययाधिकरणम् ॥ २ ॥

वेदान्तकौस्तुभप्रभा ।

सुकृतदुष्कृते एवेति तु बादरिः ।

सुकृतदुष्कृते एव चरणशब्देनोच्येते । चर्यते इति चरणं कर्म, न हि लोकवेदयोश्चरणशब्दः शीले प्रसिद्धः । तुशब्दउपलक्षणार्थ-निवृत्त्यर्थो, नहि मुख्ये सम्भवन्ति लक्षणाऽऽश्रयणीया, कर्मचरण-योर्भेदव्यपदेशस्तु ब्राह्मणपरिव्राजकन्यायेनेति बादरिराचार्यो-मेने ॥ ११ ॥ इति कृतात्ययाधिकरणम् ॥ २ ॥

सू० अनिष्टादिकारिणामपि च श्रुतम् ॥ ३।१।१२।

वेदान्तपारिजातसौरभः।

अनिष्टादिकारिगतिश्चिन्त्यते । तत्र तावत्पूर्वः पक्षः, निषिद्धसक्तानां विहितविरक्तानां दुष्टा-नामपि "ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसं ते सर्वे गच्छन्ती"ति गमनं श्रुतम् ॥ १२ ॥

वेदान्तकौस्तुभः ।

एवमिष्टापूर्त्तादिकारिणां चन्द्रलोकारोहणा-वरोहणमुक्तमिदानीमनिष्टादिकारिणोऽपि चन्द्र-

लोकं यान्ति ? न वेति ? विचार्य्यते —

अनिष्टादिकारिणामपि च श्रुतम्।

अनिष्टादिकारिणां चन्द्रलोकगतिरास्ति ? न वेति ? संशये तावत्पूर्वः पक्षः। अनिष्टं निषिद्धं कर्म, विहितपरित्यागः आदिशब्दार्थः। निषिद्धकारिणां विहितपरित्यागकारिणां चापि "ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ती"ति कौशीतकीवाक्येन गमनं श्रुतम् ॥ १२ ॥

वेदान्तकौस्तुभप्रभा।

अनिष्टादिकारिणामपि च श्रुतम्।

जीवस्य गतिस्त्रिधा, अर्चिरादिका, धूमादिका, यमवशगा, च। तत्र विदुषां मोक्षहेतुका प्रथमा। स च फलाध्याये वक्ष्यते। अविदुषां पुण्यकर्मणां च धूमादिका ऽत्र निरूपिता। तदुभयविधुराणां तु नरकाद्यापत्तिश्चेदानीं निरूप्यते। तथाहि ये विहितं न कुर्वन्ति, ये च निषिद्धं कुर्वन्ति, ते उभयेऽनिष्टादिकारिणस्ते ऽपि चन्द्रमसं गच्छन्ति ? उत नेति ? संशये, तेषामपि श्रुतं गमनं कौशीतक्याम्नाये "ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ती"ति सर्वेषामविशेषेण गतिश्रवणात् ॥ १२ ॥

सू० संयमने त्वनुभूयेतरेषा-मारोहावरोहौ तद्गतिदर्शनात् ।

३ । १ । १३ ॥

वेदान्तपारिजातसौरभः ।

यमालये दुःखमनुभूयानिष्टादिकारिणां चन्द्र-मण्डलारोहावरोहौ, "पुनः पुनर्वशमापद्यतेमे वैव-स्वतं संयमनं जनानामि "त्यादिषु यमाल-यगमनदर्शनात् ॥ १३ ॥

वेदान्तकौस्तुभः ।

ननु धर्मिणामिवाधर्मिणामपि यदि चन्द्रलोक-गमनं तर्हि विधिनिषेधरूपस्य शास्त्रस्य वैयर्थ्यं स्यादित्यत आह —

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ।

उक्तदोषनिवृत्तौ तुशब्दः । धर्मिणामिवाध-र्मिणां चन्द्रलोकगमनं नास्ति । यत उभयविध-शास्त्रवैयर्थ्यं स्यादित्यर्थः । तर्हि को विशेष इत्यत्रो-च्यते । "न साम्परा यः प्रतिभाति बालं प्रमा-

यन्तं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यतेमे वैवस्वतं संयमनं जनानां यमं राजानमि"त्यादिषु तद्गतिदर्शनाद्यमलोकगतिदर्शनात् । संयमने यमालये स्वकृतकर्मानुरूपं दुःखमनुभूयेतरेषामनिष्टादिकारिणां चन्द्रलोकारोहावरोहौ भवतः । तत्राधार्मिका नानायातना अनुभूय, चन्द्रलोकमारुह्य प्रत्यवरोहन्तीत्यर्थः ॥ १३ ॥

वेदान्तकौस्तुभप्रभा ।

ननु सुकृतिनां दुष्कृतकर्मणां च समानफलत्वमयुक्तमित्याशङ्क्याह —

संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ।

तुशब्दः शङ्कानिरासार्थः । संयमने यमालये दुःखमनुभूयेतरेषामनिष्टादिकारिणां चन्द्रारोहावरोहौ । कुतस्तद्गतिदर्शनात् । दर्शयति च श्रुतिस्तेषां यमवश्यतां "न साम्परा यः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् । अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यतेमे" इति । "वैवस्वतं संयमनं जनानां यमं राजानमि"ति च ॥ १३ ॥

सू० स्मरन्ति च। ३।१।१४॥

वेदान्तपारिजातसौरभः।

पराशरादयः यमवश्यत्वं स्मरन्ति ॥१ ४ ॥

वेदान्तकौस्तुभः।

स्मरन्ति च।

पराशरादयः सर्वेषां यमवश्यत्वं "सर्वे चैते वशं यान्ति यमस्य भगवन्किल "इत्यादिषु स्मरान्ति च ॥ १४ ॥

वेदान्तकौस्तुभप्रभा।

स्मरन्ति च।

स्मरन्ति च सर्वेषां यमवश्यत्व पराशरादयः। "सर्वे चैते वशं यान्ति यमस्य भगवन्किले"त्यादिषु ॥ १४ ॥

सू० अपि सप्त ।३।१।१५।

वेदान्तपारिजातसौरभः।

रौरवादीन्सप्त नरकानपि स्मरन्ति ॥ १५ ॥

वेदान्तकौस्तुभः।

अपि सप्त।

अपि च पापिनां गन्तव्यत्वेन रौरवा-

दीन् सप्त नरकान् स्मरन्ति ॥ १५ ॥

वेदान्तकौस्तुभप्रभा ।

अपि सप्त ।

अपि शब्दस्मरणस्य समुच्चयार्थः । पापिनां गन्तव्यत्वेन सप्त-नरकान् रौरवमहारौरवप्रभृतीन्स्मरन्ति ॥ १५ ॥

सू०तत्रापि च तद्व्यापाराद-विरोधः ॥ ३।१।१६।

वेदान्तपारिजातसौरभः ।

रौरवादिष्वपि चित्रगुप्तादीनामधिष्ठातॄणां यमायत्ततया यमस्यैव व्यापारात्तत्रा ऽन्ये ऽप्यधि-ष्ठातार इति नास्ति विरोधः ॥ १६ ॥

वेदान्तकौस्तुभः

ननु रौरवादौ चित्रगुप्तादयो ऽपरे ऽपि अधि-ष्ठातारः स्मर्यन्ते, यमस्यैव वशं यान्तीति विरु-द्धमिवाभाति, नेत्याह —

तत्रापि च तद्व्यापारादविरोधः ।

तत्रापि च रौरवादिष्वपि तद्व्यापारात्

यमव्यापारात् चित्रगुप्तादीनां यमायत्तत्वाद-विरोधः ॥ १६ ॥

वेदान्तकौस्तुभप्रभा ।

ननु सप्तसु नरकेषु कथं यमयातनाप्राप्तिर्यतो रौरवादिषु चित्रगुप्तादीनामन्येषामधिष्ठातॄणां स्मरणादित्यत आह —

तत्रापि तद्व्यापारादविरोधः ।

रौरवादिष्वपि यमव्यापारादाज्ञाकरणादविरोधः ॥ १६ ॥

सू० विद्याकर्मणोरिति तु प्रकृतत्वात् ३।१।१७।

वेदान्तपारिजातसौरभः ।

अथ राद्धान्तः, पञ्चाऽग्निविद्यायाम् "अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राणि असकृदावर्त्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेना ऽसौ लोको न सम्पूर्य्यते" इत्यनिष्टादिकारिणामनवरोहं दर्शयति । पथोरिति च विद्याकर्मणोर्निर्देशस्तयोः प्रकृतत्वात् । तद्य इत्थं विदुरिति देवयानः पन्था इष्टापूर्त्त

दत्तमिति पितृयानस्तयोरन्यतरेणापि ये न गच्छन्ति तानीमानि तृतीयस्थानभाञ्जिभूतानीति पापिनां चन्द्रगतिर्नास्तीति वाक्यार्थः ॥ १७ ॥

वेदान्तकौस्तुभः ।

अथ सिद्धान्तमाह —

विद्याकर्मणोरिति तु प्रकृतत्वात् ।

तुशब्दः पूर्वपक्षनिषेधार्थः । अनिष्टादिकारिणां चन्द्रलोकगतिर्नोपपद्यते । यस्मात्पञ्चाग्निविद्यायां "वेत्थ यथा ऽसौ लोको न सम्पूर्य्यते" इति प्रश्नस्य प्रतिवचने " अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राणि असकृदावर्तीनि भूतानि भवन्ति, जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेना ऽसौ लोको न सम्पूर्य्यते" इत्यनिष्टादिकारिणामनवरोहं दर्शयति । पथोरिति च विद्याकर्मणोर्निर्देशः । एतदेवाह सूत्रकारः — विद्याकर्मणोरितीति । अर्थइति शेषः । कुतः ? तयोः प्रकृतत्वात्, एतयोरित्येतत्शब्दस्य प्रकृतवाचकत्वात् । एतयोर्विद्याकर्मणोः पथोः देवयानपितृयानसाधनयोरन्यतरेणान्यतरस्मिन् याने पापिनो-

नाधिकृता भवन्ति । फलितार्थस्तु "तद्य इत्थं विदुर्ये चेमे ऽरण्ये श्रद्धां तप इत्युपासते" इत्युक्त्वा "ते ऽर्चिषमभिसम्भवन्ति अर्चिषोहरि "त्यादिना देवयानो विद्याविषयः पन्था "अथ य इमे ग्रामे इष्टापूर्त्तं दत्तमित्युपासते" इत्युक्त्वा "ते धूममभिसम्भवन्ती "त्यादिना पुण्यकर्मविषयः पितृयानश्च दर्शितस्तयोरन्यतरेणापि ये न गच्छन्ति तानीमानि तृतीयस्थानभाञ्जि भूतानीति "ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ती"ति श्रुतिरपीष्टादिकारियात्राविषया ॥ १७ ॥

वेदान्तकौस्तुभप्रभा ।

इति प्राप्ते राद्धान्तः —

विद्याकर्मणोरिति तु प्रकृतत्वात् ।

तुशब्दः पक्षनिवृत्तौ । विद्याकर्मविहीनानां देवयानपितृयानगती न स्तः, कारणाभावात् । पञ्चाग्निविद्यायां "वेत्थ यथा ऽसौ लोको न सम्पूर्यते "इति प्रश्नस्य प्रतिवचने "अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेना ऽसौ लोको न सम्पूर्यत "इत्यनिष्टादिकारिणामनवरोहं दर्शयति । पथोरिति च विद्याकर्मणोर्निर्देशस्तयोः प्रकृतत्वात् । "तद्य इत्थं विदुरिति देवयानः

पन्था इष्टापूर्त्ते दत्तमिति पितृयानस्तयोरन्यतरेणापि ये न गच्छन्ति तानीमानि तृतीयस्थानभाञ्जिभूतानीति ॥ १७ ॥

सू० न तृतीये तथोपलब्धेः ॥

३ । १ । १८ ॥

वेदान्तपारिजातसौरभः ।

तृतीये स्थाने ऽनिष्टादिकारिदेहारम्भार्थमपि पञ्चमाहुत्यपेक्षा नास्ति, श्रद्धादिक्रमप्राप्तां पञ्चमाहुतिं विना ऽपि जायस्वेति देहारम्भोपलब्धेः ॥ १८ ॥

वेदान्तकौस्तुभः ।

ननु "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति देहप्राप्तेः पञ्चमाहुतिसापेक्षत्वं श्रूयते । सा चाहुतिश्चन्द्रप्राप्तिपूर्विका ऽतो ऽनिष्टादिकारिणामपि देहप्राप्तये चन्द्रारोहावरोहावङ्गीकर्तव्याविति चेन्नेत्याह —

न तृतीये तथोपलब्धेः ।

मुमुक्षूणामर्चिरादिमार्गः इष्टादिकारिणां पितृयानाख्यो मार्गः । इत्येतन्मार्गद्वयापेक्षया

तृतीयं स्थानमिति स्थानशब्देन सूच्यते श्रुत्या-ऽनिष्टादिकारिणां यः स तृतीयस्तस्मिन्मार्गे देह-प्राप्तेः पञ्चमाहुतिसापेक्षत्वं नास्ति। कुतः ? तथो-पलब्धेः तृतीये मार्गे प्रविष्टानां पञ्चमाहुति-मनपेक्ष्यैव। "जायस्व म्रियस्वैतत्तृतीयं स्थानमि"ति देहप्राप्तेरुपलब्धेः इष्टादिकारिणां श्रद्धासोमा-दिक्रमेणास्मिंल्लोके देहप्राप्तिरतस्तेषां देहप्राप्तौ "पञ्चाम्यामाहुतावापः पुरुषवचसो भवन्ती "ति सङ्ख्यानियमः, अनिष्टादिकारिणां तु विनैवाहु-तिसङ्ख्यानियमं भूतान्तरप्रविष्टाभिरद्भिः शरीर-मारभ्यते, नतु श्रद्धादिक्रमप्राप्ताभिरित्यर्थः। "पञ्चाम्यामाहुतावापः पुरुषवचसो भवन्ती"ति श्रुत्या चापां पञ्चम्यामाहुतौ पुरुषशब्दवाच्यत्वं प्रतिपाद्यते, न च तासां प्रकारान्तरेण पुरुषवचस्त्वं वार्य्यते। पञ्चाम्यामाहुतावेवापः पुरुषवचसो भव-न्ती"त्यवधारणाभावो ऽप्यस्ति ॥ १८ ॥

वेदान्तकौस्तुभप्रभा ।

नन्वेवं तर्हि तेषां चन्द्रगमनाभावे शरीरयोगस्यैवासम्भवः पञ्चमाहुत्यभावावादित्यत आह —

न तृतीये तथोपलब्धेः ।

तृतीये स्थाने शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । कुतः ? तथोपलब्धेः । तथा तेनोक्तप्रकारेण "जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेना ऽसौ लोको न सम्पूर्यत" इति तृतीयस्थानस्य केवलपापकर्मणो द्युलोकारोहावरोहाभावेन द्युलोकासम्पूर्तिवचनादस्य तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । न चैवं पञ्चमाहुतिवाक्यबाध इति वाच्यं, तस्य पुरुषवचस्त्वप्रतिपादनमात्रेणोपक्षीणतया ऽन्यनिवारकत्वे मानाभावात् । अवधारणादर्शनादन्यथा वाक्यभेदप्रसङ्गात् ॥ १८ ॥

सू० स्मर्य्यते ऽपि च लोके ॥

३ । १ । १९ ॥

वेदान्तपारिजातसौरभः ।

"जज्ञे द्रोणविनाशाय पावकादिति नः श्रुतमि"त्यादिना इष्टादिकारिणामपि धृष्टद्युम्न प्रभृतीनां पञ्चमाहुतिं विनैव देहोत्पत्तिः स्मर्य्यते ॥ १९ ॥

वेदान्तकौस्तुभः ।

स्मर्यते ऽपि च लोके ।

महाभारतादौ पुण्यकर्मणामपि धृष्टद्युम्न-

प्रभृतीनां पञ्चमाहुत्यनपेक्षो देहारम्भः । स्मर्य्यते च " उत्तस्थौ पावकात्तस्मात्कुमारो देवसन्निभः । कुमारी चापि पाञ्चाली वेदीमध्यात्समुत्थिता । सुभगा दर्शनीयाङ्गी स्वसितायतलोचने"त्यादिना ॥ १९ ॥

वेदान्तकौस्तुभप्रभा ।

स्मर्यते ऽपि च लोके ।

अपि च लोके पुण्यकर्मणां धृष्टद्युम्नद्रौपदीप्रभृतीनां पञ्च माहुत्यनपेक्षमयोनिजं जन्म स्मर्यते ॥ १९ ॥

सू० दर्शनाच्च । ३।१।२०॥

वेदान्तपारिजातसौरभः।

चतुर्विधेषु भूतेषु स्वेदजोद्भिज्जयोः स्त्रीपुरुषसङ्गमन्तरेणोत्पत्तिदर्शनाच्च न पञ्चमाहुत्यपेक्षा ॥ २० ॥

वेदान्तकौस्तुभः ।

दर्शनाच्च ।

प्रत्यक्षतः जरायुजाण्डजस्वेदजोद्भिजेषु चतुर्विधेषु स्वेदजोद्भिज्जयोर्योषित्पुरुषसङ्गं विनै-

वोत्पत्तिदर्शनाच्च देहोत्पत्तेः पञ्चमाहुतिसापेक्षत्वं नास्ति ॥ २० ॥

वेदान्तकौस्तुभप्रभा ।

दर्शनाच्च ।

इतश्च चतुर्विधो भूतग्रामो जरायुजाण्डजस्वेदजोद्भिज्जलक्षण-स्तत्र योषित्पुरुषसम्बन्धमन्तरेण स्वेदजस्थावरयोरुत्पत्तिदर्शनान्न पञ्चमाहुत्यपेक्षा ॥ २० ॥

सू० तृतीयशब्दावरोधः सं-शोकजस्य ॥३।१।२१॥

वेदान्तपारिजातसौरभः ।

"अण्डजं जीवमुद्भिजमि"त्यत्र तु तृतीय-शब्देन स्वेदजस्य सङ्ग्रहो ऽतो न चातुर्विध्य-हानिः ॥ २१ ॥

वेदान्तकौस्तुभः ।

ननु "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्यण्डजं जीवजमुद्भिजमि "ति श्रुत्या स्वेदजानि भूतानि नोक्तानि, अतो न

चतुर्विधानि तानीत्यत आह —

तृतीयशब्दावरोधः संशोकजस्य ।

संशोकजस्य स्वेदजस्योक्तश्रुतिस्थेनाण्डजं जीवजमुद्भिजमिति पाठक्रमापेक्षया तृतीयेनोद्भिजशब्देनावरोधः संग्रहो ज्ञेयः । पृथ्वीं जलं चोद्भिद्य जायते इत्युद्भिजं वृक्षादिकं यूकादिकं च, अतश्चतुर्विधानि भूतानि । तस्मादनिष्टादिकारिणां न चन्द्रलोकारोहणमिति सिद्धम् ॥ २१ ॥ इत्यनिष्टादिकार्य्याधिकरणम् ॥ ३ ॥

वेदान्तकौस्तुभप्रभा ।

ननु " त्रीण्येव बीजानि भवन्त्यण्डजं जीवजमुद्भिजमि"त्यत्र त्रिविधो भूतग्रामः श्रूयते, कथं तस्य चतुर्विधत्वमित्यत्राह —

तृतीयशब्दावरोधः संशोकजस्य ।

तृतीयेनोद्भिजशब्देन संशोकजस्य स्वेदजस्यावरोधो ऽन्तर्भावः, स्वेदजोद्भिजयोर्भूम्युदकोष्मप्रभवतुल्यत्वात् ॥ २१ ॥

इत्यनिष्टादिकार्य्याधिकरणम् ॥ ३ ॥

सू० तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ ३ । १ । २२ ॥

भूतस्य जीवासाधारणधर्मस्य नित्यस्यापि शङ्कोच-विकाशौ भवतः "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः । ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः । तेषामादित्यवज्ज्ञानं प्रकाशयति भारत! "इति श्रीमुखवचनात् ॥ २८ ॥

वेदान्तकौस्तुभप्रभा।

ननु "नित्यं विभुं सर्वगतं सुसूक्ष्मं नित्यः सर्वगतः स्थाणुरि"त्यादिविभुत्वप्रतिपादकश्रुतिस्मृतिविरोधस्तदवस्थएवेत्याशङ्क्यायामाह —

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ।

तुशब्दः शङ्कानिरासार्थः । स विभुज्ञानगुणएव, सारोविभुत्वव्यपदेशोमुख्योयस्य तस्य भावस्तस्मात्तद्व्यपदेशः विभुत्वव्यपदेशः । तत्रैकदेशिदृष्टान्तमाह । प्राज्ञवदिति । यथा प्राज्ञस्य ब्रह्मणः बृहन्तोगुणाअस्मिन्निति ब्रह्मेति श्रुत्युक्ता निरुक्तिः । एवं प्रत्यगात्मनोऽपि विभुगुणत्वाद्विभुत्वव्यपदेशोन स्वरूपेण, अन्यथा पूर्वोदाहृतानि श्रुतिस्मृतिसूत्राणि बाध्येरन् ॥ २८ ॥

सू० यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥२।३।२९॥

वेदान्तपारिजातसौरभः ।

जीवस्य गुणनिबन्धनोविभुत्वव्यपदेशोन

वरोहश्रुत्यानुशयिनामवरोहतां देवमनुष्यादि-
भाववदाकाशादिभावः प्रतिपाद्यते ? किं वाऽऽका-
शादिसादृश्यमात्रमिति ? संशये सोमभाववद-
विशेषादाकाशादिभावः प्रतिपाद्यते इति पूर्वः
पक्षस्तत्रोच्यते । तत्स्वाभाव्यापत्तिरनुशयिनाम-
वरोहतां जीवानां तैराकाशादिभिः सादृश्या-
पत्तिः प्रतिपाद्यते । कुतः ? उपपत्तेः आकाशादि-
संसर्गकृततत्सादृश्योपपत्तेः । तथाहि लोके क्षीर-
काले दध्यभावात् क्षीरस्य दधिभावो युज्यते ।
अनुशयिनो ऽवरोहतः सतः पूर्वं विद्यमानाका-
शादिभावो न युज्यते, अन्यस्यान्यभावासम्भवात्
सोमाख्यशरीरभावः स्वकृतपुण्यफलभोगाय
युज्यते, आकाशादिभावस्तदानीं भोगाभावाच्च
नोपपद्यते, नो भवति श्रुतेः सादृश्यपरत्वम् ।
तस्मात्तत्सादृश्यापत्तिरिति सिद्धम् ॥ २२ ॥

इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

वेदान्तकौस्तुभप्रभा ।

तत् स्वाभाव्यापत्तिरुपपत्तेः ।

इष्टादिकारिणां भूतसूक्ष्मपरिवेष्टितसानुशयानामवरोह--

उक्तः । अथ तत्प्रकारश्चिन्त्यते । " अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षती "त्यत्र संशयः, किमाकाशादिप्रतिपत्तौ देवमनुष्यादिभाववदाकाशादिभावः ? आहोस्वित्तत्सादृश्यप्राप्तिरिति ? तत्राकाशादिभाव इति पूर्वः पक्षः । सिद्धान्तस्तु तत्स्वाभाव्यापत्तिराकाशादिसाम्यप्राप्तिरित्यर्थः । कुतः ? उपपत्तेः । नह्यन्यस्यान्यभाव उपपद्यते, तत्सादृश्यं तु युज्यते ॥ २२ ॥ इति तत्स्वाभाव्यापत्त्यधिकरणम् ॥ ४ ॥

सू० नातिचिरेण विशेषात् ।

३ । १ । २३ ॥

वेदान्तपारिजातसौरभः ।

जीवोऽल्पेन कालेनाकाशादिवर्षान्तसाम्यं विजहाति पृथिवीं प्रविश्य व्रीह्यादिभावमापद्यते । अतो खलु दुर्निष्प्रपतरमिति विशेषवचनात् । व्रीह्यादिभावाद्दुःखतरनिःसरणवाक्यं पूर्वत्राचिरकालिकमवस्थानं द्योतयति ॥ २३ ॥

वेदान्तकौस्तुभः ।

इदानीं तत्तत्सादृश्यपरिच्छेदकः कालश्चिन्त्यते —

नातिचिरेण विशेषात् ।

किमनुशयवान् आकाशवायुधूमाभ्रमेघवर्ष-प्रतिपत्तौ तत्तत्सादृश्येन चिर तिष्ठत्युताल्पकाल-मिति ? संशयः, तत्र तत्तत्सादृश्येनाल्पकालाव-स्थितौ मानाभावात् पुण्यवद्भिर्लब्धस्य तत्त-सादृश्यस्यानल्पकालस्थायित्वसम्भवाच्च चिरं तिष्ठतीति प्राप्ते * ब्रूमः— नातिचिरेणेति । अनु-शयवान् जीवः अल्पमल्पं कालमेवाकाशादि-सादृश्येनावस्थाय वर्षसादृश्यानन्तरं भूमिं प्रवि-शतीत्यर्थः । कुतः ? विशेषात् " पृथिव्यनन्तरं व्रीह्यादिभावस्ततो निष्क्रमणे अतो वै खलु दुर्नि-ष्प्रपतरमि"ति विशेषश्रवणात् । अतो व्रीह्यादिभावात् दुर्निष्प्रपतरं दुःखतरं निष्क्रमणमनल्पकालसाध्य-मित्यर्थः । एतेनाकाशादिभ्यो ऽचिरेण निःसरणं प्रतीयते । दुर्निष्प्रपतरमित्यत्र द्वितीयतकारलोप-श्छान्दसः । आकाशादिसादृश्येन जीवस्य चिरं कालावस्थाने प्रयोजनाभावाच्च । तस्मादाकाशादि-सादृश्येनाल्पकालं तिष्ठतीति सिद्धम् ॥ २३ ॥

इति नातिचिराधिकरणम् ॥ ५ ॥

---

* सूत्रकारसिद्धान्तं वदामः ।

वेदान्तकौस्तुभप्रभा ।

नातिचिरेण विशेषात् ।

आकाशवायुधूमाभ्रमेघवर्षप्राप्तौ किं द्राघिष्ठं कालं साहश्ये-नावस्थानमुतालपकालमिति ? विषये अल्पकाले हेत्वभावाद्द्राघिष्ठ-मिति प्राप्ते–ब्रूमः । नातिचिरेणाल्पेन कालेनावरोहः यावद्व्रीह्या-दिप्राप्तिरित्यर्थः । कुतः ? विशेषश्रवणात् । अतो वै खलु दुर्निष्प्रप-तरमिति एकस्तकारश्छान्दसत्वाल्लुप्तो ज्ञेयः । व्रीह्यादिभावादुत्तरं दुखतरं निःसरणमिति वदन्सर्वत्र पूर्वत्राचिरकालं बोधयति ॥ २३॥

इति नातिचिराधिकरणम् ॥ ५ ॥

सू० अन्याधिष्ठिते पूर्ववद-भिलापात् ३।१।२४॥

वेदान्तपारिजातसौरभः ।

" ते इह व्रीहियवा औषधीवनस्पतय-स्तिलमासा इति जायन्ते " तत्रान्यक्षेत्रज्ञाधि-ष्ठिते व्रीह्यादौ जायन्ते संसर्गमात्रं प्राप्नुवन्ती-त्यर्थो ज्ञेयः । कुतः ? आकाशादिभिरिव तेषां व्रीह्यादिभिरपि संसर्गमात्रकथनात् ॥ २४ ॥

———

वेदान्तकौस्तुभः

ब्रीह्यादिप्राप्तौ चिरं कालं तिष्ठति चेत्तर्हि ब्रीह्यादेरनुशयिशरीरत्वमस्ति किमिति ? सन्देहमिदानीं निराकरोति —

अन्याधिष्ठिते पूर्ववदभिलापात् ।

अनुशयिनां वृष्टिद्वारा पृथिवीप्राप्त्यनन्तरं श्रूयते "त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्त" इति तत्र संशयः, किमनुशयिनो व्रीह्यादिशरीरा जायन्ते ? किं वा ऽऽकाशादाविव व्रीह्यादौ तेषां सम्श्लेषमात्रमिति ? तत्र व्रीह्यादिशरीरवत्त्वेनोत्पद्यन्ते जायन्ते इति वचनादिति प्राप्ते ब्रूमः, स्थावरशरीराधिकारिणा ऽनुशयिजीवादन्येन जीवेनाधिष्ठिते व्रीह्यादौ ते संसर्गमात्रं प्राप्नुवन्ति । कुतः ? पूर्ववदभिलापात् । यथाऽऽकाशादिषु वर्षान्तेषु तेषां संश्लेषमात्रमुक्तम्, नतु तत्तच्छरीरित्वम् । तत्र कर्मपरामर्शाभावात् । यत्र शरीरग्रहणपूर्वकं सुखदुःखभाक्त्वं, तत्र "रमणीयचरणा रमणीयां योनिमापद्येरन्नि"ति कर्मपरामर्शो ऽस्ति । एवं व्रीह्यादे-

ष्वप्यभिलापात् कर्मपरामर्शं विनैव व्रीह्यादि-भावव्यपदेशेन प्रवेशमात्रकथनात् । इष्टादिकर्म-कारिणां स्थावरजन्मप्रापककर्मणो ऽभावाच्च जायन्ते इति वचनं संसर्गमात्रपरमिति भावः ॥ २४ ॥

वेदान्तकौस्तुभप्रभा ।

अन्याधिष्ठिते पूर्ववदभिलापात् ।

"त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते" इति श्रूयते । तत्र ते किं व्रीह्यादिशरीरा जायन्ते ? उत क्षेत्रज्ञान्तराधि-ष्ठिते व्रीह्यादौ संसर्गमात्रं प्रपद्येरन्निति ? विषयः व्रीह्यादिदेह-भोक्तारो जायन्ते इति पूर्वः पक्षः । जनेर्मुख्यार्थत्वोपपत्तेरिति प्राप्ते सिद्धान्तः । अन्याधिष्ठिते व्रीह्यादिशरीरिजीवविशेषाधिष्ठिते व्रीह्यादौ संसर्गमात्रं प्राप्नुवन्त्यनुशायिनो, न तु व्रीह्यादिशरीरत्वं, कुतः ? पूर्ववदिति । आकाशादिवत्तेषामपि कथनात् तत्कर्मजन्य-त्वाभावाच्च स्थावरयोनित्वमित्यर्थः ॥ २४ ॥

सू० अशुद्धमिति चेन्न शब्दात् ।

॥ ३ । १ । २५ ॥

वेदान्तपारिजातसौरभः ।

तेषां व्रीह्यादिस्थावरयोनिप्रापकं हिंसा-

योगाज्ज्योतिष्टोमाद्यशुद्धं कर्मास्तीति चेज्ज्योतिष्टोमादेरशुद्धत्वं नास्ति, विधिशास्त्रात् ॥ २५ ॥

वेदान्तकौस्तुभः।

अशुद्धमिति चेन्न, शब्दात्।

नन्विष्टादिकारिणामशुद्धमग्निसोमीयपशुहिंसायोगात्पापमिश्रं ज्योतिष्टोमादिकर्मास्ति, तत्र पुण्यांशस्य स्वर्गे फलमनुभूय हिंसांशफलानुभवार्थं व्रीह्यादिषु स्थावरेषु ते जन्म प्राप्नुवन्तीति चेन्न। कुतः ? शब्दात्। ज्योतिष्टोमादेः शब्दात् शास्त्रात्केवलधर्मत्वेन सुखहेतुत्वादित्यर्थः। "न हिंस्यात्सर्वाभूतानी"ति हिंसात्मकाधर्मनिषेधशास्त्रं धर्मविषयेन सुखोदर्कसंज्ञपनशास्त्रेण बाध्यत इति भावः। तत्र हितमेव भवति न हिंसा। "न वा उ एतन्म्रियसे न रिष्यसि देवा उ एषिपथिभिः सुगेभिः यत्र यन्ति सुकृतो नापि दुष्कृतस्तत्र त्वा देवः सविता दधात्वि"ति मन्त्रवर्णात्तस्मान्न तादृशं कर्माशुद्धम् ॥ २५ ॥

वेदान्तकौस्तुभप्रभा ।

अशुद्धमिति चेन्न, शब्दात् ।

अत्र साङ्ख्यश्चोदयति । कर्म द्विविधं शुद्धमशुद्धं च, तत्र शुद्धमहिंसादि, द्वितीयं ज्योतिष्टोमादि पशुहिंसावत्त्वात् । अनुशयिनां ज्योतिष्टोमादिकर्तृत्वेनाशुद्धव्यामिश्रकर्मफलभोगाय मुख्यमेव स्थावरं जन्मेति प्राप्ते सिद्धान्तः । शुद्धमेव ज्योतिष्टोमादि कर्म । कुत ? शब्दात् । शास्त्रप्रमाणकत्वात् । " धर्माधर्मयोः सामान्यविधेर्विशेषविधिर्बलीयान्" "न हिंस्यात्सर्वाभूतानी"ति सामान्यनिषेधस्य बाह्यहिंसाविषयकत्वेन सावकाशत्वात् । क्रतुगतहिंसाविधेस्तु निरवकाशत्वेन बलीयस्त्वात्तेन सामान्यनिषेधस्य बाधोयुक्त एवातो गौणमत्र जन्मेति ॥ २५ ॥

सू० रेतः सिग्योगो ऽथ ३।१।२६।

वेदान्तपारिजातसौरभः ।

"यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवती"ति सिग्भाववद्व्रीह्यादिभावोऽपि ॥ २६ ॥

वेदान्तकौस्तुभः ।

रेतः सिग्योगो ऽथ ।

अथ व्रीह्यादिभाववचनानन्तरम् "यो योह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवती-

ती"ति रेतःसिग्योगः श्रूयते । रेतः सिञ्चतीति रेतः सिक्तेनानुशयिनो योगो रेतःसिग्योगस्तत्र तद्रक्षिताऽन्ननिबन्धनो रेतोनिबन्धनश्च तद्भूयो-भवतीति तद्भावलक्षणश्च योगस्तत्संसर्गमात्रं प्रतिपादयति, तद्व्रीह्यादिभाववचनमपि संसर्ग-मात्रविषयम्, तद्भूय एव भवति मनुष्यपश्वादि-भूतस्य रेतःसेक्तुः सम्बन्धी सन्सदृशो-भवतीत्यर्थः ॥ २६ ॥

वेदान्तकौस्तुभप्रभा ।

रेतः सिग्योगो ऽथ ।

इतश्च व्रीह्यादिसंश्लेषमात्रं व्रीह्यादिभाववचनानन्तरं "यो यो-ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवती"ति श्रुतेः रेतः सिग्यो-गो यथा तद्योगमात्रं वक्ति, तद्व्रीह्यादिभावो ऽपि तद्योगमात्रमेव भूय एव भवति, तदाकृतिर्भवतीत्यर्थः । मनुष्येण भक्षितो मनुष्यो-ज्ञायते, पश्वादिना भक्षितः पश्वादिर्भवतीति यावत् ॥ २६ ॥

सू० योनेः शरीरम् ॥३।१।२७॥

वेदान्तपारिजातसौरभः ।

योनिमाश्रित्य शरीरी भवति ॥ २७ ॥

हरिरों तत्सदिति श्रीमद्भगवन्निम्बार्कविरचिते शारीरकमीमांसावाक्यार्थे वेदान्तपारिजात-सौरभे तृतीयाध्यायस्य प्रथमः पादः ॥१॥

वेदान्तकौस्तुभः ।

योनेः शरीरम् ।

अनुशयी पञ्चमाहुतौ सिग्वियुक्तो योनेः संयोगात् शरीरं प्रतिपद्यते, तस्मान्ततः पूर्व-त्राकाशादिभाववचनानि तत्तत्संयोगमात्रं प्रति-पादयन्तीति सिद्धम् ॥ २७ ॥

इत्यन्याधिष्ठिताधिकरणम् ॥ ६ ॥

हरिरों तत्सदिति श्रीसनत्कुमारसन्ततिप्रवर्त्तका-चार्यश्रीमन्निम्बार्कपादपद्मान्तेवासिना श्रीश्री-निवासाचार्येण विरचिते शारीरकर्मामांसा-भाष्ये श्रीमति वेदान्तकौस्तुभे तृतीया-ध्यायस्य प्रथमः पादः ॥ १ ॥

वेदान्तकौस्तुभप्रभा।

योनेः शरीरम्।

योनिप्राप्तेः पश्चादेवानुशयिनां देहप्राप्तिः। तत्रैव सुखदुःखादि-भोगस्य सत्त्वात्। ततः पूर्वं ह्याकाशादिप्राप्तौ तद्योगमात्रमेवेति सिद्धम् ॥ २७ ॥ इत्यन्याधिष्ठिताधिकरणम् ॥ ६ ॥

इति श्रीसनकसम्प्रदायप्रवर्त्तकाचार्य श्रीश्रीनिम्बार्कमतानुयायि-श्रीमन्मुकुन्दचरणारुणपद्ममकरन्दभृङ्गेण जगद्विजयि श्रीदश्री-केशबकाश्मीरिभट्टेन सङ्गृहीतायां श्रीवेदान्तकौस्तुभ-प्रभाख्यायां ब्रह्मसूत्रवृत्तौ तृतीयाध्याय-प्रथमपादविवरणम् ॥ १ ॥



श्रीमते निम्बार्काय नमः ।

अथ

तृतीयाऽध्याये द्वितीयपादारम्भः ।

सू० सन्ध्ये सृष्टिराह हि ॥

३ । २ । १ ॥

वेदान्तपारिजातसौरभः ।

एवं जाग्रतो जीवस्य वैराग्यार्थं संसारगतिरुदीरिता । अथ स्वप्नादि निरूप्यते । स्वप्नमधिकृत्य "अथ न तत्र रथा रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते" इत्यादि श्रूयते । तत्र रथादिसृष्टिर्जीवकृता ? उत ब्रह्मकृता ? इति सन्देहे सन्ध्ये स्वप्नस्थाने रथादिसृष्टिर्जीवकृता । हि यतः "सृजते स कर्त्ते"ति श्रुतिराह ॥ १ ॥

वेदान्तकौस्तुभः ।

एवं प्रथमे पादे आत्मानात्मविवेकार्थं भूतभौतिकसम्बन्धो वैराग्यार्थं च स्वर्गनरकसम्बन्धो जाग्रतो जीवस्य प्रपञ्चितः । इदानीं